UNIVERSITY OF MYSORE

ORIENTAL LIBRARY PUBLICATIONS

SANSKRIT SERIES No. 53

श्रीमद्ब्रह्मसूत्रभाष्यम्

श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितम्

श्रीमज्जयतीर्थ–व्यासतीर्थ–राघवेन्द्रतीर्थानां

टीकाभिस्समलंकृतम्

तृतीयसंपुटम्

THE

BRAHMASUTRA BHASHYA

OF

SRI MADHVACHARYA

WITH

GLOSSES OF

SRI JAYATIRTHA, SRI VYASATIRTHA AND
SRI RAGHAVENDRATIRTHA

Vol. III

EDITED BY

R. [illegible]ACHARYA

Resident Pandit, Oriental Library, Mysore

MYSORE
PRINTED AT THE GOVERNMENT BRANCH PRESS
1920

(ALL RIGHTS RESERVED)

Price Rs. 4-0-0

UNIVERSITY OF MYSORE

ORIENTAL LIBRARY PUBLICATIONS

SANSKRIT SERIES No. 53

श्रीमद्ब्रह्मसूत्रभाष्यम्

श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितम्

श्रीमज्जयतीर्थ–व्यासतीर्थ–राघवेन्द्रतीर्थानां

टीकाभिस्समलंकृतम्

तृतीयसंपुटम्

THE

BRAHMASUTRA BHAṢHYA

OF

SRI MAḌHVACHARYA

WITH

GLOSSES OF

SRI JAYATIRTHA, SRI VYASATIRTHA AND SRI RAGHAVENDRATIRTHA

Vol. III

EDITED BY

R. RAGHAVENDRACHARYA

Resident Pandit, Govt. Oriental Library, Mysore

MYSORE

PRINTED AT THE GOVERNMENT BRANCH PRESS

1920

(*ALL RIGHTS RESERVED*)

अवतरणिका.

अथास्य श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्ब्रह्मसूत्रभाष्यस्य तत्त्वप्रकाशिका-तात्पर्यचन्द्रिका-प्रकाशैस्साकं मुद्र्यमाणस्य तृतीयमिदं संपुटं, प्रथमाध्याये प्रथमपादीयानां प्राणाधिकरणप्रभृतीनां चतुर्णामधिकरणानां, सप्ताधिकरण्यात्मकस्य समग्रस्य द्वितीयपादस्य च विवरणग्रन्थेन सुविहितशरीरं विराजतेतराम्. इतः प्राक्तनस्य द्वितीयसंपुटस्यावतरणिकायां आकाशाधिकरणान्ताया अष्टाधिकरण्याः प्रतिपाद्यविषयसंग्रहोऽकारि. अधुना तु संपुटे अस्मिन्नन्तर्भवतामेकादशानामधिकरणानां प्रतिपाद्यसंग्रहः क्रियते.

परिच्छिन्नत्वेन सार्वत्रिकावकाशदानान्वयव्यतिरेकरहिते भूते आकाशशब्दप्रवृत्तिनिमित्तस्यावकाशदातृत्वस्यायोगेन, आवृत्तिमात्रविशिष्टाया एकस्या आकाशश्रुतेर्निरवकाशविष्णुलिङ्गैर्बाधार्हत्वेन, भूते मुख्यत्वबोधकमानाभावेन च पूर्वत्राकाशशब्दस्य भूतपरत्वासम्भवेऽपि, "भर्ता सन् भ्रियमाणः" इत्यनुवाके "तद्वै त्वं प्राणः" इत्यत्र प्राणशब्दस्य रूढ्या, जीवनान्वयव्यतिरेकवद्वायुवृत्तिशरीरकतया जीवनान्वयव्यतिरेकवत्त्वेन जीवनहेतुत्वरूपप्रवृत्तिनिमित्तयोगेन, "मुखे मुख्यः प्रकीर्तितः" इति मुख्यत्वबोधकप्रमाणसद्भावेन, अत्रत्यमातरिश्व-प्राणादिबहुश्रुतीनां निरवकाशैरपि विष्णुलिङ्गैरबाध्यतया, वस्तुतोऽस्मिन्ननुवाके विष्णुलिङ्गानामभावेन, श्रीपतित्वस्य "अद्भ्यस्संभूतः" इत्यनुवाकान्तरस्थत्वेन, श्रीशब्दस्य योगेन प्राणभार्यापरत्वसंभवेन

च विष्णावसिद्ध्या प्राणे संभवेन च मुख्यप्राणपरत्वावश्य-म्भावात्, तत्रैव श्रुतमहाभोगशब्दोक्तपूर्णानन्दत्वापरपर्यायमानन्द-मयत्वं च तस्यैव न विष्णोरिति शङ्कायां, "प्राणस्य प्राणं" इत्यादौ प्रयोगेण "नामानि सर्वाणि" इत्यादिश्रुतिभिश्च विष्णौ प्राणशब्दस्य रूढेः, वायुवृत्तिगतजीवनान्वयव्यतिरेकवत्त्वस्य वा-युवृत्तिशरीरके मुख्यप्राण इव मुख्यप्राणशरीरके विष्णावपि सं-भवेन जीवनहेतुत्वस्य मुख्यप्राणगतस्यापि विष्णवधीनतया त-दधीनत्वन्यायेन विष्णावेव मुख्यतया च योगस्य च संभवेन, "योऽयं मध्यमः प्राणः" इति मुख्यप्राणस्य मध्यमप्राणत्वबोध-कवाक्यस्यैव विष्णोरुत्तमप्राणत्वबोधकतया प्राणशब्दस्य विष्णौ मुख्यत्वबोधकप्रमाणस्य च सत्त्वेन, प्राण-मातरिश्वादिश्रुतीनां व-स्तुतो वैष्णवत्वेन प्राणश्रुतिबाहुल्याभावेन केवललोकप्रसिद्धेर्बाध-संभवेन, श्रीपतित्वस्य भिन्नानुवाकस्थत्वेऽपि "ह्रीश्च ते" "त-द्वै त्वं" इति वाक्ययोर्युष्मच्छब्दाभ्यामेकस्यैव वस्तुनो बोध-स्य न्याय्यतया विष्णुलिङ्गत्वसंभवेन, बहूनां श्रीलक्ष्म्यादिश-ब्दानां प्रमाणाद्यभावे लोकप्रसिद्ध्यतिक्रमस्यायुक्ततया योगेन प्राणभार्यापरत्वासंभवेन, अत्रैवानुवाके "तमेव मृत्युममृतं" इत्या-दिना मृत्युत्वामृतत्वादिनिरवकाशविष्णुलिङ्गानां श्रूयमाणतया च योगरूढिभ्यां प्राणशब्दस्य विष्णावेव मुख्यत्वादानन्दमयत्वं च तस्यैवेति सिद्धान्तयता प्राणाधिकरणेनाध्यात्मिकाशेषनामसम-न्वयः कृतः ॥ पूर्वत्र "तद्वै त्वं" इति वाक्यस्य वायुसूक्ताघटक-तया तत्रत्यप्राणश्रुतिमात्रस्य निरवकाशविष्णुलिङ्गैर्बाधसंभवेऽपि, अग्निसूक्ते "वि मे कर्णा पतयतो वि चक्षुर्वीदं ज्योतिः" इत्यत्र-त्याया ज्योतिश्श्रुतेः सूक्तानुगृहीताया बाधायोगेन, हृदयाहितत्व-लिङ्गात्, "त्वामग्ने" इत्यग्निश्रुतिसन्निधानाच्च रूढ्या ज्योतिश्श-

न्दस्याग्निपरत्वमेव, 'इदमग्निसूक्तं न विष्णुसूक्तं' इति लोकप्रसिद्ध्या सूक्तस्य वैष्णवत्वायोगान्न विष्णुपरत्वमिति हृदयाहितत्वेनोक्त आनन्दमयोऽपि न विष्णुरिति शङ्कायां, उदाहृतवाक्योक्तापरिच्छिन्नवैभवत्वरूपकर्णादिविदूरत्वलिङ्गस्य "परो मात्रया" इत्यादिश्रुत्या विष्ण्वेकनिष्ठतयाऽवगतस्यान्यत्र निरवकाशत्वात्, प्रकाशत्वरूपज्योतिःपदप्रवृत्तिनिमित्तस्यानन्याधीनत्वेन विष्णावेव मुख्यत्वात्, "तदेव ज्योतिषां ज्योतिः" इत्यादौ प्रयोगात्, "ज्योतिषैकेषां" इति वक्ष्यमाणन्यायेन ज्योतिःपदस्य वैष्णवत्वात्तद्घटितोक्तसूक्तस्य वैष्णवत्वाभावप्रसिद्धेरज्ञानमूलत्वेन ज्योतिश्श्रुतिसूक्तयोस्सावकाशयोर्निरवकाशविष्णुलिङ्गेन बाधात्, योगरूढिभ्यां ज्योतिःपदमुख्यवाच्यो विष्णुरेवेति स एवानन्दमय इति सिद्धान्तयता ज्योतिरधिकरणेन सूक्तगताशेषनामसमन्वयः कृतः ॥ पूर्वाधिकरणे ज्योतिश्श्रुतेरेकस्या निरवकाशलिङ्गेनान्यत्र प्रसिद्धिबाधेऽपि, छान्दोग्यतृतीयाध्याये "गायत्री वा इदं सर्वं भूतं वाग्वै गायत्री" इत्यादिना श्रुतानामनेकासां गायत्रीवाक्पृथिव्यादिश्रुतीनामन्यत्रप्रसिद्धिबाधायोगात्, विष्णौ प्रसिद्धशब्दत्यागेनाप्रसिद्धगायत्रीशब्दप्रयोगे प्रयोजनाभावात्, उपदेशभेदाभावेनाग्निसूक्तस्थज्योतिषो विष्णुत्वसंभवेऽपि इह 'दिवः' इति पञ्चम्युपदेशस्थज्योतिश्शब्दार्थस्य 'दिवि' इति सप्तम्युपदेशस्थगायत्रीशब्दार्थस्य चैकत्वानुपपत्तेः, वेदविशेषरूपगायत्र्या नित्यत्वेन तद्गतप्रवृत्तिनिमित्तस्येशाधीनत्वायोगेन तदधीनत्वन्यायानवतारात्, प्राक्तनज्योतिर्निष्ठकर्णाद्विविदूरत्वविरुद्धदृष्टश्रुतत्वाद्यसंभवेन अत्रत्यज्योतिषो विष्णुत्वानुपपत्त्या तदभिन्नगायत्र्या अपि विष्णुत्वायोगात्, रूढेरभावात्, योगस्यामुख्यवृत्तित्वाच्च उक्तवाक्यस्थगायत्र्या विष्णुत्वं न संभवतीति रूढ्या

छन्दोविशेषत्वमेवेति पूर्वपक्षे, "ज्यायांश्च पूरुषः" "यद्वैतद्ब्रह्म" "एतामेव ब्रह्मोपनिषदं" इति पूरुषब्रह्मादिश्रुतयः, "गायति त्रायति च" इत्युक्ताशेषवेदोच्चारणाख्यगानत्राणकर्तृत्वं, "पादोऽस्य सर्वा भूतानि" इत्युक्तभूतादिपादत्वं, "एतामेव नातिशीयन्ते" इत्युक्तसर्वोत्तमत्वं चेत्यादीनां श्रुतिलिङ्गानां बाहुल्येन बहुभिश्श्रुतिलिङ्गैर्बहूनामपि शब्दानां प्रसिद्धार्थत्यागसंभवात्, तत्तत्पदप्रवृत्तिनिमित्तगुणवत्तयोपासनार्थमप्रसिद्धपदप्रयोगोपपत्तेः, उपदेशभेदस्य चैकस्मिन्नेव त्रिसप्तलोकापेक्षयोपपन्नत्वात्, "स्वभावजीवकर्माणि" इत्यादिश्रुत्या क्षेमायानादिनित्यस्यापीशाधीनतासंभवेन छन्दोगतप्रवृत्तिनिमित्तस्यापि विष्णवधीनत्वेन तदधीनत्वन्यायावतारसंभवान्महायोगेन "सर्वच्छन्दोभिधो ह्येषः" इति पौराणिकरूढ्या च गायत्री विष्णुरेवेति प्राक्तनमग्रेतनं च ज्योतिस्स एवेति सिद्धान्तयता गायत्र्यधिकरणेन अधिवेदगताशेषनामसमन्वयः सिद्धः ॥ अतीते नवमेऽधिकरणे प्राणशब्दस्य विष्णौ समन्वितत्वेऽपि, चक्षुश्श्रोत्रादिभिस्सहपाठः, "ता अहिंसन्त" इत्यादिनोक्तानि प्राणविवादो देहादुत्क्रमणप्रवेशने, ततो देहपातोत्थाने चेत्यादिमुख्यप्राणलिङ्गानि तत्सहचरितप्राणश्रुतिश्चेति प्राणत्वसाधकैः, "तं यच्छतं वर्षाणि" इति श्रुतशतायुष्ट्वं, तत्सहपठितपुरुषश्रुतिः, "प्राणो वंशः" इति चक्षुरादीन् प्रति वंशत्वं चेति जीवत्वसाधकैः, "इन्द्रो वै वृत्रं हत्वा" इत्यादिनोक्तानि वृत्रहननमहाव्रतयाजित्वादिलिङ्गानि, "तमिन्द्र उवाच प्राणो वा अहमस्मि" इति इन्द्रप्रयुक्ताहंश्रुतिश्चेतीन्द्रत्वसाधकैश्च बहुभिः श्रुतिलिङ्गैः ऐतरेये "ता वा एताश्शीर्षंच्छ्रियश्श्रिताः चक्षुः श्रोत्रं मनो वाक्प्राणः" इत्यादिना श्रुतः प्राणो मुख्यप्राणजीवेन्द्रान्यतम इति पूर्वपक्षे, "एतद्ब्रह्मैतत्स-

त्यं तं प्रपदाभ्यां प्रापद्यत, ब्रह्मेमं पुरुषं, अः इति ब्रह्म " इत्यादिश्रुतीनां, " तं देवाः प्राणयन्त. तं भूतिरिति देवा उपासां चक्रिरे, सर्वे वेदाः, प्राणो ह्येष य एष तपति, प्राणस्त्वं प्राणः सर्वाणि भूतानि आ पिपीलिकाभ्यः प्राणेन वृहत्या विष्टब्धानि " इत्यादिना श्रुतानां देवोपदेश्यत्व भूतित्वप्रकारकदेवोपासनाविषयत्व-सर्ववेदप्रतिपाद्यत्व–सूर्यमंडलस्थत्व-सर्वान्तर्यामित्व-सर्वव्यापित्वलिङ्गानां च वचनान्तरबलेन विष्ण्वेकनिष्ठत्वेन बहुत्वेन च बलवत्त्वात्, पूर्वपक्षीयश्रुतिलिङ्गानां च तत्तदन्तर्यामिविषयत्वेन सावकाशत्वात्. " उदासीनवदास्तां " इत्यस्य बाह्यरूपविषयत्वेनाविरोधात्, इन्द्रप्रयुक्ताहंशब्दस्य " अहं मनुः " इत्यादौ वामदेवप्रयुक्ताहंशब्दवल्लक्षणया वा स्मार्तमुख्यवृत्त्या वाऽन्तर्यामिपरत्वात् प्राणो विष्णुरेवेति सिद्धान्तं कुर्वता पादान्तप्राणनयेन. सलिङ्गनामसमन्वयः कृतः ॥

एवमनन्तवेदगतानां लोकतोऽन्यत्रप्रसिद्धानां अशेषनाम्नां तत्तद्वाक्यगतैरशेषैर्लिङ्गैर्विष्णौ समन्वये सिद्धे, तेषु विप्रतिपन्नानां लोकतोऽन्यत्रप्रसिद्धानां लिङ्गानां हरौ समन्वयो हेतुहेतुमद्भावसंगत्या द्वितीयपादे निरूप्यते। प्रागुक्तनामसमन्वयं प्रति लिङ्गसमन्वयस्य हेतुत्वं, तस्मिन् सत्येवास्योत्थानेन तत्कार्यत्वं चास्तीति संगतिसंभवः ॥

पूर्वपादान्त्यनयविचारितप्रकरणगते " ब्रह्म ततमं " इत्यत्र श्रुतसर्वगतत्वान्तर्गतं ऐतरेये " चत्वारः पुरुषा इति बाध्वः " इति खण्डे " एतं ह्येव बहृचा महत्युक्थे " इत्यादिना " सर्वेषु भूतेष्वेतमेव ब्रह्मेत्याचक्षते " इत्यन्तेन प्रतिपादितं सर्वप्राणिहृदयगुहास्थत्वरूपं सर्वभूतगतत्वं, प्रागसकृच्छ्रुतादित्यपदोक्तस्यैव 'एतं' इति परामर्शात्तस्य च " तस्यैतस्यासावादित्यो रसः "

इति वाक्ये 'तस्यैतस्य' इति संवत्सरं परामृश्य तदधिपतित्वरूपसंवत्सरसारत्वोक्त्या आदित्यपरत्वात्, "चित्रं देवानां" इति सौरमन्त्रोदाहरणात् 'आदित्यं एतं' इति क्षित्यादिष्विव विशिष्यानुक्तिलिङ्गाच्चादित्यस्यैव वा, "चक्षुर्मयः श्रोत्रमयः" इत्यादिना वक्ष्यमाणचक्षुरादिसंबन्धरूपजीवलिङ्गात् "भूतेष्वेतं" इति भूतपदोपादानेन भूतादन्यत्राभावलाभेनाल्पौकस्त्वलिङ्गाच्च एतच्छब्दस्य तत्रतत्र वक्ष्यमाणपरामर्शित्वदर्शनात्सर्वजीवानामेव वा संभवति, न विष्णोः, उक्तश्रुतिलिङ्गानामसंभवाद्भूतगतत्वेन तद्गतसुखदुःखादिभोगापत्तेश्चेति पूर्वपक्षं प्रतिक्षिपता सूत्राष्टकात्मकेनाद्याधिकरणेन, विष्णावेव प्रसिद्धब्रह्मशब्दात्, तस्य चात्र अमुख्यार्थव्यवच्छेदकैवकारसहितत्वेन मुख्यार्थग्राहकत्वात्, "स योऽतोऽश्रुतः" इत्याद्युत्तरवाक्यगतानां कार्त्स्न्येनाश्रुतत्वादिलिङ्गानामन्यत्रासंभवात्, "अहमात्मा" इति स्मृतिसमाख्यानात्, संवत्सरपदस्य विरिञ्चपरतया तदुत्तमत्वेन तत्सारत्वस्य, अन्तर्नयन्यायेनादित्यश्रुतेः, भूतपदस्योपासनार्थत्वेन व्योम्नीव सर्वगतत्वाविरोधिनोऽल्पौकस्त्वस्य च विष्णौ संभवेन सावकाशत्वात्, संभोगप्राप्तेस्सामर्थ्यवैशेष्येण परिहर्तुं शक्यत्वात्, 'भूतेषु' इत्यनेनैव वा आदित्यपदेन वा आदित्यस्थत्वस्याप्युक्तिसंभवात् चक्षुरादिस्वामित्वेन चक्षुर्मयत्वादेरुपपत्तेश्च कस्यापि बाधकस्याभावात्, अणोर्जीवस्यादित्यस्य वा सर्वगतत्वायोगेन परपक्षे बाधकसद्भावाच्च विष्णुरेव सर्वभूतगत इति सिद्धान्तयता भावलिङ्गसमन्वयः कृतः ॥

पूर्वाधिकरणे विषयवाक्यस्थादित्यश्रुतेरन्तर्नयसमन्वितसवितृश्रुतिपर्यायत्वाद्विष्णुपरत्वेऽपि, वाजसनेये तृतीयाध्याये "सर्वं वा अत्तीति तददितेरदितित्वं" इति वाक्यस्थाया अ-

दितिश्रुतेः पूर्वसमन्वितशब्दपर्यायत्वाभावेन निरवकाशत्वात्, अ-त्तृत्वरूपलिङ्गस्यापि "अनश्नन्" इति श्रुत्या अनत्तृतया प्रति-पन्ने विष्णावयोगाच्छ्रुतिलिङ्गयोर्द्वयोरपि निरवकाशत्वेन वा, श्रु-तेरन्तर्नयन्यायेन सावकाशत्वेऽपि निरवकाशलिङ्गानुगृहीतत्वेन निरवकाशतया वा अत्तुर्विष्णुत्वं न संभवति, किंतु देवमा-तुरेवेति प्राप्ते, "सर्वं वा अत्ति" इत्युक्तसर्वसंहर्तृत्वरूपसर्वा-त्तृत्वस्य "यमप्येति भुवनं" इत्यादिभिर्विष्ण्वेकनिष्ठत्वात्तस्यै-वादितिशब्दप्रवृत्तिनिमित्ततया अदितित्वलिङ्गस्यादितिश्रुतेश्च वि-ष्णौ सावकाशत्वात्, "नैवेह किंचनाग्र आसीत् मृत्युनैवेद-मावृतमासीत्" इति निरवकाशब्रह्मप्रकरणाच्च विष्णुरेवात्तेति सिद्धान्तयता अत्तृत्वाधिकरणेन क्रियालिङ्गं समन्वितम् ॥ पूर्वत्र प्रातिपदिकार्थस्य संहर्तृत्वस्य प्रत्ययार्थस्यैकत्वस्य चोपपत्त्या अत्तुर्ब्रह्मत्वेऽपि, "ऋतं पिबन्तौ सुकृतस्य लोके गहां प्रवि-ष्टौ" इति काठकवाक्ये "ऋतं पिबन्तौ" इति प्रातिपदिकार्थ-कर्मफलभोक्तृत्वस्व प्रत्ययार्थद्वित्वस्य च कर्मबन्धविधुरे एक-स्मिंश्च ब्रह्मण्ययोगेन ऋतपातृत्वलिङ्गं न विष्णोः, किंतु च्छत्रि-न्यायेन जीवेश्वरयोरेवेति पूर्वपक्षे, तस्मिन्नेव वाक्ये "गुहां प्रविष्टौ" इत्युक्तस्य गुहाप्रविष्टत्वस्य "यो वेद निहितं गुहा-यां" इत्यादिभिर्विष्ण्वेकनिष्ठत्वात्, उत्तरवाक्ये परत्वाविशेष-णयुक्तब्रह्मशब्दात्, "एष सेतुः" इत्यादिश्रुत्यन्तरसिद्धाभयत्व-सेतुत्वादिलिङ्गाच्च,

आत्मान्तरात्मेति हरिरेक एव द्विधा स्थितः ।

इत्यादिस्मृतिसिद्धरूपद्वयविवक्षया एकस्मिन्नपि द्वित्वस्योपपत्तेः, "अनश्नन्" इत्युक्तानशनस्य

शुभं पिबत्यसौ नित्यं नाशुभं स हरिः पिबेत् ।

इत्याद्यनुसारेण अशुभानशनरूपत्वसंभवाच्छुभकर्मफलभोक्तृत्वरूपमृतपातृत्वं विष्णोर्युज्यत एवेति समादधता गुहानयेन क्रियालिङ्गसमन्वयास्सिद्धः ॥ छान्दोग्ये चतुर्थाध्याये "य एषोऽन्तराक्षिणि पुरुषो दृश्यते एष आत्मेति होवाच एतदमृतमभयमेतद्ब्रह्म" इत्यत्र श्रुतोऽक्ष्यन्तस्स्थः, "य एष आदित्ये पुरुषः सोऽहमस्मि स एवाहमस्मि" इति गार्हपत्याख्याग्निना स्वात्मन आदित्यस्थत्वाभिधानात् "आदित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशत्" इत्यादिश्रुत्या अक्ष्यादित्ययोरेकदैवत्यकत्वात्. "अग्नयस्समूदिरे" इत्यग्निश्रुतिबाहुल्याच्च, "स यश्चायं पुरुषे यश्चासावादित्ये स एकः" इति तैत्तिरीयसमाख्यायाश्च "सोऽहमस्मि स एवाहमस्मि" इत्यभ्यासेन, अलौकिकविष्णुग्रहणे अपूर्वत्वमित्यस्य "अपहते पापकृत्यां, उपवयन्तं भुञ्जामः" इत्यद्यर्थवादेन बाधान्न विष्णुः किंत्वग्निरेवेति पूर्वपक्षं प्रतिक्षिपता अन्तराधिकरणेन, मृतिभयवत्त्वेन प्रमितेऽग्नौ "एतदमृतमभयं" इत्युक्तामृतत्वाभयत्वयोर्विष्णवसाधारणयोर्ब्रह्मात्मशब्दयोश्चानवकाशत्वात्, "तद्यदस्मिन्" इत्यादिनोक्तात् अक्ष्णोरसङ्गत्वापादकत्वसंयद्वामत्वादिलिङ्गात्, "कं ब्रह्म खं ब्रह्म" इत्यादिब्रह्मप्रकरणात्, "स एनान् ब्रह्म गमयति" इत्युपसंहारे श्रुतैतद्विद्यानां ब्रह्मगत्याख्यलिङ्गश्रवणेन प्रकरणाविच्छेदात्, अग्निप्रयुक्ताहंशब्दस्य चान्तर्यामिपरत्वेनाभ्यासार्थवादयोरपि विष्णुनिष्ठत्वात्, अग्नेरपि जीवत्वेन प्रेरकजीवान्तरापेक्षायामनवस्थानाद्वस्तुतः प्रेरकत्वासंभवाच्च स्वतन्त्रो विष्णुरेवाक्षिस्थ इति सिद्धान्तकरणाद्रमणक्रियासहिताक्षिस्थितिरूपभावलिङ्गसमन्वय--सिद्धिः ॥ वाजसनेये पञ्चमाध्याये ' एष त आत्मान्तर्याम्यमृतः " इति श्रुतोऽन्तर्यामी, "यस्य पृथिवी शरीरं" इत्यादिना तत्रैव श्रुतस्य पृथिव्यादिशरीरकत्वस्य 'पूर्वपक्षस्य शरीरं' इत्यादौ

शरीरशब्दस्य स्वरूपे प्रयोगात्पृथिव्याद्यात्मकत्वस्वरूपस्य "व्याप्तं कार्येषु कारणम्" इत्याद्यनुसारेण कारणस्य कार्यस्थतया "यः पृथिव्यां तिष्ठन्" इत्यादावुक्तपृथिव्यादिस्थत्वस्य च सर्वोपादाने प्रकृतौ कार्यकारणयोर्भेदाभेदाभ्युपगमेनोपपन्नत्वात्, कार्यस्य कारणाधीनत्वेन "यः पृथिवीमन्तरो यमयति" इत्यादेर्गौणत्वेनोपपत्तेः प्रकृतिरथवा पृथिव्याद्यभिमानिजीवा एव वा, तान् प्रति पृथिव्यादेः स्थूलशरीरत्वात्, न तु विष्णुरिति, अत्रामृतस्य प्रकृत्यादित्वे पूर्वाधिकरणविषयवाक्योक्तामृतत्वस्य न विष्णुत्वसाधकत्वमिति शङ्कां, "यं पृथिवी न वेद, यः पृथिवीमन्तरो यमयति" इत्यादिनोक्तस्य कार्त्स्न्येन पृथिव्यादिदेवाविदितत्वस्य, बाह्यापेक्षां विना रमणकर्तृत्वरूपान्तरत्वस्य च "न ते विष्णो, सर्वेषां भूतानामन्तरपुरुषः" इत्यादिश्रुतिभिर्विष्ण्वेकनिष्ठत्वात्, पृथिव्यादेर्जडत्वेऽप्रसक्तनिरासप्रसङ्गात् 'यं' इत्यस्य वैयर्थ्याच्च, शीर्यत इति योगेन वा ईशनियम्यत्वात्मकशरीरगुणयोगेन गौण्या वा पृथिव्यादौ ब्रह्मशरीरत्वसंभवेन "यः पृथिव्यां" इत्यादिनयनस्य क्लेशमन्तरेणोपपन्नत्वात्, प्रकृतिजीवासाधारणत्रिगुणत्वसंसारित्वाद्यनुक्तेः, "आत्मनोऽन्तरः, विज्ञानादन्तरः" इति जीवाद्भिन्नत्वेनान्तर्यामिण उपदेशाच्च विष्णुरेवान्तर्यामीति सिद्धान्तकरणेन निराकुर्वता अन्तर्यामिनयेन अन्तर्यामित्वरूपक्रियाभावलिङ्गं समन्वितम् ॥ आथर्वणे "द्वे विद्ये वेदितव्ये" इत्युपक्रम्य "अथ परा यया तदक्षरमधिगम्यते, यत्तदद्रेश्यं" इत्यादिना श्रुतमदृश्यत्वादिगुणकमक्षरं "यथा पृथिव्यां" इत्युपादानदृष्टान्तबलेन असति बाधकेऽन्तरङ्गत्यागायोगेन च 'अक्षरात्' इति श्रुतोपादानकारणत्वलिङ्गात् जडप्रकृतिरेवेति वा, "कूटस्थोऽक्षर उच्यते" इति स्मृतावक्षरपदस्य श्रौतत्वे प्र-

योगादुपादानाभिमानित्वेनोपादानत्वस्यापि संभवाच्चित्प्रकृतिरेवेति वा, "स ब्रह्मविद्यां" इत्युपक्रमे ब्रह्मशब्दश्रवणाच्चतुर्मुख एवेति वा, "कर्तारमीशं" इत्युत्तरत्र ईशशब्दश्रवणाद्रुद्र एवेति वा, "अक्षरात्परतः परः" इत्युत्कर्षावधिभूतस्य विष्णोरुक्तनिकृष्टाक्षरत्वायोगेन, चित्प्रकृतिपक्षे 'अक्षरात् परतः' इति पञ्चम्योस्सामानाधिकरण्येन, पक्षान्तरेषु वैयधिकरण्येनोपपत्तेश्च पूर्वपक्षे प्राप्ते, "अथ परा यया स हरिर्वेदितव्यः" इत्यादिभिर्विष्णवेकधर्मत्वेनावगतपरविद्याविषयत्वरूपधर्मोक्तेः, "यदा पश्यः पश्यते रुग्मवर्णं" इति रूपोपन्यासात् तस्य च "विमिश्राणि व्यमिश्रयत्" इति मिश्ररूपवत्तयाऽवगतेषु विष्णोरितरेष्वसंभवात्, "अक्षरत्रयमीरितम्" इति स्मृत्या परावधित्वेनाक्षरस्यान्यतया निर्देशस्य विष्णुत्वाबाधकत्वात्, पृथिव्यादिदृष्टान्तस्य कारणत्वमात्रे संभवात्, ब्रह्मेशादिशब्दस्य विष्णावेव मुख्यत्वात्, जडपक्षे "यः सर्वज्ञः" इत्युक्तसार्वज्ञ्यादिविशेषणायोगात्, "तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते" इति "जुष्टं यदा पश्यत्यन्यमीशं" इति ब्रह्मरुद्रयोरक्षराद्भेदव्यपदेशाच्च अदृश्यत्वादिगुणकं परतः परत्वेन श्रुतमक्षरं विष्णुरेवेति सिद्धान्तयता अदृश्यत्वाधिकरणेनाभावलिङ्गसमन्वयः कृतः ॥ छान्दोग्ये पञ्चमाध्याये "अभिविमानमात्मानं वैश्वानरमुपास्ते" इति, वाजसनेये सप्तमेऽध्याये "अयमग्निर्वैश्वानरः" इति, "वैश्वानरमृत आजातमग्निं" इत्यृगादिषु च श्रुतो वैश्वानरः, अग्नावेव प्रसिद्धानां वैश्वानराग्न्यादिशब्दानां होमाधारत्व-गार्हपत्याद्यङ्गकत्व-पाचकत्वादिलिङ्गानां च श्रवणात्, तेषां च विष्णौ मुख्यत्वे लोकव्यवहारविरोधात् सर्वविद्यानां वैष्णवत्वापत्त्या 'इयमग्निविद्या, इयमन्याविद्या' इत्यादिव्यवस्थानुपपत्तेश्च अग्निर्देवता भूतं वा भवेत्, न विष्णुः, न च

विष्णुत्वसाधकश्रुति-लिङ्ग-समाख्या-प्रकरणानां बहुत्वान्निरवकाशत्वाच्चाग्निरेवेत्यानिर्णय इति युक्तम्, उभयप्रापकाणां समबलत्वेनान्यतरानिर्णयेऽपि अत्रत्याभिविमानपदोक्तसर्वगतत्वविशिष्टस्य वैश्वानरस्याप्यनिर्णयेन प्राचीनं सर्वगतत्वेन श्रुतमक्षरं विष्णुरेवेति सिद्धान्त्यभिमतनिर्णयायोगादिति पूर्वपक्षे, "आत्मानं" इति श्रुतादात्मशब्दात्, "अभिविमानं" इत्युक्तसर्वगतत्वलिङ्गात्, "अहं वैश्वानरो भूत्वा" इति स्मृतिसमाख्यानात्, "को न आत्मा किं ब्रह्म" इति विचारपूर्वकमुपक्रम्यैतद्विद्याया अधीतत्वेन ब्रह्मप्रकरणात्, "शीर्ष्णो द्यौस्समवर्तत" इत्यादिना पुरुषसूक्तोक्तस्य द्य्वादिजनकशीर्षाद्यवयवकस्यैव "मूर्धैव सुतेजाः" इत्यर्थतोऽत्रोक्तत्वेन पुरुषसूक्तसमाख्यानाच्च निरवकाशसाधकसद्भावात्, वैश्वानरादिशब्दानामग्न्यादिलिङ्गानां च तथोपासनार्थतया विष्णौ सावकाशत्वात्, विष्णौ मुख्यत्वेऽपि शब्दानामनन्यगतिकतया शब्दाधीनहानादिसिद्ध्यर्थमन्यत्र व्यवहाराविरोधात्, अग्न्यादिविद्यादिभिर्ब्रह्मोपासनयाऽग्न्यादावेव विष्णोर्व्यक्तत्वानुस्मरणीयत्वप्राप्यत्वनिमित्तैर्विद्यादिव्यवस्थोपपत्तेः कस्यापि बाधकस्याभावाद्विष्णुरेव वैश्वानर इति निर्णयं कुर्वता वैश्वानराधिकरणेन फलतः पाचत्वाद्यनेकालिङ्गसमन्वयस्सिद्ध इत्यलम् ॥

तदेवं स्वसिद्धान्तं निरूप्य, तद्विरोधेन परैस्तत्तदधिकरणतात्पर्यविषयतया येऽर्था वर्णितास्तेषां परीक्षाऽपे तत्तत्स्थानेषु सम्यक्कृता स्वाभिमतार्थे सुदृढनिर्णयसमुत्पादनाय. यावदवश्यवक्तव्यं तावत्सर्वमपि सुनिरूपितम्.

अस्य संपुटस्य मुद्रणात्प्राक् ग्रन्थसंशोधनं पूर्वसंपुटयोर्निर्दिष्टानां पुस्तकानां, श्रीमत्सातारावाळाचार्यद्वारा खेठक्षेत्र-

निवासिभिराद्यवंशीयाचार्यैः प्रहितस्य प्रकाशपुस्तकस्य, श्री-संजीवसुब्रह्मणाचार्यसंबन्धिनश्चन्द्रिकापुस्तकस्य चाधिकस्य साहाय्येन निर्वर्तितमिति शम्.

सुजनविधेयः,
रायपाळय राघवेन्द्राचार्यः.

विषयानुक्रमणिका.

विषयः			पुटसङ्ख्या
प्राणाधिकरणे—			
भाष्यटीकोक्तमधिकरणशरीरम्	....	....	१—३
चन्द्रिकाप्रकाशयोः—			
पूर्वाधिकरणसङ्गतिः	....	....	४—५
भाष्योक्तफलाक्षेपसमाधी	....	....	५—६
चिन्तापरम्परा	....	....	६—८
अधिकाशङ्कासमर्थनेन पूर्वपक्षः	....	....	८—२०
सिद्धान्ते—			
विष्णौ जीवनान्वयव्यतिरेकोपपादनेन प्राणशब्दप्रवृत्तिनिमित्तोपपादनम्	....	....	२१—२२
प्राणशब्दस्य विष्णुपरत्वे लक्ष्म्यादिशब्दानां प्राणभार्यापरत्वप्रतिबन्दीमोचनम्	...	....	२३
प्राणशब्दस्य विष्णावेव मुख्यत्वे प्रमाणप्रदर्शनम्		....	२३—२४
“भर्ता सन् भ्रियमाणः” इत्यनुवाक एव विष्णुलिङ्गप्रदर्शनम्			२५
अनुवाकद्वयस्य भिन्नार्थत्वाभावेन श्रीपतित्वादेः प्राणस्य विष्णुत्वे लिङ्गत्वोपपादनम्	....	....	,,
पूर्वपक्षे शङ्कितयोः मातरिश्वश्रुत्यपानसाहित्ययोः सावकाशत्वोपपादनम्	....	...	,,
श्रीपतित्वादिलिङ्गस्यासिद्धिपरिहारः	....	....	२६

विषयः			पुटसङ्ख्या
मतान्तराधिकरणविचारे--			
अद्वैत्यधिकरणपरीक्षा	....	....	२६—३८
रामानुजीयाधिकरणपरीक्षा	....	....	३८—३९
शैवाधिकरणपरीक्षा	....	....	३९—४०
ज्योतिराधिकरणे—			
भाष्यटीकोक्तमाधिकरणशरीरम्	....	....	४१—४२
चन्द्रिकाप्रकाशयोः—			
दर्शनत्रयप्रदर्शनम्	....	....	४३—४४
तत्र,			
आद्यस्य 'ज्योतिरादिचतुस्सूत्री एकमधिकरणं' इति तत्त्वप्रदीपकृन्मतस्योपपादनम्	....	...	४४—४८
द्वितीयस्य 'चतुस्सूत्र्या एकाधिकरणत्वेऽपि "अथ यदतः परो दिवः" इति च्छान्दोग्यस्थमेव विषयवाक्यं' इति सन्न्यायरत्नावळीकृन्मतस्योपपादनम्		...	४९
मतद्वयेऽपि अग्निसूक्तच्छान्दोग्यगतवाक्यद्वयस्याप्युदाहरणतासमर्थनम्	....	....	५०--५३
तृतीयस्य 'ज्योतिस्सूत्रमेकमधिकरणमुत्तरा त्रिसूत्री त्वधिकरणान्तरं' इति टीकाकृन्मतस्योपपादनम्		....	५३—५५
सूक्तगतानां ज्योतिरादिशब्दानामुदाहरणत्वं, ज्योतिश्शब्दसमन्वयस्यैतत्पादसंगतत्वसमर्थनं च		....	५६—५८
प्राणाधिकरणेन प्रत्युदाहरणरूपसङ्गतिसमर्थनं, चिन्तापरम्परा च	....	....	५८—६०
पूर्वपक्षे—			
टीका-सुधाभिमतपूर्वपक्षद्वयस्य संग्रहः	....	....	६१

विषयः	पुटसङ्ख्या
टीकाभिमतपूर्वपक्षविशदीकरणं, सुधाविरोधपरिहारश्च	६२—६५
सुधाया अभिप्रायान्तरवर्णनेन तदनुसारिपूर्वपक्षान्तरवर्णनम्	६५—६६
टीकासुधयोरेकाभिप्रायवर्णनेन एकपूर्वपक्षरचना, प्रमेयाश्रितशङ्का च	६६—६७
सिद्धान्ते—	
कारिकया पूर्वपक्षद्वयनिरासकन्यायसंग्रहः ...	६८
कर्णादिविदूरत्वस्य निरवकाशत्वव्युत्पादनम्	६८—६९
अग्निश्रुतिसूक्तादीनां विष्णौ सावकाशत्ववर्णनम् ...	६९—७१
उक्तार्थे न्यायविवरणसंवादसंपादनम् ...	७२
सूक्तान्तरेष्वप्येतन्न्यायप्रसारणम्	७३—७६
अन्तराद्यधिकरणानामेतेन, एतस्य तैश्चागतार्थत्ववर्णनम्	७६—७७
"ज्योतिर्दर्शनात्" इत्यनेनास्यापुनरुक्तत्वम्	७७—७८
सर्वदेवोपास्यत्वादिलिङ्गान्तराणां सूत्रेऽनुक्तया न्यूनतापरिहारः	७८—७९
'विचरणाभिधानात्' इति सूत्रन्यासशङ्कासमाधी ...	७९—८०
गायत्र्यधिकरणे—	
भाष्यटीकयोः—	
संगतिप्रदर्शनपूर्वकमधिकरणशरीरवर्णनेन आद्यसूत्रविवरणम्	८१—८३
भूतादिपादसूत्रव्याख्यानं, भूतादेर्ब्रह्मपादत्वसमर्थनं च ...	८३—८५
बाधकोद्धारपरतृतीयसूत्रविवरणं, उपदेशद्वयस्याविरोधोपपादनं च	८५—८६
चन्द्रिकाप्रकाशयोः—	
अधिवेदगतगायत्र्यादिच्छन्दसामुदाहरणत्वम्	८७
पूर्वसंगतिकथनोपयुक्ततया एतदधिकरणविषयवाक्यविषये प्रस्थानद्वयटीकानुसारेण मतभेदप्रदर्शनम्	८७—८८
मतद्वयस्यापि मूलप्रदर्शनपूर्वकं विवरणम्	८८

विषयः पुटसङ्ख्या

आद्ये मते पूर्वपक्षद्वयं, तत्फलं च .... ८९—९०

द्वितीयमते पूर्वपक्षत्रयम् ९०

पञ्चानामपि पूर्वपक्षाणां मूलप्रदर्शनम् .... ९०—९१

पूर्वपक्षभेदेन संगतिभेदः ९१

चिन्तापरम्परा .... ९१—९४

पूर्वपक्षानुदयमाशङ्क्य अधिकशङ्कापञ्चकेन तदुदयवर्णनम् .... ९४—९९

तत्तच्छङ्कानिरासकप्रदर्शनपूर्वकं सिद्धान्तोपपादनम् .... १००—१०२

"तादृशत्वात्तु तच्छक्तेः" इत्यनुव्याख्यानभावविवरणम् .... १०२—१०६

आकाशाधिकरणेनास्य गतार्थतापरिहारः.... .... १०६

वियदधिकरणविरोधनिरासः १०७

भाष्यादौ अनादेरन्याधीनतासमर्थनस्यानौचित्यशङ्कानिरासेनाधिकरणसिद्धान्तोपसंहारः .... १०७—११०

सूत्रक्रमसमर्थनम् ११०

मतान्तराधिकरणपरीक्षायां—

अद्वैतिरामानुजादिशा ज्योतिरादिचतुस्सूत्रया एकाधिकरणत्वस्य प्रथमसूत्रार्थस्य चानुवादः .... ११०—१११

तदुपरि, यथास्थितसूत्रन्यासायोगः, विषयवाक्योदाहरणानौचित्यं, ज्योतिर्भूतादिसूत्रयोः पुनरुक्ततेति दूषणानि १११-११२

पुनरुक्तेः परिहारमाशङ्क्य स्थिरीकरणम् .... ११२—११६

स्वपक्षे 'भूतादि' इत्यत्रादिशब्दार्थकथनम् ११६

"पादोऽस्य सर्वा भूतानि" इत्यत्र ग्रहैकत्वपक्षेकत्वनयानुरोधेन उद्देश्यविधेयभावविचारः .... ११६—११८

"इष्टिराजसूय" इत्यादिमीमांसाधिकरणन्यायेन पादशब्दस्य "पादोऽस्य" इत्यत्रामुख्यार्थतायाः, "त्रिपात्"

विषयः पुटसङ्ख्या

इत्यत्र मुख्यार्थतायाश्च समर्थनम् ११८-१२०

"चेतोर्पणनिगदात्" इत्यत्र परेषां, "तथा हि दर्शनम्" इत्यत्र उभयोश्च व्याख्याननिरासः ११९-१२०

चतुर्थसूत्रे परभाष्योक्तव्याख्यानस्यानुवादपूर्वकं निरासः १२०

भामत्युक्तताद्विवरणनिरासः १२१-१२२

रामानुजीयार्थनिरासः १२२-१२३

शैवाधिकरणनिरासः १२३-१२५

स्वरीत्या उपदेशभेदविरोधपरिहारः १२६-१२८

एकस्मिन्नेव प्रकरणे द्युशब्दस्यानेकार्थत्वायोगशङ्कानिरासः १२८-१२९

सर्वतःपृष्ठ-विश्वत पृष्ठशब्दयोरर्थभेदवर्णनम् १२९-१३०

छान्दोग्यभाष्यसूचितरीत्यन्तरेण उपदेशभेदविरोधपरिहारः.... १३०-१३१

त्रिपाच्छब्दस्य परोक्तार्थखण्डनम् १३१-१३२

सर्वतःपृष्ठ-विश्वतःपृष्ठशब्दयोः परोक्तार्थनिरासः १३२

सर्व-विश्वशब्दयो रामानुजाभिमतकार्यकारणार्थकल्पनिरासः.... १३२-१३३

टीकाक्षरार्थवर्णनम् १३३

पाद्यान्त्यप्राणाधिकरणे—

भाष्यटीकयोः—

ससंगतिकाधिकरणशरीरवर्णनेन प्रथमसूत्रव्याख्यानम् १३४-१३६

बाधकोद्धारपरद्वितीयसूत्रव्याख्यानम् १३६-१३७

तृतीयसूत्रव्याख्यानम्.... .... १३८

आक्षेपसमाधानपरचतुर्थसूत्रव्याख्यानं, उपासनात्रैविध्यविवरण च १३९-१४१

चन्द्रिकाप्रकाशयोः—

संगतिविवरणम् १४२

विषयः	पुटसङ्ख्या
चिन्तापरम्परा	१४३
अतीतप्राणाधिकरणेनास्य गतार्थताशङ्कायास्संभावितपरिहार-निरासपूर्वकं समर्थनम्	१४३–१५०
निरवकाशप्रापकप्रदर्शनेन पूर्वपक्षोत्थितिवर्णनम्	१५०–१५६
अत्रत्यप्राणस्यान्यत्वे "तद्वै त्वं" इत्युक्तस्याप्यन्यत्वशङ्कायाः पूर्वपक्षफलत्वाक्षेपसमाधी	१५७–१६६
"अत एव प्राणः" इत्यत्र समन्वितत्वेनात्रान्यत्रप्रसिद्ध्या च अत्र समन्वयिमानप्राणशब्दस्योभयत्रप्रसिद्धत्वापत्त्या एतत्पादसंगत्यनुपपत्तिशङ्कायाः आकाशज्योतिश्शब्द-वैलक्षण्योपपादनेन परिहारः	१६७–१७०
सिद्धान्ते—	
देवोपास्यत्वादिविष्णुलिङ्गादीनां निरवकाशत्वेन प्राबल्यवर्णनम्	१७०–१७२
पूर्वपक्षप्रापकाणां सावकाशत्ववर्णनावसरे शास्त्रदृष्टिसू-त्रतात्पर्यवर्णनेन इन्द्रप्रयुक्ताहंशब्दस्यान्तर्यामिपरत्व-प्रतिपादनम्	१७२–१७४
प्रकारान्तरेणाहंशब्दस्योपपत्तिमाशङ्क्यान्तर्यामिपरत्वसमर्थनम्	१७४-१७६
चक्षुरादिसाहचर्यस्य वायुत्वानिर्णायकत्वानिरूपणम्	१७६
प्राणसंवादादीनामप्यन्तर्यामिगतत्वोपपादनम्	१७६–१७८
जीवलिङ्गानामन्यथानयनम्	१७८
सिद्धान्तोपसंहारः	१७८–१७९
सूत्राणामर्थवर्णनपूर्वकं क्रमसमर्थनम्	१७९–१८३
मतान्तराधिकरणविचारे—	
अद्वैत्यधिकरणानुवादः	१८३–१८५
तत्र हिततमत्वस्य ब्रह्मलिङ्गतानिरासः	१८५–१८६

विषयः	पुटसङ्ख्या
अमृतत्वोपासनकर्मत्वस्य ब्रह्मलिङ्गतानिरासः	१८६
ज्ञानेन कर्मालेपादेर्ब्रह्मलिङ्गतानिराकरणम्	१८६–१८७
रामानुजाधिकरणानुवादः, तत्रान्तरङ्गानुपपत्तिवर्णनम्	१८७–१९०
"न वक्तुः" इति सूत्रस्य—	
अद्वैत्यभिमतार्थनिरासः	१९१–१९२
रामानुजीयार्थनिरासः	१९२–१९४
शास्त्रदृष्टिसूत्रस्य—	
अद्वैतिव्याख्याननिरासः	१९४–१९७
रामानुजव्याख्यानिरासः	१९८
"जीवमुख्यप्राण" इति सूत्रस्य—	
अद्वैत्युक्तार्थनिरासः	१९९–२०१
तद्भाष्योपन्यस्तवृत्तिकृद्व्याख्याननिरासः....	२०१–२०२
रामानुजोक्तार्थनिरासः	२०२–२०३
शैवाधिकरणनिरासः	२०३–२०४
टीकाक्षरार्थवर्णनम्	२०५
एतत्पादीयद्वादशाधिकरणप्रमेयज्ञानाय पेटिकासंगतिनिरूपणम्	२०६
समन्वयपरसप्ताधिकरण्याः विषयोपाधीनां संग्रहः	२०७

द्वितीयपादे

सर्वगतत्वाधिकरणे—

भाष्यटीकयोः—	
पादार्थप्रदर्शनम्	२०९
संगतिविषयसंशयाः	२०९–२१०
पूर्वपक्षोक्तिपूर्वकं सूत्रमवतार्य तद्व्याख्यानम्	२१०–२११

विषयः	पुटसङ्ख्या
द्वितीयसूत्रव्याख्यानम्	२११–२१२
विष्णोरन्यस्य सर्वगतत्वं पराकुर्वतोस्तृतीयचतुर्थसूत्रयोर्विवरणम्	२१२–२१३
सिद्धान्तोपरि शङ्कानिरासकस्य पञ्चमसूत्रस्य व्याख्यानम्....	२१४
सिद्धान्ते स्मृतिसमाख्यां प्रदर्शयतः षष्ठसूत्रस्य व्याख्यानं, परमतनिराकरणं च	२१५–२१६
सिद्धान्तमाक्षिप्य समादधतोः सप्तमाष्टमसूत्रयोर्व्याख्यानम् ...	२१६–२१८
चन्द्रिकाप्रकाशयोः—	
पादसंगत्युक्तिः	२१९
तत्रानुव्याख्यानप्रमाणीकरणम्	२२०
सर्वगतत्वस्यान्यत्रप्रसिद्धिसमर्थनम्	२२०–२२१
पूर्वपादान्त्याधिकरणेन एतदधिकरणस्य संगतेः फलस्य च निरूपणम्—	२२१–२२२
चिन्तापरम्परा	२२२–२२३
पूर्वपक्षारम्भः	२२३–२२४
आदित्यशब्दस्यान्तरधिकरणे विष्णौ समन्वितत्वात्तद्बलेन सर्वगतस्य विष्ण्वन्यत्वपूर्वपक्षायोगशङ्का	२२४
तस्यास्संभावितपरिहारानाशङ्क्य समर्थनम्	२२४–२३०
आदित्यलिङ्गैरत्रत्यादित्यशब्दस्य सूर्यपरत्वावश्यम्भावेन पूर्वपक्षसमर्थनेन तच्छङ्कापरिहारः	२३१–२३२
लिङ्गैरेव पूर्वपक्षसंभवेन श्रुत्या पूर्वपक्षस्यायुक्तत्वमाशङ्क्य समाधानम्	२३२
न्यायविवरणादिस्वारस्यानुरोधेन पूर्वपक्षसमञ्जसीकरणाय पक्षद्वयोक्तिः	२३३–२३७
स्वतोऽन्यत्रप्रसिद्धादित्यश्रुतेः समन्वयमकृत्वा तद्बलेनान्यत्र-	

विषयः पुटसङ्ख्या

प्रसिद्धस्य सर्वगतत्वस्य समन्वयायोगशङ्कायाः परिहारः २३७–२३८

सौरमन्त्रोदाहरणस्य सूर्यप्रापकत्वसमर्थनम् ... २३८–२३९

आदित्येऽनुक्तत्वलिङ्गस्य सूर्यप्रापकत्वसमर्थनम् ... २३९

चक्षुर्मयत्वादिलिङ्गस्य जीवप्रापकत्वसमर्थनम् २३९–२४२

"सर्वेषु भूतेषु" इति श्रुत्युक्तसर्वभूतगतत्वरूपार्भकौकस्त्वस्य सर्वगतत्वविरोधितया न विष्णुवृत्तित्वमिति शङ्कायाः सर्वगतत्वाल्पौकस्त्वयोराविरोधसमर्थनेन परिहारस्य अधिकारणान्तरैरलाभवर्णनम् २४२–२४३

अल्पौकस्त्वस्य विषयवाक्यगतिगद्यत्वनिरूपणम् २४३

पूर्वाधिकरणाक्षेपस्य भाष्याद्युक्तस्योपपादनम् .. २४४–२४६

अर्भकौकस्त्वस्य ब्रह्मणि सावकाशत्वशङ्कानिराकरणम् ... २४६

आदित्यपूर्वपक्षेऽल्पौकस्त्वविरोधिनः "ब्रह्म ततमं" इत्युक्तसर्वगतत्वस्यानुपपत्तिमाशङ्क्य संकोचनेनाविरोधोपपादनम् २४६

ब्रह्मणि संकोचनासंभवनिरूपणम् २४६–२४७

ब्रह्मशब्दादीनां पूर्वपक्षबाधकत्वनिरासेन पूर्वपक्षोपसंहारः २४७–२५०

सिद्धान्ते—

संवत्सरसारत्वरूपसूर्यलिङ्गस्य विष्णौ सावकाशत्वनिरूपणम् २५०–२५१

यच्छब्दोपबन्धलिङ्गस्य सावकाशत्ववर्णनम् २५१–२५२

आदित्यशब्दस्य विष्णौ प्रसिद्धिवर्णनम्... ... २५२

सर्वपुरुषाभिमुख्यस्य सूर्यलिङ्गत्वनिरासः ... २५२–२५४

सौरमन्त्रचक्षुर्मयत्वादीनां विष्णावुपपादनम् ... २५४–२५५

जीवपक्षे एतच्छब्दो वक्ष्यमाणपर इत्यस्य समाधानम् ... २५५–२५६

अर्भकौकस्त्वस्याबाधकत्वोपपादनम् २५६–२५७

विषयः	पुटसङ्ख्या
आदित्येऽनुक्तत्वस्यादित्यप्रापकत्वनिरासः	२५७–२५८
प्रसिद्धोपदेशादिस्वपक्षसाधकानां निरवकाशत्वोपपादनम् ...	२५८–२६०
"अनुपपत्तेस्तु न शारीरः" इति सूत्रोक्तपरपक्षबाधकस्फुटीकरणम्	२६०–२६२
कर्मकर्तृव्यपदेशस्य परपक्षबाधकत्वोपपादनम्	२६२
स्मृतिसमाख्योपपादनम्	२६३
उक्तसिद्धान्तस्य न्यायविवरणमूलत्ववर्णनम् ...	२६३
अनुव्याख्यानोक्तवर्णकान्तरस्य सूत्रारूढत्वव्यञ्जनम् ...	२६३–२६४
सूत्रक्रमबीजवर्णनम्	२६४–२६७
पूर्वत्रैवात्र प्रत्यधिकरणं टीकायां विषयोपाध्यनुक्तिकृतन्यूनतायाः, अनुव्याख्याने स्फुटत्वादनुक्तिरिति परिहारं सूचयितुमनुव्याख्यानानुवादपूर्वकं विवरणम्	२६७–२६८
उक्तानुव्याख्यानस्य संगतिपरत्वमपि संभवतीति तद्विवरणम्	२६८–२७०
तस्य पेटिकासंगतिपरत्वविवरणम्	२७०–२७१
अद्वैत्यधिकरणपरीक्षा	२७१–२७८
तेषां सूत्राक्षरार्थास्वारस्यनिरूपणम्	२७८–२८१
विशिष्टाद्वैतिनां अधिकरणाक्षरार्थानुवादेनास्वारस्यनिरूपणम्....	२८१–२८९
शैवाधिकरणनिराकरणम् ...	२८९–२९०
टीकाक्षरार्थवर्णनम	२९१–२९२

अत्तृत्वाधिकरणे—

भाष्यटीकयोः—

संगतिसंशयविषयपूर्वपक्षाः	२९३–२९४
सूत्रावतरणपूर्वकं सिद्धान्तनिरूपणम	२९४–२९६
गुणसूत्रोक्तप्रकरणविवरणेन सिद्धान्तनिगमनम् ...	२९६–२९६

विषयः पुटसङ्ख्या

चन्द्रिकाप्रकाशयोः—

अव्यवहितपूर्वाधिकरणेन प्रत्युदाहरणसंगतिप्रदर्शनम् २९७

चिन्ताप्रदर्शनेन संशयटीकाविवरणम् २९७–२९८

पूर्वपक्षे,

अदितिशब्दपर्यायस्यापि पूर्वं विष्णावसमन्वयेनादितिश्रुतेर्निरवकाशत्वमित्यभिप्रेत्य पूर्ववैषम्यप्रदर्शनम् २९९–३००

श्रुतेर्निरवकाशत्वपक्षे लिङ्गस्य निरवकाशत्वसंभवेऽपि, टीकोक्ते श्रुतेस्सावकाशत्वपक्षे लिङ्गस्य निरवकाशत्वानुपपत्तिमाशङ्क्य समाधानम् ३००–३०१

अदनकर्तृत्वमदितित्वमित्युपेत्य समाधानान्तरोक्तिः ३०१–३०२

निरवकाशविष्णुलिङ्गानामस्मिन् प्रकरणेऽभावेनान्तराधिकरणन्यायाविषयतयाऽदितिश्रुतेः निरवकाशत्वमित्यभिप्रेत्य न्यायविवरणस्य तात्पर्यान्तराभिधानम ... ३०२–३०३

अस्मिन् पक्षे टीकाविरोधपरिहारः ३०४

"सर्वं वा अत्तीति" इति श्रुत्युक्तसर्वात्तृत्वलिङ्गेन "नैवेह किंचन" इति विष्णुप्रकरणेन च अदितिश्रुतेर्बाधशङ्कायाः सर्वशब्दार्थस्य संकोचासंकोचाभ्यां परिहारः ३०४

संकोचपक्षे जन्मादिसूत्रोक्तासंकुचितसर्वात्तृत्वस्यातिव्याप्त्युक्तययोगशङ्कापरिहारः ३०४–३०६

अदेर्भक्षणार्थत्वेनादितेरत्तृत्वेऽपि संहर्तृत्वस्य पक्षद्वयेऽप्यनतिव्याप्तिशङ्कायाः परिहारः ३०६

"नैवेह किंचन" इति प्रकरणस्यादितिश्रुत्यबाधकतायाश्चेधोपपादनम् ३०५–३०७

विषयः | पुटसङ्ख्या

सिद्धान्ते--

पूर्वपक्षसिद्धान्तप्रापकयोस्सावकाशत्वनिरवकाशत्वसंग्रहः ३०७–३०८

सर्वात्तृत्वस्य विष्णोरन्यत्र निरवकाशत्वसमर्थनम् ३०९–३१०

विष्णावदितिशब्दप्रयोगप्रदर्शनेन "सर्वं वै" इति श्रुतेः
तत्प्रवृत्तिनिमित्ताभिधानपरत्ववर्णनम् ३१०–३११

टीकोक्तहेतूक्तिपरत्ववर्णनम् ३११–३१२

सर्वशब्दार्थस्यासंकोचप्रतिपादनम् ३१२

प्रकरणस्य निरवकाशत्वोपपादनम् ३१२–३१३

सूत्रक्रमनिरूपणम् ३१३

अर्वाचीनामधिकरणस्य सूत्राक्षरार्थकथनस्य च निरासः ... ३१३–३१७

टीकाक्षरार्थवर्णनम् ३१७–३१९

गुहाधिकरणे—

भाष्यटीकयोः

संगति-संशय-विषय-पूर्वपक्षाः ३२०–३२१

सूत्रमवतार्य तद्व्याख्यानम् ३२१–३२३

गुणसूत्रस्थविशेषणविवरणम् ३२३–३२४

सूत्रद्वयस्य परापव्याख्याननिराकरणम् ३२४–३२६

चन्द्रिकाप्रकाशयोः—

पूर्वाधिकरणसंगतिः ३२६–३२७

विषय-संशयटीकाविवरणाय चिन्ताप्रदर्शनम् ३२७–३३०

पूर्वपक्षे—

पूर्ववैषम्यप्रदर्शनपूर्वकं प्रातिपदिकार्थस्य कर्मफलभोक्तृत्वस्य
प्रत्ययार्थस्य द्वित्वस्य च ब्रह्मण्ययुक्तत्वोपपादनम् ३३०–३३२

एकस्य ब्रह्मणो द्विवचनबोध्यानेकत्वायोगशङ्काया आनन्दमया-

विषयः पुटसङ्ख्या

धिकरणे परिहृतत्वशङ्काया द्वेधा परिहारः ३३२--३३३

द्विवचनस्य 'दाराः' इत्यादाविव शब्दसाधुत्वमात्रार्थतायाः निरासः ३३३–३३४

'पिबन्तौ' इत्यादिद्विवचनान्तानां व्यत्ययेनैकत्वार्थतानिरासः ३३४

"ग्रहं सम्मार्ष्टि" इत्यादाविवोद्देश्यविशेषणत्वाद्द्विवचनार्थसंख्याया अविवक्षितत्वशङ्कानिरासः ... ३३४–३३५

द्विवचनस्य द्वित्वार्थकत्वेऽपि अत्रैकवचनान्ततयोद्देनैकत्वार्थतानिरासः ३३५–३३६

'पिबन्तौ' इत्यादेर्द्विवचनप्रतिरूपकमात्रत्वेन द्वित्वाज्ञापकत्वनिरासः ३३६–३३७

ब्रह्मपक्षे छायातपायोगानिरूपणम् ३३७–३३८

शङ्कोपसंहारः ३३८

सिद्धान्ते—

सिद्धान्तहेतूनां संग्रहः ३३८–३३९

गुहाप्रविष्टत्वस्य निरवकाशत्वोपपादनम् ३३९

ब्रह्मशब्दस्य निरवकाशतोपपादनम् ३३९–३४०

सेतुत्वादे निरवकाशत्ववर्णनम् ३४०

"यस्सेतुः" इत्यादेर्ब्रह्ममात्रपरत्वेऽपि "ऋतं पिबन्तौ" इत्यादेः कर्मफलात्तृत्व-द्विवचनरूपबाधकादुभयपरत्वमस्त्विति शङ्कानिरासः ३४०–३४१

ब्रह्मणो भोक्तृत्वे प्रमाणोपन्यासः ३४१–३४२

"अनश्नन्नन्यः" इत्यादेरशुभभोगाभावविषयत्वसमर्थनम् ३४२–३४४

विषयः	पुटसङ्ख्या
विषयवाक्यगतस्य ऋतपदस्य जीवपक्षेऽनुपपत्तेरीशपक्षे उपपत्तेश्च वर्णनम्....	३४४–३४५
द्विवचनानुपपत्तिपरिहारावसरे,	
द्विवचनार्थस्य द्वित्वस्यैकस्मिन् ब्रह्मण्ययोगेन तदुपपत्तये पिबत्प्रातिपदिकस्य भोक्तृभोक्तृसमुदाये लक्षणेत्यस्य पराभिप्रेतस्य निरासाय प्रधानभूतप्रातिपदिके लक्षणाया अन्याय्यतोपपादनम्	३४५–३४८
"युवं हि स्थः" "एते असृग्रं" इति प्रातिपदोरुत्कर्षस्य "द्वयोर्यजमानयोः" "बहुभ्यो यजमानेभ्यः" इत्यत्र-त्यद्व्यादिप्रातिपदिकार्थानुरोधफलकतैव न तु प्रत्ययार्थानुग्रहार्थतेत्युपपादनम्	३४९–३५०
"प्रोद्गातॄणां" इत्यत्र बहुवचनानुग्रहाय प्रातिपदिकलक्षणाश्रयणस्य प्रस्तोत्रादिच्छन्दोगानां भावेन, अत्र ब्रह्मप्रकरणे लक्षणीयस्यान्यस्याभावेन च वैषम्योपपादनम्....	३५०–३५२
पूर्वोक्तैरेकवचनान्तवाक्यनिर्णीतैकत्वविरुद्धत्वाद्द्वित्वस्यात्र श्रुतितात्पर्यविषयत्वमेव नेति परिहारान्तरोपपादनम्	३५२–३५६
द्वित्वस्य विवक्षामङ्गीकृत्य द्वित्वैकत्वयोस्समावेशवर्णनेन परिहारान्तरकथनम्	३५६–३५८
भाष्यानुरोधेन 'आत्मानौ' इति सौत्रपदसूचितपरिहारस्योपपादनम्	३५८–३६१
"न संख्योपसंग्रहात्" इत्यधिकरणेनास्य गतार्थतायास्त्रेधापरिहारः	३६१–३६३
"नाणुरतच्छ्रुतेः" इत्यनेन गतार्थतानिरासः	३६४
एकस्य ब्रह्मणः छायातपत्वानुपपत्तेः परिहारः	३६५
सूत्रे 'ऋतं पिबन्तौ' इत्यनभिधाय 'गुहां प्रविष्टौ' इत्यभि-	

विषयः पुटसङ्ख्या

धाने स्वारस्यकथनम् ३६५–३६६

सूत्रे 'आत्मानौ' इति साध्यनिर्देशस्य प्रयोजनोक्तिः, सूत्रक्रमोक्तिश्च ३६६

अद्वैत्यधिकरणपरीक्षा ३६६–३७५

विशिष्टाद्वैत्यधिकरणपरीक्षायां,

"अत्ता" इत्यादिचतुस्सूत्र्या एकप्रकरणस्थवाक्यविशेषविषयकत्वेन, पादान्तराधिकरणान्तराव्यवाहितत्वेन, उपजीव्योपजीवकभावेन परपरस्परान्वितार्थत्वेन चैकाधिकरणतेति विशिष्टाद्वैतिपक्षस्यानुवादः ३७५–३७८

स्वरीत्या एकप्रकरणस्थवाक्यविषयकत्वस्यासिद्धिवर्णनम ३७८–३७९

उपजीव्योपजीवकभावेनान्वितार्थत्वं चासिद्धमिति वक्तुं, "ऋतं" इत्येतत् "यस्य" इत्यस्य "महान्तं" इति ब्रह्मप्रकरणाद्विच्छेदकामिति शङ्काया एवासंभववर्णनम् ३७९–३८०

"प्रकरणात्" इति सूत्रावरोधात्, लिङ्गादानन्तर्यरूपक्रमदौर्बल्यस्य पूर्वतन्त्रसिद्धत्वाच्च "यस्य" इत्यस्य "ऋतं" इत्यनेनैकवाक्यताशङ्कनस्यायुक्तत्ववर्णनम्.... ३८०–३८१

प्रकरणविच्छेदशङ्कायास्तत्परिहारस्य च पूर्वपक्षसिद्धान्तयोस्तुल्यतया तच्छङ्कापरिहाराय "गुहां" इति सूत्रमित्येतदयुक्तमिति वर्णनम् ३८१

एकप्रकरणस्थवाक्यविशेषविषयत्वस्य अदृश्यत्वाद्यधिकरण-द्युभ्वाद्यधिकरणयोरेकाधिकरणत्वव्यभिचारवर्णनम् ... ३८२

उपजीव्योपजीवकभावस्यापि तत्र सत्त्वेनाविशेषापादनम्.... ३८२

पादान्तराधिकरणान्तरव्यवधानस्य तत्राधिकरणभेदप्रयोजकत्वमाशङ्क्य निराकरणम् ३८२–३८३

विषयः | पुटसङ्ख्या

स्पष्टास्पष्टलिङ्गकवाक्यविषयकत्वेनाद्दशत्वाद्यधिकरण–द्युभ्वाद्यधिकरणयोरेकपादनिवेशनानर्हत्वमिति शङ्कायाः प्रकृतेऽप्यविशेषेण भिन्नपादनिवेशनापादनेन परिहारः ३८३

अत्तृत्वाधिकरण-गुहाधिकरणयोर्भेदे अध्वरमीमांसकसम्मत्युपपादनम् ३८४–३८५

अस्याश्चतुस्सूत्र्या भिन्नाधिकरणत्वसाधनेन सिद्धान्त्यभिमतं "प्राणस्तथा" इत्यस्य "सर्वत्र" इत्यस्य च भिन्नाधिकरणत्वं सिद्धमिति वर्णनम् ३८५

मान्त्रवर्णिकसूत्रतद्धेतुव्यपदेशसूत्रयोर्भिन्नाधिकरणतापत्तिपरिहारः ३८६–३८६

'साधारणाकारं विहायासाधारणाकारेण गौणार्थो वर्णनीयः' इति न्यायव्युत्पादनं "अत्ता" इत्यत्र क्रियत इति तदभिप्रायस्य प्रोद्गात्रधिकरणेन मासाग्निहोत्राधिकरणेन च पुनरुक्त्युद्भावनेन निरासः ३८७–३८८

रामानुजीयाधिकरणनिरासन्यायस्य शैवाधिकरणनिरासेऽतिदेशः, तद्विवरणं च प्रकाशो ३८८

टीकाक्षरार्थवर्णनम् ३८८–३९१

अन्तराधिकरणे—

भाष्यटीकयोः—

संगति–विषयवाक्य–विषय–संशय–पूर्वपक्षप्रदर्शनम् ... ३९२–३९३

सूत्रव्याख्यानपूर्वकं सिद्धान्providedाविष्करणम् ३९४–३९५

युक्त्यन्तरेण विष्णोश्चक्षुरन्तःस्थत्वसाधकस्थानादिसूत्रविवरणम् ३९५–३९६

प्रकरणबलेन विष्णोश्चक्षुरन्तस्स्थत्वं साधयतस्सुखविशिष्टाभिधानसूत्रस्य व्याख्यानम् ३९६–३९७

विषयः पुटसङ्ख्या

अक्षिस्थप्रकरणस्य वैष्णवत्वानुपपत्तिं परिहरतः श्रुतोपनिषत्कसूत्रस्य विवरणम् ३९७–३९९

विपक्षे बाधकप्रदर्शनेन विष्णोराक्षिस्थत्वं समर्थयतः अनवस्थितिसूत्रस्य व्याख्यानम् ३९९–४००

चन्द्रिकाप्रकाशयोः—

अव्यवहितपूर्वाधिकरणेन संगतिप्रदर्शनम् ४०१–४०२

चिन्तापरम्पराप्रदर्शनेन विषय—संशयटीकाविवरणम् ... ४०२–४०६

पूर्वपक्षे—

"अन्तरक्षणि पुरुषो दृश्यते" इत्यत्रोक्तचक्षुरन्तस्स्थस्य अग्नित्वे हेतूकृतस्य "य एष आदित्ये पुरुषः" इत्यादित्यस्थस्याग्निना स्वात्मतयोपदिष्टत्वस्य, "आदित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशत्" इति श्रुतिबलेन चक्षुरादित्यदेवतयोरैक्यमाश्रित्य प्रयोजकत्वोपपादनम् ४०६

"अक्षिणी प्राविशत्" इत्यत्रेव "अन्तरक्षणि" इत्यत्रापि अक्षिशब्दस्य गोलकपरत्वसंभवेन चक्षुरादित्यदेवतयोरैक्यमयुक्तमिति शङ्कायाः प्रवेशवाक्यस्याक्षिशब्दवैधर्म्यप्रदर्शनपूर्वकं देवतापरत्वोपपादनेन प्राचीनटीकाभिमतपरिहारवर्णनम् ४०६–४०९

स्थानादिसूत्रादिस्वारस्याय अक्षिस्थादित्यस्थपुरुषवाक्यद्वयावैयर्थ्याय च अक्षिशब्दद्वयस्य जडपरत्वं, "आदित्ये पुरुषः" इत्यत्रादित्यशब्दस्यादित्यमण्डलपरत्वं चाश्रित्य अक्ष्यादित्यमण्डलयोरेकदेवतास्थानत्वेनैकविधत्वरूपमेकत्वमभिमतमिति टीकारीत्या परिहारान्तरम् ४०९–४१०

विषयः	पुटसङ्ख्या
अंशाधिकरणे वक्ष्यमाणस्य अक्ष्यादित्ययोस्त्रिवृत्त्वेन साम्यस्य आदित्यस्थस्याक्षिस्थत्वासाधकत्वादैक्यशब्दार्थत्वेनाविवक्षा	४१०
"सोऽहमस्मि" इति श्रुतावहंशब्दस्याग्निपरत्वे मानाभावेनादित्यस्थस्य स्वात्मतयोपदेशोऽसिद्ध इति शङ्कायाः परिहाराय "बहुश्रुतिभ्यः" इति न्यायविवरणस्य त्रिविधाग्निश्रुतिपरत्ववर्णनम्	४१०–४११
बहुश्रुतिषु न्यायविवरणोक्ताभ्यासार्थवादसाहित्यविशेषणस्य टीकोक्तात्प्रकारादन्येन प्रकारेण अभ्यासत्रैविध्यप्रदर्शनपूर्वकं विवरणम्	४१२–४१३
प्रमाणतयोदाहृतन्यायविवरणस्थानामभ्यासार्थवाद–बहुश्रुतीनां साध्यभेदप्रदर्शनम्	४१३
टीकोक्तरीत्या अभ्यासार्थवादयोस्साध्यभेदं प्रदर्श्य श्रुतीनां प्राधान्यनीरूपणम्	४१३–४१४
स्वोत्प्रेक्षितयोजनायाष्टीकायामनुक्तौ बीजाभिधानपूर्वकं टीकोक्तयोजनायां स्वारस्यप्रदर्शनम्	४१४
"यश्चासावादित्ये" इति समाख्याया विष्णुपरत्वाक्षेपेऽपि पूर्वपक्षिणस्तात्पर्यसद्भावात् टीकायां समाख्याविरोधशङ्का न युक्तेत्यस्य समाधानम्	४१४
टीकायामग्नेरादित्यस्थत्वस्यौपचारिकत्वशङ्काया अयुक्तत्वशङ्कायाः, विष्णुपक्षेऽपूर्वताशङ्कायाश्च निरासः	४१४–४१५
"अपहते पापकृत्यां" इत्यस्यार्थवादत्वोक्तेरभिप्रायवर्णनं, अर्थवादेन ब्रह्मपक्षनिरासवर्णनं च	४१५–४१६
अमृतत्वाभयत्वाद्युक्तेर्गत्यभिधानपूर्वकं पूर्वपक्षोपसंहारः ...	४१६

विषयः	पुटसङ्ख्या
सिद्धान्ते—	
अमृतत्वादिसौत्रहेतूनां विष्णुप्रापकाणां निरवकाशत्वस्य परहेतुसावकाशत्वस्य परपक्षे बाधकानां च विवरणपूर्वकं विष्णुरेवाक्षिस्थ इति निष्कृष्योक्तिः	४१६-४१८
टीकाया न्यायविवरणमूलत्वप्रदर्शनम्	४१८
परपक्षसाधकानां अभ्यासवह्न्यग्निश्रुत्यादीनां सावकाशत्वव्युत्पादनम्	४१८–४१९
अस्मद्विद्यात्मविद्ययोः ब्रह्मविद्यात्वेऽपि प्रकारभेदेन भेदोपपादनम्	४१९–४२०
सूत्राणां न्यासस्समर्थनार्थविवरणपूर्वकं क्रमविवरणम्	४२०–४२४
मतान्तराधिकरणपरीक्षायां—	
परकीयमतद्वयेऽप्यस्याधिकरणस्य अन्तरस्थत्वाधिकरणेन गतार्थताभिधानम्	४२४–४२६
पराभिमतानां गतार्थतापरिहारप्रकाराणां निरासः	४२६–४२७
असाधारणदूषणाभिधानाय भामत्युक्तपूर्वपक्षसिद्धान्तानुवादः	४२७–४२८
तत्र पूर्वपक्षानुत्थाननिरूपणम्	४२८
स्वमते गतार्थतायाः प्रसक्तिरेव नेति निरूपणम्	४२९
परसिद्धान्तस्याप्ययुक्ततानिरूपणम्	४२९–४३०
परमते स्थानादिसूत्रवैयर्थ्योक्तिः	४३०
सुखविशिष्टसूत्रार्थस्यानुवादेन दूषणम्	४३०–४३१
श्रुतोपनिषत्कसूत्रार्थदूषणम्	४३१–४३२
"अनवस्थितेः" इति पञ्चमसूत्रव्याख्यानिरासः ...	४३२–४३३
परमते उक्तदोषाणां केषांचिन्मतेऽप्यतिदेशस्य प्रकाशे विवरणम्	४३३–४३५

विषयः	पुटसङ्ख्या
कैश्चिद्व्याख्यातस्य "अत एव च स ब्रह्म" इति सूत्रस्य प्रक्षिप्तत्वोक्तिः	४३५
एतदधिकरणस्याद्वैतप्रातिकूलतोक्तिः	४३५
शैवाधिकरणनिरासः	४३६–४३८
टीकाक्षरार्थवर्णनम्	४३९–४४३
अन्तर्याम्यधिकरणे —	
भाष्यटीकयोः—	
संगति-विषयवाक्य-विषय-संशय-पूर्वपक्षाः	४४४–४४५
सूत्रावतरणपूर्वकं सिद्धान्तं निरूप्य सिद्धान्तहेतोरविदितत्वादेर्निरवकाशत्वनिरूपणम्	४४६–४४६
प्रकृतेरन्तर्यामित्वनिरासकस्य "न च स्मार्तं" इति सूत्रस्य जीवस्य तन्निरासकस्य "शारीरश्च" इत्यस्य च व्याख्यानं, विष्णुपक्षे शरीरशब्दार्थस्याविरोधव्युत्पादनं च	४४७–४४८
चन्द्रिकाप्रकाशयोः—	
पूर्वाधिकरणसंगतिः	४४९–४५०
चिन्तापरम्पराप्रदर्शनेन विषय-संशयटीकाविवरणं, अस्पष्टांशे फलफलिभावकथनं च	४५०–४५२
पूर्वपक्षे—	
अन्तर्यामिणः प्रकृतित्वे अन्तर्यामिणि श्रुतपृथिव्यादिशरीरत्वस्य पृथिव्याद्यात्मकतारूपत्वाश्रयणेन हेतूकरणम्	४५२
"दिशश्शरीरं" इत्यादौ दिगाद्यात्मकत्वं दिगादिशरीरत्वमिति विवक्षायां प्रकृतेरप्राकृतदिगाद्यात्मकत्वासंभवेनोक्तशरीरत्वविवक्षा न संभवतीति शङ्का	४५२–४५३

विषयः पृष्ठसङ्ख्या

दिगाद्यभिमानिदेहस्य प्राकृतत्वेन दिगादिशरीरत्वमात्रस्य गौणत्वेऽपि वाक्यान्तरे मुख्यस्य संभवात्प्रकृतिपूर्वपक्षसंभवोपपादनम् ४६३

सर्वत्र शरीरशब्दार्थासंभवाद्ब्रह्मपक्षत्यागः ४५३

नित्यत्वाद्दिगादेश्शर्यमाणत्वरूपशरीरशब्दयोगार्थस्याप्यसंभवव-र्णनम् ४६३

"यः पृथिव्यां तिष्ठन्" इति पृथिव्याद्याश्रितत्वस्य, "पृथिवीं यमयति" इति पृथिव्यादिनियामकत्वस्य, "आत्मानं यमयति" इत्यात्मनियामकत्वस्य, "यमात्मा न वेद" इति आत्माविदितत्वस्य, "द्रष्टा श्रोता" इति द्रष्टृत्वादेश्च प्रकृतौ संभवोपपादनेन बाधकाभावव्युत्पादनम् ४६३–४५४

जीवमात्रमन्तर्यामीत्येव पूर्वपक्षो न प्रकृतिरितीति परकीयमतद्वयोक्तिदूषणम् ४६५–४०६

शरीरशब्दस्य देहार्थत्वमुपेत्य "शारीरश्च" इति सूत्रोक्तजीवपूर्वपक्षविवरणं, तत्र भामत्युक्तदोषानिराकरणं च . ४५६

परोक्तजीवमात्रपूर्वपक्षे दोषनिरूपणम् ४५६–४६७

विष्णुपक्षे शरीरशब्दार्थायोगप्रतिपादनम् ४५७

पृथिव्यादेर्जडत्वेन तदविदितत्वस्य तदभिमानिनि जीवे संभवोक्तिः, तत्र पृथिव्यादिशब्दस्य तदभिमानिपरत्वाभाववर्णनम् ४५७–४५८

पृथिव्याद्यन्तरत्वस्य, आत्मनियामकत्वस्य, आत्माविदितत्वस्य च अभिमानिजीवेषु व्युत्पादनम् ४५८

विषयः पुटसङ्ख्या

"य आत्मनि" इत्यत्राप्यात्माभिमानिजीवस्यैवान्तर्यामित्वमिति पक्षान्तरोक्तिः ४५८–४५९

सिद्धान्ते—

अधिदैवादिप्रकरणेषु पृथिव्याद्यविदितत्व-तदन्तरत्वरूपनिरवकाशविष्णुलिङ्गबलेन पृथिव्यादिशरीरत्वमपि विष्णुपक्षे नेतुं शक्यमिति भावेन उक्तस्य पृथिव्याद्यविदितत्वस्य कारिकया निरवकाशत्वोपपादनम् ४५९

कारिकार्थविवरणम् ४५९-४६०

पृथिव्याद्यन्तरत्वस्य निरवकाशत्वनिरूपणम् ४६१

सूत्रभाष्याद्युक्तस्योपलक्षणत्वाभिप्रायेण स्वयं समाख्योक्तिः ४६१–४६२

समाख्याया भाष्यादावनुक्तेर्हेतुकथनपूर्वकं सूत्राभिमतत्वनिरूपणं प्रकाशे ४६२

पृथिव्यादिशरीरत्वसावकाशत्वस्य कारिकायां संग्रहेण, बहिः तद्विवरणेन च व्युत्पादनम् ४६२–४६४

सूत्रक्रमस्योपपादनम् ४६६

एतद्भाष्यस्य बृहदारण्यकभाष्यविरोधादिपरिहारः ... ४६६–४७०

मतान्तराधिकरणपरीक्षायां—

अद्वैत्युक्ताधिकरणखण्डनम् ४७०–४७८

अद्वैतिमते रामानुजमते च सूत्राक्षरार्थानुपपत्तिनिरूपणम् ४७८–४८१

केषांचिदधिकरणस्यानुवादेन दूषणं प्रकाशे ... ४७८–४८१

अतीतानागतानेकभेदसूत्राणामद्वैतविरोधितानिरूपणेनोपहासः ४८१–४८३

प्रकाशे शैवाधिकरणनिरासः ४८२–४८३

विषयः पुटसङ्ख्या

अदृश्यत्वाधिकरणे—

भाष्यटीकयोः—

संगति-विषयवाक्य-विषय-संशय-पूर्वपक्षाभिधानपूर्वकं सूत्रावतरणम् ४८४–४८६

पूर्वपक्षविशदीकरणम् ४८६–४८६

सूत्रव्याख्यानपूर्वकं सिद्धान्तकथनम् ४८६–४८७

प्रकृतिविरिञ्चयोरदृश्यत्वादिगुणकत्वनिराकरणपरस्य "विशेषणभेदव्यपदेशाभ्यां च" इति सूत्रस्य विवरणम् ४८७–४८९

"रूपोपन्यासाच्च" इति सूत्रविवरणम् ४८९–४९०

चन्द्रिकाप्रकाशयोः—

अनन्तरसंगतिः ४९१–४९२

विषय-संशयटीकाविशदीकरणाय चिन्तायाः फलफलिभावस्य च प्रदर्शनम् ४९२–४९४

पूर्वपक्षे—

जडप्रकृति-चित्प्रकृति-चतुर्मुख-रुद्राणां प्रत्येकं हेतुभिरदृश्यत्वादिगुणकत्वस्य उपपादनपूर्वकं ब्रह्मणः प्रतिषेधः ४९४–६००

"तथाऽक्षरात्संभवतीह विश्वम्" इति "अक्षरात्परतः परः" इति च वाक्ययोरविरोधसंपादनम् ... ६००

परविद्याविषयत्वस्य बाधकतापरिहारः ६००–६०२

सिद्धान्ते—

परविद्याविषयत्वस्य विष्ण्वेकनिष्ठत्वोपपादनम् ६०२–६०४

परोक्तस्य उपनिषदां परविद्यात्वस्य तदितरऋगादीनामपरविद्यात्वस्य च निरासः ६०४

विषयः — पुटसङ्ख्या

'परोक्षज्ञानमपरविद्या, भक्तिरूपमपरोक्षज्ञानं परविद्या' इति केषांचिन्मतस्य निरासः ६०६

विद्याशब्दस्य भावे क्यबन्तत्वेन ज्ञाने मुख्यत्वात्पराशरवचनानुसाराच्च न ज्ञानकरणार्थकत्वमिति शङ्कायाः परिहारः ६०६–६०७

पूर्वपक्षप्रापकेषु,

ऊर्णनाभ्यादिदृष्टान्तस्य निमित्तत्वेऽपि संभवेन, 'ब्रह्मविद्यां' इत्यत्र ब्रह्मशब्दस्य चतुर्मुखपरत्वेन सावकाशीकरणम् ६०६

"यस्सर्वज्ञः" इत्यत्रत्यसर्वज्ञशब्दस्य, उत्तरार्धोक्तचतुर्मुखजनकत्वायोगेन रुद्रप्रापकेशशब्दोपोद्बलकत्वाभाववर्णनम् ६०७–६०८

सर्वज्ञपदस्य 'सर्ववित्' इत्यनेन पुनरुक्तिपरिहारस्य टीकोक्तस्य स्मारणम् ६०८

सर्वज्ञत्वविशेषणस्य चित्प्रकृति-चतुर्मुख-रुद्राणामक्षरत्वनिषेधे हेतुत्वसंभवेऽपि भाष्ये जडप्रकृतिमात्रनिषेधकत्ववर्णने हेतूक्तिः ६०९

भेदव्यपदेशस्य चित्प्रकृतिनिषेधेऽपि हेतूकर्तुं शक्यत्वेऽपि भाष्ये चतुर्मुखरुद्रमात्रनिषेधे हेतूकरणे हेतूक्तिः ... ६०९

सौत्रस्येतरशब्दस्य जडप्रकृति-चतुर्मुख-रुद्रपरत्वेन 'इतरौ' इति द्विवचनानुपपत्तेश्चतुर्मुखरुद्रयोश्चेतनत्वेनैकीकारमाश्रित्य परिहारः ५०९–६१०

"अक्षरात्परतःपरः" इति निकृष्टत्वेन श्रुतत्वरूपबोधकस्य अक्षरभेदे प्रमाणप्रदर्शनेन परिहारः ५१०

विषयः पुटसङ्ख्या

"तथाऽक्षरात्" इत्यत्र "अक्षरात्परतः परः" इत्यत्र च विद्यमानयोरक्षरशब्दयोर्विभिन्नार्थत्वे प्रकृतहानाप्रकृतस्वीकारदोषस्य न्यायतः परिहारः ५१०–६१२

सूत्रक्रमोपपादनम् ६१२

मन्तराधिकरणपरीक्षायां —

अद्वैतिपूर्वपक्षसिद्धान्तयोः भामत्युक्तयोरनुवादः ५१३–६१४

पादसंगत्याभावादिना तद्दूषणम ६१४–६१६

"धर्मोक्तेः" इति सौत्रसिद्धान्तहेत्वनानुगुण्येन प्रथमसूत्रार्थनिरासः ६१६–६१६

सौत्रभेदव्यपदेशविरोधादिना द्वितीयसूत्रार्थनिरासः ... ६१६–६१७

तृतीयसूत्रार्थनिरासः ६१७

सौत्रपदन्यासस्याद्वितप्रातिकूल्तावर्णनम् ६१८

रामानुजीयाधिकरणस्य अक्षरात्परतः परे जीवत्वशङ्कानुदयोपपादनेन निरासः ६१८–६१९

शैवाधिकरणखण्डनं प्रकाशे ६१९–६२०

टीकाक्षरार्थवर्णनम् ६२०–६२१

वैश्वानराधिकरणे—

भाष्यटीकयोः—

संगति विषय-संशय पूर्वपक्षोक्तिपूर्वकं प्रधानसूत्रमवतार्य सूत्रव्याख्यानेन सिद्धान्ताविष्कारः ६२२–६२३

आत्मशब्दस्यामुख्यवृत्त्या अन्नयादिपरत्वसंभवेन तेषामेव वैश्वानरत्वशङ्कानिरासकद्वितीयसूत्रव्याख्यानम् ६२३–६२४

वैश्वानरस्य विष्णुत्वमाक्षिप्य समादधतस्तृतीयसूत्रस्य व्याख्यानम् ६२४–६२८

विषयः ... पुटसङ्ख्या

पुरुषसूक्तसमाख्याया वैश्वानरस्य विष्णुत्वे प्रयोजकत्वोपपादनाय पुरुषसूक्तस्य विष्णुपरतायास्समर्थनम् ६२८–६२९

पुरुषसूक्त-वैश्वानरविद्ययोर्विरुद्धविषयकत्वान्न समाख्यात्वसंभव इति शङ्काया निरासः ६२९

वैश्वानरशब्दस्य प्रसिद्ध्यनुसारेण देवता-भूतपरत्वशङ्कनिरासकस्य चतुर्थसूत्रस्य व्याख्यानम् ६२९

अग्निवैश्वानरादिशब्दानां भगवन्मात्रपरत्वे प्रसिद्धिविरोधापत्तेरग्न्यादिवाचकत्वमङ्गीकार्यमिति शङ्कां जैमिनिमतानुरोधेन परिहरतः पञ्चमसूत्रस्य विवरणं, अन्यमतानां व्यासमताविरोधित्वनिरूपणं च ६२९–६३०

सूक्तादिनियमस्य मतभेदेन ब्रह्मपरत्वाविरोधेनोपपत्तिं वर्णयतः षष्ठादिसूत्रचतुष्टस्य व्याख्यानम् ६३०–६३३

चन्द्रिकाप्रकाशयोः—

टीकासुधयोर्वैश्वानरशब्दस्यान्यत्रप्रासिद्धतोक्तेः सूत्रविरुद्धताशङ्कायां उत्तानदृशां समाधानद्वयस्यानुवादपूर्वकं दूषणम् ६३४–६३९

टीकोक्तेर्लोकतोऽन्यत्र प्रसिद्धताभिप्रायतां, सौत्रसाधारण्योक्तेरन्यत्रप्रासिद्धे विष्णुलिङ्गानां च निरवकाशतया तुल्यबलताभिप्रायतां च प्रदर्श्य स्वाभिमतपादसंगतिव्युत्पादनम् ६३५–५३६

टीकायां वैश्वानरशब्दस्य नामत्वोक्तेर्मूलप्रदर्शनपूर्वकं अणुभाष्यविरोधशङ्कानिरासः ५३६–६३७

पूर्वाधिकरणसंगतिः ५३७

चिन्ताप्रदर्शनेन विषय-संशयटीकाविवरणम् ५३७–६३९

विषयः पुटसङ्ख्या

पूर्वपक्षे—

अग्निदेवता-भूतप्रापकाणां विष्णुप्रापकसमाख्यादितः प्राबल्य-निरूपणम् ५३०–५४२

पूर्वपक्षप्रापकाग्नयादिश्रुतेरन्यत्रप्रसिद्धयोगापातेन निरवकाशत्वेनापि प्राबल्यव्युत्पादनम् ५४२–५४३

"जगद्वाचित्वात्" इति, "शरीररूपकाविन्यस्तगृहीतेः" इति, "समाकर्षात्" इति च वक्ष्यमाणन्यायैरग्न्यादिशब्दानां ब्रह्मणि मुख्यत्वेऽप्यन्यत्रप्रसिद्धिव्यवहारोपपत्तिशङ्कानिरासः ५४४–५४९

इन्द्राग्न्यादिशब्दानां ब्रह्मणि मुख्यत्वे सूक्तव्यवस्थाद्यसंभवापादनम् ५४९

अग्निश्रुत्यादीनां विष्णुप्रापकेभ्यः प्राबल्यवचनस्य वैश्वानरशब्दस्य साधारण्यप्रतिपादकसूत्रभाष्यटीकाविरोधपरिहारः ५४९–५५०

टीकायां लिङ्गस्य निरवकाशत्वोक्तेष्टीकान्तरानुसारेण भाववर्णनम् ५५०

टीकादिस्वारस्याय पूर्वपक्षान्तरोक्तिस्तत्फलाभिधानं च ५५०–५५१

सिद्धान्ते—

आत्मशब्दादीनां विष्णुत्वासाधकतायाः उपपादकतयोक्तयोर्व्यवहारानुपपत्तिसूक्तादिव्यवस्थानुपपत्त्योर्मध्ये व्यवहारान्यथानुपपत्तेः व्यवहारगत्युक्त्या परिहारं वक्तुमावश्यकप्रमेयसंग्रहः ५५१–५६२

कारिकाविवरणेनान्यत्र व्यवहारोपपादनम् ५६२–५६४

सूक्तादिव्यवस्थानुपपत्तेः परिहाराय "अभिव्यक्तेः" इत्या-

विषयः	पुटसङ्ख्या
दिसूत्रोक्तसूक्तादिव्यवस्थाहेतूनां न्यायबलेन विवरणम्	६६४–६६८
आवश्यकस्थलेषु अन्वयप्रदर्शन-सूत्राक्षरार्थवर्णन-प्रतिपाद्यभेद-निरूपण-विपरीतक्रमायोगव्युत्पादनैः यथास्थितसूत्रक्रमवर्णनम्	६६८–६६०
पञ्चमप्रभृतिसूत्राणामास्मिन् पादे निवेशनानौचित्यशङ्कायास्त्रेधा परिहारः	६६०–६६१
मतान्तराधिकरणपरीक्षायां—	
अद्वैत्युक्ताद्यसूत्रार्थस्यानुवादेन निरासः, प्रकाशे तदीयाधिकरणानुवादश्च	६६१–६६३
रामानुजीयाद्यसूत्रार्थनिरासस्तदधिकरणस्य प्रकाशेऽनुवादश्च	६६३–६६४
मतद्वयेऽपि द्वितीयादिसूत्रार्थानां क्रमेणानुवादपूर्वकं निरासः	६६५–६७१
एतदधिकरणस्याद्वैतप्रतिकूलतावर्णनम्	६६९
टीकाक्षरार्थवर्णनम्—	६७१–६७५

श्रीः

अथ टीका–चन्द्रिका–प्रकाशसमेते श्रीमद्ब्रह्मसूत्रभाष्ये प्राणाधिकरणम्.

॥ ओम् अत एव प्राणः ओम् ॥

"तद्वै त्वं प्राणो अभवः महान्भोगः प्रजापतेः । भुजः करिष्यमाणः यद्देवान्प्राणयो नव" इति महाभोगशब्देन परमानन्दत्वं प्राणस्योक्तम् ।

तत्त्वप्रकाशिका.

अन्यत्राप्येवमिति ज्ञापनार्थमत्र सूत्रमादावेव पठति—अत एवेति । अत्र लोकतोऽन्यत्रप्रसिद्धप्राणनाम्नो विष्णौ समन्वयसमर्थनादस्ति शास्त्रादिसङ्गतिः । विषयवाक्योदाहरणपूर्वकं सङ्गतिं विषयसंशयौ च सूचयति—तदिति । यदुदितमानन्दमयत्वं विष्णोः, तत्कस्यचित्प्राणस्य "तद्वै त्वं" इति वाक्ये महाभोगशब्देन प्रतीयते । यस्माद्ब्रह्मणो भोगान् करिष्यमाणः कुर्वाणोऽकार्षीश्च, तस्मात्त्वं महाभोगोऽभवः, स्वस्य महाभोगाभावे परस्मै तद्दानानुपपत्तेः । यस्मात्पायुगुह्यैक्येन नवेन्द्रियाभिमानिनो देवानचेष्टयश्चेष्टयसि च, तस्मात्त्वं प्राणश्चाभव इति । तस्य च प्राणस्य विष्णोरन्यत्वेऽन्य-

स च प्राण· प्रसिद्धेर्वायुरित्यापतति । न चैवम्, यतो विष्णुरेव प्राणः ।

तत्त्वप्रकाशिका

स्यैवानन्दमयत्वं स्यादित्ययं निर्णयो भवति । स प्राणोऽत्र विषयः। किं विष्णुरुत वायुरिति सन्देहः । महाभोगत्वं प्राणशब्दस्यान्यत्र प्रसिद्धिश्च सन्देहबीजमिति भावः । तत्र सयुक्तिकं पूर्वपक्षयति—**स चेति** । स प्राणो वायुर्भवेत्, प्राणशब्दस्य तस्मिन् प्रसिद्धेः। न च महाभोगत्वं श्रुतिबाधकं, श्रुतितो लिङ्गस्य दौर्बल्यात् । न च सावकाशत्वादिना बाध्यबाधकभावः, महाभोगवत्त्वस्यैव वायौ साव-काशत्वात् । प्राणश्रुतेर्विष्णावनकाशात् । न हि तावत्प्राणप-दस्य तत्र रूढिरस्ति । नाऽपि योगस्सम्भवति, प्राणशब्दप्रवृत्तिनिमित्त-जीवनकारणत्वस्यान्वयव्यतिरेकाभ्यां वायावेव दर्शनात्,

यत्प्राप्तिर्यत्परित्याग उत्पत्तिर्मरणं तथा ।

इत्यादेः । तथा च निरवकाशप्राणश्रुत्या महाभोगत्वलिङ्गस्य सावकाशस्य सुतरां बाधोपपत्तेर्वायुरेवायं प्राणः प्रागुक्तानन्दम-यश्च, प्राणशब्दस्यान्यत्र प्रवृत्तावपि "मुखे मुख्यः प्रकीर्तितः" इति मुख्यवायावेव मुख्यत्वात्स एव प्राणो भवेदिति भावः । सिद्धान्तयति—**न चेति** । कुतो नैवमित्याशङ्कायां हेतुतया सूत्रं व्याचष्टे—**यत इति** । यतोऽयं प्राणो विष्णुरेवेति स एवान-न्दमयोऽतो वायुरयं प्राणः आनन्दमयश्चेत्येतन्न युक्तमित्यर्थः ।

'अत एव' "श्रीश्च ते लक्ष्मीश्च पत्न्यौ अहोरात्रे पार्श्वे" इत्यादितल्लिङ्गादेव ॥ ९ ॥

तत्त्वप्रकाशिका

कुतोऽयं प्राणो विष्णुरेवेत्यतः, सौत्रं हेतुमुपादाय व्याचष्टे–अत एवेति । श्रीलक्ष्मीपतित्वादिविष्णुलिङ्गात्प्राणो विष्णुरेवेत्यर्थः । वक्षस्स्थलाश्रिता श्रीरिति सम्प्रदायविदः । कथं श्रुत्या पूर्वपक्षिते सति लिङ्गेन निर्णय इति चेत्, लिङ्गस्य निरवकाशत्वात्, प्राणश्रुतेर्विष्णावपि सावकाशत्वात्, निरवकाशेन सावकाशस्य बाधोपपत्तेः । रूढियोगयोरभावात् कथं विष्णौ प्राणश्रुतेरवकाश इति चेन्न, "ईशानः प्राणदः प्राणः" इत्यादिविद्वद्रूढेर्महायोगस्य च सत्त्वात् । न च जीवनस्य प्राणान्वयव्यतिरेकविरोधः, प्राणगतजीवनकारणत्वस्याऽपि भगवदधीनत्वात् । तथा च श्रुतिः—

न प्राणेन नापानेन मर्त्यो जीवति कश्चन ।
इतरेण तु जीवन्ति यस्मिन्नेता उपाश्रितौ ॥

इति । तस्मादाध्यात्मिकाशेषशब्दोपलक्षकप्राणशब्दवाच्यो हरिरेवेति सिद्धम् ॥ ९ ॥

चन्द्रिका

॥ ओम् अत एव प्राणः ओम् ॥

अत्र आध्यात्मिकप्राणादिशब्दसमन्वय उच्यते । अत्रापि प्राणशब्दप्रवृत्तिनिमित्तं जीवनादिहेतुत्वमन्वयव्यतिरेकाभ्यां प्राणशब्दार्थत्वेन प्रसिद्धस्य वायोरेवेति स एव प्राणशब्दवाच्यो न तु विष्णुरित्याद्यधिकाशङ्कानिरासेन पूर्वन्याय एवातिदिश्यत इति आति-

प्रकाशः

॥ ओम् अत एव प्राणः ओम् ॥ "आध्यात्मिकाशेषशब्दोपलक्षकप्राणशब्दवाच्यो हरिः" इति टीकां मनसि निधायाधिकरणोपाधिमाह—**अत्रेति** । प्राधान्यात्प्राणशब्दस्य सूत्रे मुखतः कीर्तनमिति भावः। अत्र भाष्यदिशाऽऽनन्दमयाधिकरणानन्तर्यप्रतीतेः "अतिदेशो हि तादृशः" इत्यनुभाष्यदिशाऽन्तरधिकरणेन सङ्गतिमाह—**अत्रापीति** । न केवलं पूर्वत्रेत्यपेरर्थः । 'जीवनादिहेतुत्वमन्वयव्यतिरेकाभ्यां वायोरेव' इत्यन्वयः । **इत्यादीति** । "प्रमाणाश्रिता तु" इत्यादिना वक्ष्यमाणदिशाऽऽदिशब्दः । तर्हि पूर्वानन्तर्ये को हेतुरित्यतः पूर्ववैषम्यमाह—**भूतेति** । न च भाष्यविरोध इति शङ्क्यं, तस्य, "तद्वै त्वं प्राणः" इति प्राणस्य विष्णुन्यत्वे महाभोगशब्दोक्तं पूर्णानन्दत्वमपि तस्यैवेत्यानन्दमयोऽप्यन्यस्स्यादिति पूर्वपक्षे तदाक्षेपेण सिद्धान्ते तत्समाधानेन प्रयोजनमात्रपरत्वोपपत्तेः । न च पूर्वं ब्रह्मशब्दादिना विष्णुनिष्ठतयाऽवधारितस्यानन्दमयत्वरूपपूर्णानन्दत्वस्यात्र प्राणे श्रवणात् प्राणो विष्णुरेवेति वैपरीत्यस्यापि सम्भ-

चन्द्रिका

देशिकी अवान्तरसङ्गतिः । भूताकाशस्य त्ववकाशहेतुत्वेऽन्वय-व्यतिरेकौ न स्तः, परिच्छिन्नस्य तस्याभावेऽपि क्वचिदवकाश-दर्शनात् । यद्यप्यत्र "तद्वै त्वं प्राणः" इत्यत्र प्राणस्य विष्णोः अन्यत्वे "प्राणं देवाः" इत्यादावप्यन्यत्वं स्यात् इत्यपि

प्रकाशः

वान्नेदं प्रयोजनं युक्तमिति वाच्यं, टीकोक्तदिशा सावकाशेन लिङ्गमात्रेण निरवकाशप्राणश्रुतिबाधायोगात् । उक्तं च टीका-यां—"न च महाभोगत्वं श्रुतिबाधकं, श्रुतितो लिङ्गस्य दौर्ब-ल्यात्" इति । कथं तर्ह्यानन्दमये श्रुतस्य ब्रह्मशब्दादेर्बाध इति चेत्, अत्रत्यपूर्वपक्षन्यायेनान्यत्रप्रसिद्धनिरवकाशप्राणश्रुतिसा-हचर्येणानन्दमयत्वस्यान्यत्रप्रसिद्धत्वापत्त्या तद्बलेन ब्रह्मशब्दादे-र्मुख्यप्राण एव कथं चित्सावकाशत्वादिति भावः । भाष्योक्तं फलं प्रकारान्तरेणाक्षिप्य समाधत्ते—यद्यपीति । नन्वेवमयं प्राणोऽ-न्यश्चेत् "प्राणं देवा अनुप्राणन्ति" इत्युक्तोऽप्यन्यस्स्यादिति साक्षात्प्राणमयाक्षेपसमाधानेन साफल्यसम्भवे महाभोगत्वमुखेनाक्षे-पस्तु वक्रो नाश्रयणीय इति शङ्कार्थः । न चात्र वक्ष्यमाण-रीत्या प्राणश्रुतिबाहुल्यापादनसाहित्यादिरूपस्यैव तत्र विशेषहे-तोरभावान्न तदाक्षेप इति वाच्यं, एकत्र निर्णीतस्यैवार्थस्य बाध-काभावे सर्वत्र ग्राह्यत्वात् । न च तत्रविष्णुपरत्वं बाधकं, अद्या-प्यसिद्धेः । न च तत्र मुक्तप्राप्यत्वादिब्रह्मलिङ्गमेव बाधकमिति

चन्द्रिका

प्रयोजनं वक्तुं शक्यम् । तथाऽपि सूत्रे कण्ठोक्तानन्दमयत्वाक्षेपो दर्शनीय इति भाष्यादौ तदुक्तिः । अत एव आनन्दमयोक्तायाः विष्णोः प्राणतायाः इहाक्षेपान्न तेन गतार्थता, नापि प्राणशब्दस्योभयत्रप्रसिद्धता । अत्र प्राणः किं मुख्यवायुः उत

प्रकाशः

वाच्यं, अन्यत्र प्रसिद्ध्या ब्रह्मलिङ्गानामन्यथा नयनस्यात्रेव तत्रापि तुल्यत्वादिति उक्तत्वात् । **कण्ठोक्तेति** । उपलक्षणमेतत्, महाभोगत्वमुखेनानाक्षेपे विष्णुधर्मतया निर्णीतेन महाभोगत्वेन विष्णुरेव प्राण इति शङ्का स्यात् । सा माभूत्, महाभोगत्वस्यापि वायुधर्मत्वादिति दर्शयितुमित्यपि ध्येयम् । एवं हि प्राणत्वस्यानाक्षेपे गतार्थतादिरित्यत आह—**अत एवेति** । 'प्राणतायाः' "कोह्येवान्यात्कः प्राण्यात्" इत्युक्तायाः । अन्यथा तत्रैव विष्णोर्जीवनहेतुत्वरूपप्राणदत्वस्य सिद्धत्वादिह सिद्धान्ते तत्समर्थनं न स्यादिति भावः । **नापीति** । 'अत एव' इत्यनुवर्तते । प्राणपदप्रवृत्तिनिमित्तस्य विष्णावाक्षेपेण प्राणशब्दस्य भगवति वृत्तेरसम्मतेः । अन्यथा "आकाशोऽर्थान्तरत्वादि" इत्यत्र पूर्वपक्षे "आकाश इति होवाच" इत्यत्र विष्णोराकाशतायाः अनाक्षेपेणोभयत्रप्रसिद्धिवदुभयत्रप्रसिद्धता स्यादिति भावः । एवं संगतिमुक्त्वा भाष्योक्तप्रयोजनटीकां च समर्थ्य विषयसंशयटीकां व्यनक्ति—**अत्रेति** । "तद्वै त्वं प्राणोऽभवः महान् भोगः

चन्द्रिका

ब्रह्म इति चिन्ता । तदर्थं किं प्राणश्रुतिप्रसिद्ध्यनुसारेण श्रीपतित्वादिलिङ्गं बाध्यं किं वा विपरीतमिति । तदर्थं प्रसिद्धिबाधे किं श्रुतेर्मुख्यत्वहानिरुत नेति । तदर्थं प्राणशब्दप्रवृत्तिनिमित्तं जीवनहेतुत्वं किं ब्रह्मणि नास्ति उतास्तीति । तदर्थं किं जीवनं मुख्यप्राणान्वयव्यतिरेकानुविधाय्युतेश्वरान्वयव्यतिरेकानुविधायीति । तथा "भर्ता सन् भ्रियमाणो बिभर्ति" इत्यनुवाकस्थेन "तद्वै त्वं

प्रकाशः

प्रजापतेः भुजः करिष्यमाणः यद्देवान् प्राणयो नव" इति तैत्तिरीये श्रुतः प्राणो विषय इति ध्येयम् । **मुख्येति** । प्राणशब्दस्य वायुवृत्त्यादिसाधारणत्वेऽपि तस्यात्रासम्भवप्रकारस्य वक्ष्यमाणत्वात् 'मुख्यवायु' इत्युक्तम् । **विपरीतमिति** । लिङ्गानुसारेण श्रुतिर्बाध्येत्यर्थः । **जीवनेति** । "यद्देवान् प्राणयो नव" इति वाक्यशेषे तथोक्तेरिति भावः । **जीवनमिति** । 'जीवानां' इति शेषः । यदि जीवनं मुख्यान्वयव्यतिरेकानुविधायि, तदा प्राणशब्दप्रवृत्तिनिमित्तं ब्रह्मणि नेति मुख्यत्वहानेर्न श्रुतिबाधः कार्य इति वायुरेवेति पूर्वपक्षे फलम् । यदा तु विपरीतं तदा ब्रह्मेति सिद्धान्ते फलम् । इयं च चिन्तापरंपरा 'प्राणस्तत्तु' इति सौत्रप्रतिज्ञांशव्यावर्त्यप्रमेयाश्रिताभ्यधिकाशङ्कोपयुक्ता । एषा च शङ्काऽनुव्याख्याने कण्ठोक्तेति तदुपयुक्तचिन्तैव प्रथमं विशदीकृता । हेत्वंशव्यावर्त्यप्रमाणाश्रिताभ्यधिकाशङ्कोपयुक्तां चिन्तामाह—**तथेति** । तत्रैवं द्रष्टव्यं—प्राणो मुख्यवायुरुत ब्रह्मेति

चन्द्रिका

प्राणः" इति वाक्येनोक्तः प्राणः किं "अद्भ्यस्सम्भूतः" इत्यनुवाकस्थेन "ह्रीश्च ते लक्ष्मीश्च पत्न्यौ" इति वाक्येन उक्तादन्यः किं वा अनन्य इति। नन्वत्र प्राणो न तावत् जड-

प्रकाशः

चिन्ता। तदर्थं ब्रह्मत्वसाधकं लिङ्गादिकं नास्त्युतास्तीति। तदर्थं "भर्ता सन् भ्रियमाणः" इत्युक्तचिन्तेति। यदा त्वन्यस्तदा ब्रह्मलिङ्गमत्र नास्तीति साधकाभावाद्वायुरेवेति पूर्वपक्षे फलम्। यदा त्वनन्यस्तदा ब्रह्मलिङ्गसत्त्वाद्ब्रह्मेति सिद्धान्ते फलमिति ध्येयम्। अत्रैवं पूर्वपक्षक्रमः—प्राणशब्दस्य वायावेव प्रसिद्धेः वायुरेव प्राणो न विष्णुरिति। यद्यपि निरवकाशलिङ्गैर्लोकप्रसिद्धिबाध इह पूर्वत्र च अविशिष्टः, विषयवाक्यभेदेन च नाधिकरणभेदः। तथाऽपि

…………अध्यात्ममन्वयव्यतिरेकतः।

प्राणादिहेतुतादृष्टेरतिदेशो हि तादृशः॥

इत्यनुव्याख्यानोक्तरीत्या "प्राणशब्दप्रवृत्तिनिमित्तजीवनकारणत्वस्यान्वयव्यतिरेकाभ्यां वायावेव दर्शनात्" इति टीकोक्ताभ्यधिकाशङ्कया पूर्वपक्षोत्थानसम्भवो वाच्यः। स चायुक्तः, प्राणो जडवायुरिति वा मुख्यवायुरेवेति वा पूर्वपक्षयितव्यत्वात्। तत्राद्यस्त्वयुक्तः, अन्त्ये हेतोरासिद्धिरिति भावेन "प्राणशब्दस्यान्यत्र वृत्तौ" इत्यादिटीकां विवृण्वन्नाक्षिपति—नन्विति।

चन्द्रिका

रूपो वायुरिति पूर्वः पक्षः, जडं प्रति "त्वं प्राणो अभवः" इत्याद्युक्त्ययोगात् । "ओषधे त्रायस्वैनम्" इत्यादेश्च स्वमतेऽभिमानिदेवतापरत्वात्, मीमांसकमते चान्यपरत्वेन अचेतनसम्बोधनपरत्वाभावात् । नापि मुख्यप्राण इति, जीवनस्य तदन्वयव्यतिरेकानुविधानादर्शनेन अधिकाशङ्काऽयोगात् । ननु आकाशाधिकरणपूर्वपक्षे जडस्याप्याकाशस्य आनन्दमयत्वादिकमिव, अत्रापि जडस्याप्यभिमानिद्वारा सम्बोधनादि युक्तम् । न च मुख्ये मुख्यत्वा-

प्रकाशः

जडं प्रतीति । चेतनं प्रतीव सम्बोधनादिरूपोक्त्ययोगादित्यर्थः । एतेन टीकायां मुख्यत्वोक्तिरुपलक्षणमिति सूचितम् । ननु "ओषधे त्रायस्व" इत्यादौ जडस्यापि सम्बोधनं दृश्यते इत्यत आह—**ओषध इति** । **अन्यपरत्वेनेति** । "अभिधानेऽर्थवादः" इति मन्त्राधिकरणगुणसूत्रे यत्राचेतना ओषधिग्रावादयस्त्राणश्रवणार्थमामन्त्र्यन्ते, किं पुनर्विद्वांसो ब्राह्मणा इति कर्मसमुत्साहार्थमित्युक्तेरुत्साहपरत्वेनेत्यर्थः । एतेन "नह्यचेतनं प्रति त्वमेवमभव इति बुद्धिमतोच्यते" इति सुधावाक्यं विवृतम् । **तदन्वयेति** । वायुविकारान्वयव्यतिरेकानुविधायित्वस्यैव जीवनादेः प्रतीयमानत्वेन मुख्यान्वयव्यतिरेकानुविधानादर्शनादित्यर्थः । मन्दानां जडानां जडपरत्वेनापि पूर्वपक्षसम्भवभ्रममाशङ्क्य टीकादिविरोधेन निरस्यति—**नन्विति** । **आनन्दमयत्वादिकमिति** । पूर्वत्र स्पष्टमेतत् । 'अस्यापि' मुख्य-

चन्द्रिका

तत्प्राणशब्दस्य कथं जडपरत्वेन पूर्वपक्ष इति युक्तम्, लोकप्रसिद्ध्या पूर्वपक्षयतो ब्रह्मणीव मुख्येऽपि मुख्यत्वज्ञानाभावादिति चेन्न, "मुख्यवायावेव मुख्यत्वात्" इत्यादिपूर्वपक्षटीकया "प्रेरकोऽस्यापि यद्धरिः" इत्याद्यनुव्याख्यानेन च विरोधात् । 'त्वमभवः, करिष्यमाणः, प्राणयः' इत्यादीनां बहूनाममुख्यार्थत्वापाताच्चे तिचेत्, उच्यते—प्रत्यक्षेण जीवनस्य मुख्यप्राणान्वयव्यतिरेकानुविधानाज्ञानेऽपि "तत्प्राणे प्रपन्न उदतिष्ठत्" "तत्प्राण उत्क्रान्तेऽपद्यत" इत्यादिवाक्यात् तज्ज्ञानम् । न च "प्राणस्तथाऽनुगमात्" इति वक्ष्यमाण-

प्रकाशः

प्राणस्यापीत्यर्थः । टीकादेरपि किं मूलमित्यत आह—**त्वमभव इति** । यदुक्तं जडरूपो वायुरिति वा मुख्य इति वा पूर्वपक्ष इति, तत्र त्वदुक्तानुपपत्त्यैव जडायोगान्मुख्य एवेति ब्रूम इति भावेन तत्रोक्तं दोषं परिहर्तुमाह—**उच्यत इति** । "प्राणशब्दप्रवृत्तिनिमित्त" इत्यादिटीकां विवृण्वन् तत्र "यत्प्राप्तिः" इति स्मृत्युक्तिरुपलक्षणमिति भावेनाह—**तदिति** । ब्रह्मणश्शरीरमित्यर्थः । आदिपदेन

यत्प्राप्तिर्यत्परित्याग उत्पत्तिर्मरणं तथा ।

इत्यादि, "श्रेष्ठश्च" इत्यत्र भाष्यस्थमत्र टीकोक्तं ग्राह्यम् । "तत्प्राणे" इति वाक्यं विष्णुपरं न वायुपरम् । अतोऽस्मादपि न जीवनहेतुत्वज्ञानं मुख्यस्येत्याक्षिपति—**न चेति** । **वक्ष्यमाणेति** ।

चन्द्रिका

न्यायेन "तत्प्राणे" इत्यत्र प्राणो विष्णुरिति युक्तम्, अत्रत्यसिद्धान्तन्यायेन प्राणशब्दप्रवृत्तिनिमित्तं जीवनादिहेतुत्वं विष्णोरङ्गीकृत्य निरवकाशान्यलिङ्गेन तत्र पूर्वपक्षोदयेन तद्विचारस्यैतत्सिद्धान्तोत्तरभावितया एतत्पूर्वपक्षदशायां तत्रत्यसिद्धान्तासिद्धेः, यथा—"आकाशोऽर्थान्तर" इत्यस्य "आकाशस्तल्लिङ्गात्" इत्येतत्सिद्धान्तानन्तरभावितया "आकाशस्तल्लिङ्गात्" इत्येतत्पूर्वपक्षदशायां "आकाशोर्थान्तर" इत्येतत्सिद्धान्तासिद्धिः, तद्वत । एतेन

प्रकाशः

तत्र हि "तावा एताः शीर्षच्छ्रियः श्रिताः" इत्यारभ्य बहुषु स्थलेषु श्रूयमाणः प्राणो विष्णुरन्यो वेति विशये, प्राणसंवादादिलिङ्गात् मुख्यप्राणादिरन्य एवेति प्राप्ते, "तं देवाः प्राणयन्त" इत्यादिना देवोपदेश्यत्वादिविष्णुलिङ्गानामस्मिन्प्रकरणे अनुगमादनुवृत्तेरन्यप्रापकाणामन्तर्यामिणि सम्भवात्प्राणो विष्णुरिति वक्ष्यमाणन्यायेनेत्यर्थः । एतदुपजीवनेन तदधिकरणसिद्धान्तोत्थानादेतत्पूर्वपक्षदशायां तत्रत्यन्यायेनास्य वाक्यस्य न विष्णुपरत्वं शङ्कार्हमिति भावेन समाधत्ते—**अत्रत्येति** । **सिद्धान्तासिद्धेरिति** । अन्यथा स्वर्गकामाधिकरणसिद्धफलान्वयमुपेत्य किं भावार्थस्य फलकरणता किं वा नामार्थस्येति विचारात्मकभावार्थाधिकरणसिद्धान्तेन फलाभावरूपस्वर्गकामाधिकरणपूर्वपक्षानुदयः स्यादिति भावः । **यथाऽऽकाशोऽर्थान्तरेत्यादि** । प्रागेव विस्तृतमेतत् । **एतेनेति** ।

चन्द्रिका

"प्राणस्तथा" इत्यनेन अस्य गतार्थत्वशङ्काऽपि निरस्ता । एतदभावे ब्रह्मणो जीवनहेतुत्वाभावेन तत्र प्राणशब्दस्य मुख्यत्वासिद्धेः । अत एव टीकायां अन्वयव्यतिरेकयोः "यत्प्राप्तिर्यत्परित्यागः" इति स्मृतिरुक्ता । यद्वा—कुलालशरीरस्य घटं प्रतीव मुख्यप्राणशरीरभूतवायोर्जीवनं प्रत्यन्वयव्यतिरेकदर्शनमात्रेण तस्य तत्र हेतुत्वम् । अत एवोक्तं सुधायाम्—"वायुविकारशरीरत्वा-

प्रकाशः

एतत्पूर्वपक्षदशायां तत्रत्यस्य प्राणस्य वायुपरत्वकथनेनेत्यर्थः । अन्यथा "तत्प्राणे" इतिश्रुतेः तत्रैव विष्णुपरत्वसिद्धौ विष्णोरेव श्रौतान्वयव्यतिरेकाभ्यां जीवनहेतुत्वसिद्ध्या प्राणपदमुख्यार्थत्वसिद्धेरेतदनारम्भ एव स्यादिति भावः । तदेव व्यनक्ति—**एतदिति** । वाक्यात्तज्ज्ञानिमित्युक्तपरिहारं टीकारूढं करोति—**अत एवेति** । प्रत्यक्षेण जीवनहेतुत्वस्य ज्ञानायोगादेवेति वा, वचनगम्यत्वादेवेति वाऽर्थः । टीकायां स्मृत्युदाहरणेऽपि वक्ष्यमाणप्राणनयेनागतार्थत्वादि द्योतयितुमस्माभिः श्रुतिरुदाहृतेति हृदयम् । एवं टीकानुरोधेन जीवनहेतुत्वादेर्मुख्याधीनत्वं वाक्यसिद्धमित्युक्त्वेदानीं सुधानुसारेण प्रत्यक्षेणैव सिद्धमित्याह—**यद्वेति** । यथा घटं प्रति कुलालशरीरस्य अन्वयव्यतिरेकदर्शनमात्रेण कुलालात्मनो हेतुत्वं गम्यते, तथेत्यर्थः । **वायोरिति** । जडभूतस्येत्यर्थः । 'तस्य' मुख्यप्राणस्य । 'तत्र' जीवने । **अत एवेति** । शरीरान्वयव्य-

चन्द्रिका

न्मुख्यस्य" इति। ब्रह्मणस्तु सर्वगत्वादशरीरत्वाच्च तस्य वा तच्छरीरस्य वा नास्मदादिशरीरे अभाव इति, न तद्व्यतिरेकाज्जीवनव्यतिरेकः। यद्यपि "अन्तर्यामी" इत्यत्रेशस्य गौणं यौगिकं वा शरीरमस्तीति वक्ष्यते, तथाऽपि न जीवनव्यतिरेकस्य गौणा-

प्रकाशः

तिरेकदर्शनमात्रेण तच्छरीरिणो देहित्वावगमादेवेत्यर्थः। एतेन टीकायामपि 'दर्शनात्' इत्यस्य प्रत्यक्षेण दर्शनादित्यर्थः। स्मृत्युक्तिश्चाभ्युच्चयत्वेनेत्यपि सूचितम्। ननु ब्रह्मणोऽप्येवं किं न स्यादित्यतः "वायावेव दर्शनात्" इति टीकास्थावधारणव्यावर्त्यं विवृण्वंस्तत्किं प्रत्यक्षादिसिद्धाभ्यामन्वयव्यतिरेकाभ्यां जीवनहेतुत्वं विष्णोरुच्यते अथ श्रुत्येति विकल्पौ हृदि निधायाद्य आह—**ब्रह्मणस्त्विति**। **सर्वगतत्वादिति**। "स एवाधस्तात्स उपरिष्टात्" "सर्वगतं सुसूक्ष्मं" "अशरीरः प्रज्ञात्मा" इत्यादेरिति भावः। **अभाव इति**। नन्वक्षराधिकरणे अणुत्वस्यापि वक्ष्यमाणत्वात्तद्व्यतिरेकोऽपि सम्भवतीति चेन्न, सर्वगतत्वासमानाधिकरणाणुत्वस्यैव व्यतिरेकप्रयोजकत्वादित्याशयात्। नन्वन्तर्याम्यधिकरणे "यस्य पृथवी शरीरं" इत्यादिना सशरीरत्वं वक्ष्यते। तत्कथमशरीरत्वमित्याशङ्क्य निरस्यति—**यद्यपीति**। नन्वथाऽपि "भूमा सम्प्रसादात्" इत्यत्र "उत्क्रान्तप्राणान् शूलेन समासं व्यतिषं दहेत्" इत्युत्क्रमणलिङ्गात्प्राणो वायुरिति प्राप्ते, पूर्ण-

चान्द्रिका

दिशरीरव्यतिरेकानुविधानेन तत्कार्यत्वमतिप्रसङ्गात् । भूमाधिकरणे तु सर्वगतस्यापि ईशस्य अस्मदादिशरीरादुत्क्रमणमस्तीति वक्ष्यते, न तु तत्राभावः । तस्मान्न विष्णोर्जीवनादिहेतुत्वं अन्वयव्यतिरेक-

प्रकाशः

सुखत्वलिङ्गात् उत्क्रमणस्य च रूपविशेषेण विष्णावपि सम्भवाद्विष्णुरेव प्राण इत्युक्तन्यायेन विष्णोरप्यभावो युक्त इत्यत आह—**भूमेति** । यथा शरीरस्थस्यैव चक्षुषो ध्रुवादिमण्डलपर्यन्तं निर्गमनं, तथा विष्णोरपि विचित्रशक्तिवशाद्रूपविशेषादिना देहे सत एव महत्त्वस्य शक्त्याऽणुत्वस्य व्यक्त्या उत्क्रमणोपपत्तेरिति भावः । **अन्वयेति** । प्रत्यक्षेण वा आगमेन वा सिद्धाभ्यामन्वयव्यतिरेकाभ्यां कल्प्यं न भवतीत्यर्थः । यद्यप्यत्र विष्णोर्व्यतिरेकमुपेत्यापि किमन्वयव्यतिरेकौ प्रत्यक्षगम्यौ उतागमगम्यौ । आद्येऽपि किं साक्षादुत शरीरद्वारा । नाद्यः, अयोग्यत्वात् । न द्वितीयः, अशरीरत्वात् । नान्त्यः, "तत्प्राणे प्रपन्ने" इत्यादेरिव तद्बोधकागमस्याभावात् । भावे वा तस्य वायुपरत्वादित्यपि वक्तुं शक्यं भवति । तथाऽप्यस्य स्पष्टत्वादन्वव्यतिरेकासिद्धत्वेऽपि श्रुत्या जीवनहेतुत्वं सिध्यतीत्यस्यावश्यापाकर्तव्यत्वाद्वास्तवाभिप्रायेण व्यतिरेकाभावेनैवान्वयव्यतिरेकाकल्प्यत्वमुक्तम् । एतेन "प्राणादिहेतुतादृष्टेः" इत्यत्र प्राणादिहेतुतायाः परमात्मन्यन्वयव्यतिरेकतोऽदृष्टेरदर्शनादित्यप्यनुव्याख्यायोजना, सुधोक्ता व्य-

चन्द्रिका

कल्प्यम् । नापि श्रुतिसिद्धम्, अन्वयव्यतिरेकानुसारेण "येन जातानि जीवन्ति" इत्यादेर्मुख्यप्राणविषयत्वात् । "इतरेण तु जीवन्ति" इत्यादावितरशब्दस्तु वायुवृत्तिरूपप्रसिद्धप्राणेतरत्वविवक्षया मुख्यप्राणेऽपि युक्तः । केचित्तु—"अन्वयव्यतिरेकाभ्यां हि हेतुता कल्प्या" इति सुधायाः प्रातीतिकार्थं

प्रकाशः

तिरेकायोगेनोपपादनीयेति स्पष्टीकृता । एवं—अदृष्टेरागमेनाप्यदर्शनादित्यर्थान्तरमप्यभिप्रेत्य द्वितीयपक्षमपि निषेधति—**नापीति । मुख्यप्राणेति** । अन्यथा श्रुत्या प्रत्यक्षेण चोक्तान्वयव्यतिरेकानुपपत्तेरिति भावः । ननु च

न प्राणेन नापानेन मर्त्यो जीवति कश्चन ।
इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ ॥

इत्यत्र प्राणस्य जीवनहेतुत्वनिरासपूर्वं विष्णोरेव तदुक्तेस्तद्विरोध इत्यतः, प्राणापानशब्दयोः जडवायुपरत्वेनेतरशब्देन तद्भिन्नचेतनस्य वायोरेव ग्रहणादित्याह—**इतरेण त्विति** । ननु 'नापि श्रुतिसिद्धं' इत्याशङ्कानिरासावयुक्तौ, "अन्वयव्यतिरेकाभ्यां हि हेतुता कल्प्या । न च परमात्मनः प्राणशब्दप्रवृत्तिनिमित्तजीवनादिहेतुतावगमकान्वयव्यतिरेकौ पश्यामः" इति सुधाविरोधात् । तत्रान्वयव्यतिरेककल्प्यताया एव हेतुत्वस्य प्रतीतेरित्युत्तानदृशां भ्रममनूद्य निरस्यति—**केचित्त्विति** ।

चन्द्रिका

गृहीत्वा हेतुताया अन्वयव्यतिरेकमात्रगम्यत्वान्न श्रुतिस्तत्र प्रमाणमिति पूर्वपक्ष्यभिप्राय इत्याहुः । तत्र, यागादेः स्वर्गादौ अहेतुत्वापातात् । अन्ये तु—व्यतिरेकगर्भिताया हेतुतायास्तद्रहिते परमात्मनि अयोगान्न तस्य जीवनहेतुता श्रुत्याऽपि बोधयितुं शक्येति तदभिप्राय इत्याहुः । तदपि न, नित्यविभूनामहेतुत्वापत्तेः । तस्माज्जीवनादिहेतुत्वं न ब्रह्मगतम् । नाप्यन्यगतं तदधीनम्,

प्रकाशः

अन्वयव्यतिरेकमात्रेति । प्रत्यक्षादिसिद्धान्वयव्यतिरेकेत्यर्थः । **तत्रेति** । अन्वयव्यतिरेकद्वारकहेतुतायाम् । **यागादेरिति** । तत्र प्रत्यक्षादिसिद्धान्वयव्यतिरेकयोरप्रसरादिति भावः । एतेन 'न च पश्यामः' इति सुधागतस्यागमेन न पश्यामः, "येन जीवन्ति" इत्यादेरपि मुख्यविषयत्वादित्यपि तात्पर्यमुक्तं भवति । एतेन "अन्वयव्यतिरेकप्रमाणत्वाद्धेतुहेतुमद्भावस्य" इति न्यायविवरणटीकाऽपि क्काचित्कत्वाशयेति दर्शितम् । नन्वीश्वरहेतुत्वे श्रुतिप्रमाणशङ्का, तन्निरासस्तु न मुख्यप्राणविषयत्वमुपेत्य, किं त्वन्यथैवेति भ्रममनूद्य तन्निनिरस्यति—**अन्ये त्विति** । **तद्रहित इति** । नित्यविभुत्वाद्देशतः कालतो वा स नास्तीति भावः । 'नित्यविभूनां' प्रकृत्यादीनाम् । "प्राणशब्दप्रवृत्तिनिमित्तस्य वायावेव" इतिटीकास्थावरणस्य स्वातन्त्र्यरूपस्यापि न विष्णावित्यर्थान्तरमभ्युपेत्याह—**नापीति** । स्वातन्त्र्यस्यापि शब्दप्रवृत्तिहेतुत्वेन प्राणो विष्णुस्स्यात्

चन्द्रिका

धीनम्, जन्मादिसूत्रोक्तस्थितिहेतुताया असम्भवादिप्रसङ्गात् । तस्मान्मुख्यवायुरेव प्राण इति स एवानन्दमयः, तस्यान्तराधिकरणे पूर्वपक्षितेन्द्रादिवदानन्दवल्ल्यामानन्दमयाद्भेदव्यपदेशाभावेन, आकाशाधिकरणे पूर्वपक्षिताकाशवच्च जडत्वाभावेन स्वत एवानन्दमयत्वसम्भवात् । तस्मात् "अन्वयव्यतिरेकतः" इत्यनुव्याख्यानोक्ताऽधिकाशङ्का युक्ता । इयञ्च प्रमेयाश्रिता । प्रमाणाश्रिता तु— पूर्वत्राकाशश्रुतेरिव इह न श्रुतेरावृत्तिमात्रम्, किन्तु "त्वं प्राणः"

प्रकाशः

दिति शङ्काभिप्रायः । **असम्भवादीति** । भगवति जीवनरूपस्थितिहेतुत्वस्याभावेनान्यत्र भावेन चासम्भवातिव्याप्ती स्यातामिति भावः । टीकोक्तमानन्दमयाक्षेपमनूद्य समर्थयते—**स एवेति** । 'महाभोगः' इत्यानन्दमयत्वेनोक्तस्य प्राणस्य मुख्यत्वात् प्रागुक्तानन्दमयोऽपि स एव स्यादित्यर्थः । 'इन्द्रादिवत्' इन्द्रादेरिव । **भेदव्यपदेशेति** । "भेदव्यपदेशाच्च" इति सूत्रभाष्योक्तदिशेति भावः । "प्राणशब्दप्रवृत्ति" इत्यादिटीकाया मूलं दर्शयन्नुपसंहरति—**तस्मादिति** । **इयं चेति** । अनुव्याख्यानोक्ता प्राणपदप्रवृत्तिनिमित्ताश्रितेत्यर्थः । "प्राणशब्दस्य तस्मिन् प्रसिद्धेः" इत्यादिटीकायां श्रुतित्वनिरवकाशत्वाभ्यां लिङ्गाच्छ्रुतेः प्राबल्येन पूर्वपक्षोक्तिरुपलक्षणमिति मत्वाऽऽह—**आवृत्तीति** । "प्राणः, प्राणयः" इत्यावृत्तिमात्रं नेत्यर्थः । "त्वं भर्ता मातरिश्वा प्रजानां" इति मातरिश्वश्रुतिर्ध्येया ।

चन्द्रिका

"देवान् प्राणयः" 'मातरिश्वा' इति श्रुतिबहुत्वमस्तीति निरवकाशेनापि न बाध इत्येका । इयं च भाष्ये बहुश्रुतियुक्तविषयवाक्योदाहरणात् सूचिता । अन्या तु—यदि प्राणशब्दस्य योगेन विष्णुपरता, तर्हि लक्ष्म्यादिशब्दानामपि योगेन प्राणभार्यापरत्वसम्भवात् लक्ष्मीपतित्वादिलिङ्गस्यैवासिद्धिः । अथ लक्ष्म्यादिशब्देषु न प्रसिद्धार्थत्यागः, तर्हि प्राणशब्देऽपि तथा । इयं च "प्रसिद्धेर्वायुः" इति भाष्ये सूचिता । इयं यद्यपि आ-

प्रकाशः

'निरवकाशेनापि' श्रीपतित्वादिलिंङ्गेनेत्यर्थः । 'अपि' इत्यभ्युपगमः, तदभावस्याग्रे स्पष्टत्वात् । नन्वियं शङ्का गायत्र्यधिकरणे क्रियते । यदाहुः—

कथं प्रसिद्धबहुलशब्दानामन्यथार्थता ।

इतीति चेन्न, अनेकश्रुतिप्रसिद्ध्युपजीवनेन तत्र प्रवृत्तत्वात्, इह बहुत्वमात्रस्योपजीवनात् । यद्वा—गायत्रीवाक्पृथिव्यादिश्रुतीनां भिन्नविषयत्वादिहैकविषयतद्बाहुल्यस्याभिप्रेतत्वात् । नन्वथापि पादान्त्यप्राणाधिकरणे तादृक्श्रुतिबाहुल्यशङ्काऽपाक्रियते । तदुक्तं "बाहुल्याच्छ्रुतिलिङ्गयोः" इति, सत्यं, तत्र बहुश्रुतिगतनिरवकाशत्वोपजीवनेन पूर्वपक्षप्रवृत्तिरिह तु बहुत्वमात्रोपजीवनेन प्रवृत्तिरिति ध्येयम् । वक्ष्यते चैतत्तत्रैव । **योगेनेति** । "लक्ष दर्शने" इति धातो र्लक्षयति सर्वमित्यादियोगेनेत्यर्थः । **भाष्ये सूचितेति** । 'भाष्येऽ-

चन्द्रिका

काशादिशब्दसाधारणी, आकाशश्रुतेः प्रसिद्धार्थहानौ अनन्तत्वादिलिङ्गानामपि तद्धानिस्स्यात् इति शङ्कोदयात् । तथाऽपि पूर्वाधिकरणे अनुद्धृतेत्यधिकाशङ्का । अपरा तु — मुख्यवायौ मुख्यप्राणत्वप्रसिद्धेः "मुखे मुख्यः प्रतीर्तितः" इति वचनाच्च प्राणशब्दस्य परमात्मनि मुख्यत्वायोगात् मुख्यसम्भवे चामुख्यग्रहणायोगात् नात्र प्राणशब्दः परमात्मपरः । आकाशशब्दस्य तु भूते मुख्यत्वे न प्रमाणमस्तीति । इयं च टीकायां मुख्यपदप्रयोगादिना सूचिता ।

प्रकाशः

प्यस्य सर्वस्यापि स्वीकारार्थं प्रसिद्धेरित्याह' इति सुधायां दिक्प्रदर्शनस्य कृतत्वादिति भावः । **अनुद्धृतेति** । इहैव सौत्रेवकारेण लिङ्गानिरवकाशत्ववाचिनोद्ध्रियते । तथा चानेनरूपेण तदप्यत्रोदाहरणमित्युक्तं भवति । **वचनाच्चेति** ।

चेष्टायां बाह्यवायौ च मुख्यप्राणे च गीयते ।
प्राणशब्दस्त्रिषु ह्येषु मुखे मुख्यः प्रकीर्तितः ॥

इति वचनाच्चेत्यर्थः । **मुख्यत्वायोगादिति** । प्रसिद्धिवचनयोरभावादिति भावः । नन्वाकाशशब्दस्य भूते मुख्यस्यापि बाधः कथमित्यत आह—**आकाशेति** । उपलक्षणमेतदिन्द्रादिशब्दस्य । तत्र "मुखे मुख्य." इतिवदिन्द्राकाशादौ मुख्य इति वचनाभावात् । अत एव 'वचनाच्च' इत्युक्तम् । 'आदिना' इत्यादिपदेन प्रमा-

चन्द्रिका

इतरा तु—पूर्ववन्निरवकाशब्रह्मलिङ्गाभावान्न ब्रह्मपरतेति । न च श्रीपतित्वादिकं लिङ्गं निरवकाशमिति वाच्यम्, "अद्भ्यस्सम्भूतः" इत्यनुवाके "ह्रीश्च ते लक्ष्मीश्च पत्न्यौ" इति उक्तस्य विष्णुत्वेऽपि "भर्ता सन् भ्रियमाणः" इत्यनुवाके "तद्वै त्वं प्राणः" इत्युक्तस्य "त्वं भर्ता मातरिश्वा प्रजानां" इति मातरिश्वश्रुत्या "प्राणापानावजिरꣳ संचरन्तौ" इत्यपानसाहित्यलिङ्गेन चाविष्णुत्वात् । इयमपि शङ्का "न चात्र वाक्ये पूर्ववदनन्यथासिद्धं लिङ्गमस्ति" इति सुधाग्रन्थेऽत्रपदेन सूचिता । तस्माद्युक्ता अधिकाशङ्का ।

प्रकाशः

णकथनादिर्ग्राह्यः । 'पूर्ववत्' आकाशाधिकरण इवेत्यर्थः । तत्र निरवकाशलिङ्गमाशङ्क्य तस्य भिन्नप्रकरणगतत्वेन परिहारमाह—नचेति । अत्रपदेनेति । तदनेन "न चात्र वाक्ये पूर्ववदनन्यथासिद्धं किमपीश्वरलिङ्गमस्ति, येन श्रुतिबाधं प्रत्येष्यामः" इति वाक्यं, श्रीपतित्वादिलिङ्गं भिन्नप्रकरणगतं, महाभोगत्वादिकं त्वन्यथासिद्धमित्याशयतयां योज्यमित्युक्तं भवति ।

नन्वेतच्छङ्कानिरासकन्यायं सूत्रे नोपलभामह इत्याशङ्क्य, 'प्राणस्तत्तु' इति प्रतिज्ञांशतात्पर्यं व्यञ्जयन् आदावनुव्याख्यानोक्तप्रमेयाश्रिताभ्यधिकाशङ्कयोर्मध्ये, न विष्णोर्जीवनादिहेतुत्वमन्वयव्य-

चन्द्रिका

तत्परिहारेण सिद्धान्तस्तु—

वायुवृत्तिर्यथा मुख्यप्राणदेहस्तथैव सः ।
विष्णोर्देहस्ततस्तस्यैवान्वयव्यतिरेकिता ॥

वायुवृत्तिर्मुख्यप्राणस्येव सोऽपि ब्रह्मणो देहस्थानीयः । युक्तश्च भूमाधिकरणे ईश्वरस्यास्मदादिशरीरादुत्क्रमणस्य वक्ष्यमाणत्वादजीवनदशायां रूपविशेषस्य व्यक्तयात्मना तत्संयोगाभावात् व्यति-

प्रकाशः

तिरेकलभ्यमिति यदुक्तं, तच्छङ्कानिवर्तनप्रकारं सगृह्णाति—तत्परिहारेणेति । "प्राणगतजीवनादिकारणत्वस्यापि भगवदधीनत्वात्" इति टीका उपलक्षणम् । अत एव "प्रेरकोऽस्यापि" इत्यनुव्याख्यानं 'अस्यापि' जीवनादेरपि इत्यपि सुधायां व्याख्यातमिति भावः। 'देहः' इत्युक्त्वा मुख्यदेहभ्रमं वारयन्व्याचष्टे—वायुवृत्तिरिति । 'सोऽपि' मुख्योऽपि । तथा च यथा प्राणशरीरभूतवायोर्जीवनं प्रत्यन्वयादिदर्शनमात्रेण मुख्यस्य तत्र हेतुत्वं, तथा मुख्यस्यापि साक्षात्प्रयत्नाधिष्ठेयत्वेन विष्णुदेहत्वात्तदन्वयादिदर्शनमात्रेण तस्य तत्र हेतुत्वं भविष्यतीत्यर्थः । एतेनाशरीरत्वान्न तच्छरीरस्यास्मदादिशरीरे व्यतिरेक इति निरस्तम् । प्राणस्य तच्छरीरत्वेन व्यतिरेकसम्भवात् । यदप्यस्मदादिशरीरे तस्य सर्वगतत्वात् व्यतिरेको नेति, तन्निरस्यति—युक्तश्चेति । व्यक्त्यात्मनेति । शक्त्यात्मना तत्संयोगस्य सत्त्वेन सर्वगतत्वोक्तिरिति भावः । विवरि-

चन्द्रिका

रेकः । "इतरेण" इति श्रुतौ इतरशब्दो ब्रह्मपरः, पूर्वत्र "मध्ये वामनं" इति वामनशब्दात्, उत्तरत्र च "गुह्यं ब्रह्म सनातनं" इति ब्रह्मशब्दात् । किञ्च मुख्यप्राणस्य जीवनादि-हेतुत्वेऽपि तस्य भगवदधीनत्वेनापि तत्र प्राणशब्दो मुख्यः ।

प्रकाशः

ष्यते चैतद्भूमादिनये । यद्यपि नापि श्रुतिसिद्धमित्यादि, तच्च 'येन जीवन्ति' इत्यादेर्ब्रह्मपरत्वं जन्मादिसूत्रे सिद्धमिति भावेन टीकोक्तकठश्रुतेर्ब्रह्मपरत्वं साधयति—**इतरेणेति** । **वामनेति** । वक्ष्यते च वामनश्रुतेर्वैष्णवत्वं "शब्दादेव" इत्यत्र । प्राणगतस्येशाधीनत्वे साक्षितया टीकोक्ताऽपि "इतरेण" इति श्रुतिस्तद्गतत्वेऽपि प्रमाणं भवतीति भावः । एवं जीवनहेतुत्वं प्राणपदप्रवृत्तिनिमित्तं भगवद्गतमिति समर्थ्येदानीं टीकोक्तरीत्याऽन्यगतं च भगवदधीनमेव । ततश्च प्राणशब्दार्थो भगवानेवेत्यभिप्रेत्याह—**किं चेति** । न च प्रागुक्तासम्भवादिप्रसङ्गः, अनन्याधीनजीवनहेतुत्वस्य भगवन्मात्रगतत्वेनान्यगतत्वाभावात्, तस्यैव लक्षणत्वेन जन्मादिसूत्रे अभिप्रेतत्वादिति तात्पर्यात् । अत एव तद्गतत्वस्यापि समर्थनमकारि । टीकायां तु जन्मादिसूत्रादौ सिद्धत्वात् कण्ठतो नोक्तम् । एवं प्रमेयाश्रितां शङ्कां परिहृत्य, याऽपि प्राणशब्दस्य योगेन विष्णुपरत्वे लक्ष्म्यादिशब्दानामपि प्राणभार्यापरत्वमिति

चन्द्रिका

लक्ष्म्यादिशब्दानां तु बहुत्वादन्यत्रप्रयोगाभावात् मुख्यार्थत्यागापातात् अन्यपरत्वे मानाभावाच्च नान्यत्र यौगिकता । प्राणशब्दस्य त्वेकत्वात् "प्राणस्य प्राणः" इत्यादौ ब्रह्मणि प्रयोगात् तत्र परममुख्यत्वेन मुख्यार्थात्यागात् "नामानि सर्वाणि" इत्यादिमानसद्भावाच्च ब्रह्मपरता ।

आपेक्षिकाच्च मुख्यत्वात् वायौ मुख्यपदं भवेत् ।
यथा पराक्षरपदं श्रीतत्त्वे मध्यमाक्षरे ॥

प्रकाशः

प्रमाणाश्रिता, तां तावत्सङ्गतत्वात्परिहरति—**लक्ष्म्यादीति** । लक्ष्मीश्रीह्रीशब्दानां सत्त्वादिति भावः । 'अन्यत्र' प्राणभार्यायां । 'लोकतः' इति योज्यम् । तेन न रूढिरिति भावः ।

शंरूपमाश्रिता वायुं श्रीरित्येव च कीर्त्यते ।

इत्यादिस्तु न प्रसिद्ध इति भावः । लक्ष्मीशब्दे तदभावाच्च । अत एव 'लक्ष्म्यादि' इत्युक्तम् । **एकत्वादिति** । मातरिश्वादिश्रुतेर्गतेर्वक्ष्यमाणत्वादिति भावः । 'इत्यादौ' तलवकारे । "प्राणादयो वाक्यशेषात्" इत्यत्र "प्राणस्य प्राणं" इत्यादौ वक्ष्यमाणप्राणप्राणदत्वादिलिङ्गसाम्याद्वैष्णवत्वमिति भावः । **परमेति** । प्रवृत्तिनिमित्तपौष्कल्यादिति भावः । याऽपि मुख्यपदप्रयोगादिना सूचिता शङ्का, तां निराचष्टे—**आपेक्षिकाच्चेति** ।

चन्द्रिका

मुख्यप्राणो हि करणभूतचक्षुरादिप्राणापेक्षया मुख्यः । दृश्यते च मध्यमाक्षरेऽपि श्रीतत्त्वे "तामक्षरं परं प्राहुः" इत्यादौ परशब्दः, जडप्रकृतिरूपाधमाक्षरात्परत्वात् । अत एव श्रुतिः "प्राण एवाकरणः तस्मान्मुख्यस्तस्मान्मुख्यः" इति, "योऽयं मध्यमः प्राणः" इति च ।

प्रकाशः

श्लोकं व्याचष्टे—**मुख्यप्राणो हीति** । आपेक्षिकत्वे कथं मुख्यत्वमित्यत उत्तरार्धं व्याचष्टे—**दृश्यते चेति** ।

अपरं त्वक्षरं या सा प्रकृतिर्जडरूपिका ।
श्रीः परा प्रकृतिः प्रोक्ता चेतना विष्णुसंश्रया ॥
तामक्षरं परं प्राहुः परतः परमक्षरम् ।
हरिमेवाखिलगुणमक्षरत्रयमीरितम् ॥

इत्यदृश्यत्वनयभाष्यस्थस्मृतावित्यर्थः । 'अत एव' आपेक्षिकमुख्यत्वादेव । **श्रुतिरिति** । "चक्षुरादिवत्तु" इत्यत्र भाष्योक्ता । तथा च न प्राणशब्दपरममुख्यार्थत्वं मुख्यप्राणस्य, किन्तु हरेरेव,

अन्यव्यपेक्षया वायौ मुख्यवृत्तिर्विधीयते ।
तस्मात्प्राणादिशब्दाश्च विष्णावेव हि मुख्यतः ॥

इत्यैतरेयभाष्योक्तेरिति भवः । "अयं वाव शिशुः योऽयं मध्यमः प्राणः" इति बृहदारण्यकोक्त्या हरिरेवोत्तमप्राण इति लाभादिति भावः । यद्यपि श्रीपतित्वादेर्भिन्नप्रकरणगतत्वेन ब्रह्म-

चन्द्रिका

"अङ्गचः" इत्याद्यनुवाकद्वयस्य भिन्नार्थत्वेऽपि "अङ्गचः" इत्यत्र श्रीपतित्वादेरिव, "भर्तान् सन्" इत्यत्र

तमेव मृत्युममृतं तमाहुः तं भर्तारं तमु गोप्तारमाहुः ।

यस्तद्वेद यत आबभूव सन्धां च याꣳ सन्दधे ब्रह्मणैषः ॥

इत्यादिब्रह्मलिङ्गानां सत्त्वात् । एतदेवाभिप्रेत्य भाष्यादौ "इत्यादितल्लिङ्गात्" इत्यादावादिशब्दः । कथं चानुवाकद्वयं भिन्नार्थम्, "श्रीश्च ते" इति युष्मच्छब्देनोक्तस्य "तद्वै त्वं प्राणः" इत्यत्रापि युष्मच्छब्देन प्रत्यभिज्ञानात् । मातरिश्वश्रुतिरपि अन्तरधिकरणन्यायेन "हरिꣳ हरन्तमनुयन्तु देवाः" इति हरिश्रुत्या 'हरन्तं' इति निरुपपदसंहर्तृत्वलिङ्गेन च ब्रह्मपरा । अपानसाहित्यं तु मुख्यप्राणेऽपि न स्वरसम् ।

प्रकाशः

लिङ्गाभावादिति चोद्यं, तच्चाभ्युपेत्य सन्निहितलिङ्गानि तावद्दर्शयति—**अङ्गच इत्यादीति** । मारकत्वामृतत्वभर्तृत्वगोप्तृत्वमुक्तिहेतुवेदनविषयत्वादिलिङ्गानामित्यर्थः । एकवाक्यतां साधयति—**कथं चेति** । मातरिश्वश्रुतिविरोध इत्यत आह—**मातरिश्वेति** । **अन्तरिति** । तत्राधिदैवगतसर्वशब्दप्रवृत्तिनिमित्तस्य भगवति समर्थनादिति भावः । एतेन श्रुतिबहुत्वमस्तीति प्रथमपक्षोऽपि निरस्तो ध्येयः । ननु "प्राणापानावजिरं" इत्यपानसाहित्यरूपमुख्यप्राणलिङ्गविरोध इत्यत आह—**अपानेति** । **न स्वरसमिति** ।

चन्द्रिका

तस्मात्प्राणो विष्णुरेवेति। यद्यपि तैत्तिरीयशाखायां "ह्रीश्च ते" इति पाठः। तथाऽपि भाष्ये शाखान्तरमाश्रित्य "श्रीश्च ते" इति पठितमिति द्रष्टव्यम् ॥

अन्ये तु—"प्रस्तोतर्या देवता प्रस्तावं" इत्युपक्रम्य श्रूयते, "कतमा सा देवता। प्राण इति होवाच। सर्वाणि हवा इमानि भूतानि प्राणमेवाभिसंविशन्ति" इति। तत्र प्राणशब्दः प्रसिद्धप्राणपर इति प्राप्ते, ब्रह्मपरएव, सर्वभूतसंवेशनादिब्रह्मलि-

प्रकाशः

स्वस्य स्वेन साहित्यस्यायोगादिति भावः। भाष्योक्तं श्रीपतित्वादिलिङ्गं न सिद्धमित्याशङ्क्याह—**यद्यपीति** ॥

एवं स्वमतेऽधिकरणशरीरं समर्थ्य परोक्तं निरसितुमाह—**अन्ये त्विति**। "कतमा सा" इति तच्छब्दपरामर्शविषयं दर्शयितुं 'इत्युपक्रम्य' इत्युक्तम्। "अभिसंविशन्ति प्राणमभ्युज्जिहते सैषा देवता प्रस्तावमन्वायत्ता" इति च्छान्दोग्यप्रथमाध्यायगतप्राणशब्दो विषय इत्यर्थः। **प्रसिद्धेति**। वायुवृत्तिपरो ब्रह्मपरो वेति विशये, प्राणशब्दस्य प्रसिद्धप्राणे रूढत्वेन प्रथमत्वेनानुपसञ्जातविरोधित्वेन च प्रबलत्वात् तदनुसारेण चरमस्योपसञ्जातविरोधित्वेन दुर्बलस्य सर्वभूतसंवेशनादेर्नेयत्वाद्वायुवृत्तिरूपप्राणपर इति प्राप्ते, प्राणशब्दादपि प्रथमत्वेनानुपसञ्जातविरोधिनः "कतमा सा देवता" इति प्रश्नस्य चेतनवाचिदेवतापदमहिम्ना

चन्द्रिका

ज्ञादिति सिद्धान्तः। न चैवं पूर्वेणेदं गतार्थम्, "यदा वै पुरुषः स्वपिति प्राणं तर्हि वागप्येति प्राणं चक्षुः" इत्यादिश्रुतेः स्वापकाले प्रसिद्धप्राणे सर्वभूतसारेन्द्रियलयाद्युक्तिद्वारा सर्वभूतलयादिपरायाः मानान्तरानुगृहीतत्वेन प्रबलत्वात्। ब्रह्मणि भूतलयादिबोधिकायाश्च "यतो वा इमानि" इत्यादिश्रुतेः तदननुगृहीतत्वेन दुर्बलत्वात्। प्रस्ताववाक्यमपि प्रबलानुसारेण प्रसिद्धप्राणे सर्वभूतलयादिपरम्, न तु ब्रह्मणि सर्वभूतलयादिपरम्।

प्रकाशः

ब्रह्मविषयत्वात्प्रश्नानुसारेण परिहारस्य व्याख्येयत्वाद्रूढ्या प्राणपरिहारानुरोधेन प्रश्नव्याख्याने च प्राणे सर्वभूतसंवेशनादिलिङ्गानुपपत्तेर्ब्रह्मपर एवेति सिद्धान्त इत्यर्थः। नन्वाकाशाधिकरण एवास्यार्थस्योक्तत्वान्नेदमारभ्यमित्याशङ्कयाभ्यधिकाशङ्कयाऽऽरम्भ इत्याह—**नचेति**। "प्रस्तोतर्या देवता" इत्यादि प्रस्ताववाक्यं स्वापवाक्यानुसारात् प्रसिद्धप्राणे भूतलयादिपरं, "यतो वै" इत्यादिकारणवाक्यानुसारात् ब्रह्मणि वेति चिन्तायां, "यदा वै पुरुषस्स्वपिति" इति स्वापवाक्यानुसारात् प्राण एव। न च स्वापवाक्यं न प्रसिद्धप्राणपरमिति वाच्यं, स्वापकाले प्राणवृत्तावपरिलुप्यमानायां इन्द्रियवृत्तीनां परिलुप्यमानत्वेन प्रबोधकाले प्रादुर्भाववत्त्वेन च प्रत्यक्षेणानुमानेन च सम्भवात्। ननु स्वापवाक्ये इन्द्रियाणां लय उच्यते, प्रस्तावावाक्ये भूतानामिति किं

चन्द्रिका

यद्वा—प्रबलस्वापवाक्यानुसारेण प्रस्ताववाक्यमपि प्रसिद्धप्राणे इन्द्रियमात्रलयादिपरम् । "आकाशाद्वायुः" इत्यादिवाक्यं तु न मानान्तरानुगृहीतमिति तदनुसारेण "सर्वाणि भूतान्याकाशादेव" इति

प्रकाशः

केन सङ्गतमिति चेन्न, भूतसारत्वादिन्द्रियाणां तद्द्वारा सर्वभूतलय प्रतिपादने तात्पर्यात् । न च "यत्प्रयन्त्यभिसंविशन्ति" इति ब्रह्मणि सर्वभूतलयप्रतिपादककारणवाक्यानुसारेण प्रस्ताववाक्यं ब्रह्मणि सर्वभूतलयपरं किं नेति वाच्यं, स्वापवाक्यस्य प्रत्यक्षादिमानान्तरसंवादित्वेन प्रबलत्वात्कारणवाक्यस्य ब्रह्मणि भूतलयस्य प्रत्यक्षाद्यप्रसिद्धतया तद्रहितत्वेन दुर्बलत्वात् प्रस्ताववाक्यं स्वापवाक्यानुरोधेन प्राण एव सर्वभूतलयादिपरमित्यर्थः । एवं स्वापवाक्ये इन्द्रियपदं भूतपरमुपेत्यैकार्थत्वमुक्तमिदानीं प्रस्ताववाक्यगतभूतपदमेव भूतसारेन्द्रियपरं, स्वापवाक्यस्योक्तादिशा बलवत्त्वादित्याशयेन पक्षान्तरमाह—**यद्वेति** । तथा चेन्द्रियलयाद्याधारत्वं वायुवृत्तेरेवेति प्रस्ताववाक्यं प्रसिद्धप्राणपरमेवेति भावः । ननु यथा प्रबलस्वापवाक्यानुरोधेन प्रस्ताववाक्यं प्रसिद्धप्राणपरमिति शङ्काऽत्रोच्यते, तथा पूर्वत्रापि सम्भूतवाक्यानुरोधेन "आकाशादेव" इत्यत्र आकाशपदं भूतपरामिति शङ्का स्यादतो नेयमभ्यधिकाशङ्केत्याशङ्क्य, सम्भूतवाक्यस्यैतद्बाधने प्राबल्याभावादित्याह—**आकाशाद्वायुरिति** ।

चन्द्रिका

वाक्यं न वाय्वादिमात्रकारणभूताकाशपरमिति पूर्वस्मादधिकाशङ्कायां, पुंवाक्ये मानान्तरानुग्रहतदभावाभ्यां प्राबल्यदौर्बल्ये स्तः, अपुंवाक्ये त्वनाशङ्कितदोषे न ताभ्यां ते स्त इति, तन्निरासार्थत्वादस्येत्याहुः। तदुक्तं भामत्यां—

पुंवाक्यस्य बलीयस्त्वं मानान्तरसमागमात्।
अपौरुषेयवाक्ये तत्संगतिः किं करिष्यति॥

इति। तन्न, पूर्वपक्षे प्राणस्य जडवायुत्वे, प्रश्ने "कतमा सा देवता" इति, प्रतिवचने च "सैषा देवता" इति देवताशब्दायोगात्। तदभिमानिचेतनत्वे च "वायुविकारस्य पञ्चवृत्तेः प्राणस्योपादानं युक्तं"

प्रकाशः

परिहारप्रकारमाह—**पुंवाक्य इति**। तस्य सम्भावितदोषत्वादिति भावः। तथा च स्वापवाक्यस्य प्राबल्याभावान्न तदनुरोधेन प्रस्तावावाक्यं प्राणपरं, किन्तु "यतो वै" इत्याद्यनुरोधेन ब्रह्मलिङ्गेन च ब्रह्मपरमिति। 'तत्सङ्गतिः' मानान्तरसङ्गतिः। प्राणशब्दस्य जडपरत्वं वा चेतनपरत्वं वेति विकल्प्य क्रमेण निरस्यति—**पूर्वपक्ष इति**। उपलक्षणमेतत्, प्रस्तावान्वायत्तत्वस्य चायोगादित्यपि ध्येयम्, चेतन एव देवताशब्दस्य मन्त्राधिष्ठातृत्वस्य च योगात्। ननु "कतमा सा देवता प्रतिहारमन्वायत्ता अन्नमिति होवाच" इत्यादावचेतनेऽपि देवताशब्दोऽस्तीति चेद्विप्रतिपत्तेरिति भावः। यदपि गतार्थतामाशङ्क्य द्वेधाऽभ्यधिकाशङ्का-

चन्द्रिका

इत्यादित्वत्पूर्वपक्षभाष्यविरोधात् । स्वापवाक्ये मानान्तरसंवादस्यैव अभावेन तं स्वीकृत्य पूर्वोत्तरपक्षोक्तचयोगाच्च । तथा हि—

नहि स्वापे पृथिव्यादेरक्षाणां वा विनाशधीः ।
प्रत्यक्षादनुमानाद्वा देवतायां जडेऽथवा ॥

न तावत्स्वापकाले जडे वा देवतायां वा महाभूतानां लयादौ

प्रकाशः

प्रदर्शनं, तदपि नेत्याह—**स्वापवाक्य** इति । स्यादेवं, यदि "यदा वै पुरुषः स्वपिति" इति वाक्ये विवक्षितं लक्षणया भूतलयाधारत्वं मुख्यवृत्त्या वागादीन्द्रियलयाधारत्वं च प्रसिद्धप्राणस्य मानान्तरसिद्धं स्यात्, तदा तदनुसारात् प्रस्तावेवाक्येऽपि तथा स्यान्न चैवमस्तीत्यर्थः । मानान्तरसंवादाभावमेवाह—**नहीति** । इन्द्रियलयद्वारा भूतलयपरत्वाशयेनोक्तं—**पृथिव्यादेरिति** । मुख्यवृत्त्येन्द्रियलयपरत्वपक्षाशयेनोक्तं—**अक्षाणामिति** । लयशब्दार्थः—**विनाशेति** । **प्रत्यक्षादिति** । एतेन मानान्तरं प्रत्यक्षमनुमानं वेति विकल्प्य नोभाभ्यामित्युक्तं भवति । **देवतायामिति** । एतेन "प्राणं वागप्येति" इत्यत्र प्राणशब्दः किं जडवायुपरः उत तदभिमानिचेतनदेवतापर इति विकल्पः सूचितः । वागादीनां भूतपरत्वमुपेत्य प्राणे पृथिव्यादिलयाधारत्वमुच्यत इत्याद्यः पक्षः । तत्र तावन्मानातरसंवादाभावमुपपादयति—**न तावदिति** । 'जडः'

चन्द्रिका

मानान्तरसंवादः, तेषां स्वापकालेऽप्यलीनानामेवानुभवात् । दृष्टि-सृष्टिमते च तदा वायुविकारादेरप्यभावेन तत्र भूतलयायोगात् । नापि स्वापकाले जडे वा देवतायां वा इन्द्रियाणां लये प्रत्यक्षसंवादः, तेषामतीन्द्रियत्वात् । नापि स्वापकाले वायुवृत्तेरलोपादिन्द्रियवृत्तीनां च लोपात्तत्र तेषां लयोऽनुमीयत इति अनुमानसंवादोऽस्तीति वाच्यम्, त्वया जन्मादिसूत्रे ब्रह्मण उपादानत्वेऽपि श्रुतिसंवाद्यनुमानानामुक्तत्वात् । यस्मिन् सव्यापारे सति

प्रकाशः

इति प्राणशब्दार्थस्य विकल्पेनानुवादः । **मानान्तरेति** । प्रत्यक्षानुमानरूपेत्यर्थः । **अनुभवादिति** । प्रत्युत तद्विसंवाद एवेति भावः । ननु दृष्टिसृष्टिपक्षे सर्जकदृष्टेरभावात् कथमेतदित्यत आह— **दृष्टीति** । **अक्षाणां वेति** । द्वितीयपक्षोपालम्भं विशदयति— **नापीति** । 'तेषां' इन्द्रियाणां । एतेन 'प्रत्यक्षान्न विनाशधीः' इत्युपपादितम् । अनुमानादित्येतदुपपादयति—**नापीति** । 'तत्र' वायुविकारे । 'तेषां' इन्द्रियाणां । इन्द्रियाणि प्राणे लीयन्ते, प्राणप्रवृत्तौ सत्यामपि इन्द्रियवृत्तीनां परिलुप्यमानत्वात् । यस्मिन् सव्यापारे सति यन्निर्व्यापारं तत्तत्र लीयते, यथा सम्प्रतिपन्नमित्यनुमीयत इत्यर्थः । **उक्तत्वादिति** । तथा च "यतो वै" इत्यादिवाक्यस्यापि मानान्तरसंवादेन प्राबल्याद्दौर्बल्योक्त्ययोगादिति भावः । न चोपादानत्वे मानान्तरसंवादेऽपि न भूतलयाधारत्वे

चन्द्रिका

यन्निर्व्यापारं तत्तत्र लीयतइति व्याप्त्यभावाच्च । पूर्वेद्युर्येन दृष्टं तेनैव चक्षुषा पश्यामीत्यादिप्रत्यभिज्ञाविरोधाच्च । "यथा सोम्य वयांसि वासोवृक्षं संप्रतिष्ठन्त एवꣳ हवैतत्सर्वं परे आत्मनि सम्प्रतिष्ठते" इति प्रक्रम्य "चक्षुश्च द्रष्टव्यं च श्रोत्रं च श्रोतव्यं च" इत्यादिना सुप्तौ चक्षुरादीनामनाशस्यैव श्रवणाच्च ।

प्रकाशः

इति वाच्यं, उपादानस्यैव लयाधारत्वादिति तात्पर्यात् । **व्याप्त्यभावाच्चेति** । सम्प्रतिपन्नदृष्टान्ताभावादिति भावः । यद्वा—परमात्मनोऽपि तथाविधस्य सत्त्वेन तत्र लयानङ्गीकारेण व्यभिचारादिति भावः । यद्वा—कुठारे सव्यापारे सति निर्व्यापारं खड्गादिकं तत्र न लीयत इति व्यभिचारादिति भावः । प्रत्यक्षविरोधं चानुमानस्याह—**पूर्वेद्युरिति** । एतेन "वागप्येति" इत्यादिश्रुतिविरोधात्प्रत्यभिज्ञा भ्रान्तिरिति निरस्तम् । प्रत्यक्षस्य बलवत्त्वेन श्रुतिगताप्ययशब्दस्य निर्व्यापारत्वार्थान्तरपरत्वेन सावकाशत्वादिति भावः । श्रुतिविरोधं चाह—**यथेति** । **एतत्सर्वमिति** । सर्वशब्दार्थमेव दर्शयति—**चक्षुश्चेति** । **अनाशस्येति** । संप्रतिष्ठितिशब्दस्यापि लयार्थत्वे पक्षिणामावासवृक्षाश्रयत्वदृष्टान्तानुपपत्तिरिति भावः । "कस्मिन्सर्वे प्रतिष्ठिताः" इति गार्ग्यकृतप्रश्नं प्रति परिहारत्वानुपपत्तेश्चेति भावः । "परे आत्मनि" इत्युक्त्या च वायुवृत्तौ चक्षुरादीनामप्ययानुमानमसमञ्जसमिति सूचितम् ।

चन्द्रिका

किं च आकाशाद्वाय्वाद्युत्पत्तिरपि मानान्तरसंवादिनी, अवकाशात्पवनस्य, पवनाच्च फूत्काराद्दहनस्य, दहनाच्चोष्मतः स्वेदस्य, वृष्टितश्च पार्थिवपदार्थानामुत्पत्तेर्दर्शनादिति नाकाशवाक्यात् प्राणवा-

प्रकाशः

'श्रवणात्' षट्प्रश्ने । एवं, स्वापवाक्यं न मानान्तरसंवादीति तदनुसारेण प्रस्तावावाक्यं न प्राणपरं, प्रत्युत जन्माधिकरणे त्वदुक्तदिशा "यतो वै" इत्यादि वाक्यमेव मानान्तरसंवादीति तदनुसारेण ब्रह्मपरमेवेति नाभ्यधिकाशङ्कावकाश इत्युक्तम् । इदानीं, यदपि "आकाशाद्वायुः" इत्यादि वाक्यं त्वित्यादिना पूर्ववैषम्यवर्णनं, तदपि नेत्याह—**किं चेति** । 'पवनस्य दहनस्य' इत्यादेः 'उत्पत्तेः दर्शनात्' इत्यन्वयः । अवकाशाभावे पवनादर्शनादिति भावः । कथं पवनाद्दहनस्योत्पत्तिदर्शनमित्यत उक्तं—**फूत्कारादिति** । एवमूष्मत इत्यपि ध्येयम् । वक्ष्यते च भाष्ये भगवत्पादैः—"आपः" इत्यत्र "घर्मात्स्वेदादिदृष्टेः" इति । यत् "अपिचादित्योऽन्नं चोद्गीथप्रतिहारयोः देवते" इत्यादिनोक्तं परभाष्ये—"कतमा सा देवतेति । आदित्य इति होवाच सर्वाणि ह वा इमानि भूतान्यादित्यमुच्चैस्सन्तं गायन्ति, सैषा देवतोद्गीथमन्वायत्ता" इति, तथा "कतमा सा देवतेति । अन्नमिति होवाच सर्वाणि ह वा इमानि भूतान्यन्नमेव प्रतिहरमाणानि जीवन्ति, सैषा देवता प्रतिहारमन्वायत्ता" इत्यादित्यान्नयोरब्रह्मत्वदर्शनात् तत्समाख्यानात्प्राणस्याप्य-

चान्द्रिका

क्येऽधिका शङ्का । न च 'कतमा सा देवतोद्गीथमन्वायत्ता आदित्य इति होवाच' इत्यादिना उद्गीथादावादित्यादेरब्रह्मण एव देवतात्वेनोक्तत्वात् तत्सन्निहिते प्रस्तावेऽप्यब्रह्मण एव देवतात्वमित्यधिका शङ्केति वाच्यम्, पूर्वाधिकरणेऽपि "अपां का गतिरिति असौ लोक इति होवाच" इत्यादिकेनाब्रह्मण एव गतित्वेनोक्ततया त-

प्रकाशः

ब्रह्मत्वमिति शङ्कान्तरं, तदप्यनूद्य पूर्ववैषम्येण निरस्यति—न चेति । "उद्गीथमन्वायत्ता" इत्यर्थानुवादोऽयम् । पूर्वाधिकरणविषयवाक्येऽपि "का साम्नो गतिरिति स्वर इति होवाच, स्वरस्य का गतिरिति प्राण इति होवाच, प्राणस्य का गतिरिति अन्नमिति होवाच, अन्नस्य का गतिरिति आप इति होवाच, अपां का गतिरिति असौ लोक इति होवाच" इति शालावत्यप्रश्नोत्तरत्वेन दाल्भ्येन स्वर्गलोकस्य गतित्वोक्तौ, "अप्रतिष्ठितं वै किल ते दाल्भ्य साम" इति तत्पक्षे प्रत्याख्याते, दाल्भ्येन पुनः "अमुष्य लोकस्य का गतिः" इति प्रश्ने कृते, "अयं लोक इति होवाच" इति पृथिवीलोकं गतित्वेन शालावत्यो दाल्भ्यमुवाच । तत्पक्षे च जैबलिना "अन्तवद्वै किल ते शालावत्य साम" इति प्रत्याख्याते, तर्हि "अस्य लोकस्य का गतिः" इति शालावत्यकृतप्रश्नोत्तरत्वेन "आकाश इति होवाच" इति श्रवणात् प्रायपाठरूपसन्निधानादित्यर्थः । ननु "असौ लोकः"

चन्द्रिका

त्सन्निधानात् "अस्य लोकस्य का गतिः" इति वाक्येऽप्याकाशस्याब्रह्मत्वं युक्तमिति साम्यात् ।

प्रकाशः

इत्यादौ ब्रह्मलिङ्गाभावात् "अप्रतिष्ठितं किल" इत्यादिना तस्य दूषितत्वाच्च स्वर्गादेरब्रह्मत्वेऽप्याकाशस्य सर्वभूतकारणत्वादिब्रह्मलिङ्गवत्त्वात् "परोवरीयो ह्यस्य भवति" इत्यादिफलश्रवणाच्च ब्रह्मत्वमेव । प्रायपाठस्य संशये सत्येव निर्णायकत्वेनेह सन्देहाभावात् । उक्तं च पूर्वतन्त्रे—"विशये प्रायदर्शनात्" इतीति चेद्धन्त तर्हीहापि भूतसंवेशनादिब्रह्मलिङ्गाद्ब्रह्म परमस्तु । तदेतदुक्तं—**साम्यादिति** । न च "आदित्यमुच्चैस्सन्तं गायन्ति" इत्यादिब्रह्मलिङ्गावभासान्न स्वर्गादिकवाक्यतौल्यमिति वाच्यं, एवं तर्हि तस्य तत एव ब्रह्मपरत्वावश्यम्भावेनाब्रह्मसन्निधानमसिद्धमिति नाभ्यधिकाशङ्का युक्ता । उक्तं च—

आदित्यसंस्थितो विष्णुर्यत्सदा सर्वगीतभुक् ।
राजादौ गीतमप्यज्ञैर्भुङ्क्ते गानस्य देवता ।
उद्गीथदेवता तस्य स एव पुरुषोत्तमः ।
अन्नस्थेनैव जीवन्ति भूतान्येतानि विष्णुना ।
प्रतिहारदेवताऽतः स प्रतिहारो हि भोजनम् ॥

इति स्मृतावादित्यादेर्विष्णुत्वम् । उक्तं च सुधायां—"आदित्यान्नयोरब्रह्मत्वस्याप्यसिद्धेः । तत्रापि "सर्वाणि हवा इमानि भूतान्यादित्यमु-

चन्द्रिका

यच्चोक्तम् 'पुंवाक्यस्य' इत्यादि, तत्र ब्रूमः—

अपुंवाक्यद्वयेऽप्येकेनान्यानुसरणे ध्रुवम् ।
कर्तव्ये सति क्लृप्तत्वात्संवाद्येवानुरुद्ध्यताम् ॥

तथा हि—प्रमाणभूते पुंवाक्ये प्रत्यक्षादौ च संवादिन एव अनु-

प्रकाशः

च्चैस्सन्तं गायन्ति" इत्यादिब्रह्मलिङ्गसद्भावात् । "अन्नमेव प्रतिह-रमाणानि" इत्येतस्य तु प्रायपाठादुपजीवनार्थत्वेन ग्राह्यत्वात्" इति । एतेनैतत्प्राणस्य ब्रह्मत्वनिर्णयावश्यम्भावात्तन्निर्णायकस्यान्यस्याभावा-दत्रैव तन्निर्णीयते इति निरस्तम् । ब्रह्मलिङ्गस्यात्र सत्त्वात् । पक्षा-न्तरप्रापकस्य चाभावेन संशयपूर्वपक्षयोरयोगेन पूर्वन्यायेनैव नि-र्णयसिद्धेरिति । उक्तं च सुधायां—"अत्रापि संशयाद्ययोगात्" इति । एवमभ्यधिकाशङ्काप्रकारं निरस्य तन्निवर्तकतयोक्तसिद्धा-न्तप्रकारं च निरस्यति—**यच्चोक्तमिति । अपुंवाक्येति** । प्र-स्ताववाक्यं तावदवश्यं स्वापवाक्यकारणवाक्यान्यतरानुरोधेन नेयं, भूतसंवेशनादिलिङ्गमात्रस्यात्र निर्णायकत्वे पूर्वेण गतार्थत्वस्योक्त-त्वात् । तत्र द्वयोरपौरुषेयत्वेऽपि पूर्वपक्ष्युक्तरीत्या मानान्तरसंवा-दिस्वापवाक्यमेवानुरोद्धव्यं, लोके तथा क्लृप्तत्वात् । तथा च प्रस्ताववाक्यं प्रसिद्धप्राणपरमेवेति न पूर्वपक्षोपमर्द इत्यर्थः । क्लृप्तत्वादित्येतदुपपादयति—**प्रमाणेति** । ननु मानान्तरसंवादिनोऽ-प्रामाण्यात्कथं तदनुसरणमिति चेत्किमिदमप्रामाण्यं किं ज्ञातार्थ-

चन्द्रिका

सरणीयत्वं कॢप्तमिति इहापि तथैव युक्तम्, अर्थाबाधरूपप्रामाण्यस्य संवादेन दार्ढ्यात्, अनपेक्षत्वस्य च दैवात्संवादेन अहानेः। सप्रयोजनत्वाय च प्रस्तावववाक्यस्यापूर्वार्थत्वे स्वापवाक्येऽपि तत्प्रसङ्गात्। स्वापवाक्यस्याप्यभिमानिदेवतापरत्वे अपू-

प्रकाशः

र्वत्वमुत मानान्तरसापेक्षत्वरूपम्। आद्य आह—**अर्थेति**। विषयाबाधरूपं याथार्थ्यमेव प्रामाण्यं, न त्वनधिगतार्थत्वमन्यत्र निरस्तत्वादिति भावः। एतेन—प्रमाणसिद्धे मानान्तरसंवादो व्यर्थ इति निरस्तम्। प्रमाणसिद्धत्वेपि तत्रानाश्वासशङ्कानिरासेन दार्ढ्यार्थत्वादिति। द्वितीय आह—**अनपेक्षत्वस्येति**। स्वापवाक्यं च न मानान्तरमपेक्ष्यार्थं बोधयति, किन्तु तदुक्तेऽर्थे दैवान्मानान्तरसंवादः। न च तावता सापेक्षत्वम्। उक्तं च वाचस्पत्ये—'यत्र तु प्रमाणान्तरसंवादस्तत्र प्रमाणान्तरादिवार्थवादादपि सोऽर्थः प्रसिध्यति, द्वयोः परस्परानपेक्षयोः प्रत्यक्षानुमानयोरिवैकत्रार्थे प्रवृत्तेः' इतीति भावः। स्वापवाक्याननुसरणे कारणवाक्यस्यैवानुसरणे बीजान्तरमाशङ्क्याह—**सप्रयोजनत्वायेति**। ब्रह्मपरत्व एवापूर्वार्थत्वं, न तु प्राणपरत्व इति भावः। 'तत्प्रसङ्गात्' अपूर्वार्थत्वप्रसङ्गात्। नन्वत्र ब्रह्मपरत्वेनापूर्वार्थत्ववत्तत्र तन्न सम्भवति, प्राणपरत्वेन सिद्धत्वादित्यत आह—**स्वापवाक्यस्येति**। प्राणवाय्वभिमानीत्यर्थः। एवञ्च स्वापवाक्यगतप्राणशब्दस्य तदभिमानिदेवता-

चन्द्रिका

र्वात्वर्थत्वसम्भवाच्च । अनाशङ्कितदोषत्वात्तु द्वयोरपि प्रामाण्यम्, न त्वन्योन्यमननुसरणम् । अन्यथा श्रुत्या श्रुत्यन्तरसंवादः उपक्रमाद्यानुगुण्यं च नानुसरणीयं स्यात् । मानान्तरविरोधश्च न परिहार्यस्स्यात् । तदुक्तं भामत्यामपि—'यद्यपि श्रुतयः स्वतः प्रमाणतया अनपेक्षाः । तथाऽपि मानान्तरोपनीतार्थवशेन व्यवस्थाप्यन्ते' इति । तस्मात्परेषामधिकरणमयुक्तम् ॥

केचित्तु—कृत्स्नस्य जगतः प्रसिद्धप्राणाधीनप्रवृत्त्यादिदर्शनात्

प्रकाशः

रत्वेन तदनुसारेण प्रस्तावावाक्यस्यापि देवतापरत्वे अपूर्वत्वलाभान्न ब्रह्मपरत्वसिद्धिरिति भावः । यदप्युक्तं—'अपूर्वावाक्यतयाऽनाशङ्कितदोषत्वान्नान्यानुसरणं' इति, तदपि नेत्याह—**अनाशङ्कितेति** । **संवादइति**। 'नानुसरणीयः' इति योज्यम्। **मानान्तरेति** । 'अन्यथा' इत्यनुवर्तते । अपौरुषेयेऽप्यन्यानुसरणमित्यत्र तद्वचनमेव संवादयति-**उक्तं चेति** । एतेन स्वापवाक्यं संवर्गविद्यायां श्रूयते, प्रस्तावावाक्यं तु उद्गीथविद्यायां, अतस्तयोर्नैकवाक्यत्वमिति सिद्धान्त इति निरस्तम् । ब्रह्मकारणवाक्यस्यापि तथात्वादिति । यदत्र कैश्चिदुक्तं—"प्राणस्य प्राणः प्राणबन्धनं हि सोम्य मनः" इति चोदाहरणमिति, तत्तु परभाष्य एव संशयानुदयेन दूषितत्वान्न निराकृतम् ।

रामानुजीयमतमपाकरोति—**केचित्त्विति** । "प्रस्तोतर्या देवता" इति वाक्ये निखिलजगत्कारणतया प्राणशब्दनिर्दिष्टः प्रसिद्धः प्राणः परमात्मा वेति सन्देहे पूर्वपक्षादिकमनुवदति—**कृत्स्नस्येति** ।

चन्द्रिका

प्रस्तावावाक्ये प्रसिद्धप्राण एवोच्यते इत्याकाशाधिकरणादधिकाशङ्कायां, शिलाकाष्ठादिषु तदभावात् 'सर्वाणि' इत्यस्यायोग इति परिहारोऽभिप्रेत इत्याहुः । तन्न, प्राणाधीनप्रवृत्तिकं शरीरमिव तदनधीनप्रवृत्तिकं शरीरादन्यदपि बहु पश्यतः पूर्वपक्षिणः सर्वं प्राणाधीनप्रवृत्तिकमिति शङ्काऽयोगात् ।

प्रकाशः

शिलेति । शिलाकाष्ठाद्यचेतनेषु प्राणायत्तस्थित्यदर्शनात् "सर्वाणि ह्वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते" इति सर्वपदायोगादत एव च "सर्वाणि ह्वा इमानि" इति प्रसिद्धवन्निर्देशादेव हेतोः प्राणशब्दनिर्दिष्टः परमात्मैवेति सिद्धान्त इत्यर्थः । पूर्वपक्षस्य निर्दलत्वेनानूदितं निरस्यति— **तन्नेत्यादिना** ।

एतेन, यत्केन चित्प्रलपितं—पूर्वत्राकाशपदेन परमाकाशस्य परप्रकृतिरूपस्य ग्रहणेन तद्भेदादस्त्वीश्वर आकाशः । प्रस्तावावाक्यगतप्राणस्तु "प्राणाद्ध्येव खल्विमानि भूतानि" इत्यादिश्रुतेः प्रसिद्धप्राण एवेति शङ्कायां, सर्वकारणत्वादिलिङ्गात्प्राणाशिव एव, "प्राणाद्ध्येव" इति श्रुतेस्त्वानन्दरूपस्य ब्रह्मणः कारणत्व एव तात्पर्यमिति परिहार इति । उक्तं च—

प्राणे तु का गतिरिति प्राणाद्ध्येवेत्यपि श्रुतेर्नैतत् ।
शिव एव सोऽपि लिङ्गात् सा श्रुतिरानन्दविश्रान्ता ॥

इति, तन्निरस्तम्, पूर्वत्रापि "आकाशाद्वायुः" इत्यपि श्रुतेस्स-

चन्द्रिका

ग्रन्थस्तु स्पष्टार्थः ॥

प्रकाशः

त्त्वात् । ऐकाधिकरण्ये तु "अत एव" इति विन्यासायोगात् । "प्राणाद्ध्येव" इत्यादेर्विष्णुपरत्वेनानन्दमयाधिकरण एव साधितत्वाच्च । सिद्धान्तोऽप्ययुक्तः,

प्राणस्थविष्णुना सर्वे प्रसूयन्ते यतस्ततः ।
प्रस्तावदेवता स स्यात् प्रस्तावस्तु जनिर्यतः ॥

इत्यादिव्याख्यानरूपस्मृतिविरोधाच्च । "प्राणः स्थूणा अयं वाव शिशुर्योऽयं मध्यमः प्राणः" इति श्रुतिविरोधाच्च ।

द्वावात्मानौ हि देवेषु द्वौ प्राणौ द्वौ च चेतनौ ।
अज्ञानाभिभवास्पृष्टौ वायुर्नारायणश्च तौ ॥
तदन्ये चेतनास्सर्वे प्राणाश्चात्मान एव च ।
अज्ञानाभिभवस्पृष्टास्तस्मात्ते ह्यधमाः स्मृताः ॥
मध्यमो वायुरेवैक उत्तमः केवलो हरिः ।

इति ब्रह्माण्डपुराणविरोधाच्चेति । उपन्याससमुखेनैव टीकाग्रन्थस्य विवृतत्वान्नाक्षरार्थवर्णने यतितव्यमित्याह—**ग्रन्थस्त्विति** ॥

॥ इति प्राणाधिकरणम् ॥

—अथ ज्योतिरधिकरणम्—

"यो वेद निहितं गुहायाम्" इत्युक्तम् । तच्च गुहानिहितं "वि मे कर्णा पतयतो वि चक्षुर्वी३दं ज्योतिर्हृदय आहितं यत् । वि मे मनश्चरति दूर आधीः किं स्विद्वक्ष्यामि किमु नू मनिष्ये" इति ज्योतिरुक्तम् ।

तत्त्वप्रकाशिका

अत्र लोकतोऽन्यत्रप्रसिद्धज्योतिर्नाम्नो ब्रह्मणि समन्वयप्रतिपादनादस्ति शास्त्रादिसङ्गतिः । श्रुत्यधिकरणसङ्गती विषयवाक्योदाहरणपूर्वकं विषयसंशयौ च सूचयति—यो वेदेति । "यो वेद निहितं गुहायाम्" इत्यानन्दमयस्य हृदयगुहानिहितत्वमुक्तम्, मन्त्रवर्णोक्तस्यैवान्नमयादिशब्दैरुच्यमानत्वात् । तद्गुहानिहितत्वं "वि मे कर्णा पतयतः" इति कस्य चिज्ज्योतिषः प्रतीयते, मे कर्णौ ज्योतिषो विरुद्धं पततः, चक्षुश्च विरुद्धं पतति, यदिदं हृदय आहितं ज्योतिस्तदप्यत्यन्तं कर्णादिविरुद्धं वर्तते, मे मनश्चातीव विरुद्धं चरति, अतो व्याप्तबुद्धिरप्यहं किं नु वक्ष्यामि, किं वेदानीं चिन्तयामीति । एतच्च यदि विष्णोरन्यत्तर्ह्यानन्दमयत्वं चान्यस्यैव प्रसज्येतेति निर्णेयं भवति । तज्ज्योतिरत्र विषयः । किं विष्णुरुताग्निरिति सन्देहः । गुहानिहितत्वं ज्योतिश्शब्दस्याग्नौ प्रसिद्धिश्च सन्देहबीजमिति भावः । तत्र सयुक्तिकं पूर्वपक्षयति—तच्चेति । तज्ज्योतिरग्निरेव भवेत्, एतत्सूक्तस्याग्निसूक्तत्वात् । न

तच्च ज्योतिरग्निसूक्तत्वात्प्रसिद्धेश्चाग्निरेवेति प्राप्तम् । अत आह–

॥ ओम् ज्योतिश्चरणाभिधानात् ओम् ॥

विष्णुरेव ज्योतिः, कर्णादीनां विचरणाभिधानात् । स हि "परो मात्रया तन्वा वृधान" इत्यादिना कर्णादिविदूरः ॥३४॥

तत्त्वप्रकाशिका

च वाच्यम् प्रकरणादपि लिङ्गस्य बलीयस्त्वाद्गुहानिहितत्वलिङ्गेनास्य बाध इति, ज्योतिश्श्रुतेरग्नावेव रूढत्वात् । न हि लिङ्गं श्रुतिप्रकरणापबाधने शक्तं, यावता श्रुतित एव दुर्बलम् । श्रुतिस्सावकाशेति चेन्न, जाठरजातवेदसि लिङ्गस्यापि सावकाशत्वात् । तथा च सावकाशलिङ्गमात्रात् सावकाशश्रुतिप्रकरणयोर्बलवत्त्वादग्निरेवेदं ज्योतिः, ततश्च गुहानि हितत्वमानन्दमयत्वं च तस्यैवेत्यर्थः । सिद्धान्तयत्सूत्रमवतारयति––**अत इति** । यस्मादिति प्राप्तमत आह सूत्रकार इत्यर्थः । सूत्रं व्याचष्टे––**विष्णुरेवेति** । विष्णुरेवेदं ज्योतिर्भवेत्, कर्णादीनामेतज्ज्योतिर्विरुद्धचरणाभिधानात् कर्णादिविदूरत्वलिङ्गादित्यर्थः । कर्णादिविदूरत्वाभिधाऽनेपि कुतो विष्णुरिदं ज्योतिरित्यत आह––**सहीति** । मीयन्ते विषया अनेनेति मात्रा इन्द्रियगणस्ततस्त्वं परोऽसीत्यर्थः । न च प्रकरणविरोधः, लिङ्गेन प्रकरणबाधोपपत्तेः । न च श्रुतिविरोधः, श्रुतेर्विष्णावपि सावकाशत्वात् । महायोगविद्वद्रूढिसद्भावेन मुख्यत्वाच्च । निरवकाशलिङ्गेन सावकाशश्रुत्यादेर्बाधोपपत्तेः । अतो विष्णुरेवेदं ज्योतिरिति तस्यैव गुहानिहितत्वमानन्दमयत्वं चेति सिद्धम् ॥

चन्द्रिका

॥ ओम् ज्योतिश्चरणाभिधानात् ओम् ॥

अत्र त्रीणि दर्शनानि । "ज्योतिः" इत्यादिचतुस्सूत्री एकमधिकरणम् । विषयवाक्यं तु अग्निसूक्तस्थं "ज्योतिर्हृदय आहितं यत्" इति वाक्यमेवेत्येकं मतम् । इदं च "ज्योतिः" इत्यस्य सूत्रस्य अग्निसूक्तस्थं वाक्यमेव उदाहृत्य, "इदं चैकमधिकरणं" इति वदतः तत्त्वप्रदीपकृतोऽभिप्रेतम् । मतान्तरं तु—चतुस्सूत्र्या एकाधिकरणत्वेऽपि, विषयवाक्यं "ज्योतिः" इत्यस्यापि "अथ यदतः परो दिवो ज्योतिः" इति च्छान्दोग्यवाक्यमेवेति । इदं च "छन्दोऽभिधानात्" इति सूत्रव्याख्यानरूपं "नित्यत्वादेव शब्दानाम्" इत्यनुव्याख्यानं, "ज्योतिश्चरणाभिधानात्" इत्यधिकरणं तात्पर्यतो

प्रकाशः

॥ **ओम् ज्योतिश्चरणाभिधानात् ओम्** ॥ "टीकासु च यदस्पष्टं" इति प्रतिज्ञानुरोधेन टीकाकृतां योजनाभेदेषूपपत्तीर्विवक्षुर्विरोधं च परिजिहीर्षुस्तदुक्तयोजनाभेदान् दर्शयति—**अत्रेति** । "त्रीणि दर्शनानि" इत्युक्त्या त्रयमप्युपादेयमिति सूचयति । **चतुस्सूत्रीति** । "ज्योतिः" इत्येकं, "छन्दोऽभिधानान्नेति चेन्न तथा चेतोर्पणनिगदात्तथा हि दर्शनम्" "भूतादिपादव्यपदेशोपपत्तेश्चैवम्" "उपदेशभेदान्नेति चन्नोभयस्मिन्नप्यविरोधात्" इति चतुस्सूत्री । **तत्त्वप्रदीपेति** । प्राचीनभाष्यव्याकर्तुः । "इतिसूत्रव्याख्यानरूपं" इति सुधारीत्योक्तम्, एतन्मते ज्योतिस्सूत्रस्यापि

चन्द्रिका

विवृणोतीत्यवतार्य, "ज्योतिः" इति सूत्रस्य च्छान्दोग्यवाक्यमेवोदाहरतः सन्न्यायरत्नावलीकारस्याभिप्रेतम् । मतान्तरं तु—ज्योतिस्सूत्रमेकमधिकरणं, "छन्दः" इत्यादित्रिसूत्री त्वधिकरणान्तरमिति । इदं च टीकाकारस्याभिप्रेतम् । न चात्राऽऽद्यपक्षे अग्निसूक्ते गायत्रीरूपच्छन्दोऽभिधानभूतादिपादव्यपदेशोपेदशभेदानामभावेन "छन्दोऽभिधानात्" इत्यादेरयोग इति वाच्यम्, "ज्योतिर्हृदय आहितं यत्" इति अग्निसूक्तस्थस्यैव ज्योतिषः छान्दोग्येऽपि ज्योतिश्श्रुत्या, "योऽयमन्तर्हृदये" इति हृदयनिहितत्वरूपधर्मेण च

प्रकाशः

तात्पर्यतो व्याख्यानरूपत्वात् । यद्वा—साक्षाच्छन्दस्सूत्रस्यैव व्याख्यानरूपत्वाभिप्रायेणैवमुक्तम् । 'इत्यनुव्याख्यानं इत्यवतार्य' इत्यन्वयः । **सन्न्यायेति** । प्राचीनानुव्याख्यानव्याख्यातुः । **टीकाकारस्येति** । तत्त्वप्रकाशिकाकृतः । एवं मतभेदमुपन्यस्य तत्त्वप्रदीपपक्षे "वि मे कर्णा पतयतः" इत्यग्निसूक्तगतस्यैव सर्वत्र विषयवाक्यत्वेऽनुपपत्तिमाशङ्कय समाधत्ते—**न चेति** । **अभावेनेति** । "गायत्री वा इदꣳ सर्वं भूतं यदिदं किञ्च" इत्यादिच्छान्दोग्यवाक्य एव सत्त्वेन तस्य च्छन्दःप्रभृतिसूत्रेष्वविषयत्वे तेषामयोग इत्यर्थः । 'ज्योतिश्श्रुत्या' "अथ यदतः परो दिवो ज्योतिर्दीप्यते" इति

चन्द्रिका

शाखान्तराधिकरणन्यायेन प्रत्यभिज्ञायमानत्वेनैकत्वात् । अन्यथा अनेकाधिकरणपक्षेऽपि च्छान्दोग्योक्तस्य ज्योतिषो "गायत्री वा इदꣳ सर्वम्" इति श्रवणाच्छन्दस्त्वेऽप्यग्निसूक्तस्थस्य च्छन्दस्त्वानापत्त्या पूर्वाधिकरणसिद्धान्ताक्षेपेण उत्तराधिकरणपूर्वपक्षो न स्यात् । तथा च "छन्दोऽभिधानात्" इत्यस्यायमर्थः—अग्निसूक्तस्थं ज्योतिर्न विष्णुः, अस्यैव ज्योतिषः छान्दोग्ये गायत्रीत्वाभिधानादिति ।

प्रकाशः

ज्योतिश्श्रुत्या । **शाखान्तरेति** । अधिकरणशरीरं प्रागुक्तम् शास्त्रयोनिसूत्रे । "एकं वा संयोगरूपचोदनाख्याविशेषात्" इति सिद्धान्तसूत्रोपन्यस्तेन फलसंयोगादिसाधारणधर्मकृतप्रत्यभिज्ञारूपेण न्यायेन यथा शाखाभेदेऽपि अग्निहोत्रज्योतिष्टोमादिकर्माभेदः, तथा वेदभेदेऽपि शब्दैक्याद्धर्मैक्याज्ज्योतिरभेद इत्यर्थः । अग्निसूक्तगतस्य च्छान्दोग्यगतस्य च ज्योतिष एकत्वमवश्याभ्युपेयम्, अन्यथा टीकाकृत्पक्षेऽप्ययुक्तिरित्याह—**अन्यथेति** । उक्तदिशैकत्वानभ्युपगतौ । **पूर्वेति** । ज्योतिरधिकरणेत्यर्थः । अस्त्वेकत्वं ज्योतिषः, किं तत इत्यतः प्रागुक्तानुपपत्तिनिरासप्रकारमाह—**तथा चेति** । नन्वेवं पूर्वपक्षे अग्निसूक्तस्थं ज्योतिर्न विष्णुः, अन्यत्रनिरूढज्योतिःश्रुतेरिति स्वप्रकरणगतज्योतिश्श्रुतिरूपपूर्वपक्षयुक्त्यभिधानसम्भवेन प्रकरणान्तरगतज्योतिषैक्यं प्रसाध्य, तत्रत्यच्छन्दस्त्वादियुक्त्यभिधानसमञ्जसम् । न च ज्योतिश्श्रुतेरधिदै-

प्रकाशः

वशब्दत्वे अधिभूतशब्दत्वे वा पूर्वन्यायेन विष्णुपरतया सावकाशत्वेन न निरवकाशविष्णुलिङ्गात्प्राबल्यमिति न सा पूर्वपक्षप्रापिकेति वाच्यम्, भाष्याद्युक्तदिशा सूक्तरूपनिरवकाशप्रकरणानुगृहीततया प्राबल्यादिति चेन्न, वक्ष्यमाणरीत्या प्रकरणान्तरगतज्योतिषोऽपि विष्णुत्वं निर्णेतुमेतत्प्रकरणगतप्रापकापरित्यागेन प्रकरणान्तरगततत्तत्प्रापकाभिधानमुखेनैवंजातीयकसर्वगतज्योतिषो विष्णुत्वाक्षेपाभिप्रायेणान्यगतप्रापकाभिधानात् । न चैवं छान्दोग्यवाक्यमेव सर्वत्रोदाहृत्य तत्रत्यज्योतिषो विष्णुत्वनिर्णये कृते तदैक्यादग्निसूक्तगतज्योतिषोऽपि तन्निर्णयः सेत्स्यतीति वाच्यम्, अस्मिन्पक्षेऽपि सिद्धान्ते छान्दोग्यस्थं ज्योतिर्विष्णुः, अस्यैव ज्योतिषोऽग्निसूक्ते चरणाभिधानात् इति वक्राश्रयणस्य तुल्यत्वात् । नन्वस्मिन्पक्षे केवलं सिद्धान्ते चरणरूपैकयुक्त्यभिधानाय प्रकरणान्तरानुसरणं तदर्थं सूत्रं चैकं, तत्त्वप्रदीपपक्षे च पूर्वोत्तरपक्षयोरनेकयुक्त्यभिधानायान्यप्रकरणानुसरणं तदर्थं सूत्राणि त्रीणीति गौरवमिति चेन्न, प्रकरणान्तरानुसरणे समाने युक्त्यादिगतैकानेकत्वादेरप्रयोजकत्वात् । प्रधानसूत्रे प्रकरणान्तरानुसरणापेक्षया गुणसूत्रेष्वेव तदनुसरणस्य न्याय्यत्वाच्च । चरणेन ज्योतिषो विष्णुत्वे पूर्वमभिहितेऽन्यप्रकरणगतप्रापकान्तरावष्टम्भेन पूर्वोक्ताक्षेपरूपशङ्काया अनन्तरमेवोदयाच्चेति तात्पर्यात् । उक्तं

चन्द्रिका

एवं भूतादिपादव्यपदेशादावपि द्रष्टव्यम् । न च पूर्वपक्षे अग्निसूक्तस्याग्निपरत्वात्, छान्दोग्यस्य च च्छन्दःपरत्वात् प्रत्यभिज्ञाऽयोग इति शङ्क्यम्, अस्मिन्मते "तेजो वै ब्रह्मवर्चसं गायत्री" इति श्रुतौ अग्निशब्दानतिभिन्नार्थतेजश्शब्दगायत्रीशब्दयोः सामानाधिकरण्यदर्शनेनाग्नौ गायत्रीशब्दस्य, गायत्र्यां वा अग्निशब्दस्य सम्भवेनाग्निसूक्तवत् छान्दोग्यस्याग्निपरतायाः, छान्दोग्यवदग्निसूक्तस्याऽपि गायत्रीपरताया वा सम्भवेन द्वयोरप्येकार्थत्वात् । न चाग्निसूक्तस्थेन

प्रकाशः

च तत्वप्रदीपे—"अग्निसूक्तमुदाहृत्य मन्त्रगोचरविचारमाचरता परमवैदिकेनाचार्येण निखिलोऽपि वेदसमन्वयो विचारितो भवतीति महानयं लाभः" इति । **एवमिति** । अग्निसूक्तस्थं ज्योतिर्विष्णुरेव, अस्यैव ज्योतिषः छान्दोग्ये भूतादिपादव्यपदेशादुपदेशभेदेऽप्यविरोधादिति द्रष्टव्यमित्यर्थः । ननु भवेदेवमनुपपत्तिपरिहारः, यद्युभयगतज्योतिषोरेकत्वं स्यात् । न चैवं, वाक्यद्वयस्यापि भिन्नार्थपरत्वात् । अन्यथा "वागेवास्य ज्योतिः" "अथैष ज्योतिः" इत्यादावपि ज्योतिश्श्रुत्यैकत्वं स्यादित्याशङ्क्याह—**न चेति** । नन्वेवमप्यग्निसूक्तस्थस्य "वि मे कर्णा पतयतो वि चक्षुः" इति कर्णचक्षुराद्यगोचरत्वमुच्यते । तत्र च "तदेतद्दृष्टं च श्रुतं च" इति च्छान्दोग्ये तृतीये दृष्टत्वादिकमुच्यते । अतो नैकार्थ्यमित्याशङ्क्याह—**न चेति** ।

चन्द्रिका

कर्णादिविदूरत्वेन "तदेतद्दृष्टं च श्रुतं च" इति च्छान्दोग्यस्थदृष्टत्वादिकं विरुद्धमिति शङ्क्यम्, आकारभेदेनाविरोधात् । एकाधिकरणत्वादेव हि "छन्दोऽभिधानात्" इति सूत्रे समन्वेतव्यशब्दान्तरमनुक्त्वा "विकारशब्दान्नेति चेत्" इत्यादाविव पूर्वसूत्रोक्तसमन्वयबाधकमात्रमुद्धृतम् । भाष्येऽपि च्छन्दस्सूत्रव्याख्यानावसरे "अग्निगायत्र्यादि" इति अग्निपदं प्रयुक्तम् । तस्मादाद्यं मतं युक्तम् ।

प्रकाशः

आकारेति । शुद्धरूपेणादृष्टत्वादि, विशिष्टरूपेण दृष्टत्वादिकमित्यर्थः । यद्वा—कात्स्न्र्येनादृष्टत्वादि, एकदेशेन दृष्टत्वादीत्यर्थः । यद्वा—सूक्ष्मस्थूलाकारभेदेनेत्यर्थः । ननु कुत एवं कर्णादिविदूरत्वदृष्टत्वादेराकारभेदेनाविरोधं व्युत्पाद्य, अग्निपर्यायतेजश्शब्दस्य गायत्र्यां श्रवणेनाग्निसूक्तस्थच्छान्दोग्यस्थवाक्ययोरैकार्थ्यं चापाद्य ज्योतिश्श्रुत्या गुहानिहितत्वधर्मेण चानेकत्र श्रुतज्योतिष एकत्वव्युत्पादनेनैकाधिकरण्यसमर्थनक्लेशः, भिन्नविषयतयाऽधिकरणद्वयमेवास्त्वित्यतः, ऐकाधिकरण्ये सूत्रे भाष्ये च ज्ञापकमाह—**एकाधिकरणत्वादेवेति** । **अनुक्त्वेति** । अन्यथा "आकाशस्तल्लिङ्गात्" "अत एव प्राणः" इत्यादाविव गायत्र्यादिसमन्वेतव्यशब्दोपादानं स्यादिति भावः । **अग्नीति** । अन्यथा गायत्रीपदमेव प्रयुञ्जीतेति भावः । नन्वेवमपि सन्न्यायरत्नावलीकृन्मते छान्दोग्यवाक्यस्यैव ज्योतिरादिसूत्रचतुष्टये विषयत्वात्तत्र

चन्द्रिका

द्वितीयेऽपि च्छान्दोग्ये चरणाभिधानाभावेऽपि उक्तरीत्या वाक्यद्वयोक्तस्य ज्योतिष एकत्वात् 'चरणाभिधानात्' इत्येतत् न व्यधिकरणम्। तथा च 'चरणाभिधानात्' इत्यस्यायमर्थः—छान्दोग्यस्थं ज्योतिर्विष्णुः, अस्यैव ज्योतिषोऽग्निसूक्ते विचरणाभिधानात् इति। यद्यपि च्छान्दोग्योक्तस्य ब्रह्मत्वे "यद्वैतद्ब्रह्म" इत्यादिश्रुतिलिङ्गानि स्ववाक्यस्थानि सन्ति, तथाऽपि तत्तत्सूक्तस्थनिरवकाशविष्णुलिङ्गैः सावकाशश्रुतिसूक्तबाधेन भिक्षुकपादप्रसरणन्यायेन सर्ववेदानां विष्णौ समन्वयं दर्शयितुं सूत्रकारेण अग्निसूक्तस्थं लिङ्गमुक्तम्। तस्मात् द्वितीयमपि निरवद्यम्।

प्रकाशः

च्छन्दोभिधानादिसम्भवेऽपि चरणशब्दितकर्णादिविदूरत्वादेरभावेन चरणाभिधानादित्ययुक्तमित्यत आह—**द्वितीयेऽपीति**। 'पक्षे' इति वर्तते। नन्वयुक्तमेतत्, छान्दोग्यगतज्योतिषो विष्णुत्वे तत्रत्यानां "ततो ज्यायांश्च पूरुषः" "यद्वैतद्ब्रह्म" "य एतामेव ब्रह्मोपनिषदं वेद" इति श्रुतीनां, "एतामेव नातिशीयन्ते" इति सर्वोत्तमत्वगानत्राणकर्तृत्वभूतादिपादत्वादिलिङ्गानां च त्यागेनान्यगतलिङ्गोदाहरणे प्रयोजनाभावादित्याशङ्क्याह—**यद्यपीति**। एवं मतद्वये एकैकं वाक्यमुदाहरणमुपेत्य सूत्राणां सामञ्जस्यमुक्तम्। अधुना, मतद्वयेऽपि वाक्यद्वयमुदाहरणं, पूर्वोत्तरपक्षन्यायसाम्याच्चैकाधिकरणता। नहि विषयभेदमात्रेणाधिकरणभेदः। अतो

चन्द्रिका

यद्वा—मतद्वयेऽपि वाक्यद्वयमप्युदाहरणम् । यथा ह्यग्निसूक्तस्थवाक्ये प्रकरणानुगृहीतश्रुत्या पूर्वःपक्षः, तथा छान्दोग्येऽपि "गायत्री वा इदं सर्वं" इत्युपक्रमात्, "सैषा चतुष्पदा षड्विधा गायत्री" इति चोपसंहारात् तस्य गायत्रीप्रकरणत्वेन, तदनुगृहीतज्योतिश्श्रुत्या पूर्वपक्ष इति पूर्वपक्षयुक्तिसाधारण्यात्, तथाऽग्निसूक्ते निरतिशयवैभवलक्षणचरणेन सिद्धान्तवत्, छान्दोग्येऽपि "एतामेव नातिशीयन्ते" इति निरतिशयवैभवरूपेण चरणेन सिद्धान्त इति सिद्धान्तयुक्तिसाधारण्याच्चैकाधिकरणता । यथाऽऽघाराग्निहोत्राद्यधिकरणेषु "आघारमाघारयति" "अग्निहोत्रं जुहोति" इत्याद्युदाहरणभेदेऽपि द्रव्यदेवतालक्षणयागरूपाभावान्नानयोर्यागविधित्वमिति पूर्वपक्षयुक्तिसाधारण्यात्, मन्त्रवर्णादिना देवतादिलाभान्न रूपाभाव इति सिद्धान्तयुक्तिसाधारण्याच्च एकाधिकरणता, तद्वत् ।

प्रकाशः

न वैयधिकरण्यमित्याह—**यद्वेति** । **छान्दोग्येऽपीति** । 'तदनुगृहीतश्रुत्या' इत्यन्वयः । तत्र गायत्रीप्रकरणत्वं साधयति—**गायत्री वा इदमित्यादिना** । **चरणेनेति** । 'वि' कर्णादीन्द्रियापरिच्छेद्यत्वरूपविचरणेनेत्यर्थः । **साधारण्यादिति** । 'भूतादि' इति युक्त्यन्तरं तु च्छान्दोग्यमात्रासाधारणमिति वक्ष्यत इति भावः । वाक्यभेदेऽपि न्यायसाम्यादैकाधिकरण्ये दृष्टान्तमाह—**यथेति** । अधिकरणशरीरं प्रागुक्तम् समन्वयसूत्रे । द्रव्यदेवते हि यागस्य रूपमुच्यते । तदलाभे सति विधानयोग्यस्वरूपावि-

चन्द्रिका

छन्दस्सूत्र तु च्छन्दश्शब्दोऽग्नेरप्युपलक्षकः। अत एव "अग्निगायत्र्यादि" इति भाष्ये अग्निपदप्रयोगः। "उपदेशभेदात्" इति पूर्वपक्षयुक्तिः, "भूतादिपाद" इति सिद्धान्तयुक्तिश्च

प्रकाशः

शेषानवगत्या नानयोर्यागविधित्वमिति "दध्ना जुहोति" "सन्ततमाघारयति" इत्यादिवाक्यप्राप्तहोमाघारसमुदायानुवादत्वरूपपूर्वपक्षयुक्तिसाधारण्यात्, "अग्निर्ज्योतिर्ज्योतिरग्निस्स्वाहेति सायं जुहोति" "इन्द्रं ऊर्ध्वोऽध्वर आघारमाघारयति" इति वचनविनियुक्तमन्त्रवर्णात्, "दध्ना जुहोति" "चतुर्गृहीतं वा एतदभूत्" इत्यादिना च देवताद्रव्यलाभरूपस्वतन्त्रहोमाघारविधिरिति सिद्धान्तयुक्तिसाधारण्याच्चेत्यर्थः। आदिशब्देन चित्राज्याधिकरणयववराहाधिकरणादेर्ग्रहणम्। ननु वाक्यद्वयेऽपि ज्योतिष एव विषयत्वेन ज्योतिस्सूत्रे ज्योतिर्मात्रग्रहणेऽपि च्छन्दस्सूत्रे च्छन्दोमात्रग्रहणं न युक्तम्। न ह्युभयत्र च्छन्द इत्येव पूर्वः पक्षः, किन्तु सूक्ते अग्निरिति, छान्दोग्ये छन्द इतीत्यत आह—छन्दस्सूत्र इति। गायत्रीरूपच्छन्दसि उपदेशभेदादिरूपानुपपत्त्यन्तरं उद्भाव्य समाधातुं तस्य मुखतः कीर्तनमिति भावः। उपलक्षकत्वे ज्ञापकं—अत एवेति। नन्वाद्यसूत्रद्वयस्य कथञ्चिद्वाक्यद्वयसाधारण्यसम्भवेऽप्युत्तरसूत्रद्वयस्य न तत्सम्भवति, सूक्ते भूतादिपादव्यपदेशादेरभावादित्यत आह—उपदेशेति। यथाऽऽनन्दमयाधिकरणे "तद्धेतुव्यपदेशात्" इत्या-

चन्द्रिका

च्छान्दोग्यवाक्यमात्रासाधारणी । एवञ्च यथा अर्थवादनये भट्टमते एको विचारः अर्थवादमन्त्रादिसाधारणः, अन्यस्तु अर्थवादमात्रासाधारण इति द्विपर्वा विचारः, तथाऽत्राप्युक्तरीत्या द्विपर्वा विचारः ।

प्रकाशः

नन्दमयमात्रासाधारणं, तद्वदिति भावः । मीमांसकसंमत्या चोक्तमर्थं निष्कृष्याह—**एवञ्चेति** । अर्थवादाधिकरणं प्रागुक्तं आद्याधिकरणे । तत्र "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्" इति सूत्रेणाक्रियार्थानामर्थवादमन्त्रनामधेयानां आनर्थक्यादप्रामाण्यमिति पूर्वः पक्षः, "विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः" इति सिद्धान्तसूत्रस्थेन तुशब्देन, "तुल्यं च साम्प्रदायिकं" इति सूत्रेण वा कृत्स्नस्वाध्यायपुरुषार्थपर्यवसाय्यध्ययनविधिमहिम्नाऽर्थवादादीनां सप्रयोजनत्वावसायेन प्रामाण्यमिति सिद्धान्त इति साधारण एको विचारः, पुनरर्थवादानां द्वाराभावादप्रामाण्यमिति पूर्वः पक्षः, सिद्धान्तसूत्रे स्तुतिग्रहणात् द्वारसम्भवात् प्रामाण्यमित्यसाधारणो अन्यो विचार इति यथा द्विपर्वा विचारः, तथेहाऽपि वाक्यद्वयगतज्योतिश्शब्दार्थः विष्णुरन्यो वेति संशयेऽग्निच्छन्दस्त्वाभिधानादप्रसिद्धज्योतिर्गायत्रीपदप्रयोगे प्रयोजनाभावान्न विष्णुः किं त्वन्य इति प्राप्ते, उभयत्र चरणशब्दितापरिच्छिन्नवैभवत्वस्याभिधानात्तथोपासनार्थमप्रसिद्धपदप्रयोगस्यापि सम्भवाद्विष्णुरिति सिद्धान्त इत्येको विचारः, पुनः छान्दोग्यस्थज्योतिर्न ब्रह्म उपदेश-

चन्द्रिका

अत एवास्य तत्त्वप्रदीपे अन्तर्भेदाधिकरणत्वमुक्तमिति दिक् ॥ तृतीयेऽपि

प्रकाशः

भेदादिति प्राप्ते, भूतादिपादव्यपदेशादिना सिद्धान्त इत्यन्यो विचार इति द्विपर्वा विचार इत्यर्थः । 'अत एव' साधारणासाधारणद्विरूपविचारत्वादेवेत्यर्थः । ननु

नित्यत्वादेव शब्दानां तत्स्वभावः कथं ततः ।

इत्यनुव्याख्यानोक्तायाः पूर्वपक्षयुक्तेः "तादृशत्वाच्च तच्छक्तेः" इत्युक्तसिद्धान्तयुक्ते श्चाग्निसूक्तस्थज्योतिष्ययोगात् कथमिदमुदाहरमिति चेन्न, तयोर्भूतादिपादव्यपदेशादिवत् गायत्रीवाक्यमात्रासाधारण्येनोपपत्तेः । अत एव द्विपर्वा विचार इत्युक्तम् । नन्वथापि ज्योतिस्सूत्रे इदमग्निसूक्तमेव न विष्णुसूक्तमित्यध्यापकप्रसिद्धेरज्ञानमूलत्वादिरूपो न्यायो व्युत्पाद्यः, उत्तरत्रिसूत्र्यामनादिनित्यस्यापीशाधीनत्वादिव्युत्पादको न्याय इति न्यायस्य व्यवस्थितत्वात् विषयस्यापि व्यवस्थयाऽधिकरणभेदश्च वाच्य इति चेन्न, अन्तरागर्भिणीन्यायेनोपपत्तेः । अत एवान्तर्भेदाधिकरणत्वमुक्तमित्युक्तम् । एवमन्यदप्यूह्यमिति भावेनोक्तं—दिगिति । एवं मतद्वयं समर्थ्य टीकाकारमतं चोपपन्नमित्याह—तृतीयेऽपीति । 'पक्षे' इति सम्बध्यते । यदुक्तं समन्वेतव्यशब्दानुक्तेः छन्दःप्रभृतिसूत्रत्रयं न भिन्नाधिकरणमिति, तत्र किं साक्षादनुक्तिरभिप्रेता, अर्थसूचनमपि वेति । आद्यः कल्पो व्यभिचारीत्याह—

चन्द्रिका

"कम्पनात्" "शब्दादेव प्रमितः" इत्यादाविव अधिकरणान्तरत्वेऽपि समन्वेतव्यशब्दान्तरस्य साक्षादनुक्तिर्न विरुद्धा। सूचनं तु प्रकृतेऽपि "छन्दोऽभिधानात्" इत्यनेन कृतम्। भाष्येऽग्निपदं तु अन्यत्रप्रसिद्धस्य गायत्रीपदस्य विष्णौ प्रयोगे प्रयोजनमत्र वदता सूत्रकृता पूर्वत्रोत्तरत्र च अग्न्यादिपदस्य विष्णौ प्रयोगे प्रयोजनं सूचितमिति दर्शयितुम्। अन्यथा मतान्तरेऽपि "अग्निगायत्र्यादि" इत्यादिपदं व्यर्थं स्यात्।

प्रकाशः

कम्पनादिति। तत्र "महद्भयं वज्रमुद्यतं" इति वज्रशब्दः समन्वीयते। "शब्दात्" इत्यत्रेशानशब्दः। "पत्यादिशब्देभ्यः" इत्यत्र ब्राह्मणशब्दः। न च तत्र ते उपात्ताः। तथाऽप्यधिकरणान्तरत्वं तत्र सम्मतमित्यर्थः। द्वितीये त्वाह— **सूचनं त्विति**। छन्दःशब्देन गायत्रीशब्दसूचनादिति भावः। ननु तत्सूत्रभाष्ये गायत्रीपदप्रयोगमात्रे कर्तव्ये "अग्निगायत्र्यादिशब्दार्थरूपोऽसाविति चेतोऽर्पणार्थं हि निगद्यते" इत्यग्निपदोपादानमयुक्तमित्यत आह—**अग्निपदं त्विति**। **प्रयोजनमिति**। तत्तत्पदप्रवृत्तिनिमित्तगुणवत्तयोपासनारूपप्रयोजनमित्यर्थः। 'अत्र' अधिकरणे। **अग्न्यादीति**। अग्न्याकाशप्राणभूमाक्षरादिपदस्येत्यर्थः। 'मतान्तरे' प्रागुपन्यस्तमतद्वयेऽपीत्यर्थः। नन्वधिकरणान्तरत्वे पूर्वत्राकाशप्राणाधिकरणयोरिवोत्तरत्र च्छन्दोऽधिकरण-

चन्द्रिका

अनुव्याख्यानन्यायविवरणयोः "ज्योतिः" इत्यत्राधिकाशङ्काऽनुक्तिस्तु "अग्निसूक्तिस्थत्वात्" इति भाष्य एवोक्तत्वात्, न तु तस्यैकाधिकरणत्वात्। "अधिभूताध्यात्माधिदैवगतानामपि शब्दानां" इति न्यायविवरणे ज्योतिरधिकरणस्य पृथगुपाध्यनुक्तिरपि तस्याकाशाधिकरणवदधिभूतगतशब्दविषयत्वं वाऽन्तरधिकरणवदधिदैवगतशब्दविषयत्वं वेत्यभिप्रेत्य, न त्वेकाधिकरणत्वमभिप्रेत्य। सूक्तविषयत्वमेव हि ततोऽस्य विशेषः। इदं च मतत्रयं सूत्रयोजनामात्रे भिन्नं, प्रमेये त्वविरुद्धम्। एवमन्यत्राप्यविरोध ऊह्यः॥

प्रकाशः

इव च ज्योतिराधिकरणेऽभ्यधिकाशङ्कोक्तिः स्यादित्यत आह—**अनुव्याख्यानेति**। **उक्तत्वादिति**। विवरिष्यते चैतदिति भावः। नन्वधिकरणोपाध्युक्तिपर्यालोचनया ज्योतिरादिचतुस्सूत्र्या ऐकाधिकरण्यं प्रतीयते। अन्यथा 'सूक्तगताः' इत्यप्युच्येतेत्यत आह—**अधिभूतेति**। ननु तर्हि तेनैव गतत्वात्किमर्थमेतदित्यत आह—**सूक्तेति**। ननु तर्हि परस्परविरुद्धत्वान्मतत्रयस्यापि प्रामाण्याद्वस्तुनि विकल्पस्स्यादित्यत आह—**इदं चेति**। **एवमिति**। "कारणत्वेन चाकाशादिषु" इत्यादावित्यर्थः। तथा च तत्र वक्ष्यामः॥ एवं टीकाकाररीत्या अधिकरणभेदे समर्थिते सति अन्यत्रानुक्तेः कस्तर्ह्यस्य विषयोपाधिः, ज्योतिश्शब्दस्य देवतावाचित्वे जडवाचित्वे

चन्द्रिका

तत्र ज्योतिरधिकरणे सूक्तस्था ज्योतिरादिशब्दा उदाहरणम् ।

प्रकाशः

वाऽन्तराद्यधिकरणन्यायेन गतत्वादित्यत आह—**तत्रेति** । सूक्तगतत्वं विषयतावच्छेदकम् । ज्योतिश्शब्दस्य च वायुवाचिप्राणशब्दसमन्वयेन तज्जन्याग्निवाचित्वेन बुद्धौ सन्निधानादितरोपलक्षणत्वेनोपादानमिति भावः । नन्वस्य टीकारीत्या शास्त्राध्यायसङ्गतत्वेऽपि नात्र पादे सङ्गतिः । तथा हि—ज्योतिश्शब्दस्य भूतपरत्वे आकाशाधिकरणन्यायेन, देवतापरत्वेऽन्तराधिकरणन्यायेन विष्णौ प्रयोगात् "आकाशोऽर्थान्तरत्वादि" इत्यादावाकाशशब्दस्येव पूर्वोक्तचन्यत्रप्रसिद्धिभ्यामुभयत्रप्रसिद्धतापत्त्या नात्र समन्वयो युक्तः । न च पादान्त्यप्राणाधिकरणे प्राणशब्दस्य पूर्वं समन्वयेऽपि लोकप्रसिद्ध्याऽन्यत्रप्रसिद्धत्ववदिहापि स्यादिति वाच्यम्, तत्र पूर्वपक्षे पूर्वोक्तसमन्वयस्याक्षेपेण तथात्वसम्भवेऽपीह पूर्वोक्ताक्षेपाभावेन तदसम्भवात् । न च पूर्वं ज्योतिश्शब्दपर्यायस्याग्निशब्दस्यैव समन्वयो न ज्योतिश्शब्दस्येति वाच्यम्, "अत्ता" इत्यधिकरणटीकायामदितिश्रुतेः सावकाशत्वोक्त्ययोगात् । सवित्रादिशब्दसमन्वयमात्रेण तत्पर्यायस्याऽऽदित्यशब्दस्य "सर्वत्र" इत्यधिकरणे सावकाशताया वक्ष्यमाणत्वाच्च । अत एवाग्रे वक्ष्यति "सावकाशाग्निश्रुत्या सावकाशविष्णुलिङ्गबाधात्" इतीति चेत्सत्यम्, लोकतोऽन्यत्रप्रसिद्धप्रकरणेन ज्योतिर्नाम्नोऽप्यन्यत्र प्रसिद्धत्वात् ।

प्रकाशः

उक्तं हि—

श्रुत्यादितो लोकतो वाऽपीतरेषु प्रसिद्धता ॥

इति । न चैवं निरवकाशप्रकरणवशेन अन्यत्रैवप्रसिद्धता स्यात्,

बलवच्छ्रुतिलिङ्गाद्यैरन्येष्वेव प्रसिद्धता ।

इत्युक्तेरिति वाच्यम्, नाम्नो विष्णावपि सावकाशत्वात् । प्रागुक्त-दिशा तत्र विवक्षितबलवत्त्वस्येहाभावाच्च । 'लोकतः' इति टीका तु, प्राक् साक्षादसमन्वितत्वात्समन्वितत्वेऽप्यापाततो लोकप्रसिद्ध्या वा, प्रकरणस्य लोकतः प्रसिद्ध्या परम्परया वा, पूर्वत्रेवात्रान्य-त्रप्रासिद्धिबाधकनिरवकाशलिङ्गाभावादिति वा नेया । न चैवं, येन श्रुतेरन्यत्रप्रसिद्धता तदेव प्रागसमन्वितं प्रकरणं "ईक्षतिकर्म" इत्यत्र स्थानमिवेह समन्वीयताम् । पादसङ्गतिस्तु "अन्तः" इत्यादेरिव फलतस्सेत्स्यतीति वाच्यम्, प्राक् नाम्नः समन्वितत्वेन तस्यैवेह बुद्धिस्थत्वात् । न च प्रागपि नामद्वारा तत्तन्नामयुक्तं प्रकरणमर्थात्समन्वितमिति वाच्यम्, नाम्न एव साक्षात्समन्वितत्वेनेहापि धीस्थत्वात् । साक्षादर्थनिष्ठनामद्वारेणैव प्रकरणसमन्वयस्योचितत्वाच्च । स्थानस्यापि सन्नामद्वारेणैव समन्वेष्यमाणत्वाच्च । यद्वा—न पूर्वोक्तच-न्यत्रप्रसिद्धिभ्यामुभयत्रप्रसिद्धता, किं तु श्रुतिलिङ्गादितौल्येन वा प्रवृत्तिनिमित्तादिसाम्येन वा सा । न चात्र तथा, येनासंगतिः ।

चन्द्रिका

प्राणाधिकरणन्यायागोचरत्वप्रदर्शनेन पूर्वपक्षोत्थानादनन्तरसङ्गतिः ।

प्रकाशः

"आकाशोऽर्थान्तरत्वादि" इत्यत्राकाशशब्दस्य उभयत्रप्रसिद्धत्वं तु पादान्त्यप्राणाधिकरणेऽन्यथैव वक्ष्यत इति । ननु भाष्यरीत्या सङ्गत्याश्रयणे आनन्दमयाधिकरणानन्तर्यप्राप्तेरत्र निवेशो न युक्त इत्यतः पूर्वसङ्गतिमाह—**प्राणेति** । एतच्चाग्रे स्पष्टमिति भावः । **सङ्गतिरिति** । प्रत्युदाहरणरूपेत्यर्थः । उक्तं च—

पूर्वन्यायात्ययो यत्र प्रत्युदाहरणा तु सा ।

इति । "यो वेद निहितं गुहायामित्युक्तम्" इति भाष्यं तु, यद्यग्निसूक्तगतं ज्योतिर्विष्णोरन्यत्, तर्हि तन्निष्ठगुहानिहितत्वयुक्तानन्दमयोऽप्यन्यः प्रसज्येतेति पूर्वपक्षे आनन्दमयाधिकरणाक्षेपात्, सिद्धान्ते च तत्समाधानात्सफलोऽयं विचार इति प्रयोजनमात्रपरमिति भावः । एतच्चान्तरधिकरणप्रयोजनसमर्थनरीत्या समर्थनीयम् । नन्वेवं यदि ज्योतिर्विष्णोरन्यत्, तर्हि तस्यैव गुहानिहितत्वात् प्रागुक्तान्तस्स्थत्वमपि तस्यैवेत्यन्तरधिकरणमप्याक्षेप्तुं शक्यते । एवञ्च पूर्वोक्ताक्षेपेणोभयत्रप्रसिद्धत्वशङ्काऽपि नोदेष्यति । न च गुहानिहितत्वमन्यदन्यदन्तस्स्थत्वं चान्यदिति वाच्यम्, तस्यापि "निहितं गुहासु" इति गुहानिहितत्वरूपत्वादिति तत्रैवोक्तत्वात् । ज्योतिषो गुहानिहितत्वात्तस्य च "यो वेद निहितं" इति मन्त्रवर्णे श्रवणान्मान्त्रवर्णिकस्यैवानन्दमयत्वात्साऽपि

चन्द्रिका

अत्र ज्योतिः किमग्निः किं वा विष्णुः इति चिन्ता । तदर्थं किं ज्योतिश्श्रुतिप्रसिद्ध्यनुसारेण कर्णादिविदूरत्वलिङ्गं बाध्यमुत विपरीतमिति । तदर्थं किं श्रुत्यनुग्राहकं सूक्तं निरवकाशमुत सावकाशमिति ।

प्रकाशः

ज्योतिरित्याक्षेपादस्याक्षेपस्य ऋजुत्वादिति चेन्न, पूर्वत्र तदधिकरणस्यैवाक्षेपेणेहापि तथात्वस्यैवोचितत्वात्, व्यवहिताक्षेपस्याविविशेषात् । अन्तर्नयाक्षेपस्याप्यानन्दमयनयाक्षेपपर्यन्तत्वस्यावश्यकत्वाच्च । अन्यथा जिज्ञासाक्षेपपर्यवसानायोगात् । साक्षादेव तदाक्षेपसम्भवे तद्द्वारा तदाक्षेपस्य वक्रत्वाच्च । न चैवं मनश्चक्षुराद्यगोचरत्वरूपादृश्यत्वश्रवणात्तद्युक्तानन्दमयोऽपि ज्योतिरित्यस्य ऋजुत्वात्तथैवाक्षिप्यतामिति वाच्यम्, अनेकसमभिव्याहारलभ्यादृश्यत्वमुखाक्षेपापेक्षया एकवाक्यलभ्यसन्निहितगुहास्थत्वमुखेनाक्षेपस्यैव ऋजुत्वादिति । **अत्रेति** ॥

वि मे कर्णा पतयतो वि चक्षुर्वी३ दं ज्योतिर्हृदय आहितं यत् ।
वि मे मनश्चरति दूर आधीः किं स्विद्वक्ष्यामि किमु नू मनिष्ये ॥

इत्यग्निसूक्तादिगतज्योतिरादिशब्दो विषय इत्यर्थः । **अग्निरिति** । कोटचन्तरप्राप्त्यभावस्य वक्ष्यमाण त्वादिति भावः । **विपरीतमिति** । लिङ्गाच्छ्रुतिर्बाध्येत्यर्थः । यदि सूक्तं निरवकाशं, तदा तदनुगृहीतया बलीयस्या श्रुत्या लिङ्गस्य बाधादग्निरिति पूर्वपक्षे

प्रकाशः

फलम्, यदि सावकाशं, तदा दुर्बलया श्रुत्या निरवकाशलिङ्गबाधायोगात् विष्णुरिति सिद्धान्ते फलमिति स्पष्टत्वात् फलफलिभावो नोक्तः । द्वावत्र पूर्वपक्षौ । एकस्तावदभ्यधिकाशङ्कां विनैव ज्योतिश्श्रुतिविष्णुलिङ्गयोः पूर्वोत्तरपक्षप्रापकयोस्सावकाशत्वमुपेत्य जात्या बलवत्त्या श्रुत्यैव लिङ्गबाधः, सूक्तस्थत्वं त्वभ्युच्चययुक्तित्वेनोच्यत इति । अन्यस्तु विष्णुलिङ्गस्य निरवकाशत्वमुपेत्य श्रुतिमात्रेण पूर्वपक्षोदयायोगादभ्यधिकाशङ्कयेति । आद्यस्तु टीकानुसारी । अन्त्यस्तु सुधानुसारी । तत्रेयं चिन्तापरम्परा द्वितीयपूर्वपक्षानुरोधेन । आद्यपूर्वपक्षे तु 'उत विपरीतं' इति द्वितीयचिन्ताऽनन्तरं 'तदर्थं श्रुत्यनुग्राहकं' इत्यत्र, तदर्थं किं लिङ्गं सावकाशमुत निरवकाशमिति चिन्ता द्रष्टव्या । यदि सावकाशं, तदा श्रुत्या लिङ्गबाधादग्निरिति पूर्वपक्षे फलम्, यदि निरवकाशं तेन सावकाशश्रुतिबाधाद्विष्णुरिति सिद्धान्ते फलमिति ध्येयम् । अत्र ज्योतिरग्निर्विष्णुर्वा, तदर्थं श्रुत्या लिङ्गं बाध्यं उत लिङ्गाच्छ्रुतिः, तदर्थं श्रुतिबाधेन मुख्यार्थहानिरुत नेति, तदर्थं ज्योतिश्श्रुतिप्रवृत्तिनिमित्तं विष्णौ न युक्तमुत युक्तमिति, तदर्थं तमोविरोधित्वं प्रवृत्तिनिमित्तमुत प्रकाशत्वादिरूपमिति प्रमेयाश्रिताधिकाशङ्कोपयुक्ता चिन्तापरम्परा स्पष्टैवेति, प्रमाणाश्रिताशङ्कोपयुक्तैव सा प्रदर्शितेति ध्येयम् ।

चन्द्रिका

पूर्वपक्षस्तु—युक्तः पूर्वत्र वायुसूक्तस्थस्य प्राणश्रुतिमात्रस्य निरवकाशविष्णुलिङ्गैः बाधः । अत्र तु ज्योतिश्श्रुतेः न बाधः, प्रकरणरूपेण सूक्तेन अनुगृहीतत्वात् । यद्यपि ज्योतिश्शब्दः तमोविरोधिमात्रे प्रसिद्धः, तथाऽपि हृदयाहितत्वलिङ्गात् "त्वामग्ने तमसि" इत्यग्निशब्दसन्निधानाच्च अग्निपरः, न त्वग्निसूक्तस्थत्वाज्ज्योतिश्शब्दोऽग्निपरः, तथात्वे सूक्तस्य अग्निश्रुतिसम्पादकत्वेन श्रुत्यनुग्राहकत्वायोगात् ।

प्रकाशः

पूर्वन्यायाविषयत्वप्रदर्शनपूर्वं द्विविधं पूर्वपक्षं सङ्ग्रहेण निर्दिशति—युक्त इति । अत्रैवं योजना—इदं ज्योतिरग्निरेव, न विष्णुः, अग्नौ निरूढज्योतिश्श्रुतेः । न च पूर्ववन्निरवकाशलिङ्गेन ज्योतिश्श्रुतिबाध इति, युक्तः पूर्वत्र वायुसूक्तस्थस्येत्यादि । **प्रकरणेति** । उपलक्षणमेतत्, पूर्ववन्निरवकाशलिङ्गाभावादित्यपि ध्येयम् । "सूक्तेनानुगृहीतत्वात्" इति युक्तिः आद्ये पूर्वपक्षेऽभ्युच्चयत्वेन, द्वितीये तु पूर्वपक्षोत्थानार्थमुक्तेति ध्येयम् । ननु पक्षद्वयेऽपि न सूक्तस्य श्रुत्यनुग्राहकत्वं, यावता श्रुतेः सवित्रादिपरत्वत्याजनेनाग्न्यादिपरत्वसम्पादन एवोपक्षयादित्याशङ्क्यानुग्राहकत्वं साधयति—**यद्यपीति** । **हृदयेति** । तच्च जाठरजातवेदसि प्रसिद्धमिति भावः । **त्वामग्न इति** ।

विश्वेदेवा अनमस्यन्भियाना त्वामग्ने तमसि तास्थिवांसम् ।

इति श्रवणेन तत्सन्निधानात् छागपशुन्यायेन विशेषश्रुत्या सा-

चन्द्रिका

एतेन—ज्योतिश्शब्दाग्निशब्दौ देवतापरौ चेदन्तरधिकरणन्यायेन ब्रह्मपरौ, भूतपरौ चेदाकाशाधिकरणन्यायेन ब्रह्मपरौ, सावकाशाग्नि-श्रुतेर्निरवकाशविष्णुलिङ्गैर्बाधात् । न चाग्निश्रुतिः प्रकरणानुगृही-तेति वाच्यम्, तत्तत्सूक्तस्थाग्नयादिश्रुतीनां विष्णौ सावकाशत्वे सूक्तानामपि तथात्वात् । सर्वसूक्तानां वैष्णवत्वेऽपि इदमग्निसूक्तं इदं

प्रकाशः

मान्यश्रुतेरर्थोपपत्तेरिति भावः । एवं सूक्तस्य श्रुत्यनुग्राहकत्वं समर्थ्य इदानीं पूर्वेण गतार्थतया पूर्वपक्षानुदयशङ्काप्रकारमनूद्य सुधो-क्तदिशाऽधिकाशङ्कयोत्थानं वक्ष्यन्, लिङ्गस्य निरवकाशत्वाभावात् अधिकाशङ्कां विनैव पूर्वपक्षोदय इति भावेन टीकाभिमतं पक्षं तावद्विशदयति—**एतेनेत्यादिना** । सूक्तस्य श्रुत्यनुग्राहकत्वकथ-नेन निरवकशलिङ्गाभावेन चेत्यर्थः । **अन्तारीति** । निरवकाश-लिङ्गेन सावकाशदेवतावाचिश्रुतीनां प्रवृत्तिनिमित्तस्यैश्वर्यादेर्भगव-द्गतत्वोक्त्या विष्णुवाचित्वसाधनरूपन्यायेनेत्यर्थः । **आकाशेति** । अचेतनगतस्यापि प्रवृत्तिनिमित्तस्य भगवदधीनत्वादिसमर्थनन्यायेने-त्यर्थः । तमेव न्यायमाह—**सावकाशेति** । ज्योतिःपदप्रवृत्तिनि-मित्तस्य भगवद्गतत्वेन तदधीनत्वेन चेति भावः । श्रुतेरुज्जीवकत्व-माशङ्क्य तदपि सावकाशमित्याह—**न चेति** । सूक्तरूपप्रकरणे-त्यर्थः । ननु सूक्तानां वैष्णवत्वे इदमग्निसूक्तमिदं विष्णुसूक्तमिति व्यवस्थानुपपत्तेर्निवकाशतेत्यत आह—**सर्वेति** ।

चन्द्रिका

त्वन्यदिति व्यवस्था तु "अभिव्यक्तेरित्याश्मरथ्यः" इति वक्ष्यमाणन्यायेन युक्ता। एवं च सावकाशसूक्तस्य निरवकाशविष्णुलिङ्गैः सुतरां बाधेन पूर्वपक्षानुदय इति परास्तम् । सावकाशाग्निश्रुत्या सावकाशविष्णुलिङ्गबाधात्। नन्वेवं सावकाशलिङ्गस्य सावकाशश्रुत्यैव बाधसम्भवात् भाष्ये सूक्तोक्तिर्व्यर्था। न च "ज्योतिः" इति सामान्यश्रुतेरग्निरूपविशेषपर्यवसानार्थं तदुक्तिः, टीकायां "श्रुतिप्रकरणयोः" इति द्विवचनस्य, भाष्ये 'अग्निसूक्तस्थत्वाच्च' इति चशब्दस्य चायोगात्।

प्रकाशः

वक्ष्यमाणेति । वैश्वानराधिकरणे अग्न्यादिशब्दानां विष्णौ मुख्यत्वे तत्तत्सूक्तानां तत्तद्विद्यानां च वैदिकसिद्धव्यवस्थानुपपत्तेरन्यवाचित्वमेवेति प्राप्ते, अग्न्यादिसूक्तादिभिर्विष्णूपासनयाऽग्न्यादावेव विष्णोरभिव्यक्तत्वाद्वा, अग्न्यादिसूक्ताद्युपासकैरग्न्यादावेव विष्णोरनुस्मरणीयत्वाद्वा, तदुपासकानामग्न्यादिस्थविष्णुप्राप्तिरूपाद्वा निमित्तात्सूक्तादिव्यवस्थोपपत्तेरग्न्यादिशब्दानां विष्णौ मुख्यत्वं, सूक्तादीनां तत्परत्वे व्यवस्था च युज्यत इति सिद्धान्त इति वक्ष्यमाणन्यायेनेत्यर्थः । **सुतरामिति** । यदि जात्या प्रबलायाः श्रुतेर्बाधस्तदा स्वभावतोऽपि दुर्बलस्य प्रकरणस्य किमु वाच्यं बाध इतीत्यर्थः । **नन्वेवमिति** । श्रुतिलिङ्गयोः सावकाशत्वे सतीत्यर्थः । **न चेति** । प्रकरणस्य विशेषोपस्थापकत्वादिति भावः । **द्विवचनस्येति** ।

चन्द्रिका

सामान्यश्रुतेः "त्वामग्ने" इति विशषोपस्थापके शब्दे सति प्रकरणा-प्रतीक्षणाच्चेति चेन्न, लिङ्गस्यातिशयेन बाधाय सूक्तोक्तेः । अत एवोक्तं टीकायां "यावता श्रुतित एव लिङ्गं दुर्बलम्" इति । निरवकाशं तु विष्णुलिङ्गं नास्ति, गुहानिहितत्वस्य जाठराग्नावपि सम्भवात् । निरतिशयवैभवरूपकर्णादिविदूरत्वस्य चाग्निश्रुत्यादिबलात् अग्नाव-प्युपपत्तेः । सुधायां तु—ज्योतिरधिकरणे 'अधिकाशङ्का "अग्नि-सूक्तस्थत्वात्" इति भाष्य एव दर्शिता' इत्युक्तम् । तत्र च श्रुतिमात्रेण

प्रकाशः

अन्यथा सावकाशलिङ्गमात्रात् सावकाशश्रुतेर्बलवत्त्वादित्येव ब्रूयात् । प्रकरणस्याग्निश्रुतिसम्पादकत्वेनोपयोगात्तत्समतया निर्देशो न स्यादि-त्यर्थः । ननु तमोविरोधिमात्रे प्रसिद्धज्योतिश्शब्दस्याग्न्युपस्थापकत्वं कथमित्यत आह—**सामान्येति** । अत **एवेति** । श्रुतिवत् सूक्त-स्यापि स्वतन्त्रत्वादेव, टीकायां "नहि लिङ्गं श्रुतिप्रकरणबा-धेन शक्तं, यावता श्रुतित एव दुर्बलम्" इत्युक्तम् । अतो ज्ञायते सूक्तरूपं प्रकरणमतिशयार्थमुक्तमिति । ननु लिङ्गस्य निरवकाशत्वे कथं श्रुतित एव बाध इत्यत आह—**निरवकाशं त्विति** । **निर-तिशयेति** । सर्वथा कर्णादिविदूरत्वस्य क्वाप्यसम्भवादिति भावः । अस्मिन्पक्षे सुधाविरोधमाशङ्क्य साऽपि टीकानुसारेण नेयेति भा-वेन तत्तात्पर्यं वक्तुमाह—**सुधायामिति** ।

चन्द्रिका

पूर्वपक्षानुदयात् तदुदयार्थमधिकाशङ्कोक्तिरिति नाभिप्रायः, उक्तरीत्या सूक्ताभावेऽपि पूर्वपक्षोदयसम्भवात्. किन्तु पूर्वपक्षदार्ढ्यार्थं तदुक्तिरित्यभिप्रायः। यद्वा—सुधायां प्राणाद्यधिकरणेषु अधिकाशङ्काप्रदर्शकस्य अनुव्याख्यानस्य "नन्वेतदपि पूर्वन्यायेन परिहृतं न सूत्रारम्भं प्रयोजतीत्यतोऽभ्यधिकाशङ्कां दर्शयति" इत्यवतारितत्वात्, इहापि पूर्वपक्षोदयार्थमेव भाष्ये अधिकाशङ्कोक्तिरिति सुधाभिप्रायः। एवं च तत्रेत्थं पूर्वः पक्षः—यद्यपि पूर्वाधिकरणन्यायेन निरवकाशब्रह्मलिङ्गैः सावकाशाग्निश्रुतिबाधः, यद्यपि च सर्वसूक्तानां वैष्णवत्वेऽपि "अभिव्यक्तेः" इत्यादिन्यायेन इदमग्निसूक्तं इदं वायुसूक्तमिति व्यवस्था सम्भवति। तथाऽपि इदमग्निसूक्तं न तु विष्णुसूक्तमिति अव्यापकप्रसिद्धेरयोगात् सूक्तं निरवकाशम्। एवं च निरवकाशप्रकरणानुगृहीतश्रुत्या निरवकाशमपि कर्णादिविदूरत्वलिङ्गं बहुवैभवाभिप्रायेण कथं चिदग्नावपि नेयम्। निरवकाश-

प्रकाशः

उक्तेति। सावकाशश्रुत्या सावकाशलिङ्गबाध इत्युक्तरीत्येत्यर्थः। सुधावाक्यस्य यथाश्रुतार्थमनुसृत्याभ्यधिकाशङ्कया पक्षान्तरमाह—**यद्वेति**। ननूक्तरीत्या पूर्वेणागतत्वात् कथमधिकाशङ्कावकाश इत्यत आह—**एवञ्चेति**। **तथाऽपीति**। एतेन वैश्वानराधिकरणेन गतार्थताऽपि निरस्ता। एतच्छङ्कानिरासस्य तत्राकृतत्वादिति। **कथञ्चिदिति**। स्वावरापेक्षया बहुवैभवसत्त्वादिति भावः।

चन्द्रिका

त्वमात्रप्रयुक्तस्य लिङ्गगतस्य प्राबल्यस्य श्रुतिगतान्निरवकाशसूक्त-साहित्यश्रुतित्वोभयप्रयुक्तप्राबल्यात् दुर्बलत्वात् । लिङ्गे बहुत्वप्रयुक्ते प्राबल्ये सत्यपि तस्य श्रुतित्वरूपस्वभावप्रयुक्तप्राबल्यात् दुर्बल-त्वात् । अन्तरधिकरणस्थेन्द्राग्न्यादिश्रुतिस्तु न सूक्तानुगृहीतेति । एवं चात्र टीकायां पूर्वपक्षहेतोः सूक्तस्य सिद्धान्तहेतोर्लिङ्गस्य च सावकाशत्वमिति पूर्वः पक्षः, सुधायां तु उभयोर्निरवकाशत्व-मितीति भेदः । यद्वा—सुधानुसारेण अत्रापि "सावकाशश्रुतिप्रक-रणयोः" इति टीकायां सावकाशत्वं श्रुतेरेव विशेषणं, न तु

प्रकाश

'निरवकाश' इति सूक्तमात्रविशेषणम् । ननु गुहानिहितत्वकर्णादि विदूरत्वविश्वदेवनियामकत्वादिलिङ्गानां बहुत्वादुभयप्रयुक्तप्राबल्याद्बल-वत्त्वं लिङ्गस्येत्यत आह—लिङ्ग इति ।

द्विविधं बलवत्त्वं च बहुत्वाच्च स्वभावतः ।
तयोस्स्वभावो बलवान् ....॥

इत्युक्तेरिति भावः । इयं च शङ्का न पूर्वाधिकरणेऽस्तीत्याह—**अन्तरिति** । टीकाद्वयपूर्वपक्षाशयं निष्कृष्य दर्शयति—**एवं चेति** । एवं पूर्वपक्षद्वयं प्रस्थानद्वयाभिमतमित्युपपाद्याधुना टीकाग्रन्थोऽपि लिङ्गप्रकरणयोः निरवकाशत्वमुपेत्याधिकाशङ्कयोत्थपूर्वपक्षपरो नेयः, तथा चैक एवोभयत्र पूर्वपक्ष इति भावेनाह—**यद्वेति** । **श्रुते-रेवेति** । तथा चोक्तदिशा सूक्तरूपप्रकरणं निरवकाशमित्यभिप्रे-

चन्द्रिका

प्रकरणस्य । टीकायां लिङ्गस्य सावकाशत्वोक्तिश्च कर्णादिविदूरत्वस्य निरवकाशत्वेऽपि गुहानिहितत्वस्य सावकाशत्वमभिप्रेत्य वा, स्वतो निरवकाशस्यापि सूक्तानुगृहीतश्रुतिविरोधात् कल्प्यावकाशमभिप्रेत्य वा द्रष्टव्या । लिङ्गस्य श्रुतित एव बाधोक्तिरपि सावकाशलिङ्गाभिप्रायेति । एते च शङ्के प्रमाणाश्रिते । प्रमेयाश्रिता तु—तमोविरोधित्वस्य ज्योतिश्शब्दप्रवृत्तिनिमित्तस्य सर्वगतत्वेन तमसा सह स्थिते ब्रह्मण्ययोग इति । तत्र यद्यपि "वैश्वानरो जायमानः" इति अग्निसूक्ते वैश्वानरश्रुतिः जायमानत्वलिङ्गं चास्ति, तथाऽपि विष्णौ श्रुतेः सावकाशतायाः, वैश्वानराधिकरणे लिङ्गस्य सावकाशतायाश्च द्युभ्वाद्यधिकरणे कण्ठोक्तत्वात् न ताभ्यां पूर्वपक्षितं भाष्यटीकयोः ।

सिद्धान्तस्तु—

प्रकाशः

तमिति भावः । **लिङ्गस्येति** । अतएव "जाठरजातवेदसि लिङ्गस्यापि सावकाशत्वात्" इत्युक्तमितिभावः । कर्णादिविदूरत्वादिसाधारण्येनाह—**स्वत इति** । **एते चेति** । श्रुतिसूक्तयोः लिङ्गस्य च सावकाशत्वमुपेत्योक्ता, निरवकाशत्वमुपेत्योक्ता चेति शङ्काद्वयमित्यर्थः। **प्रमेयेति** । इयं च पूर्वोत्तरनयानुव्याख्यानेन तुल्यन्यायतया सूचिता । भाष्यादावचातुर्यमाशङ्क्याह—**तत्रेति** ।

सिद्धान्तटीकां विवृण्वन् प्रामाणाश्रितशङ्काद्वयनिरासकन्यायौ

चन्द्रिका

कर्णादीनां विदूरत्वं विष्णोरन्यत्र नैव हि ।
अग्नेस्तु श्रुतिसूक्तादि सावकाशं परात्मनि ॥

कर्णादिविदूरत्वं हि 'इयत्' इति परिच्छेदानर्हवैभवत्वम्, न तु सर्वथा कर्णादिविदूरत्वं, क्वाप्यसम्भवात् । तच्च "परो मात्रया" इत्यादिभाष्योक्तश्रुतिभिर्निरवकाशम् ।

प्रकाशः

तावत्संगृह्याह—**कर्णादीनामिति** । आद्यार्धेन आद्यपक्षनिरासको न्याय उक्तः, उत्तरार्धेन द्वितीयपक्षनिरासक इति ध्येयम् । श्रुतेस्सावकाशत्वाविवादेऽपि दृष्टान्तत्वेन वा प्रमेयाश्रितशङ्कापक्षे निरवकाशत्वाभिमानाद्वा श्रुत्युक्तिः । तथा हि—अग्निसूक्तगतं ज्योतिर्विष्णुरेव, न त्वग्निः, चरणशब्दोक्तकर्णादिविदूरत्वरूपलिङ्गात् । न च श्रुतिसूक्ताभ्यां लिङ्गस्य बाधः, तस्य निरवकाशत्वादित्याद्यः । द्वितीयस्तु—ज्योतिर्विष्णुरेव, निरवकाशलिङ्गात् । न च निरवकाशसूक्तानुगृहीतया श्रुत्या बाधः, तयोर्भगवति सावकाशत्वादिति । ननु कर्णादिविदूरत्वं श्रोत्रमनःप्रभृत्यविषयत्वम् । तच्च ब्रह्मणि न युक्तं, तस्य मनोवृत्तिविषयत्वादित्यतो विष्णौ लिङ्गस्य घटनां तावदाह—**कर्णादीति** । 'अन्यत्र नैव' इत्युक्तनिरवकाशतामुपपादयन् पूर्वार्धं विशदयति—**तच्चेति** । हिशब्दोक्तश्रुतीराह—**पर इति** । मीयन्ते अनेन विषया इति मात्रा इन्द्रियगणः, ततः परोऽसीत्यर्थः । यद्वा मात्राया मितेः परः, अपरिमितोऽसीत्यर्थः ।

चन्द्रिका

न हि "अग्निर्वै देवानामवमः" इत्यवमतया, "भीषाऽस्मादाग्निस्तपति" इति सभयतया, 'परि ह्येनं म्रियन्ते विद्युद्वृष्टिश्चन्द्रमा आदित्योऽग्निः' इति मरणादिमत्तया च श्रुतस्य अग्नेरपरिच्छेद्यं वैभवम् । अग्निश्रुत्यादितु "अग्निनाऽग्निस्समिध्यते"

प्रकाशः

"अग्निर्वै देवानामवमो विष्णुः परमः" इति बह्वृचब्राह्मणे स्वोत्तमदेवावमतया 'श्रुतस्य' इत्यन्वयः । यद्यपि "भीषाऽस्मादग्निश्चेन्द्रश्च" इत्येव तैत्तिरीयाणां पाठः, तथाऽपि "भयादस्याग्निस्तपति" इति श्रुत्यन्तरबलात् 'तपति' इत्यध्याहृत्योक्तम्। यद्वा "भीषाऽस्मात्" इति श्रुतिप्रतीकग्रहणम् । "अग्निस्तपति" इत्यन्या श्रुतिः । 'अस्माद्भीषा' अस्य भयेनेत्यर्थः । **परीति** । "तमेताः परिम्रियन्ते" इति बह्वृचब्राह्मणं, "म्रियन्ते पञ्चदेवताः" इति ऋग्भाष्योक्तेः, 'परि ह्येनं' इत्यर्थानुवादः । नन्वेवं श्रुत्यादेरपि निरवकाशत्वे तौल्यमेव स्यादित्यत उत्तरार्धं विशदयति–**अग्नीति** । 'विष्णौ सावकाशं' इत्यन्वयः।

अग्निनाऽग्निस्समिध्यते कविर्गृहपतिर्युवा ।
हव्यवाड् जुह्वास्यः ॥

इत्यत्राग्निसमिन्धकस्य भगवतोऽग्निशब्दवाच्यतोक्तेरिति भावः । यद्यप्यत्र 'अग्निना' गार्हपत्येनाहवनीयोऽग्निः समिध्यते इत्यर्थः सम्भवति । उक्तं च ऋग्भाष्ये—

अथवाऽऽहवनीयोऽग्निर्मथितेन समिध्यते ।

चन्द्रिका

"त द्देवा ज्योतिषां ज्योतिः" "नारायणपरो ज्योतिः" "विष्णुरेव ज्योतिः" "अहमग्निरहं हुतं"

प्रकाशः

इति, तथाऽपि—

यस्यास्ये हूयते सोऽग्निः परेशेन समिध्यते ।

इत्युक्तत्वादस्यैव च मुख्यत्वादेतदुदाहृतमिति ध्येयम् । **तद्देवा इति ।** **वाजसनेये—**

यस्मादर्वाक् संवत्सरोऽहोभिः परिवर्तते ।
तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम् ॥

इति श्रुतस्य ज्योतिषां ज्योतिष्ट्वप्रदज्योतिषो ब्रह्मत्वं, अमृतत्वादिलिङ्गात् "ज्योतिषैकेषां" इति वक्ष्यमाणदिशा च सिद्धमिति भावः ।

नारायणपरो ज्योतिरात्मा नारायणः परः ।

इति नारायणोपनिषदि नारायण एव परं ज्योतिरिति परशब्दपर्यायपरशब्देनोत्तमज्योतिरित्युक्तेरिति भावः । "विष्णुरेव ज्योतिर्विष्णुरेव ब्रह्म विष्णुरेवाऽऽत्मा विष्णुरेव बलं विष्णुरेव यशो विष्णुरेवाऽऽनन्दः" इति चतुर्वेदशिखायां स्पष्टमेव ज्योतिष्ट्वं विष्णोः । स्मृतीरप्याह—**अहमिति ।**

अहं क्रतुरहं यज्ञः स्वधाऽहमहमौषधम् ।
मन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतम् ॥

इति गीतायां कृष्णेन स्वस्याग्निस्वरूपसत्तानियामकत्वोक्त्या स्वात्मनोऽग्निशब्दवाच्यतोक्तेः । न चात्राभेद उच्यते, विशिष्टाभेदस्य

चन्द्रिका

"ज्योतिषामपि तज्ज्योतिः" इत्यादिश्रुतिस्मृतिभिः विष्णौ सावकाशम् । इदं न विष्णुसूक्तमित्यध्यापकप्रसिद्धिस्तु 'धान्यमसि" इति मन्त्रस्य मांसहविष्कयागे निविष्टस्य 'मांसमसि' इत्यूहे कर्तव्ये "मृगोऽसि" इत्यूहवत् प्रसिद्धविष्ण्वादिशब्दाभावादज्ञानमूला ।

प्रकाशः

बाधात्, शुद्धे लक्षणापत्तेः, क्रत्वादिजडभिदायोगाच्चेति भावः । तथा तत्रैव—

ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ।

इत्यत्र "अनादिमत्परं ब्रह्म" इति पूर्वप्रकृतब्रह्मण एव, तच्छब्देन परामृश्य ज्योतिषामपि प्रकाशनशक्तिप्रदत्वेन ज्योतिष्ट्वोक्तेः । आदिपदेन "तच्छुभ्रं ज्योतिषां ज्योतिः" इत्यादि गृह्यते । सूक्तस्य निरवकाशत्वं प्रागुक्तमनूद्य सदृष्टान्तं निरस्यति—**इदमिति** । नवमे आद्यपादे "गुणशब्दस्तथेति चेत्" इति त्रयोदशाधिकरणे द्वितीयवर्णके चिन्तितम् । शाक्यानामयनाख्ये षट्त्रिंशत्संवत्सरे *सत्रे श्रुतं "संस्थिते संस्थितेऽहनि गृहपतिर्मृगयां याति, स तत्र यान् मृगान् हन्ति, तेषां तरसमयाः पुरोडाशा भवन्ति" इति । तेषु मांसमयेषु प्रकृतौ दृषदि पेषणाय तण्डुलानां विहितः "धान्यमसि धिनुहि देवान्" इति मन्त्रश्चोदकेन प्राप्तः । स किमूहितव्य उत नेति संशये, धान्यशब्दस्य सतुषद्रव्यवाचितया प्रकृतौ तण्डुलप्रकाशनासामर्थ्येनासमवेतार्थत्वात् सौरयागे "देवस्य त्वा" इति मन्त्रगतसवि-

* 'षड्विंशत्संवत्सरे' इति बहुपुस्तकपाठः.

चन्द्रिका

तदुक्तं न्यायविवरणे "सन्दिग्धश्रुतिलिङ्गाभ्यामप्यसन्दिग्धयोः केवलयोरेव बलवत्त्वात्" इति। अत्र च सन्दिग्धत्वं नाम सावकाशत्वम्।

प्रकाशः

त्रादिशब्दवन्नोहनीय इति प्राप्ते, प्रकृतिविकारभावमूलया लक्षणया धान्यशब्दस्य तण्डुलप्रकाशकतया प्रकृतौ समवेतार्थत्वात् "मांसमसि धिनुहि देवान्" इत्यूहितव्य इति सिद्धान्त इति। अत्र यथा प्रकृतौ लक्षणाया आर्थिकत्वेनाविवक्षितत्वात्स्वाधीने प्रयोगे लक्षणाश्रयणायोगान्न मांसलक्षकतया 'मृगोऽसि' इत्यूहो न्याय्यः, याज्ञिकानां तु तादृशोहाभ्युपगमो यथाऽज्ञानमूलः, तथाऽध्यापकप्रसिद्धिरपि विष्ण्वादिशब्दाभावनिमित्ताज्ञानमूलेत्यर्थः। **केवलयोरिति**। अन्योन्यनिरपेक्षयोः श्रुतिलिङ्गयोरित्यर्थः। कथमिदमुक्तार्थसंवादीत्यत आह—**अत्र चेति**। असन्दिग्धत्वं च निरवकाशत्वमित्युक्तप्रायम्। उक्तं च तट्टीकायां—"सावकाशेभ्योऽनेकेभ्योऽपि निरवकाशस्यैकस्यैव प्राबल्यात्" इति। नन्वत्र सावकाशयोश्श्रुतिलिङ्गयोरेव निरवकाशेन लिङ्गादिना बाधः प्रतीयते, न तु तादृशयोः श्रुतिप्रकरणयोः, न्यायविवरणटीकायां चास्य वाक्यस्याकाशप्राणच्छन्दोऽधिकरणपरतया व्याख्यातत्वात् तत्र च प्रकरणोपष्टम्भेन पूर्वपक्षाकरणात् कथमुक्तसंवादीति चेन्न, तुल्यन्यायतया वा, श्रुतिप्रकरणोपलक्षणत्वाशयेन वा, कैमुत्यन्यायसिद्धतया वाऽस्योदाहरणादिति। सूत्रे अग्निसूक्तस्थस्योपलक्षत्वेनोपादानात् सर्वत्रायं

चन्द्रिका

एवं सूक्तान्तरेष्वपि द्रष्टव्यम् । तथाहि—ऐन्द्रे "न त्वावाँ इन्द्र कश्चन न जातो न जनिष्यते" इति, तथा "ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः" इति, तथा "समुद्रे अन्तश्शयते" इति,

प्रकाशः

न्यायोऽनुसन्धेय इति वदंस्तत्प्रकारं क्वचित्क्वचिद्दर्शयति—एवमिति । ऐन्द्रे सूक्त इत्यर्थः । आद्याष्टकगते ऐन्द्रे "न त्वावाँ इन्द्र कश्चन न जातो न जनिष्यतेऽति विश्वं ववक्षिथ" इत्यत्र हे इन्द्र 'कश्चन' कोपि 'त्वावान्' त्वत्सदृशः नास्ति नासीन्न जनिष्यते विश्वमति ववक्षिथ त्वमेव भर्ताऽसीति असदृशत्वविश्वभर्तृत्वादिकं श्रुतम् । तथा पञ्चमाष्टकगते ऐन्द्रे "अभि त्वा शूर नोनुमो दुग्धा इव धेनवः । ईशानमस्य" इत्यत्र जङ्गमस्य स्थावरस्य च अस्य विश्वस्येशानं त्वा त्वां वेदवाच इव पुनः पुनः स्तुम इति जगन्नियामकत्वं, तत्रैव "न त्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते" इति हे मघवन् द्युस्थो वा पृथिवीस्थो वा जातो जनिष्यमाणो वाऽन्यस्त्वत्सदृशो नेत्यसदृशत्वं च श्रुतम् । तथा "समुद्रे अन्तश्शयते उद्ना वज्रो अभीवृतः ।" इति षष्ठाष्टकगतैन्द्रे अष्टमाष्टकस्थे च "समुद्रे अन्तः कवयो विचक्षते" इति समुद्रशायित्वं श्रुतम् । एतानि च ब्रह्मलिङ्गतया प्रसिद्धानीति भावः ।

चन्द्रिका

तथा बार्हस्पत्ये "विश्वेषामिज्जनिता ब्रह्मणामसि" इति, तथा सौरे "सूर्य आत्मा जगतस्तस्थुषश्च" इति, तथा वारुणे "यो विश्वस्य जगतो देव ईशे" इति, तथा विश्वकर्मसूक्ते "विश्वतश्चक्षुः" "यो नः पिता जनिता" इत्यादीनि ब्रह्मलि-

प्रकाशः

तथेति ।

देवाश्चित्ते असुर्य प्रचेतसो बृहस्पते यज्ञियं भागमानशुः ।

उस्रा इव सूर्यो ज्योतिषामहो विश्वेषामिज्जनिता ब्रह्मणामसि ॥

इत्यत्र हे बृहस्पते प्रकृष्टज्ञानिनो देवा अपि ते प्रसादा-द्यज्ञभागं प्राप्नुवन्ति, त्वं च भूतभविष्यद्वर्तमानचतुर्मुखब्रह्मणां जन-यिताऽसीति ब्रह्मजनकत्वादिकं श्रुतम् । तच्च विष्णोरन्यत्र न युक्तमिति भावः । **सौर इति ।** अद्याष्टकाष्टमाध्यायगते सौरे

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।

आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा

इत्यत्र स्थावरजङ्गमात्मकविश्वस्वामित्वं श्रुतम् । तच्च नान्यलि-ङ्गम् । न चात्रात्मशब्दः स्वरूपपरः, षष्ठ्या औपचारिकत्वप्रसङ्गा-दिति भावः । **य इति ।** पञ्चमाष्टके—

यो वर्धन ओषधीनां यो अपां यो विश्वस्य जगतो देव ईशे ।

इति विश्वेश्वरत्वं श्रुतम् । तच्च "एष सर्वेश्वरः" इत्यादिना ब्रह्माणि प्रसिद्धम् । "विश्वतश्चक्षुरुत विश्वतोमुखः" इत्यादिकं च

सर्वतःपाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् ।

चन्द्रिका

ङ्गानि सन्ति। किञ्च सौरे "येना पावक चक्षसा भुरण्यन्तं जनाँ अनु। त्वं वरुण पश्यसि" इति सूर्यस्य पावकवरुणादिशब्दैः सम्बोधनम्, तथा वारुणे--"अथावयमादित्य" इति वरुणस्य आदित्यादिशब्दैः सम्बोधनम्, तथा आग्नेये--"त्वमग्न इन्द्रो वृषभः सतामसि त्वं विष्णुरुरुगायो नमस्यः" इत्यग्निं सम्बोध्य तत्रेन्द्रविष्ण्वादिशब्दप्रयोगः तत्तत्सूक्तानां सर्वशब्दवाच्यब्रह्मपरत्वे युक्तः, नान्यथा। यदि च इन्द्रादावेव ब्रह्मलिङ्गोक्तिः स्तुत्यर्था, तर्ह्या-

प्रकाशः

इत्यादिना विष्णौ प्रसिद्धम्। जगज्जनकत्वं च "यतो वा इमानि" इत्यादिना प्रसिद्धम्। **सन्तीति**। तथा च निरवकाशब्रह्मलिङ्गैः सावकाशश्रुतिप्रकरणयोः बाध इति भावः। सूत्रे निरवकाशलिङ्गोक्तिरुपलक्षणं, अन्यत्रान्यवाचिपदप्रयोगानुपपत्त्या च विष्णुपरता ग्राह्येत्याह—**किञ्चेति**। **सौर इति**। चतुर्थाध्यायगतसौर इत्यर्थः। **अथावयमिति**। आद्याष्टकगते वारुणसूक्ते "अदित्य व्रते तवानागसो अदितये स्याम" इत्यादित्यशब्दसम्बोधनमित्यर्थः। **नान्यथेति**। तथात्वे नानादेवताप्रापकश्रुतिसद्भावेनैकवाक्यताभङ्ग इति भावः। सूक्तगतब्रह्मलिङ्गानामन्यथासिद्धिमाशङ्क्य निरस्यति—**यदि चेति**। 'लिङ्ग' इत्युपलक्षणं, पावकादिशब्दोक्तिरपि ध्येया। तथा चाकाशाद्यधिकरणानारम्भस्स्यादिति भावः। एतेनोपासनार्थं तदुक्तिरिति परास्तम्। अस-

चन्द्रिका

काशप्राणादावपि ब्रह्मलिङ्गोक्तिस्तदर्था स्यादिति दिक् । नचैवमत्रत्यसिद्धान्तेनैव अन्तरधिकरणादिपूर्वपक्षाणां कैमुत्यन्यायहतत्वात् तत्रत्यसिद्धान्तन्यायव्युत्पादनं व्यर्थम्, स्वतो बलवतोऽपि सावकाशस्य स्वतो दुर्बलेनापि निरवकाशेन बाध इत्यन्तरधिकरणन्यायेन

प्रकाशः

दुपासनाया निषिद्धत्वाच्चेति । नन्विन्द्रादीनामन्योन्यं ब्रह्मणा चाभेदात् तत्र ब्रह्मलिङ्गोक्तिः पावकादिशब्दोक्तिश्च युक्ता । अत एव "त्वमग्न इन्द्रो वृषभः" इत्यादि च युज्यत इति चेन्न, विशिष्टाभेदस्य बाधितत्वात् । विशेष्यमात्रैक्ये लक्षणापत्तेश्च । आकाशादावपि तथात्वापत्तेश्च । "यमिन्द्रमाहुः" इत्यादिविरोधाच्च, तत्र भेदोक्तेरन्तरधिकरणे दर्शितत्वात् । "पृथक्" इत्यत्राभेदस्य निरसिष्यमाणत्वाच्च । न च वाच्यं लिङ्गानां स्वावरनियामकत्वादिना सङ्कोच इति, बाधकाभावात् । न च पावकादिशब्दानां योगेन सूर्यादौ वृत्तिरविरुद्धेति वाच्यं, रूढेर्बलवत्त्वात्, नियामकाभावेन वैपरीत्यस्यापि सम्भवात् । तदेतदभिप्रेत्योक्तं— **दिगिति** । यद्वा—सूक्तान्तरेष्वप्येवं निरवकाशब्रह्मलिङ्गादीनि द्रष्टव्यानीति भावेनोक्तं—**दिगिति** । ननु यद्यत्र सूक्तानुगृहीताया अपि श्रुतेर्निरवकाशलिङ्गेन बाधस्तदा तदननुगृहीताया इन्द्राकाशादिश्रुतेः सुतरां बाधेन पूर्वन्यायवैयर्थ्यमित्याशङ्क्यान्तरधिकरणोपजीवनेनास्य प्रवृत्तेः न दोष इत्याह—**न चेति** । **स्वत इति** । जा-

चन्द्रिका

विनाऽत्रत्यसिद्धान्तस्यैवासिद्धेः। अत्र आकाशाद्यधिकरणेषु च अधिकाशङ्कानिरासकन्याय एव हि व्युत्पाद्यः, न त्वन्तरधिकरणन्यायः। "ज्योतिर्दर्शनात्" इत्यत्र त्वग्निसूक्तस्थस्यापि ज्योतिषो म्रियमाणत्वादिलिङ्गैर्जीवत्वे शङ्किते, लिङ्गानि ब्रह्मपरोपक्रमोपसंहार-

प्रकाशः

त्येत्यर्थः। ननु यदि तेनैव न्यायेनात्रत्यसिद्धान्तः, तर्हि व्युत्पाद्यन्यायभेदाभावान्नैतदारम्भः सम्भवतीत्यत आह—**अत्रेति**। यद्वा स न्यायोऽत्रैवोच्यतामित्यत आह—**अत्रेति**। न्यायद्वयस्यैकत्र व्युत्पादनायोगात्, अन्यथा अधिकरणभेदो न स्यादिति भावः। ननु तर्हि स एवात्र व्युत्पाद्यतामितिचेन्न, एतदभ्यधिकाशङ्कायाः निरासकन्यायस्य क्वचित्कर्तव्यत्वात्। नन्वेवमपि "ज्योतिर्दर्शनात्" इत्यनेन पुनरुक्तिः, तत्राग्निसूक्तगतस्यापि ज्योतिषो विष्णुत्वमाक्षिप्य समाधानादित्यत आह—**ज्योतिरिति**। **अग्निसूक्तस्थस्येति**। ननु तत्र वाजसनेयगतं ज्योतिरुदाह्रियते, नत्वाग्निसूक्तगतमिति चेदित्थमाशयः—अग्निसूक्तस्थं ज्योतिर्न विष्णुरस्यैव वाजसनेये म्रियमाणत्वादिश्रवणादिति। तत्र "योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः" इति ज्योतिः किं जीव उत विष्णुरिति संशये, "स समानः सन्नुभौ लोकावनुसञ्चरति स वा अयं पुरुषो जायमानः शरीरमभिसम्पद्यमानः पाप्मभिस्संसृज्यते स उत्क्रामन् म्रियमाणः" इत्यादिजीवलिङ्गाज्जीव इति प्रागुक्ताग्नि-

चन्द्रिका

मध्यस्थत्वादन्तर्भावितण्यन्तानीति वक्ष्यत इति न तेनाप्यस्य पुनरुक्तिः । ज्योतिश्शब्दप्रवृत्तिनिमित्तं च प्रकाशत्वं चित्प्रकाशरूपे ब्रह्मण्यप्यस्ति । यद्यप्यत्र वाक्यशेषे "विश्वे देवा अनमस्यन् भियानाः" इति सर्वदेवोपास्यत्वादिकमपि निरवकाशं विष्णुलिङ्गमस्ति । तथाऽपि

प्रकाशः

सूक्तस्थमपि ज्योतिर्जीव एवेति प्राप्ते, ज्योतिश्शब्दस्य "हृद्यन्तर्ज्योतिः" इत्यात्मप्रश्नोत्तरोपक्रमे "सुप्त इत्यत्रायं पुरुषः स्वयं ज्योतिः" इत्युपसंहारे च श्रुतत्वादात्मप्रश्नोत्तरोपक्रमोपसंहाराभ्यां चविष्णुपरत्वेन निर्णीतवाक्यमध्यस्थतया जीवलिङ्गानां मारकत्वाद्यर्थकतया कथञ्चिन्नेयत्वादिदं ज्योतिर्विष्णुरेवेत्यग्रिमसूक्तस्थमपि तथेति सिद्धान्त उच्यते, न निरवकाशलिङ्गेन सावकाशबाधन्यायव्युत्पादनं सूक्तगतत्वाधिकाशङ्कानिरासकन्यायव्युत्पादनं वा क्रियते, येन पुनरुक्तिस्स्यादित्यर्थः । एवं प्रमाणाश्रिताशङ्कां निरवकाशलिङ्गरूपप्रमाणोपदर्शनेन निरस्येदानीं प्रमेयाश्रिताशङ्कां "स्वयंज्योतिष्ट्वाद्भगवतः" इति पञ्चमगीताभाष्योक्तदिशा शब्दप्रवृत्तिहेतुभिश्शब्दप्रवृत्तिनिरूपणेन निरस्यति—**ज्योतिरिति** । **प्रकाशत्वामिति** । तमोविरोधित्वस्य गुरुत्वादिति भावः । ननु यद्यत्रेदं विषयवाक्यं स्यात्, तर्हि स्पष्टलिङ्गत्यागेन कर्णादिविदूरत्वप्रत्यायनाय चरणोक्तिरयुक्तेत्याशङ्क्याह—**यद्यपीति** । विचरणेनापरिच्छेद्यवैभव-

चन्द्रिका

कर्णादिविदूरत्ववत् विषयवाक्य एव अश्रुतत्वादपरिच्छेद्यवैभवान्तर्भूतत्वाच्च न सूत्रकारादिभिः पृथगुक्तम् । यद्यप्यत्र ज्योतिः प्रति कर्णादीनां विरुद्धचरणरूपं कर्णादिविदूरत्वं वक्तुं च "विचरणाभिधानात्" इति सूत्रयितव्यम्, तथाऽप्युपसर्गस्य द्योतकत्वमात्रं, धातोरेव तु विचरणाभिधायकत्वमिति प्रदर्शनार्थं, सूत्रस्य श्रुत्यनुगमप्रदर्शनार्थं च "चरणाभिधानात्" इत्युक्तम् । 'विचरणा-

प्रकाशः

स्यैवाभिप्रेतत्वेनोक्तत्वात्तेनैव सङ्गृहीतत्वाच्चेत्याह—**अपरिच्छेद्येति** । नन्वेवमपि 'विचरणाभिधानात्' इति वाच्यं, प्रतिपत्तिलाघवादित्याशङ्कामनूद्य निरस्यति—**यद्यपीति** । ननु तर्कताण्डवे उपसर्गाणां द्योतकत्वं पूर्वपक्षीकृत्य वाचकत्वस्य समर्थनात् कथं द्योतकत्वोक्तिः । न च तत्परीत्येति वाच्यं,

समिति ह्युपसर्गेण परमुख्यार्थतोच्यते ।

इति,

उपसङ्क्रमणं चैव द्वितीयोद्देशितं प्रति ।
अतिक्रमं वदन्तं तं उपशब्दो निवारयेत् ।

इति च भगवत्पादोक्तेरुदाहृतत्वात् । युक्तियुक्ततयोपपादनेनाभिप्रेतत्वावगमाच्चेति चेत्सत्यं, अभ्युपेत्यवादेन वा परीत्या वेयमुक्तिः । अत एव पक्षान्तरमुक्त्वा तदुपपादयति—**सूत्रस्येति** ।

चन्द्रिका

भिधानात्' इत्युक्तौ हि श्रुतौ 'वि' इत्यनेन 'चरति' इत्यस्य 'मे मनः' इति पदद्वयव्यवहितत्वात् श्रुत्यनुगमो न ज्ञायेत। तस्माद्विष्णुरेवेदं ज्योतिरिति। टीकाक्षरार्थस्तु स्पष्टः॥

प्रकाशः

अधिकरणार्थमुपसंहरति-**तस्मात्** निरवकाशलिङ्गस्य प्रवृत्तिनिमित्तस्य च भगवति सत्त्वात् **विष्णुरेवेदं ज्योतिरिति**॥

इति ज्योतिरधिकरणम्।

— अथ गायत्र्यधिकरणम् —

ओम् छन्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पण-निगदात्तथा हि दर्शनम् ओम् ॥

"अथ यदतः परो दिवो ज्योतिर्दीप्यते" इत्युक्तस्य ज्योतिषो "गायत्री वा इदꣳ सर्वं" इति गायत्र्या समारम्भः कृतः। तस्मान्न विष्णुरितिचेत्,

तत्त्वप्रकाशिका

अत्र सूत्रमेवादौ पठति—छन्दोऽभिधानादिति। लोकतोऽन्यत्रप्रसिद्धगायत्रीनाम्नोऽत्र हरौ समन्वयसमर्थनादस्ति शास्त्रादिसङ्गतिः। श्रुत्यादिसङ्गतिं विषयवाक्यविषयसंशयपूर्वपक्षतत्फलानि सूचयन् सूत्रं व्याचष्टे—अथेति। हृदयनिहितं ज्योतिर्विष्णुरित्यभिहितम्। तच्च ज्योतिः छन्दोगश्रुतौ श्रूयते—"अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विदं वा व तद्यदिदमस्मिन् पुरुषे ज्योतिः" इति। एतच्च गायत्रीत्वेन पठ्यते, "गायत्री वा इदं सर्वं भूतं यदिदं किञ्च वाग्वै गायत्री वाग्वा इदं सर्वं" इत्युपक्रमात्। इयं च गायत्री यदा विष्णोरन्या स्यात्तदेदं ज्योतिश्च सा स्यादिति गायत्रीनिर्णयोऽवश्यापेक्षितः। सा गायत्री विषयः। किं विष्णुरुत च्छन्दोविशेष इति सन्देहः। ज्योतिश्श्रुतिः लोकप्रसिद्धिश्च सन्देहबीजम्। तत्र गायत्री छन्दोविशेष एवेति पूर्वः पक्षः, गायत्रीशब्दस्य तत्रैव रूढत्वात्। "वाग्वै गायत्री" इति वाक्त्व-

न, तथा चेतोऽर्पणार्थं हि निगद्यते। अग्निगायत्र्यादिशब्दार्थरूपोऽसाविति चेतोऽर्पणार्थं हि निगद्यते।

तत्त्वप्रकाशिका

विधानाच्च। न च ज्योतिश्श्रुत्या गायत्र्यादिश्रुतिबाधः, श्रुतेः श्रुतिबाधकत्वायोगात्। न च सावकाशत्वादिना बाध्यबाधकभावः, गायत्र्यां "तेजो वै ब्रह्मवर्चसं गायत्री" इति ज्योतिःशब्दानतिभिन्नार्थतेजश्शब्दश्रवणेन ज्योतिश्श्रुतेरेव सावकाशत्वात्। न च गायत्रीश्रुतिर्विष्णाववकाशवती, रूढेरभावात्। योगस्य चामुख्यवृत्तित्वात्। न च गायत्र्या भगवदधीनत्वेन तस्मिन्नेव तच्छ्रुतेर्मुख्यत्वमिति वाच्यम्, गायत्र्या वेदविशेषत्वेन नित्यत्वात् नित्यस्य च पराधीनताऽयोगात्। तस्माद्गायत्री न विष्णुरपि तु च्छन्दोविशेष एव, ततश्चेदं ज्योतिरानन्दमयश्च नासाविति भावः। सिद्धान्तयत्सूत्रांशमनुकरोति—**नेति**। स्वपदानि वर्णयति—**अग्नी-ति**। अत्र गायत्रीशब्देन विष्णुरेव निगद्यते, तस्माज्ज्योतिश्शब्देनापि स एव निगद्यते, ततश्च स एवाऽऽनन्दमयः। न च गायत्र्यादिशब्दैरुच्यते तदभेदविधानार्थं, किन्तु गायत्र्यादिशब्दार्थगुणस्वरूपत्वेनोपासनार्थमेवेति भावः। आदिपदेन वाचो ग्रहणम्। अधिकरणान्तरेऽप्येतन्न्यायस्यानुसन्धेयत्वं च हिशब्देन सूचयति। भवेज्ज्योतिषोऽपि विष्णुत्वं, यदि गायत्रीयं विष्णुः स्यात्,

तथा हि दर्शनम्—"गायति त्रायति च" इत्यादि ।

सर्वच्छन्दोभिधो ह्येष सर्वदेवाभिधो ह्यसौ ।
सर्वलोकाभिधो ह्येष तेषां तदुपचारतः ।

इति वामने ॥

तत्त्वप्रकाशिका

तदेव कुत इत्यत आह—तथा हीति । 'दर्शनं' श्रुतिः । एतद्गायत्र्या गानत्राणकर्तृत्वलिङ्गश्रवणात्तस्य च च्छन्दस्यसंभवा-द्विष्णुरेव गायत्री, ततो ज्योतिरपि स एवेति भावः । आदिप-देन "या वै सा गायत्रीयं वा व सा येयं पृथिवी" इत्यादे-स्सङ्ग्रहः । ननु गायत्रीश्रुतेरन्यत्र निरूढत्वात् कथं लिङ्गमात्रेण विष्णुत्वनिश्चय इत्यत आह—सर्वेति । गायत्रीश्रुतेः पौराणिक-रूढ्या श्रुत्युक्तयोगेन गायत्र्या भगवदधीनत्वेन च विष्णावेव मुख्यवृत्त्या सावकाशत्वात् लिङ्गस्यामुख्यवृत्त्याऽप्यन्यत्रानवकाशात् सावकाशश्रुतेर्निरवकाशलिङ्गेन बाधोपपत्तेर्युक्तो लिङ्गमात्रेणायं निर्णय इति भावः । न च नित्यस्य पराधीनत्वायोगः,

स्वभावजीवकर्माणि द्रव्यं कालः श्रुतिः क्रिया ।
यत्प्रसादादिमे सन्ति न सन्ति यदुपेक्षया ।

इति नित्यानामपि भगवदधीनत्वस्य श्रौतत्वात् । तत्र देवलोकप-दाभ्यामग्निपृथिव्यादिशब्दानां च भगवत्परत्वमुच्यते ॥

हेत्वन्तरेणाऽपि गायत्र्या विष्णुत्वं समर्थयत्सूत्रमुपन्यस्य

॥ ओम् भूतादिपादव्यपदेशोपपत्तेश्चैवम् ओम् ॥

तावानस्य महिमा ततो ज्यायांश्च पुरुषः ।
पादोस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि ।

इति ।

सुवर्णं कोशं रजसा परिवृतं
देवानां वसुधानीं विराजम् ।
अमृतस्य पूर्णां तामु कलां विचक्षते
पादं षड्ढोतुर्न किलाविवित्से ।

इति श्रुतेः पाद इत्येकदेशपरिमितं 'चतुर्भागबलः'

तत्त्वप्रकाशका

तद्गृहीतश्रुतिमेवोदाहरति—**भूतादीति** । "सैषा चतुष्पदा षड्विधा गायत्री" इति गायत्र्याः प्रागुक्तषड्विधत्वमनूद्य चतुष्पदत्वं व्यपदिश्य तत्रैव पुरुषसूक्तमन्त्रः संवादायोदाह्रियते "तदेतदृचाभ्यनूक्तम् तावानस्य" इति । 'अस्य' पुरुषस्य 'तावान्' पूर्वोक्तो महिमा । न केवलमेतावान्, किन्तु पुरुषः 'ततः' पूर्वोक्तादपि महिम्नो ज्यायान् । कथं, सर्वाणि भूतान्यस्यैकः पादः, अस्यामृतं स्वरूपभूतं पादत्रयं दिवि तिष्ठतीत्येवं गायत्र्या भूतादिपादव्यपदेशाच्च सा विष्णुर्भवेत्, भूतादिपादव्यपदेशस्य विष्णावेवोपपत्तेरन्यत्रानुपपत्तेश्चेति भावः । ननु भूतादिपादव्यपदेशो गायत्र्यामिव विष्णावपि नोपपद्यते, तस्यापि भूतभिन्नत्वादित्यत आह—**सुवर्णमित्यादि** । नायं पादशब्दोऽमृतपादत्रयवद्भूतानामपि स्वरूपांशत्वाभिप्रायः, किन्तु 'यज्ञदत्तस्य चतुर्भागबलो देवदत्तः' इति वद्भिन्नमेव विश्वं तत्पादपरिमितसामर्थ्यं पादतयोच्यते । अतो

इतिवद्भिन्नं च । सहि पुरुषसूक्ताभिधेयः । "यज्ञेन यज्ञमयजन्त" इति यज्ञशब्दात् । "यज्ञो विष्णुर्देवता" इति हि श्रुतिः ।

तस्मिन् काले महाराजा राम एवाभिधीयते ।
यथा हि पौरुषे सूक्ते विष्णुरेवाभिधीयते ॥

इति स्कान्दे ॥

॥ ओम् उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ओम् ॥

तत्त्वप्रकाशिका

भूतपादत्वं विष्णोरुपपद्यते । तर्हि विश्वचतुष्टयसमो हरिरित्यागतमिति न मन्तव्यम्, यतोऽत्र पादपदेन विश्वं विष्णुसामर्थ्यैकदेशपरिमितमुच्यते, न चतुर्थांशपरिमितम् । कुत एतत्, "सुवर्णं कोशं" इति श्रुतेरेवेत्यर्थः । सौवर्णब्रह्माण्डकोशं रजोगुणोपलक्षितावादिपरिवृतं ब्रह्मणश्शरीरं देवानां वसुनिधानमञ्जूषां मुक्तैः पूर्णां तां षडिन्द्रियेषु विषयहोतुर्विष्णोरेकदेशपरिमितां आचक्षते पादपदेन पुरुषसूक्ताद्यागमाः, यतस्सा चतुर्थभागसाम्यं न लेभे किलेत्यर्थः । न केवलं भूतादिपादत्वस्य विष्णावेवोपपत्तेस्तल्लिङ्गत्वं, किन्तु पुरुषसूक्तोक्तत्वाच्च । भूतादिपादत्वस्य पुरुषसूक्तोक्तत्वेऽपि कुतो विष्णुलिङ्गत्व मित्यत आह— **स हीति** । यज्ञशब्दः कथं तन्निश्चायक इत्यत आह—**यज्ञइ ति** । अन्यप्रकरणेऽप्यन्यश्रुतिः प्रासङ्गिकीयं भवतु, भूतादिपादे तदभावादित्यतोऽत्र स्मृतिं चाह—**तस्मिन्निति** । किञ्च पुरुषसूक्तोक्तत्वं गायत्र्या विष्णुत्व एव वा पृथग्युक्तिस्समर्थ्यते—**स हीति** ॥

उक्तमाक्षिप्य समादधत्सूत्रमुपन्यस्याक्षेपांशं तावद्व्याचष्टे—**उपदेशेति**।

"त्रिपादस्यामृतं दिवि" इति पूर्व उपदेशः । "परो दिवः" इति पञ्चम्यन्तः पश्चिमः । तस्मान्नैकं वस्त्वत्रोच्यत इति चेन्न, त्रिसप्तलोकापेक्षयोभयस्मिन्नप्यविरोधात् ॥ ११ ॥

तत्त्वप्रकाशिका

यदुक्तं गायत्री ज्योतिश्च विष्णुरिति, तद्ब्रवेद्यादि गायत्रीज्योतिःप्रसङ्गयोरेकं वस्तूच्यते, न चैवं, "त्रिपादस्यामृतं दिवि" इति गायत्र्चा द्युस्थितत्वोक्त्या "परो दिवः" इति ज्योतिषो दिवः परत्वोक्त्या विरोधान्नैकं वस्त्वत्रोच्यते । अतः कथमुभयोर्विष्णुत्वाध्यवसाय इत्यर्थः । सिद्धान्तयत्सूत्रांशं व्याचष्टे—नेति । नात्र वस्तुद्वयमुच्यते, येनोभयोर्विष्णुत्वाभावः, किन्तु उभयत्राप्येकमेव, विवक्षाभेदेन सप्तमीपञ्चम्योरेकार्थत्वेन विरोधाभावात् । तथा हि—भूर्भुवः सुवरिति लोकत्रयाभिप्रायेण लक्षयोजनोच्छ्रितान्तरिक्षोपरितनश्वेतद्वीपानन्तासनवैकुण्ठानां द्युत्वात्तद्गतरूपत्रयं 'दिवि' इत्युच्यते । सप्तलोकापेक्षया इन्द्रसदनस्य द्युत्वात् वैकुण्ठस्य दिवःपरत्वं, मेरोरपि द्युत्वात् तत्परानन्तासनस्य दिवःपरत्वं, सूर्यमण्डलस्यापि द्युत्वेन तदुत्तरश्वेतद्वीपस्य दिवःपरत्वं, तत्रस्थमूर्तित्रयस्य दिवःपरत्वं च युज्यते । अत उभयथोपदेशेऽपि विरोधाभावादुभयत्राप्येकमेव विष्ण्वाख्यं वस्तूच्यत इति भावः । एवं पृथिव्यन्तरिक्षस्वरात्मकसर्वलोकेभ्यः क्रमेणानन्तासनादीनामुच्चत्वेन सर्वतः पृष्ठत्वं, तथा मेरुवैजयन्तसत्यलोकेभ्यो ब्रह्मसदनेभ्यस्तेषां क्रमेणोच्चत्वाद्विश्वतः पृष्ठत्वं च ज्ञातव्यम् । तस्माद्गायत्री विष्णुरेव, स एव ज्योतिरानन्दमयश्चेति सिद्धम् ॥

चन्द्रिका

ओम् छन्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पण-निगदात्तथा हि दर्शनम् ओम् ॥

अत्राधिवेदगता गायत्र्यादिशब्दा उदाहरणम् । अत्र विषयवाक्यं "अथ यदतः परो दिवो ज्योतिः" इति च्छान्दोग्यस्थं ज्योतिर्वाक्यमित्येकं मतम् । मतान्तरं तु "गायत्री वा इद꣡ँ सर्वं" इति

प्रकाशः

ओम् छन्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगदात्तथा हि दर्शनम् ओम् ॥ टीकायामनुक्तेः "अधिवेदगतानां" इति न्यायविवरणं हृदि कृत्वा एतदधिकरणोपाधिमह—अत्रेति । 'गायत्र्युष्णिक् बृहती' इत्यादिशब्दा इत्यर्थः । नन्वेवं सूत्रे गायत्रीशब्दमात्रासाधारणभूतादिपादव्यपदेशाद्युक्त्यनुपपत्तेः स एवोदाहरणमिति ज्ञायत इति चेन्न, वेदमातुस्त्रैवर्णिकद्वितीयजन्मजनन्या गायत्र्याः प्राधान्येन तन्नाम्न एवेतरोपलक्षणतया सूचनात् । अत एव सर्वसाधारण्याय 'छन्दः' इत्यसूत्रयत् । अन्यथा 'गायत्र्यभिधानात्' इत्येव ब्रूयात् । यद्यप्यत्र वक्ष्यमाणदिशा आकाशादिशब्दा अप्युदाहरणम् । तथाऽपि तेषामधिकरणान्तरविषयाणां सतामाकारान्तरेणात्र विषयत्वं, गायत्र्यादिशब्दानां तु सर्वाकारेणापीति विशेषादेवमुक्तमिति ध्येयम् । अत्र पूर्वसङ्गतिं वक्तुं प्रस्थानद्वयं संकलय्य टीकाकृदुक्तान्पक्षान् भाष्यानुगुणोपपत्तीः प्रदर्शयन्विवेचयति—अत्रेति ।

चन्द्रिका

तत्स्थं गायत्रीवाक्यमिति । अत्राद्यमतं "—"अथ यदतः परो दिवः" इति वाक्योक्ते ज्योतिषि सन्देहः किं ब्रह्म उतान्यत्" इति सुधोक्तम् । द्वितीयं तु अत्र टीकायां सुधायां चोक्तम् । अत्राद्ये मते ज्योतिरधिकरणे अग्निसूक्तस्थस्य ज्योतिषोऽग्नित्वनिरासः, अत्र तु च्छान्दोग्यस्थस्य ज्योतिषः छन्दस्त्वनिरासः । द्वितीये तु ज्योतिरधिकरणे अग्निसूक्तस्थस्य ज्योतिषोऽग्नित्वनिरासः, अत्र तु च्छान्दोग्यस्थाया गायत्र्याः छन्दस्त्वनिरास इति भेदः । आद्ये, भाष्ये गायत्रीवाक्योपादनं गायत्रीशब्दरूपपूर्वपक्षबीजप्रदर्शनार्थम् । द्वितीये, भाष्ये ज्योतिर्वाक्योपादानं पूर्वपक्षे ज्योतिरधिकरणाक्षेपप्रदर्शनार्थम् ।

प्रकाशः

'तत्स्थं' छान्दोग्यस्थं । 'अत्र' इत्यस्य विवरणं—**टीकायामिति**। "गायत्री वा इदꣳ सर्वं भूतं यदिदं किंच" इत्युदाहृतत्वादिति भावः । **सुधायामिति** । "छन्दोगाः पठन्ति "गायत्री वा इदं सर्वं भूतं" इत्यादि । तत्र संशयः किं गायत्री ब्रह्म किं वा वर्णसमावेशलक्षणो मन्त्रः" इत्यादिनेत्यर्थः । नन्विदं वा तद्वा, फलविशेषाभावाद्व्यर्थो विकल्प इत्यत **आह—अत्रेति** । मतद्वयमध्ये । 'आद्ये' ज्योतिर्वाक्यपक्षे इत्यर्थः । **द्वितीय इति** । गायत्रीवाक्यपक्षे । अत्रोक्तपक्षद्वये"—"अथ यदतः परो दिवो ज्योतिर्दीप्यते" इत्युक्तस्य ज्योतिषो "गायत्री वा इदꣳ सर्वं" इति गायत्र्या समारम्भः कृतः" इति भाष्यमनुगुणयति—**आद्य इति** ।

चन्द्रिका

आद्येऽपि, च्छान्दोग्यस्थज्योतिषः "गायत्री वै" इत्युपक्रमेण गायत्रीत्वादग्निसूक्तस्थमपि गायत्रीत्येकः पूर्वः पक्षः। अपरस्तु—अस्त्वग्निसूक्तस्थं ज्योतिः कर्णादिविदूरत्वाद्विष्णुः, छान्दोग्यस्थं तु "तदेतद्दृष्टं च श्रुतं च" इति तद्विरुद्धदृष्टश्रुतत्वादिश्रवणात् न विष्णुरिति। न चैवं सति पूर्वपक्षे पूर्वसिद्धान्तानाक्षेपादफलेयं चिन्ता, ज्योतिषो गायत्रीत्वे "इयं वा व सा येयं पृथिवी" इति गायत्र्यभिन्नत्वेनोक्तायां पृथिव्यां "अस्यां हीदं सर्वं प्रतिष्ठितं" इति उक्तस्य स्थितिहेतुत्वादेरपि तद्धर्मत्वापत्त्या जन्मादिसूत्राक्षेपात्।

प्रकाशः

स्पष्टयिष्यते चैतदग्र इति भावः। एवं वैकल्पिकोदाहरणमुक्त्वा, इदानीं ज्योतिर्वाक्योदाहरणपक्षे सुधाऽभिमतपूर्वपक्षद्वयमाह—आद्येऽपीति। उदाहरणभेदसमुच्चयार्थोऽपिशब्दः। **अग्निसूक्तस्थमपीति**। ज्योतिश्श्रुत्या हृदयस्थत्वलिङ्गेन ज्योतिर्द्वयस्यैक्यप्रत्यभिज्ञानात् दृष्टत्वादिविरुद्धधर्मस्याऽऽकारभेदादिनोपपत्तेरिति भावः। द्वितीयपूर्वपक्षेऽनुपपत्तिं प्रकाश्य समाधत्ते—**न चैवमिति**। अग्निसूक्तस्थज्योतिषो विष्णुत्वमुपेत्य पूर्वपक्षकरणे सतीत्यर्थः। **तद्धर्मत्वेति**। गायत्रीधर्मत्वापत्त्येत्यर्थः। पूर्वाधिकरणाक्षेपस्यापि व्यवहितजिज्ञासासूत्राक्षेपपर्यन्तत्वादिति भावः। ननु पूर्वोत्तराधिकरणानां आनन्दमयाक्षेपपूर्वं जिज्ञासासूत्राक्षेपकत्वेन प्रवृत्तत्वात्कथ-

चन्द्रिका

"योऽयमन्तर्हृदये" इति च्छान्दोग्यस्थे ज्योतिषि आनन्दमयधर्मभूतहृदयनिहितत्वश्रवणेन ज्योतिरधिकरणमनाक्षिप्यैव आनन्दमयाधिकरणाक्षेपाच्च। द्वितीयेऽपि, गायत्र्याः छन्दस्त्वे तामुपक्रम्य छान्दोग्ये उक्तस्य ज्योतिषोऽपि च्छन्दस्त्वादग्निसूक्तस्थमपि च्छन्द इत्येकः पूर्वः पक्षः। अन्यस्तु—उक्तरीत्याऽग्निसूक्तस्थस्य विष्णुत्वेऽपि च्छान्दोग्यस्थं छन्द एवेति। अपरस्तु—च्छान्दोग्यस्थस्यापि ज्योतिषो ज्योतिरधिकरणे विष्णौ निर्णीतज्योतिश्श्रुत्या विष्णुत्वेऽपि गायत्री न विष्णुः, तत्र तच्छ्रुतेरभावादिति। अत्रापि प्रथमद्वितीययोरा-

प्रकाशः

मस्य ततो विलक्षणस्य तन्मध्ये निवेश इत्यतः पक्षान्तरमाह—**योऽयमिति**। यद्यपि "यो वेद निहितं गुहायां" इति मन्त्रवर्ण एवायं धर्मः श्रुतः, न त्वानन्दमये, तथाऽपि मन्त्रवर्णोक्तस्यैव आनन्दमयशब्देनोच्यमानत्वादिति भावः। ज्योतिर्वाक्यपक्षे पूर्वपक्षद्वयमुक्त्वा, गायत्रीवाक्यपक्षे पूर्वपक्षत्रयमाह—**द्वितीयेऽपीति**। **उक्तरीत्येति**। कर्णादिविदूरत्वात्तस्य विष्णुत्वेऽपि "दृष्टं च श्रुतं च" इति तद्विरुद्धदृष्टत्वादिश्रवणात् छान्दोग्यस्थं न विष्णुरित्युक्तदिशेत्यर्थः। अस्मिन्पक्षे वक्ष्यमाणपक्षे च सप्रयोजनत्वं पूर्ववदनुसन्धेयम्। **तच्छ्रुतेरिति**। ज्योतिश्श्रुतिश्चोपदेशभेदेन भिन्नप्रकरणत्वान्न गायत्र्यां श्रुतेति भावः। उक्तपञ्चपक्षान् संवादयति—**अत्रापीति**। पञ्चपक्षमध्येऽपीत्यर्थः।

चन्द्रिका

द्योऽत्र टीकायामुक्तः। आद्येऽपि प्रथमद्वितीयौ द्वितीये द्वितीयतृतीयौ * च सुधायाम् । अत्र मतद्वयेऽपि आद्ये पूर्वपक्षे पूर्वसिद्धान्ताक्षेपादाक्षेपिकी अवान्तरसङ्गतिः स्फुटा । आद्यस्य द्वितीये, द्वितीयस्य द्वितीयतृतीययोस्तु पूर्वपक्षयोः पूर्वाधिकरणवैषम्यप्रदर्शनाय तदुपजीवित्वादवान्तरसङ्गतिः । अत्र गायत्री

प्रकाशः

आद्येऽपि प्रथमद्वितीयाविति । यद्यपि "अथ वा अत्रापि "अथ यदतः परो दिवः" इति वाक्योक्तज्योतिषि सन्देहः किं ब्रह्मोतान्यदिति, उपक्रमे गायत्रीशब्दश्रवणात् अन्यदिति प्राप्तम्" इत्येव सुधावाक्यं, न तु द्वेधा तत्र पूर्वपक्षोपपादनमस्ति, तथाऽपि पूर्वाक्षेपेण पूर्ववैषम्येण च योजयितुं शक्यत्वादेवमुक्तम् । तथा च तद्वाक्यं द्वेधा योजनीयमित्युक्तं भवति । **द्वितीय इति** । एतौ च सुधायां कण्ठोक्ताविति ध्येयम् । एवं पक्षान्विविच्येदानीं सङ्गतिमाह—**अत्रेति** । ज्योतिर्वाक्यपक्षे गायत्रीवाक्यपक्षे चेत्यर्थः । **तदुपजीवित्वादिति** । उपजीव्योपजीवकभाव इत्युक्तं भवति। विषयसंशयटीकां व्यनक्ति—**अत्रेति** । छान्दोग्ये तृतीयेऽध्याये "गायत्री वा इद१ँसर्वं भूतं यदिदं किंच वाग्वै गायत्री वाग्वा इद१ँ सर्वं भूतं गायति च त्रायति च या वै सा गायत्री इयं वा व सा येयं पृथिवी अस्यां हीद१ँ

* 'प्रथमे द्वितीयः द्वितीये द्वितीयतृतीयौ' इति गुरुराजीयपाठः ।

प्रकाशः

सर्वं भूतं प्रतिष्ठितं एतामेव नातिशीयन्ते या वै सा पृथिवी इयं वाव सा यदिदमस्मिन्पुरुषे शरीरं अस्मिन् हीमे प्राणाः प्रतिष्ठिताः एतदेव नातिशीयन्ते तद्वा एतत्पुरुषे शरीरं इदं वाव तत् यदिदमस्मिन्नन्तःपुरुषे हृदयं अस्मिन् हीमे प्राणाः प्रतिष्ठिताः एतदेव नातिशीयन्ते सैषा चतुष्पदा षड्विधा गायत्री। तदेतदृचाऽभ्युक्तं—

तावानस्य महिमा ततो ज्यायांश्च पुरुषः ।

पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ।

इति । यद्वैतद्ब्रह्मेति इदं वाव तत् योऽयं बहिर्धा पुरुषादाकाशः अयं वाव सः योऽयमन्तः पुरुषः आकाशः। अयं वाव सः योऽयमन्तर्हृदय आकाशः यो वै सोऽन्त हृदय आकाशः तदेतत्पूर्णं अप्रवर्ति पूर्णामप्रवर्तिनीं श्रियं लभते य एवं वेद य एवं वेद" इत्याद्युक्त्वाऽऽम्नायते, "अथ यदतः परो दिवो ज्योतिर्दीप्यते सर्वतः पृष्ठेषु विश्वतः पृष्ठेषु अनुत्तमेषूत्तमेषु लोकेषु इदं वाव तत् यदिदमस्मिन्नन्तःपुरुषे ज्योतिस्तस्यैषा दृष्टिः। यत्रैतदस्मिन् शरीरे संस्पर्शेनोष्णिमानं विजानाति तस्यैषा श्रुतिः । यत्रैतत्कर्णावपिगृह्य निनदमिव नदथुरिव अग्नेरिव ज्वलत उपशृणोति तदेतद्दृष्टं च श्रुतं चेत्युपासीत । चक्षुष्यः श्रुतो भवति य एवं वेद य एवं वेद" इति । तत्रत्या गायत्री विषय

चन्द्रिका

किं छन्दः किं वा विष्णुरिति चिन्ता। तदर्थं किं गायत्रीश्रुतिप्रसिद्ध्यनुसारेण भूतपादत्वादिविष्णुलिङ्गं बाध्यम् किं वा विपरीतमिति। तदर्थं प्रसिद्धिबाधे किं श्रुतेर्मुख्यत्वभङ्गः उत नेति। तदर्थं गायत्रीशब्दप्रवृत्तिनिमित्तं ब्रह्मणि नास्ति उतास्ति इति। तदर्थं किमनादिस्वभाव ईशानधीन उत तदधीन इति। तथा ब्रह्मपक्षे 'दिवि' 'दिवः' इति उपदेशभेदः किं न युक्तः उत युक्त इति।

प्रकाशः

इत्यर्थः। **छन्द इति**। वर्णसमावेशलक्षणो मन्त्र इत्यर्थः। **भूतेति**। गानत्राणकर्तृत्वस्य प्रवृत्तिनिमित्तानतिरेकात् 'भूतपादत्वादि' इत्युक्तम्। **किं वेति**। लिङ्गाच्छ्रुतिर्बाध्येत्यर्थः। अर्थप्रतिपादकत्वरूपगानकर्तृत्वस्य गायत्रीशब्दप्रवृत्तिनिमित्तस्य ब्रह्मण्ययुक्ततया वा, तद्गतत्वे सत्यप्यनादिस्वभावनियामकत्वरूपमहागुणलाभाय वा, अणुभाष्यदिशा तत्प्रति स्वातन्त्र्यमेव वक्तव्यमित्यभिप्रेत्य 'अनधीन उत तदधीनः' इत्युक्तम्। यद्यनधीनस्तदा प्रवृत्तिनिमित्तं ब्रह्मणि नेति प्रसिद्धिबाधे मुख्यत्वभङ्गात् गायत्री छन्द एवेति पूर्वपक्षे फलं, सिद्धान्ते तु विपरीतमिति स्पष्टत्वात्फलफलिभावो नोक्तः। एवमनुव्याख्यानोक्तप्रमेयाश्रिताभ्यधिकाशङ्कोपयुक्तचिन्तापरम्परामुक्त्वा, सूत्रसूचितप्रमाणाश्रितशङ्कोपयुक्तामाह—**तथेति**। गायत्री किं छन्द उत ब्रह्मेति चिन्ता। तदर्थं ब्रह्मपक्षे गायत्रीज्योतिषोरेकप्रकरणस्थत्वेनैक्यात् 'दिवि' 'दिवः' इत्युपदेशभेदः किं न युक्त उत

चन्द्रिका

यद्यपि पूर्वत्र निरवकाशलिङ्गैः सावकाशज्योतिश्श्रुतिबाध उक्तः, अत्र "यद्वै तत् ब्रह्म" इत्यादिश्रुत्यनुगृहीतैः भूतपादत्वादिनिरवकाशलिङ्गैः सुतरां सावकाशगायत्र्यादिश्रुतिबाध इति पूर्वपक्षानुदयः। तथाऽप्यधिकाशङ्कया तदुदयः। शङ्का तु विष्णौ प्रसिद्धेषु शब्देषु सत्सु अन्यत्रप्रसिद्धगायत्र्यादिशब्दप्रयोगे प्रयोजनं नेत्येका। इयं च "चेतोऽर्पणनिगदात्" इति सूत्रे सिद्धान्ते प्रयोजनोक्त्या सूचिता। आकाशादिशब्दसाधारणी चेयम्। गायत्रीशब्दे अनुपपत्त्यन्तरसद्भावात् स उदाहृतः। अत एव "अग्निगायत्र्यादि" इति भाष्ये आदिपदप्रयोगो युक्तः, "अधिकरणान्तरेऽप्येतन्न्यायस्यानुसन्धेयत्वं च सूचयति" इति टीका चोपपन्ना। असाधारणी त्वन्या—युक्तं अग्निसूक्तस्थज्योतिषो विष्णुत्वं, उपदेशभेदाभावात्, इह तु 'दिवः'

प्रकाशः

युक्त इति। तदर्थं सप्तमीपञ्चम्यौ विरुद्धे उत विवक्षाभेदेन अविरुद्धे इति द्रष्टव्यमित्यर्थः। उपलक्षणमेतत्, ब्रह्मपक्षे प्रसिद्धपदत्यागेनाप्रसिद्धगायत्रीपदप्रयोगे प्रयोजनं नास्त्युतास्तीत्यपि ध्येयम्। अत्रैवं पूर्वपक्षक्रमः, इयं गायत्री छन्द एव, न विष्णुः, गायत्रीशब्दस्य तत्रैव रूढत्वादिति टीकायां दर्शितः। तत्र पूर्वपक्षप्रापकमाशङ्क्याह—यद्यपीति। "यद्वैतद्ब्रह्म" "एतामेव ब्रह्मोपनिषदं" इति ब्रह्मश्रुत्यनुगृहीतैरित्यर्थः। अनुपपत्त्यन्तरेति। उपदेशभेदादिरूपेत्यर्थः। आनन्दमयशब्दवदिति भावः। गायत्री-

चन्द्रिका

इति पञ्चम्युपदेशस्थस्य ज्योतिश्श्रुत्या विष्णुत्वेऽपि 'दिवि' इति तद्विरुद्धसप्तम्युपदेशस्थगायत्र्या न विष्णुत्वमिति । अपरा तु— अग्निसूक्तस्थज्योतिर्निष्ठकर्णादिविदूरत्वविरुद्धदृष्टश्रुतत्वाद्युपदेशात् नेदं ज्योतिर्विष्णुः, ततश्च गायत्र्यपि न विष्णुरिति । इदञ्च शङ्काद्वयं "उपदेशभेदात्" इति सूत्रे कण्ठोक्तम् । अपरा तु—एकस्या वह्निश्रुतेरन्यत्रप्रसिद्धिबाधेऽपि गायत्रीवाक्पृथिव्याद्यनेकशब्दाना-

प्रकाशः

ज्योतिषोर्भिन्नप्रकरणस्थत्वमुपेत्यैकां शङ्कामुक्त्वा, एकप्रकरणस्थत्वमाश्रित्य पक्षान्तरमाह—**अपरा त्विति** । **ततश्चेति** । "तेजो वै ब्रह्मवर्चसं गायत्री" इति ज्योतिश्शब्दपर्यायस्य तेजश्शब्दस्य तत्र दर्शनात् गायत्र्येव ज्योतिरपीति भावः । **कण्ठोक्तमिति** । उपदेशभेदशब्दस्य यथा 'दिवि' 'दिवः' इति भेदव्यपदेशोऽर्थः, तथा दृष्टश्रुतत्वादिभेदव्यपदेशोऽप्यर्थ इति वक्ष्यमाणत्वादिति भावः । **अनेकेति** । "गायत्री वा इदं सर्वं वाग्वै गायत्री इयं वाव सा येयं पृथिवी" इत्याद्यनेकशब्दानामित्यर्थः । ननु "इदं सर्वं" इत्युक्तसर्वात्मकत्वस्य गायत्र्यामनुपपत्तेर्बहुबाधोऽपि न्याय्य इति चेद्ब्रह्मपक्षेऽपि तस्यास्तुल्यत्वादिति । न च वाच्यं अत्रैव श्रुतिबाहुल्येन पूर्वपक्षेण सिद्धान्ते सत्युत्तराधिकरणपूर्वपक्षानुत्थितिरिति, एतच्छङ्कायास्तत्रैव निरसिष्यमाणत्वात् इति भावः । नन्वेवमप्यनन्तरधिकरणे समुद्रशायित्वलिङ्गेनेन्द्रबृहस्पत्यादिबहुश्रुतिबाधस्योक्तत्वात्

चन्द्रिका

मन्यात्रप्रसिद्धिबाधो न युक्तः, अन्तरधिकरणे इन्द्रादिबहुश्रुतीनामन्यत्रप्रसिद्धिबाधस्तु अन्यत्रप्रसिद्धान्तस्स्थत्वमुखेन युक्तः, न चेह तथा मुखमस्तीति। इयं च—

कथं प्रसिद्धबहुलशब्दानामन्यथार्थता।

इत्यनुव्याख्याने उक्ता। एताश्च प्रमाणाश्रिताः। प्रमेयाश्रिता तु—युक्तमाकाशाद्यधिकरणोक्तं जन्यभूताकाशस्वभावस्य विवरत्वादेर्ज्योतिश्शब्दप्रवृत्तिनिमित्तस्य चेशाधीनत्वम्, धर्मिणासह जन्यत्वात्, गायत्रीरूपवेदस्य तु अनादित्वात् तत्स्वभावस्य गानत्राणकर्तृत्वादिरूपप्रवृत्तिनिमित्तस्य नेशाधीनत्वमिति।

प्रकाशः

कथेमतत्पक्षोत्थितिरित्यत आह—**अन्तरिति**। "कथं प्रसिद्ध" इत्युत्तरार्धोक्तामाशङ्कां स्फुटीकृत्य, "नित्यत्वादेव शब्दस्य" इति पूर्वार्धोक्तां शङ्कां विशदयति—**प्रमेयेति**। **जन्येति**। भूतप्रकरणादिना तत्र भूताकाशस्यैव पूर्वपक्षितत्वात्तस्य च "आत्मन आकाशः सम्भूतः" इति जन्यत्वावगमादिति भावः। **ज्योतिश्शब्देति**। प्रकाशत्वादेरित्यर्थः। धर्मिणो जन्यत्वे धर्मस्यापि तथात्वादिति भावः। गानकर्तृत्वमर्थप्रतिपादकत्वं त्राणकर्तृत्वं चाध्येतॄणां पापेभ्यो रक्षकत्वम्। तच्च तत्स्वभावः, स्वभावश्च अनादित्वान्न जन्यते, अतो न तदधीनमित्यर्थः। ईशगतत्वं त्वशक्यशङ्कमिति भावः। तस्माच्छब्दप्रवृत्तिनिमित्ताभावात्प्रसिद्धि-

चन्द्रिका

ननु कृतकक्रमविशिष्टवर्णात्मकस्य वेदस्य नानादित्वम् । उक्तं हि विष्णुतत्त्वनिर्णयटीकायां "न हि वयं वेदस्य कूटस्थनित्यतां ब्रूमः" इति, "क्रमस्य कृतकत्वेऽपि" इति चेति चेत्, मैवम्,

प्रकाशः

बाधे मुख्यत्वहानेर्गायत्री न विष्णुः, किं तु च्छन्द एव इति पूर्वपक्षशेषः । ननु यदुक्तं वेदस्यानादित्वात्तत्स्वभावो नेशाधीन इति, तदयुक्तम्,

नित्या वेदाः समस्ताश्च शाश्वता विष्णुबुद्धिगाः ।

इति प्रमाणव्याख्याऽवसरे तत्त्वनिर्णयटीकायां—"वर्णास्तावन्नित्यत्वात्सर्वगतत्वाच्च स्वतः क्रमशून्याः । न च क्रमेण विना पदवाक्यभावः, नापि तदन्तरेण प्रामाण्यम् । अतः क्रमः पौरुषेय एवास्थेयः । तत्कथं वेदस्यापौरुषेयत्वम्" इत्याशङ्क्य, "न हि वयं वेदस्य कूटस्थनित्यतां ब्रूमः । किन्तु शब्दतोऽर्थतश्च सर्वदैकप्रकारतामेव । ततश्च क्रमस्य कृतकत्वेऽपि पुरुषाभिप्रायप्रवेशेऽपि स्वतन्त्रस्य वक्तुरभावात् अपौरुषेयत्वमुपपद्यते" इत्येनेन सादित्वोक्तेः । अङ्गीकृतं चैतद्वाट्टैरपि—

यत्नतः प्रतिषेध्या नः पुरुषाणां स्वतन्त्रता ।

इत्युक्तेरित्याशङ्क्य वाक्यान्तरानुसारेणास्याभिप्रायं व्यञ्जयन्, अनादित्वमुपपादयति—नन्विति । कृतकक्रमेति । नित्यत्वात्सर्वगतत्वाच्च वर्णानां स्वतः क्रमाभावादिति भावः ।

चन्द्रिका

तत्त्वसङ्ख्यानटीकायां "नित्यत्वं नाम कूटस्थतया आद्यन्तशून्यत्वम् । तच्च वेदानाम् "नित्या वेदाःसमस्ताश्च" इत्यादिप्रमाणसिद्धम्" इत्युक्तत्वात् । युक्तञ्चैतत्, क्रमस्य सदेश्वरबुद्धिस्थत्वात् । अत एवोक्तं विष्णुतत्त्वनिर्णये—"सर्वज्ञत्वेनेश्वरस्य तद्बुद्धौ सर्वदा प्रतीयमानत्वात्" इति। तट्टीकायां कौटस्थ्यनिषेधस्तु अस्मदादीन्प्रति प्रमापकत्वोपयुक्तस्य अस्मदादिबुद्धिस्थस्य क्रमस्योच्चारणाद्यधीनत्वेन कृतकत्वात् ।

प्रकाशः

तत्त्वसङ्ख्यानेति ।

नित्या वेदाः पुराणाद्याः कालः प्रकृतिरेव च ।
नित्यानित्यं ।

इत्यस्य व्याख्याऽवसरे । ननु व्यामिश्रोक्तौ सत्यामपि कथमनादित्वनिर्णय इत्यत आह—**युक्तमिति** । 'एतत्' अनादित्वम् । स्वतःक्रमशून्यानां वर्णानां क्रमस्य बुद्धिघटितत्वेऽपि ईश्वरबुद्धेरनादिनित्यत्वेन तद्घटितस्यानादिनित्यत्वोपपत्तेरिति भावः । 'तद्बुद्धौ' तन्मनसि । 'तट्टीकायां' प्रागुक्ततत्त्वनिर्णयटीकायामित्यर्थः । प्रलये ऽविच्छेदायावश्यवक्तव्यानादिनित्यभगवद्बुद्धिघटितक्रमवत्तामपेक्ष्य क्वचित्कूटस्थनित्यत्वमुक्तम् । तादृशस्येतरप्रमाजनकत्वाभावात्तदर्थमुच्चारणघटितस्यैव तस्य वक्तव्यत्वादुच्चारणस्य चानादिनित्यत्वाभावात् कूटस्थता नेति क्वचिदुक्तमित्यर्थः । उक्तं च सुधायां वियत्पादे— "नियतविशिष्टानुपूर्वीविशिष्टत्वेनार्थावबोधशक्त्याविर्भावो जनिः" इति । आदिपदेनेश्वरोऽपि गृह्यते, तदुच्चारणघटितस्या-

चन्द्रिका

कृत्वाचिन्तया वा अनादित्वोक्तिः, क्रमस्यान्याधीनत्वात् । इयं च—

नित्यत्वादेव शब्दानां तत्स्वभावः कथं हरेः ।

इत्यनुव्याख्याने दर्शिता ।

प्रकाशः

पि तथात्वात् । अत एव 'बुद्धिस्थत्वात्' इति, 'तद्बुद्धौ' इत्येवोक्तम् । उक्तं च तर्कताण्डवे—"आधुनिकाध्यापकेन स्वबुद्धिस्थपूर्वपूर्वदिवसीयक्रमानुसारेण उत्तरोत्तरदिवसेष्विव ईश्वरेणापि स्वबुद्धिस्थप्रवाहानादिपूर्वपूर्वकल्पीयक्रमानुसारेणैव उत्तरोत्तरकल्पेष्वपि वेदस्य उच्चारितत्वेन" इत्यादि । यदि च

ज्ञानं नित्यं क्रिया नित्या बलं शक्तिः परात्मनः ।

इत्यनुव्याख्यानानुरोधात् भगवत्क्रियाणां अनादिनित्यता, तदा तद्घटितस्यापि कौटस्थ्यं ध्येयम् । ननु यदीश्वरबुद्धिघटिततया क्रमस्यानादित्वं, तर्ह्यागतमीश्वराधीनस्वभावत्वं वेदस्य । न हि यो यद्बुद्ध्यधीनः स न तदधीन इति सम्भवति, वर्णानामन्यथाक्रमेणाप्यनुसन्धातुं शक्यत्वादित्यत आह—कृत्वा चिन्तयेति । बुद्धिघटितत्वं विना वेदस्यानादित्वाभावेऽप्यनादित्वं सिद्धवत्कृत्येशानधी न त्वमाशङ्क्य, तादृशस्यापीशाधीनतोक्तौ वेदे फलाभावेऽपि तादृशजीवात्मादेरीशाधीनत्वं सिध्यति फलमिति न वैयर्थ्यमिति भावः । 'अनादित्वोक्तिः' बुद्ध्यघटितात्मादिसाधारणानादित्वोक्तिः । एतेनानुव्या-

चन्द्रिका

तत्राद्या शङ्का "चेतोऽर्पणनिगदात्" इति सूत्रे प्रयोजनोक्त्या परिहृता। द्वितीयतृतीये तु "उभयस्मिन्नप्यविरोधात्" इत्यनेन परिहृते। तस्य यथा विवक्षाभेदेन सप्तमीपञ्चम्यौ न विरुद्धे इत्यर्थः, तथा आकारभेदेन कर्णादिविदूरत्वदृष्टत्वादिके न विरुद्धे इत्यप्यर्थोपपत्तेः। चतुर्थी तु—"बाहुल्याच्छ्रुतिलिङ्गयोः" इत्यनुव्याख्याने—

प्रकाशः

ख्याने 'नित्यत्वात्' इत्यनेनानादित्वं विवक्षितमित्युक्तं भवति॥

किं तदुक्तशङ्कानिरासकमित्यतस्तद्दर्शयन् सिद्धान्तयति—**तत्रेति**। वेदोपदेष्टृत्वपातृत्वरूपगानत्राणकर्तृत्वादिरूपगायत्र्यादिशब्दार्थगुणस्वरूपत्वेन चेतोऽपर्णार्थमेव तादृशशब्दैर्निगद्यमानत्वादित्युपासनारूपप्रयोजनोक्त्येत्यर्थः। द्वितीयशङ्कापरिहारस्य भाष्यादिदिशोपलम्भेऽपि, तृतीयाया अस्मिन् सूत्रेऽदर्शनात् स्वयमाह—**तस्येति**। त्रिसप्तलोकविवक्षाभेदेनेत्यर्थः। स्पष्टयिष्यते चैतदग्र इति भावः। **आकारेति**। देशकालगुणाद्यपरिच्छिन्नत्वेनाकारेण कर्णादिविदूरत्वम्, अकार्त्स्न्येन दृष्टत्वादिकम्। यद्वा केवलरूपेण कर्णादिविदूरत्वं, किञ्चिदधिष्ठानाधिष्ठितत्वादिरूपेण दृष्टत्वादिकमित्यर्थः। उक्तं च सुधायां—"न च ज्योतिषो ब्रह्मत्वे दृष्टत्वाद्यनुपपत्तिः, यतस्तदधिष्ठानद्वारा कर्णादिविदूरस्यैव हरेरुपपद्यते" इति। **चतुर्थीति**। गायत्रीवागादिबहुश्रुतिबलेनानुव्याख्यानोक्तेत्यर्थः।

चन्द्रिका

'"ज्यायांश्च पुरुषः" इत्यादिशब्दसहितलिङ्गैश्च' इत्यादिन्यायविवरणे च परिहृता। अयं भावः—"अतो ज्यायाꣳश्च पूरुषः" "यद्वै तद्ब्रह्म" "एतामेव ब्रह्मोपनिषदम्" इत्यादिश्रुतीनां गानत्राणकर्तृत्वं, भूतादिपादत्वं, "एतामेव नातिशीयन्ते" इति सर्वोत्तमत्वमित्यादिलिङ्गानां च बाहुल्यादनेकेषामपि शब्दानां प्रसिद्धार्थत्यागः।

प्रकाशः

कथं प्रसिद्धबहुलशब्दानामन्यथार्थता।
इति चेत्तद्धरेरेव बाहुल्याच्छ्रुतिलिङ्गयोः।
तादृशत्वाच्च तच्छक्तेः.... ।

इत्यनुव्याख्याने, "तावानस्य महिमा ततो ज्यायांश्च" इत्यादिन्यायविवरणे चेत्यर्थः। ननु पूर्वोत्तरपक्षयोः श्रुतिबाहुल्यसाम्ये कथं निर्णय इत्यतः, श्रुतिसाम्येऽपि लिङ्गानामाधिक्यान्निर्णयः स्यादिति भावेन श्रुतिलिङ्गबाहुल्यं दर्शयन्नाह—**अयं भाव इति।** **गानेति।** "गायति त्रायति च" इत्युक्तमित्यर्थः। "सैषा चतुष्पदा षड्विधा गायत्री" इति गायत्र्याः प्रागुक्तषड्विधत्वमनूद्य, चतुष्पदत्वं व्यपदिश्य, तत्रैवपुरुषसूक्तमन्त्रः संवादायोदाहृतः।

तावानस्य महिमा ततो ज्यायांश्च पुरुषः।
पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि॥

इति। अत्रोक्तभूतादिपादत्वमित्यर्थः। 'एतां' गायत्रीं। ब्रह्मशब्दस्य

चन्द्रिका

पुरुषशब्दो हि "स वा अयं पुरुषः सर्वासु पूर्षु पुरि शयो नैनेन किञ्चनानावृतं" इत्यत्र सर्वान्तर्यामित्वं पुरुषत्वमित्युक्तेः, तथा "पुरुषो हवै नारायणः" "सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्" इति "एष ह्येवाचिन्त्यः परः परमो हरिः पुरुषः परः परमात्मा अजो ब्रह्म नारायणः प्रभुः" इत्यादिश्रुतेः,

यथा हि पौरुषे सूक्ते विष्णुरेवाभिधीयते ।

इत्यादिस्मृतेश्च पुरुषोत्तमे मुख्य इति । पञ्चमी तु—"तादृशत्वात्तु तच्छक्तेः" इत्यनुव्याख्याने परिहृता ।

प्रकाशः

जन्मादिसूत्रादौ, लिङ्गानां च भाष्यादौ विष्णौ मुख्यत्वस्य साधितत्वात् पुरुषशब्दस्य तत्साधयति–**पुरुषशब्दो हीति** । 'पुरुषोत्तमे मुख्यः' इत्यन्वयः । एतेन भाष्यटीकयोर्लिङ्गस्य निरवकाशत्वेन सिद्धान्तकरणमुपलक्षणमिति सूचितम् । "स वा अयं" इति श्रुतिः अष्टमे गीताभाष्यटीकायां व्याख्याता । **पञ्चमी त्विति** । "नित्यत्वादेव" इत्यनुव्याख्यानोक्ता । नन्वनादेरन्याधीनत्वं क्वाप्यनुपलम्भादसम्भावितमित्यतः,

"सत्ताप्रधानपुरुषशक्तीनां च प्रतीतयः ।
प्रवृत्तयश्च ताः सर्वा नित्यं नित्यात्मना यतः ।
तथा नित्यतया नित्यं नित्यशक्त्या स्वयेश्वरः ।
नियामयति नित्यं च ।

चन्द्रिका

अयं भावः—

अनादीनां गुणादीनां यथा गुण्यादितन्त्रता ।
तथाऽनादिश्रुतेरस्तु क्षेमायेश्वरतन्त्रता ॥

यथा वैशेषिकादिमते गगनादिपरिमाणादीनां अनादिनित्यानामपि स्वाश्रयगगनाद्यधीनता, यथावाऽद्वैतिमते अनादेरात्माज्ञानसम्बन्धस्य जीवब्रह्मविभागादेश्च सम्बन्ध्यज्ञानाद्यधीनता, यथा वा प्राभाकरमते दुःखप्रागभावस्य मोक्षस्य ज्ञानाधीनता, यथा वा मतान्तरे दुरितप्रागभावस्य निषिद्धाकरणाधीनता, तथा गायत्र्चास्तत्पदप्रवृत्तिनिमित्तस्य चोत्पत्त्यभावेऽपि स्थितौ विष्ण्वधीनता ।

प्रकाशः

इति साङ्ख्याधिकरणानुव्याख्यां हृदि कृत्वाऽऽह—**अयं भाव** इति । 'गुणादीनां' परिमाणजात्यादिधर्माणां । दृष्टान्तविवरणपूर्वं दार्ष्टान्तिकं विशदयति—**यथेति** । अधीनत्वे हेतुः—**स्वाश्रयेति** । आश्रिते आश्रयाधीनत्वस्य लोके उपलम्भात् । **अनादेरिति** ।

जीवो ब्रह्म विशुद्धा चिद्भिदस्तस्यास्तयोर्द्वयोः ।
अविद्या तच्चितोर्योगः षडस्माकमनादयः ॥

इत्युक्तेरिति भावः । **अज्ञानाद्यधीनतेति** । अन्यथा तन्निवृत्तावपि तन्निवृत्तिर्न स्यादिति भावः । **ज्ञानेति** । ज्ञानेन दुःखप्रागभावस्योत्तरसमयसम्बन्धरूपपरिपालनं क्रियत इति तैरुच्यमानत्वादिति भावः । एवं दुरितप्रागभावेऽपि ध्येयम् । ननूत्पाद्यत्वातिरेकेण तदधीनत्व-

चन्द्रिका

किञ्च—सादेरपि उत्पत्तावन्यापेक्षायामपि तदनन्तरं स्थितावनादितो न विशेषः। तत्र च सादिर्न केवलमुत्पत्तावीशतन्त्रः, किन्तु स्थितावपीति "प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः" इत्यत्र वक्ष्यमाणत्वादनादेरुत्पत्त्यभावेन तत्रान्यानपेक्षायामपि स्थितावीशापेक्षा किं न स्यात्।

प्रकाशः

स्यान्यस्याभावात् कथमनादेरन्याधीनता। नचानाश्यत्वमेव तदिति वाच्यं, अनादेर्नाशाभावस्य स्वत एव सिद्ध्याऽन्यानपेक्षणात्। न हि मतान्तरसिद्धदृष्टान्तमात्रेणानुपपन्नोऽप्यर्थस्सिध्यति, अपि तु सम्भावितमेवेत्यत आह—**किञ्चेति**। **प्रकृतैतावत्त्वमिति**। तृतीयेऽध्याये द्वितीयपादे "प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः" इत्यत्र जगत्पालनं विष्णोर्युक्तमयुक्तं वेति सन्देहे, विष्णोस्सृष्टिसंहारकर्तृत्वात्सत्यां च सृष्टौ यावत्संहारं अवस्थितेः स्वत एव सिद्धेः, संहर्तुस्संहारातिरिक्तव्यापारस्यैव रक्षारूपस्यायोगान्न पालनं युक्तमिति प्राप्ते, "नैतावदेना परो अन्यदस्त्युक्षा सद्यावा पृथिवी बिभर्ति" इति श्रुतौ 'नैतावत्' इति प्रकृतस्य सृष्ट्यादिकर्तृत्वस्य तावन्मात्रत्वं निषिध्य ततोऽधिकस्य पालनस्यापीश्वरे वर्णनात् सृष्टिसंहारकर्तुरपि पालकत्वव्यापारो युक्त इति सिद्धान्त इति वक्ष्यमाणत्वात् जन्यवस्तुनि स्थितौ यथा भगवन्नियतता तथाऽत्रापीत्यर्थः।

चन्द्रिका

दृश्यते हि योगे अन्यापेक्षस्य पराधीनत्ववत्, क्षेमेऽपि तदपेक्षस्य तदधीनता। किञ्च—

अकर्तुमन्यथाकर्तुं कर्तुं चास्तीश्वरस्य यत्।
सामर्थ्यं तेन तत्तन्त्रमनाद्यपि च सादिवत्॥

ईश्वरो हि सर्वत्राप्रतिहतशक्तित्वात् घटेनेव अव्याकृताकाशादिनाऽपि रहितमतीतादिकालं कर्तुं शक्नोति। सङ्कल्पाभावात्तु तदकरणम्। तदभावश्च कार्योन्नेयः।

प्रकाशः

ननु नैतावताऽन्याधीनतेत्यत आह—**दृश्यते हीति**। भृत्यादौ राजाद्यधीनतायाः प्रसिद्धत्वादिति भावः। ननु यद्यनाद्यपीशाधीनं, तर्हि कदाचित्तद्राहित्यमपि कुर्यात् घटराहित्यमिव, न चैवं, अतो न तदधीनमेतदित्यतः,

शक्तोऽपि ह्यन्यथा कर्तुं स्वेच्छानियमतो हरिः।
कारणैर्नियतैरेव करोतीदं जगत्सदा॥

इति तदनन्यत्वनयानुभाष्यसूचितं समाधिमाह—**किञ्चेति**। विष्टिगृहीता ईश्वरप्रेरिता वाऽनिष्टमप्यकृत्वा नैव स्थातुमीशते। न च भगवांस्तथेति 'कर्तुं शक्तोऽपि' इत्युक्तम्। 'ईश्वरो हि' इति अन्यथेश्वरत्वभङ्ग इति सूचयति। वक्ष्यते च "आत्मनि चैवं विचित्राश्च हि" इत्यत्र युक्तिपादे विचित्राप्रतिहतशक्तिमत्त्वमिति भावः। 'तदभावः' सङ्कल्पाभावः। ननु सिद्धायां शक्तौ सङ्कल्पाभावनि-

चन्द्रिका

न च शक्त्यभावादेव तदुपपत्तिः, "स्वभावजीवकर्माणि" इत्यादिटीकोदाहृतश्रुत्यादिविरोधादैश्वर्यविरोधाच्च । तथा चानादीशेच्छाधीना अनादिस्वभावता कथमीशतन्त्रताविरोधिनी । स्वभावमात्रस्येशाधीनताऽऽकाशाधिकरणे उक्ता, अत्र त्वनादेरपीति भेदः ।

प्रकाशः

मित्तं तदकरणं, सैव कुतः सिद्धेत्याशङ्क्याह—**न चेति** ।

स्वभावजीवकर्माणि द्रव्यं कालः श्रुतिः क्रिया ।
यत्प्रसादादिमे सन्ति न सन्ति यदुपेक्षया ॥

इति तदनन्यत्वनयानुव्याख्यानोक्तश्रुत्यादिविरोधादित्यर्थः । एतेन "तादृशत्वाच्च तच्छक्तेः" इत्यस्य नित्यानित्यस्वभावसर्वविषयकत्वादीश्वरशक्तेरित्यर्थ उक्तो भवति । ननु घटादिवदनाद्यप्यस्मदाद्यधीनं किं न स्यादित्यत आह—**तथा चेति** । अस्मदादावनीश्वरभावादिति भावः । नन्वाकाशाधिकरणे आकाशोपलक्षितसर्वस्वभावस्येशाधीनतोक्तेर्गतार्थमेतदित्यत आह—**स्वभावेति** । साद्यनादिसाधारण्येनेत्यर्थः । नन्वनादिस्वभावस्येशाधीनत्वे कैमुत्यन्यायहततया न्याकाशाधिकरणपूर्वपक्षोदय इति चेन्न, सामान्यतो ऽचेतनस्वभावस्येशाधीनत्वोक्तावेव विशेषविचारावसरात् । आकाशादिपदप्रवृत्तिनिमित्तसद्भावोपपादनेन आकाशादिशब्दमुख्यार्थत्वोक्त्यर्थतया तत्सार्थक्यादिति । ननु द्वितीयस्य तृतीयपादे "न वियदश्रुतेः" इत्यादाववकाशाख्यवियदुत्पत्तिमन्न वेति सन्देहे, "अनादिर्वा

चन्द्रिका

पराधीनविशेषावाप्तिलक्षणोत्पत्तिरीशादन्यस्य सर्वस्यापीति वियत्पादे वक्ष्यते, अत्र तु प्रागसतस्सत्तासम्बन्धरूपोत्पत्तिरहितानामपि स्वरूपसत्तेशाधीनेत्युक्तमित्यविरोधः । यद्यप्यनादिस्वभावस्येशाधीनतामनुक्त्वाऽपि, गायत्रीशब्दप्रवृत्तिनिमित्तस्य गानत्राणकर्तृत्वस्य वेदोपदेष्टरि

प्रकाशः

अयमाकाशः" "अनन्तोऽयमाकाशः" "आकाशवत्सर्वगतश्च नित्यः" इत्यादिश्रुतिषु अनादित्वश्रवणात् उक्तानेकश्रुतिविरोधेन सम्भूतवाक्यस्य प्रामाण्यायोगात् अनुत्पत्तिमदिति प्राप्ते, "स इदं सर्वमसृजत" "आकाशस्सम्भूतः" इत्याद्युत्पत्तिश्रुतिबाहुल्यादनुत्पत्तिश्रुत्यभावाच्चानादित्वश्रुतेश्चिरन्तनत्वाद्यभिप्रायेण भाक्तत्वसम्भवादुत्पत्तिमद्वियदित्यादिन्यायैरनादेरपि सर्वस्योत्पत्तेर्वक्ष्यमाणत्वादजन्यत्वाङ्गीकारेणेह पूर्वोत्तरपक्षौ तद्विरुद्धावित्यत आह—**पराधीनेति**। "असम्भवस्तु सतोऽनुपपत्तेः" इत्यधिकरणं हृदि कृत्वाऽऽह—**ईशादिति**। **प्रागसतः सत्ता इति**। न्यायरीत्यैतत्। सिद्धान्ते तु कार्यात्मना असतः कारणात्मना सतो घटादेः यस्सत्तासम्बन्धः पृथ्वाकारताद्यवस्थाविशेषाप्तिः तद्रूपोत्पत्तिरहितानामित्यर्थः। 'सत्ता' सत्त्वमित्यर्थः, न तु जातिः। अत्र भाष्यादौ प्रयत्नेनानादेरन्याधीनतासमर्थनस्यानौचित्यमाशङ्क्याभिप्रायोक्त्या निरस्यति—**यद्यपीति**। **वेदोपदेष्टरीति**। "गायति त्रायति च" इति श्रुत्युक्तयोगानुगतिसूचनमेतत्।

चन्द्रिका

रक्षके च विष्णाविव सम्भवेन तस्य विष्णुपरता वक्तुं शक्या। न च योगाद्रूढेः प्राबल्याद्रूढिबाधकमहायोगायेशाधीनत्वोक्तिः, "गायति त्रायति च" इति श्रुत्युक्तत्वान्निरवकाशविष्णुलिङ्गानुग्रहाच्च रूढि-त्यागेन योगस्यैवेह ग्राह्यत्वात्। भाष्ये विष्णौ पौराणिकरू-ढेरुक्तत्वाच्च। तथाऽपि यथा "व्रीहीनवहन्ति" इत्यत्र द्वितीया-श्रुतिमतन्त्रीकृत्य अवघातादेर्लिङ्गात् व्रीहिशेषतोक्ता द्वितीये,

प्रकाशः

विष्णावेवेति। न हि तज्जडे अकर्तरि मुख्यतो युज्यत इत्ये-वकारः। ननु नैवं शङ्क्यं, गायत्रीशब्दस्य च्छन्दसि रूढत्वेन योगमात्रेणापहारायोगात्, तद्बाधकमहायोगाय "स्वातन्त्र्यं तत्र मुख्यं स्यात्" इत्युक्तदिशेशाधीनत्वोक्तिरित्याशङ्क्य निरस्यति—**न चेति**। **श्रुत्युक्तत्वादिति**। "आज्यैः स्तुवते" इत्यादौ "यदाजिमीयुस्तदाज्यानामाज्यत्वं" इति श्रौतयोगेन रूढित्यागस्य दृष्टत्वेन केवलयोगापेक्षया श्रौतयोगस्य बलवत्त्वादन्यथा तस्य व्य-र्थतापत्तेः, "कम्पनात्" इत्यत्र स्मार्तयोगस्यापि रूढिबाधकतायाः वक्ष्यमाणत्वाच्चेति भावः। प्रागुक्तलिङ्गानुगृहीतत्वाच्च प्राबल्यं यो-गस्येत्याह—**निरवकाशेति**। **पौराणिकेति**।

सर्वच्छन्दोऽभिधो ह्येष सर्वदेवाभिधो ह्यसौ।

इत्यादिना पुराणसिद्धरूढेरित्यर्थः॥ **यथेति**। द्वितीयाध्याया द्यपादे "तानि द्वैधं गुणप्रधानभूतानि" इति चतुर्थे ऽधिकरणे

चन्द्रिका

तथाऽत्रापि तद्गतत्वमतन्त्रीकृत्य च्छन्दोगतस्य प्रवृत्तिनिमित्तस्य विष्णव धीनत्वेन श्रुतेर्विष्णावेव महायोगेन परममुख्यत्वमिति प्रदर्शनार्थम्, अनादिस्वभावनियामकशक्तिरूपमहागुणसिध्यर्थं, विष्णावसम्भवदना-दिप्रवृत्तिनिमित्तकशब्दसमन्वयार्थं चेशाधीनतोक्ता ।

प्रकाशः

"व्रीहीनवहन्ति" इत्यत्रावघातादपूर्वमस्त्युत नेति संशये, वाक्य-साफल्यायावश्यमपूर्वे कल्प्ये भावार्थाधिकरणन्यायेन धात्वर्थादेव कल्पनं न्याय्यमित्यवघातादस्त्यपूर्वं, व्रीहयस्तु तदर्था इति प्राप्ते, अवघातसामर्थ्यपर्यालोचनया तुषविमोकद्वारा पुरोडाशनिर्वर्तनरूपदृष्ट-प्रयोजनलाभेनापूर्वस्यैवाकल्प्यत्वाद्दृष्टानुनिष्पादिना नियमादृष्टस्य स्वी-कारेण वाक्यावैयर्थ्यात् व्रीह्यर्थोऽवघात इति सिद्धान्तितम् । तत्र यथा 'व्रीहीन्' इति शेषित्वबोधिन्यां श्रुतौ सत्यामपि तदनादरेण सामर्थ्यपर्यालोचनयैवावघातस्य व्रीहिशेषतोक्ता, तथाऽत्रापीत्यर्थः । ननु तत्र "सक्तून् जुहोति" इत्यादौ द्वितीयाया व्यभिचारि-त्वादनादरणं तस्या इत्यतः, तर्ह्यत्रापि प्रयोजनविशेषलाभाय तद-नादरणमित्याह—**महायोगेनेति** ।

स्वातन्त्र्यं तद्गतत्वं च शब्दवृत्तेर्हि कारणम् ।
स्वातन्त्र्यं तत्र मुख्यं स्यात्.............. ॥

इत्युक्तेरिति भावः । **असम्भवदिति** । तेनावकाशाकारादि-

चन्द्रिका

तस्माद्विष्णुरेव अधिवेदगतगायत्र्यादिशब्दवाच्य इति ॥ सूत्रक्रमस्तु—आद्ये उपक्रमस्थहेतूक्तिः, द्वितीये तु उपसंहारोदाहृतमन्त्रस्थहेतूक्तिः, तृतीये बाधकोद्धार इति ।

अत्रोभाभ्यामुक्तम्—चतुस्सूत्री एकमधिकरणम् । 'चरणाभिधानात्' इत्यस्य पादाभिधानादित्यर्थः ।

प्रकाशः

वर्णप्रधानादिशब्दवाच्यता सिध्यतीति भावः । अधिकरणार्थोपसंहारः—**तस्मादिति** । परमते सूत्राणामक्रमं मन्वानः स्वमते तमाह—**सूत्रेति** । **उपक्रमेति** । सौत्रदर्शनशब्देन "गायति त्रायति च" इत्युपक्रमवाक्योक्तगानत्राणकर्तृत्वलिङ्गोक्तिरित्यर्थः । **द्वितीय इति** । "भूतादिपाद" इत्यत्र "सैषा चतुष्पदा षड्विधा गायत्री" इति गायत्र्याः प्रागुक्तषड्विधत्वमनूद्य, चतुष्पदत्वं व्यपदिश्य, तत्रैव "तदेतदृचाऽभ्युक्तं" इत्युदाहृते पुरुषसूक्तस्थे "तावान्" इति मन्त्रे भूतादिपादत्वरूपलिङ्गोक्तिरित्यर्थः । एवं द्वाभ्यां स्वपक्षस्थापने सति, "उपदेशभेदात्" इति तृतीये 'दिवि' 'दिवः' इत्युपदेशभेदरूपबाधके शङ्किते, विवक्षाभेदेन तत्परिहारः क्रियत इत्यर्थः । तदुद्धारप्रकारश्चाग्रे स्पष्ट इत्याशयः ॥

उभाभ्यामिति । अद्वैतिरामानुजाभ्यामित्यर्थः । तत्र सूत्रार्थविषयवाक्ययोर्दूषणेनैवाधिकरणशरीरं दूषितं मन्वानः, प्रथमसूत्रार्थं निरसितुमनुवदति—**चरणेति** ॥ ननु न पादाभिधानं "वि मे कर्णा"

चन्द्रिका

पादाभिधानं च "अथ यदतः" इति च्छान्दोग्यगतमेव । तत्र "तदेतदृचाऽभ्युक्तम्—पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि" इति पादाभिधानादिति । तत्र लाघवार्थं श्रुत्यनुगमार्थं च 'पादाभिधानात्' इति सूत्रं स्यादिति सुधायामेवोक्तम् । किञ्च अस्मद्रीत्या "हृदय आहितं यत्" इति गुहानिहितत्वयुक्तज्योतिर्वाक्योदाहरणेन आनन्दमयाधिकरणाक्षेपेण पूर्वपक्षसम्भवे, तदनाक्षेपेण "अथ यदतः" इति वाक्योदाहरणमयुक्तम् । किञ्च—

पौनरुक्त्यं परमते ज्योतिर्भूतादिसूत्रयोः ।
पादोपदेशादन्या हि नैवास्ति चरणाभिधा ॥

"पादोऽस्य सर्वा भूतानि" इति पूर्ववाक्यस्थपादाभिधानात्

प्रकाशः

इति वाक्येऽस्तीत्यतो नेदमुदाहरणमिति भावेनाह—**पादेति** । 'चतुष्पदा' इति भूतादिसूत्रोक्तपादाभिधानभ्रान्तिं निरसितुं तद्विवृणोति—**तत्रेति** । **लाघवार्थमिति** । 'चरण' इत्युक्त्यपेक्षया 'पाद' इत्यस्य लघुत्वाच्छ्रुतौ पादशब्दस्यैव श्रुतत्वादित्यर्थः । उदाहरणं चायुक्तमित्याह—**किञ्चास्मद्रीत्येति** । ननु तत्रापि "योऽयमन्तर्हृदये" इति गुहानिहितत्वं श्रुतमिति चेन्न, ज्योतिस्सन्निधानेऽश्रवणादिति वा, द्वयोर्गुहानिहितत्वयुक्तत्वेऽपि सूक्तस्थस्य चरणयुक्तत्वेन सूत्रानुगुण्यादिति वा तात्पर्यात् । **किञ्चेति** । हिशब्दो यस्मादित्यर्थे । श्लोकं विवृणोति—**पादोऽस्येति** ।

चन्द्रिका

अन्यस्य ज्योतिर्वाक्ये पादाभिधानस्याभावात् तस्य च भूतादिसूत्रेणैवोक्तत्वात् 'चरणाभिधानात्' इत्यस्य पौनरुक्त्यम् । अथ 'चरणाभिधानात्' इत्यनेन "पादोऽस्य सर्वा भूतानि" इति मन्त्रवाक्यस्थं सर्वभूतानामेकपादत्वममृतस्य त्रिपात्त्वं चोच्यते । "भूतादिपाद" इत्यनेन तु "सैषा चतुष्पदा" इति ब्राह्मणवाक्यस्थं भूतपृथिवीशरीरहृदयानां पादत्वमुच्यते । ब्राह्मणवाक्ये हि "इदं सर्वं भूतं" इति भूतं, "येयं पृथिवी" इति पृथिवीं, यदिदमस्मिन् पुरुषे शरीरम्" इति शरीरं, "यदिदमस्मिन्नन्तः पुरुषे हृदयम्" इति हृदयं चोक्त्वा, "सैषा चतुष्पदा षड्विधा गायत्री" इति भूतादीनां चतुर्णां पादत्वं व्यपदिश्यते । ततो न पौनरुक्त्यमिति चेत्, न, 'चरणाभिधानात्' इत्यनेन "पादोऽस्य सर्वाभूतानि त्रिपादस्य" इति मन्त्रस्थपादाभिधानद्वयस्येव ततोऽधिकार्थस्यापि ब्राह्मणस्थपादाभिधानस्यापि वक्तुं शक्यत्वेन भूतादि-

प्रकाशः

अन्यस्येति । अन्यस्य सत्त्वेहि तत्परत्वेन 'चरण' इत्यस्य न पौनरुक्त्यं, न च तदस्तीत्यर्थः । **तस्य चेति** । "पादोस्य" इत्यनेनोक्तस्येत्यर्थः । उक्तदोषपरिहारमाशङ्कते—**अथेति** । **ब्राह्मणेति** । उपनिषद्वाक्ये एवमुक्तौ "चरणाभिधानात्" इत्यस्य भूतसूत्रेण पौनरुक्त्याभावेऽप्यनेन तद्वैयर्थ्यं दुर्निरासमित्याह—**चरणाभिधानादित्यनेनेति** । पररीत्या च भूतादिसूत्र-

चन्द्रिका

सूत्रवैयर्थ्यात्। अपि च त्वत्पक्षे हि ब्रह्मणस्तत्तत्पादत्वं तत्तदात्मकत्वम्। तथा च सर्वात्मकत्वं 'चरणाभिधानात्' इत्यनेनैवोक्तमिति किं तदेकदेशभूताद्यात्मकत्वप्रतिपादकेन भूतादिसूत्रेण। किं च 'चतुष्पदा' इत्यत्र चतुश्शब्दो न भूतादिपरः, पूर्ववाक्ये भूतादिवत् "वाग्वै गायत्री वाग्वा इदं सर्वम्" इति वाचः, "अस्मिन् हीमे प्राणाः प्रतिष्ठिताः" इति प्राणानां चोक्त्या भूतादीनां षट्त्वेन चतुष्ट्वायोगात्। अत एव श्रुतौ 'षड्विधा' इत्यु-

प्रकाशः

वैयर्थ्यं द्रढयति—**अपि च त्वत्पक्ष इति**। पादशब्दस्य स्वरूपार्थत्वोपगमादिति भावः। **किं तदिति**। "पादोऽस्य सर्वा भूतानि" इत्यसङ्कुचितसर्वपदेन कृत्स्नतादात्म्यलाभेन भूतपृथिवीशरीरहृदयरूपतदेकदेशचतुष्टयतादात्म्यपरस्य भूतादिसूत्रस्य वैयर्थ्यमेवेत्यर्थः। अभ्युपेत्य मन्त्रब्राह्मणयोः पादाभिधानभेदं दूषणद्वयं अभ्यधायि। वस्तुतस्तु तस्य भेद एव नास्ति, तथात्वे संवादित्वेन मन्त्रोदाहरणायोगात्। तथा च सुस्थं पौनरुक्त्यमित्याशयेन "सैषा षड्विधा चतुष्पदा" इति ब्राह्मणगतस्य "पादोऽस्य" इति मन्त्रगतस्य च पादाभिधानस्य ऐक्यं वक्तुं पीठमारचयति—**किञ्चेत्यादिना तस्मादित्यन्तेन**। **भूतादीति**। भूतपृथिवीशरीरहृदयपरः। कुत इत्यतो वाक्प्राणयोरपि प्रकृतत्वादित्याह—**पूर्वेति**। **षट्त्वेनेति**। वाग्भूतपृथिवीशरीरप्राणहृदयानां क्रमेण प्रकृतत्वादित्यर्थः। ननु

चन्द्रिका

क्रम् । न च वाच्यं भूतादीनां वाक्प्राणरहितानां चतुर्णां पादत्वं, तत्सहितानां तु षण्णां विधात्वमिति, पादशब्देन तदात्मकत्वविवक्षायां वाक्प्राणयोरपि तदात्मकत्वात् विधाषट्कान्तर्गतस्य भूतादिचतुष्टयस्य पृथक्कृत्य पादत्वोक्तेर्निष्फलत्वात् । उपासनार्थं ब्रह्मणि भूतादीनां चरणत्वारोपश्चेत्, गायत्र्याख्यच्छन्दस्येव स स्यादिति गायत्री ब्रह्मेति सिद्धान्तासिद्धिः । तस्मात् "सैषा" इत्यत्र न पूर्ववाक्यस्थानां भूतादीनां पादत्वमुच्यते, किन्तु षड्विध्यमनूद्य चतुष्पदत्वं विधाय तद्विवरणाय "पादोऽस्य" इत्यादिः ऋगुदाहृता । अन्यथा मन्त्रब्राह्मणयोः भिन्नार्थत्वात् ब्राह्मणोक्ते "तदेतदृचाऽभ्युक्तम्" इति मन्त्रसम्मतिर्न स्यात् । "त्रिपादस्यामृतं दिवि पादोऽस्य" इति पादशब्दनिर्दिष्टे चतुष्टये सति तदनिर्दिष्टस्य भूतपृथिव्यादेः पादचतु-

प्रकाशः

न निष्फलत्वं, ब्रह्मणि भूतपृथिवीशरीरहृदयरूपचतुष्टयात्मत्वोपासनाय तदुक्तेरित्यत आह—**उपासनार्थमिति** । 'सः' आरोपः । असदुपासनाया अविशिष्टत्वादिति भावः । कथं तर्हि 'चतुष्पदा' इत्यस्य सङ्गतिरित्यत आह—**तस्मादिति** । अनुवादायोगादित्यर्थः । एतेन "प्रागुक्तषड्विधत्वमनूद्य चतुष्पदत्वं व्यपदिशत" इत्यादिटीका विवृता । **अन्यथेति** । भूतपृथिव्यादेरेव चतुष्पदत्वोक्तावित्यर्थः । न युक्तं च भूतादेः पादचतुष्टयत्वकथनमित्याह—**त्रिपादस्येति** । तदिति । पादशब्दनिर्दिष्टस्येत्यर्थः ।

चन्द्रिका

ष्टयत्वायोगाच्च। 'दिवि' 'दिवः' इति च विरुद्धविभक्तिसहित-द्युप्रातिपदिकार्थसम्बद्धस्यैक्यं, तद्रहितचतुस्सङ्ख्यासम्बद्धानां तु मन्त्रब्राह्मणस्थपादानां भेद इत्यस्यात्यन्तायुक्तत्वाच्च। अस्माकं मते षाड्विध्यं तु "गायत्र्यां संस्थितो विष्णुः" इत्यादिच्छान्दोग्य-

प्रकाशः

दिवीति। द्युस्थस्य दिवः परस्य च द्युप्रातिपदिकार्थसम्बन्धितयैकत्वेन प्रत्यभिज्ञायमानत्वस्योपदेशसूत्रे सिद्धान्तितत्वादिति भावः। ननु भवन्मतेऽपि भूतानां पादत्वेन निर्देशात् कथं षाड्विध्यं, यदि विधान्तर्गतानामपि भूतानां पृथक्कृत्य पादत्वमुच्यते, सममेतन्ममापीत्यत आह—**अस्माकमिति**।

गायत्र्यां संस्थितो विष्णुः स्त्रीरूपः सूर्यसप्रभः।
द्वितीयश्चैव मत्स्यादिर्भूतनामाऽवतारगः।
तृतीयो वाचि संस्थः स स्त्रीरूपो हयशीर्षकः।
चतुर्थः पृथिवीसंस्थः स्त्रीरूपः पीतवर्णकः।
जीवस्यान्तर्गतो व्याप्यः शरीरमितिनामकः।
पञ्चमस्तद्धृदिस्थस्तु षष्ठो हृदयनामकः।
गायत्रीनामको विष्णुरेवं षड्विध उच्यते।

इत्यादिभाष्यात् "पादोऽस्य सर्वा भूतानि" इति भूतशब्दितजीवानां चतुष्पादान्तर्भावेऽपि "भूतं यदिदं किञ्च" इति षड्विधान्तर्भूतं मत्स्याद्यवताररूपमेवेति ज्ञेयमित्यर्थः।

चन्द्रिका

भाष्यात् ज्ञेयम् । तस्मान्मान्त्रवर्णिकादन्यस्य पादाभिधानस्य अभावात्तस्य च 'चरणाभिधानात्' इत्यनेनैवोक्तत्वात् परमते भूतादिसूत्रवैयर्थ्यम् । अस्माकं पक्षे 'भूतादि' इत्यादिशब्दस्तु "अमृतं दिवि" इत्युक्तामृताख्यस्वरूपपरः । नचात्र पादमुद्दिश्य विश्वभूतविधिः, येन पादैकत्वमुद्देश्यविशेषणत्वात् "ग्रहं सम्मार्ष्टि" इत्यत्र ग्रहगतैकत्ववदविवक्षितमिति चतुष्पदत्वं न सिद्ध्येत्, किन्तु

प्रकाशः

'किञ्च चतुष्पदा' इत्यादिनोक्तमुपसंहरति--**तस्मादिति** । ननु परमते '' भूतादि ' इत्यादिपदेन पृथिवीशरीरहृदयानां ग्रहणेन तस्य सार्थक्यं, भवन्मते : तु 'भूतपादव्यपदेशात्' इत्येतावता "पादोऽस्य" इत्युक्तभूतपादत्वग्रहसम्भवादादिपदं व्यर्थमित्यत आह--**अस्माकमिति** । स्यादेवं, यदि भूतपादत्वमेवात्र विवक्षितं स्यात्, न चैवं, किन्तु भूतशब्दितविश्वपादत्वमिवामृतशब्दितनारायणवासुदेववैकुण्ठाख्यस्वरूपत्रयपादत्वमपि विवक्षित्वा 'चतुष्पदा' इत्युक्तचतुष्पदत्वस्य वक्तव्यत्वात्, 'भूतं' विश्वमादिर्यस्य रूपत्रयस्य तद्भूतादि, भूतं स्वरूपत्रयं चेति यावत्, तत्पाद इति व्यपदेशोपपत्तेरित्यर्थसम्भवान्न वैयर्थ्यमित्यर्थः । ननु मन्त्रे भूतानां बहुत्वेन पादबहुत्वापत्त्या भूतानामेकपादत्वं रूपत्रयस्य त्रिपादत्वमित्यस्य असिद्धिरित्यत आह--**न चात्रेति** । **ग्रहं सम्मार्ष्टीत्यत्रेति** । तृतीयेऽध्याये "एकत्वयुक्तमेकस्य श्रुतिसंयोगात्"

चन्द्रिका

विश्वभूतोद्देशेन पादविधिः, पादानामेव जिज्ञासितत्वात् । अत एव टीकायां "सर्वाणि भूतान्यस्यैकः पादः" इति पादाविधानं दर्शितम् । तथा च "पशुना यजेत" इत्यत्र पश्वेकत्ववद्विधेयगत-

प्रकाशः

इत्याद्यपादीयसप्तमाधिकरणे "ग्रहं संमार्ष्टि" इत्युदाहृत्य किमेकस्य संमार्गः किं वा सर्वेषामिति सन्देहे, उपादेयगताया इवोद्देश्यगताया अपि सङ्ख्यायाः श्रुतिबलेन विवक्षितत्वादेकस्यैवेति पूर्वपक्षयित्वा, किमेकत्वस्योद्देश्यत्वेन विवक्षोत विधेयत्वेन, आद्ये 'ग्रहं संमार्ष्टि' 'एकं च संमार्ष्टि' इति प्रत्युद्देश्यं वाक्यपरिसमाप्तेर्वाक्यभेदात्, द्वितीयेऽपि संमार्गस्यापि विधेयत्वात्, 'ग्रहं संमृज्यात्, स च एकः' इति वाक्यभेदात्संमार्गक्रियाकर्मत्वस्यैकत्वस्य च प्रत्ययार्थतया युगपत्सम्बन्धेनोद्देश्यविशेषणत्वात्, शेषविभक्तिनिर्दिष्टत्वेन विधेयसंमार्गविशेषणत्वाभावेनैकत्वस्य विवक्षाऽयोगात् "ग्रहैर्यजेत" इत्युक्तानां सर्वेषां संमार्ग इति सिद्धान्तितम् । तत्र यथा ग्रहैकत्वमविवक्षितं, न तथा प्रकृत इत्यर्थः । **पादानामिति** । "सैषा चतुष्पदा" इत्युक्त्वा के चत्वारः पादा इति जिज्ञासोत्पादात्, तन्निवृत्तये मन्त्रोदाहरणात्, "ब्रह्मविदाप्नोति परं" इत्यत्र किंतद्ब्रह्म, कीदृशं च तद्वेदनं, का च तत्प्राप्तिरिति जिज्ञासानिवृत्त्यर्थं "तदेषाऽभ्युक्ता" इति मन्त्रोदाहरणवदिति भावः । **पशुनेति** । चतुर्थे "तत्रैकत्वमयज्ञाङ्गमर्थस्य

चन्द्रिका

त्वात् पादैकत्वं विवक्षितम् । यथा च "पौर्णमास्यां पौर्णमास्या यजेत" इत्यादौ सप्तम्यन्तः पौर्णमास्यादिशब्दः काले मुख्यः,

प्रकाशः

गुणभूतत्वात्" इत्याद्यपादीयपञ्चमाधिकरणे "पशुना यजेत" इत्युदाहृत्य किमेकत्वमयज्ञाङ्गमविवक्षितं, किं वा यज्ञाङ्गं विवक्षितमिति सन्दिह्य, समानपदश्रुत्या पश्वङ्गत्वावगमाद्वाक्यलभ्यपदान्तरोपात्तयागाङ्गत्वायोगात्, अयज्ञाङ्गमेकत्वमविवक्षितमिति पूर्वपक्षयित्वा, एकप्रत्ययोपात्तेन प्रातिपदिकार्थादपि सन्निहितेन प्रधान-भूतेन कारकेणावरुद्धमेकत्वं प्रातिपदिकार्थं पशुमनादृत्य क्रियाङ्गमवगम्यमानं वाक्यसमर्पितेन क्रियाविशेषेण सम्बद्धं पश्चादरुणैकहायनीन्यायेन पशुना विशेषणत्वेनार्थात्सम्बध्यते । तादर्थ्यं तु यज्ञं प्रत्येवेति विवक्षितमेकत्वमिति सिद्धान्तितम् । अत्र यथा पशोर्विधेयत्वेन तद्गतमेकत्वं विवक्षितं, तथा पादैकत्वमपीत्यर्थः । नन्वथापि भूतभिन्ने विष्णौ भूतशब्दितविश्वात्मकत्वायोगेन भूतपादत्वायोगः । न च वाच्यं 'चैत्रस्य चतुर्भागबलो मैत्रः' इतिवत् भिन्नमेव विश्वं तत्पादपरिमितसामर्थ्यातिशयेन पादतयोच्यते, न तु मुख्यस्वरूपाभिप्रायेणेति । सूत्रे सकृच्छ्रुतस्य श्रुतौ चैकत्र श्रुतस्य पादशब्दस्य भूतेष्वमुख्यता, अमृताख्यस्वरूपत्रये च मुख्यतेत्यस्यादृष्टचरत्वादित्यत आह—**यथा** **चेति** । एकादशे "इष्टिराजसूयचातुर्मास्येष्वैककर्म्यादङ्गानां तन्त्रभावस्स्यात्" इति

चन्द्रिका

तृतीयान्तस्तु तत्सम्बन्धिनि कर्मण्यमुख्यः, तथा 'त्रिपात्' इत्यत्र पादशब्दः स्वरूपांशे मुख्यः, "पादोऽस्य" इत्यत्र भिन्नांशे त्व-

प्रकाशः

द्वितीयपादीयद्वितीयाधिकरणे दर्शपूर्णमासयोर्विभज्य पर्वद्वये प्रयुज्यमानयोः किमङ्गानि तन्त्रमुत आवर्तेरन्निति संदिह्यैकफलत्वात् षण्णामपि यागानां एकोपक्रमावसानत्वावगमात् सकृदनुष्ठितान्यङ्गानि सर्वेषामुपकुर्वन्तीति पूर्वपक्षयित्वा, षण्णामेकफलत्वेन प्रयोगैक्यावगमेऽपि, वाचनिककालभेदेन प्रयोगभेदो भवति। "पौर्णमास्यां पौर्णमास्या यजेत" "अमावास्यायाममावास्यया यजेत" इति वचनाभ्यां हि पौर्णमास्यमावास्याकरणकः फलार्थो व्यापारः प्रत्ययवाच्यः। तदङ्गत्वेन पौर्णमावास्यमावास्याकालौ विधीयेते। तेनाङ्गानामपि तत्र तत्करणफलक्रियान्तर्गतानां तत्कालता विहिता भवति। अतः प्रतित्रिकमङ्गान्यावर्तेरन्निति सिद्धान्तितम्। अत्रत्यन्यायेन यथा सप्तम्यन्तः पौर्णमास्यादिशब्दः काले मुख्यः, तृतीयान्तस्तु तत्सम्बन्धिनि गौणः, तथा प्रकृतेऽपीत्यर्थः। एवं "प्रथमयोः" इत्यत्र प्रथमाशब्देन प्रथमाद्वितीययोरिव सूत्रे पादशब्देन मुख्यामुख्ययोर्ग्रह इति ज्ञेयम्॥ एवमाद्यतृतीयसूत्रार्थौ मतद्वयाभिमतौ दूषितौ। यत्तु "चेतोऽर्पणनिगदात्" इति द्वितीयस्य परकीयं व्याख्यानं—गायत्र्यभिष्ठाने ब्रह्मणि च्छन्दोद्वारा चित्तसमाधानाय "गायत्री वा इदं सर्वं" इति ब्राह्मणवाक्येन

चन्द्रिका

मुख्य इति न कश्चिद्दोषः । यच्च "उभयस्मिन्नप्यविरोधात्" इत्यस्य परकीयं व्याख्यानम्—यथा वृक्षाग्रसम्बद्धोऽपि श्येनः 'वृक्षाग्रे श्येनः, वृक्षाग्रात् परतः श्येनः' इति च व्यपदिश्यते, तथा दिव्येव सत् ब्रह्म 'दिवः परं' इत्यप्युच्यते । यथा वा वृक्षाग्रेणासम्बद्धोऽपि श्येनः 'वृक्षाग्रात्परत्र श्येनः, वृक्षाग्रे श्येनः' इति च उच्यते, एवं दिवः परमपि ब्रह्म 'दिवि' इत्यप्युच्यत इति, तदपि न, यस्य वृक्षाग्रस्य यं प्रति मुख्यमाधारत्वं अवधित्वं वा, तस्यैव तं प्रत्येव मुख्यस्यावधित्वस्याऽऽधारत्वस्य वा विवक्षायां 'वृक्षाग्रात्परत्र श्येनः' इत्यादिप्रयोगाभावेन दृष्टान्तासिद्धेः ॥

प्रकाशः

सर्वात्मकत्वं निगद्यत इति, तत्तु तत्र तत्र ब्रह्मण आरोपाधिष्ठानत्वादिनिरासन्यायेन निरस्तम् । यदपि "तथा हि दर्शनं" इत्यस्योभयोर्व्याख्यानं—अन्यत्रापीत्थं दर्शन मिति, तन्न, अस्मद्रीत्या विषयवाक्यगतहेतूक्तिपरत्वसम्भवे अन्यथा व्याख्यानायोगादित्यादिदूषणं स्पष्टं मत्वा, चतुर्थसूत्रव्याख्यानं परमते तावदनूद्य निरस्यति—**यच्चेति** । दिविष्ठत्वमुपेत्य तत्परत्वमुपपाद्येदानीं तत्परत्वमुपेत्य तत्स्थत्वमुपपादयति—**यथा वेति** । सप्तमीपञ्चम्यर्थयोराधारत्वावधित्वयोर्द्वयोरपि मुख्यत्वायोगादेकस्य मुख्यत्वेऽन्यस्यामुख्यत्वात्, श्रुतौ च मुख्यार्थस्यैव ग्राह्यत्वात् वैषम्येण दृष्टान्तायोग इति भावेन यथाश्रुतभाष्यं निरस्यति—**तदपि नेति** ।

चन्द्रिका

अत्र भामत्यामुक्तम्—यदाऽऽधारत्वं मुख्यं, तदा 'वृक्षाग्रात्' इत्यत्र श्येनशब्दो वृक्षाग्रलग्नश्येनावयवादुपरितनश्येनावयवावच्छिन्नश्येनावयविलक्षकः। अग्रशब्दो वा अग्रादर्वाग्भागलक्षकः। यदा त्ववधित्वं मुख्यं, तदा 'अग्रे' इत्यत्र सप्तमी सामीप्यं लक्षयति। एवं दार्ष्टान्तिकेऽपि ज्योतिश्शब्दो वा 'दिवः' इत्यत्र द्युप्रातिपदिकं वा 'दिवि' इत्यत्र सप्तमी वा लाक्षणिकीति, तन्न, ज्योतिषो ब्रह्मणो निरवयवत्वात्। लक्षणादिप्रसङ्गात्।

प्रकाशः

भाष्याभिप्रायविवरणमनूद्य निरस्यति—**अत्रेति**। **यदेति**। वृक्षाग्रसम्बन्धदशायामित्यर्थः। **उपरितनेति**। तद्भागस्याग्रासम्बद्धत्वादिति भावः। **अग्रशब्दो वेति**। अग्रावाग्भागे श्येनसम्बन्धाभावेन 'अग्रात्परतः' इत्यस्य अग्रावाग्भागात् परत इत्यर्थ इति भावः। **यदा त्विति**। असम्बन्धेनाग्रोपरि सञ्चरणदशायामित्यर्थः। **ज्योतिश्शब्द इति**। द्युसम्बन्धिज्योतिरवयवादुपरितनावयवावच्छिन्नावयविलक्षक इत्यर्थः। **द्युप्रातिपदिकं वेति**। बाह्यद्युभागातिरिक्तशारीरहार्दद्युभागस्य लक्षकमित्यर्थः। एवञ्च हार्दद्युभागस्थस्य ब्रह्मणो बाह्यद्युभागात् परतोऽवस्थानमुपपन्नमिति भावः। दिविष्ठत्वं मुख्यमुपेत्य लक्षकत्वमुक्तं, दिवः परत्वस्य मुख्यत्वपक्षे त्वाह—**दिवीति**। सामीप्यं लक्षयतीत्यर्थः। ज्योतिश्शब्दस्य लक्षकत्वे दोषमाह—**ज्योतिष इति**। पक्षत्रयसाधारणदोषमाह—**लक्षणेति**।

चन्द्रिका

"पृथिव्यां द्यौर्महामेरुः" इत्यादिस्मृतिविरोधाच्च ।

केचित्तु—सप्तमी अन्तर्बहिरधरोर्ध्वभागस्थितिसाधारणी, प्रासादस्यान्तरधरभागस्थिते इव बहिरूर्ध्वभागस्थितेऽपि वस्तुनि 'प्रासादे वर्तते' इति प्रयोगात् । पञ्चमी तूपरिस्थित्यसाधारणी । अत उभाभ्यां स्थानविशेषात् उपरिस्थितिरेव विवक्षितेत्युभे अपि मुख्यार्थे एवेत्याहुः । तन्न, उभयत्रापि द्युशब्दस्यैकार्थत्वे द्वयोरपि मुख्यार्थत्वायोगात् । सप्तमी ह्याधारत्वे । परन्तु तदाधारत्वमधरान्तर्भागाभ्यामिवोर्ध्वबहिर्भागाभ्यामप्यवच्छिद्यते, न त्ववयविनोऽवधित्वे सप्तमी ।

प्रकाशः

भङ्ग्यन्तराभावादेवमाश्रीयत इत्यत आह—**पृथिव्यामिति** ।

पृथिव्यां द्यौर्महामेरुराकाशे सूर्यमण्डलम् ।
दिवीन्द्रसदनं चैव तत्परे तु दिवः परे ॥

इति च्छान्दोग्यभाष्योदाहृतस्मृत्या द्युशब्दार्थस्याक्षादिशब्दार्थवदनेकत्वेनाधारत्वावधित्वयोर्मुख्ययोरेव सम्भवादिति भावः । उक्तदोषाप्रसङ्गान्मतान्तरं पृथगनूद्य निरस्यति—**केचित्त्विति** । तदेव दर्शयति—**प्रासादस्येति** । अन्तर्भागे अधरभागे स्थिते इत्यर्थः । बहिरूर्ध्वभागयोः स्थितेऽपीति ध्येयम् । किमतो यद्येवमित्यतोऽसाधारणपञ्चम्यनुसारेण साधारणसप्तमी नेया, ततश्च द्वयोर्मुख्यार्थलाभ इत्याह—**अत इति** । उक्तमेव विवेचयति—**सप्तमीति** । **अवयविन इति** । अन्तर्बहिराद्यवयवविशिष्टस्येत्यर्थः । सप्तम्या अ-

चन्द्रिका

नहि वृक्षात् परतो भ्रमन् श्येनो 'वृक्षेऽस्ति' इत्युच्यते। पञ्चमी त्ववधित्वे एव, न त्वाधारत्वे। न ह्यूर्ध्वभागावच्छिन्नेऽपि वृक्षे वसन् 'वृक्षात् परतः' इत्युच्यते, किन्तु 'वृक्षस्योर्ध्वभागे' इति।

प्रकाशः

मुख्यार्थत्वं प्रदर्श्य, पञ्चम्यास्तद्दर्शयति—पञ्चमीति। 'उच्यते' मुख्यवृत्त्या कथ्यत इत्यर्थः। एतेन—यत्केनचित्प्रलपितं, "यदतः परो दिवः" इति वाक्ये ज्योतिश्शिवः तदन्यो वेति सन्देहे, द्युशब्दस्याऽऽकाशवाचित्वात्तस्य च देहबाह्यभूताकाशरूपस्य वाऽन्तरिक्षलोकरूपस्य वा विवक्षितत्वेन तत ऊर्ध्ववर्ती सूर्यो वा "अन्तः पुरुषे ज्योतिः" इति पुरुषान्तर्वर्तितया जाठराग्निर्वेति प्राप्ते, "पादोऽस्य सर्वा भूतानि" इति सर्वभूतपादाभिधानात्, तस्य च परिच्छिन्नगायत्र्यामयोगाच्छिव एवेति सिद्धान्त इति। उपदेशभेदादेर्भामत्युक्त एव परिहारः। तदुक्तं—

ज्योतिः पूषा दिवोऽभ्राद्भवति हि परतो जाठरैक्योपदेशा-
द्वह्निर्वा तन्न शम्भुश्चरणकथनतः तत्र हेतोरसिद्धेः।

इत्यादि, तन्निरस्तं, उदाहरणायोगस्य चरणपदायोगस्य चोक्तत्वात्। उपदेशभेदादिपरिहारस्य भामतीमतोक्तदोषेणैव दुष्टत्वात्। "पौनरुक्त्यं परमते" इत्यादिदोषसाम्याच्च। वागादेरपि प्रकृतत्वेन भूतादिचतुष्पात्त्वायोगास्योक्तत्वाच्च॥ यदत्रोक्तं शिवार्कमणिदीपिकायां—"नद्यां घोषः" इत्युक्त्यनन्तरं गम्भीरायामिति

प्रकाशः

विशेषणे तादृशनदीसम्बन्धित्वेन नदीशब्दस्तीरपरः। एवं "गायत्री वा इदं सर्वं भूतं" इत्युक्त्यनन्तरं "वाग्वै गायत्री" इति विशेषणे वाग्रूपगायत्र्यात्मकत्वं भूतस्य लभ्यत इति न तस्याः पार्थक्यमिति, तन्न, एवमपि प्राणेन सह पञ्चपादत्वानिरासात्। किञ्चैवं सति षाड्विध्यानुपपत्तिः, वाक्त्वस्य गायत्रीविशेषणत्वात्। यदत्रोक्तं—पृथिव्यां सर्वभूतप्रतिष्ठात्वं सर्वभूतानतिवर्तनीयत्वमिति द्वे विधे, शरीरहृदययोर्ये प्राणप्रतिष्ठात्वतदनतिवर्तनीयत्वे, तयोराश्रयभेदेन चतुष्ट्वेन षाड्विध्योपपत्तिरित्यादि, तदपि न, भूतादिरूपेण षाड्विध्यसम्भवे क्लेशायोगात्। एकस्यैव धर्मस्य धर्मिभेदेन विधान्तरत्वे अतिप्रसङ्गाच्च। "गायत्र्यां संस्थितो विष्णुः" इत्यादिस्मृतिविरोधाच्च। किञ्च

नारायणपरो ज्योतिरात्मा नारायणः परः।

"विष्णुरेव ज्योतिः विष्णुरेव ब्रह्म" "अहमग्निरहं हुतम्" इत्यादिश्रुतिस्मृतिविरोधाच्च।

यदिदं परितः पूर्णं मत्स्यकूर्मादिरूपकम्।

इत्यादिच्छान्दोग्यभाष्योदाहृतैतद्व्याख्यानरूपस्मृतिविरोधाच्च। पुरुषसूक्तगतमन्त्रोदाहरणविरोधाच्च। यदपि—पुरुषसूक्तस्य शिवपरत्वकल्पनं, तदपि न, "यज्ञो वै विष्णुः" इत्यादिश्रुतिसिद्धयज्ञनामविरोधात्। लक्ष्मीपतित्वलिङ्गविरोधात्। चन्द्रिकोक्तदिशा विष्णवे-

चन्द्रिका

तस्मात् "त्रिसप्तलोकापेक्षया" इति भाष्योक्त एव परिहारः साधुः। भाष्ये ह्येवमभिप्रेतम्—यदा भूर्भुवस्स्वरिति लोकत्रयविवक्षा, तदा लक्षयोजनोच्छ्रितान्तरिक्षलोकादुपरितनस्य सर्वस्यापि द्युत्वात् श्वेत-

प्रकाशः

कानिष्ठपुरुषश्रुतिविरोधात्। "तस्माद्विराडजायत" इत्युक्तचतुर्मुखजनकत्वलिङ्गस्य विष्णावेव प्रसिद्ध्या तद्विरोधाच्च।

तस्मिन् काले महाराजा राम एवाभिधीयते।
यथा हि पौरुषे सूक्ते विष्णुरेवाभिधीयते।

इति स्कान्दवचनविरोधाच्चेति।

सुदर्शनाख्यं स्वास्त्रं तु प्रायुङ्क्त दयितं त्रिपात्।

इति भागवतविरोधाच्च। कथं तर्ह्युपदेशभेदपरिहार इत्यत आह—**तस्मादिति**। भाष्येऽस्पष्टत्वात्

लोकत्रयविवक्षायां परतो लक्षयोजनात्।
सर्वं द्यौरिति विज्ञेयं ततस्ते दिवि संस्थिताः।
दिवः परश्च भगवान् सप्तलोकविवक्षया।

इति च्छान्दोग्यभाष्यानुरोधेन टीकोक्तमाशयं प्रतीतानुपपत्तिनिरासेन विशदयति—**भाष्य इति**। अधस्तनानामतलादीनामुपरितनानां महरादीनां भूस्वर्गग्रहणेन गृहीतत्वादिति भावः।

स्वरूपपादा विष्णोस्तु त्रयो हि दिवि संस्थिताः।
नारायणो वासुदेवो वैकुण्ठ इति ते त्रयः॥

चन्द्रिका

द्वीपानन्तासनवैकुण्ठानां चान्तरिक्षादुपरितनत्वात् तत्रत्यं नारायणवासुदेववैकुण्ठाख्यं त्रिपात्संज्ञं रूपत्रयं 'दिवि' इत्युच्यते । न च—

पृथिवीस्थेषु सर्वोच्चो लोकोऽनन्तासनात्मकः ।

इत्युक्तत्वादनन्तासनस्य नान्तरिक्षादुपरितनतेति शङ्क्यं, तस्य पृथिवीस्थत्वेपि बहुलक्षयोजनोच्छ्रितत्वेन एकलक्षयोजनोच्छ्रितान्तरिक्षादुपरितनत्वोपपत्तेः । सर्वपृथिवीस्थोच्चत्वोक्त्या तु नान्ययोगो व्यावर्तते, किं त्वयोगः । यदा तु भूर्भुवस्स्वर्महर्जनस्तपस्सत्यमिति सप्तलोक-

प्रकाशः

इति स्मृत्यनुरोधेनाह—**नारायणेति** । टीकादावन्तरिक्षस्य लक्षयोजनत्वविशेषणोक्तेः कृत्यं वक्तुं चोदयति—**न चेति** । सर्वेषु लोकेषूच्चः सर्वोच्चः, सर्वेषु केष्वित्यतः, 'पृथिवीस्थेषु' इति योजना ।

बहुलक्षोच्छ्रिते नित्ये विमाने संस्थितं यतः ।

इति तद्भाष्योक्तस्मृत्यनुसारेणाह—**बह्विति** । उक्तं च द्वितीयस्कन्धतात्पर्ये पष्ठे—

अनन्तासनवैकुण्ठनारायणपुराणि तु ।
बहुलक्षोच्छ्रितेष्वेषु स वसत्यमृतो हरिः ॥

इति । ननु पृथिवीस्थोच्चत्वोक्त्या नान्योच्चत्वं लभ्यते, अतः किमेवमित्यत आह—**सर्वेति** । 'अन्ययोगः' अन्योच्चत्वयोगः । **अयोग इति** । पृथिवीस्थेषु सर्वेषूच्च एवेत्ययोग इत्यर्थः । पक्षान्तरं विशदयति—**यदेति** । अधस्तनानां अतलवितलसुतलतलातलमहातल-

चन्द्रिका

विवक्षा, तदा इन्द्रसदनस्य द्युत्वात्तत्परस्य वैकुण्ठस्य दिवः परत्वं,

पृथिव्यां द्यौर्महामेरुराकाशे सूर्यमण्डलम् ।

दिवीन्द्रसदनं चैव तत्परे तु दिवः परे ॥

इति स्मृतेर्मेरोरपि द्युत्वात्तत्परस्यानन्तासनस्यापि दिवः परता, सूर्यमण्डलस्यापि द्युत्वात् तत्परस्य श्वेतद्वीपस्यापि दिवः परत्वम् । अत्र यद्यपि लोकत्रयविवक्षायामप्यनन्तासनादीनां मेर्वादिपरत्वेन दिवः परत्वसिद्धिः, स्वर्गलोकात्परत्वं अनन्तासनश्वेतद्वीपयोर्नास्ति,

यावानुच्चस्स्वर्गलोकस्तावानुच्चतया स च ।

श्वेतद्वीपो दिविष्ठोऽतः .... ॥

प्रकाशः

रसातलपातालानां भूग्रहणेन ग्रहणादिति भावः । सप्तलोकविवक्षामाक्षिप्य समाधत्ते—**अत्रेति** । **अनन्तेति** । अनन्तासनश्वेतद्वीपवैकुण्ठानां मेरुसूर्यमण्डलेन्द्रसदनेभ्यः परत्वेनेत्यर्थः । ननु त्रयाणां द्युत्वेन प्रसिद्धस्वर्गाद्युच्चत्वसिद्ध्यै सप्तलोकविवक्षाऽस्तु, त्रित्वविवक्षायां स्वरादेरन्तरिक्षादुपरितनस्य सर्वस्य द्युत्वेन स्वर्गात्परत्वासिद्धेरित्यतो वैकुण्ठस्य तत्सम्भवेऽपि नान्ययोस्तद्युज्यत इत्याह—**स्वर्गेति** । या तु द्वितीयस्कन्धतात्पर्ये षष्ठे—

अनन्तासनवैकुण्ठनारायणपुराणि तु ।

त्रीणि धामानि वै विष्णोस्त्रिलोकाद्बहिरेव हि ॥

इति बाह्यत्वोक्तिः, सा वैकुण्ठाशया, अलौकिकत्वाशया वा, स्वर्ग-

चन्द्रिका

इत्यादेः। तथाऽपि वैकुण्ठस्य सर्वद्युपरत्वसिद्धये सप्तलोकविवक्षोक्तिः। तदुक्तम्—

द्व्यात्मकेभ्यश्च सर्वेभ्यो वैकुण्ठश्चोर्ध्व उच्यते।

इति। एवं च यथा 'चैत्रो ग्रामेऽस्ति' इत्युक्त्वा 'स ग्रामाद्बहिः' इत्युक्ते आद्ये प्रयोगे ग्रामशब्दः अरण्यादिसहिते वर्तते, द्वितीये तु वाटपरिक्षेपे। तदुक्तं महाभाष्ये— ग्रामशब्दोऽयं बह्वर्थः। अस्ति वाटपरिक्षेपे वर्तते, तद्यथा 'ग्रामं प्रविष्टः' इति। अस्ति सारण्यके

प्रकाशः

लोकस्येन्द्रसदनादर्वाग्भागविवक्षाशया वा। वस्तुतस्तु—

भुवः स्वर्गश्च कोट्यैव योजनानां प्रविस्तृतौ।

इत्युक्तान्तरिक्षस्वर्गलोकयोः कोटियोजनविस्तीर्णत्वेन ततो बाह्यप्रदेशस्थितत्वात् श्वेतद्वीपादेः, तथा भूम्या अनेककोटिविस्तीर्णत्वेन क्षीरसमुद्रादिस्थश्वेतद्वीपादेर्भूलोकस्थत्वेऽपि तमतिक्रम्यानेकलक्षयोजनोच्छ्रितत्वेन ततोऽपि बाह्यत्वमिति त्रैलोक्याद्बाह्यत्वं ध्येयम्, न तु स्वर्गादप्युच्चत्वेनेति न विरोधः। यद्वा—"सर्वतः पृष्ठेषु" इत्यादाविवानन्तासनश्वेतद्वीपवैकुण्ठानां क्रमात् भूर्भुवःसुवर्लोकेभ्यः उच्चत्वेन त्रिलोकाद्बाह्यत्वमित्यविरोधः। नन्वेवं द्युशब्दस्यानेकार्थत्वेऽप्येकस्मिन्नेव प्रकरणे नानार्थत्वं न दृष्टचरमित्यत आह—**एवञ्चेति। तदुक्तमिति।** आद्यपादे "हलोऽनन्तरास्संयोगः" इति सूत्रे। 'वाटपरिक्षेपे वर्तते यश्शब्दस्सोऽस्ति' इत्यादियोजना। ननु निरर्थकपदप्रयोगा-

चन्द्रिका

ससीमके सस्थण्डिलके वर्तते, तद्यथा 'ग्रामो लब्धः' इतीति। तथा प्रकृतेऽपि द्युशब्दोऽनेकार्थः। अनेकार्थत्वं च अक्षादिशब्दवत् वृद्धव्यवहारादिना सर्वत्र मुख्यत्वेन वा, एकत्र मुख्यत्वेऽप्यन्यत्र अमुख्यत्वेन वेति। 'अन्याय्यं चानेकार्थत्वं' इति न्यायस्य नायं विषयः। सर्वतःपृष्ठत्वं च अनन्तासनादीनां यथासम्भवं पृथिव्यादिलोकोच्चत्वं, विश्वतःपृष्ठत्वं च मेरुवैजयन्तसत्यलोकरूपचतुर्मुखस्थानादुच्चत्वमिति टीकायामेवोक्तम्। इदं च—

पृथिव्यां ब्रह्मणो मेरुर्जयन्तं त्वन्तरिक्षगम्।
तृतीयं सत्यलोके च सदनं त्रिविधं स्मृतम्॥
तेभ्योऽनन्तासनाद्या यत् परतो विश्वतः परे।

प्रकाशः

योगादेकार्थत्वे वक्तव्ये अर्थान्तरकल्पनमन्याय्यमित्यत आह—**अनेकार्थत्वं चेति**। **नायमिति**। यत्रानेकार्थत्वे न मानं, तत्रैवायं न्यायः। अत्र तु पौराणिकप्रसिद्धेः सत्त्वान्नैवमित्यर्थः। अत एवोक्तं सुधायां वैशेषिकाधिकरणे—"यत्र ह्येकस्मिन्नर्थे व्यवस्थिते वृथैवार्थान्तराङ्गीकारः, तत्रैवानेकार्थत्वमन्याय्यम्" इति। तर्हि "सर्वतः पृष्ठेषु विश्वतः पृष्ठेषु" इत्यस्य पौनरुक्त्यमित्यतोऽर्थभेदं टीकोक्तं विशदयति—**सर्वत इति**। **यथासम्भवमिति**। पृथिवीलोकादुच्चत्वमनन्तासनस्य, अन्तरिक्षादुच्चत्वं श्वेतद्वीपस्य, स्वर्गादुच्चत्वं वैकुण्ठस्येत्यर्थः। **चतुर्मुखस्थानादिति**। क्रमेणानन्तासनादीनामिति भावः।

चन्द्रिका

इत्यादिवाक्यादवगन्तव्यम् । अत्र यद्यपि वैकुण्ठस्य स्वर्गलोकात्परत्वेनैव दिवःपरत्वसिद्धिः, तथाऽपि तस्य "सर्वतः पृष्ठेषु" इत्यनेनैवोक्तत्वात् "दिवः परः" इत्यस्य वैयर्थ्यं माभूत् इतीन्द्रसदनस्य द्युत्वोक्तिः । यद्वा चित्प्रकृत्यात्मकत्वेन द्योतमाने स्थानत्रये सप्तम्यन्तो द्युशब्दो यौगिकः, पञ्चम्यन्तस्तु स्वर्गादौ रूढ इत्यविरोधः । अयं च सूत्राविरोधशब्दार्थ इति द्रष्टव्यम् । अयं च परिहारः,—

बहुलक्षोच्छ्रिते नित्यं विमाने संस्थितं यतः ।

प्रकाशः

अनेन पृष्ठशब्दस्योच्चत्वं अर्थ इत्युक्तं भवति । **इत्यादिवाक्यादिति** । आदिपदेन

पृथिवीस्थेषु सर्वोच्चो लोकोऽनन्तासनात्मकः ।
अन्तरिक्षात्मकेभ्यश्च श्वेतद्वीपे स्थितो हरिः ॥
द्व्यात्मकेभ्यश्च सर्वेभ्यो वैकुण्ठश्चोच्च उच्यते ।

इत्यस्य ग्रहणम् । टीकोक्तं वैकुण्ठस्येन्द्रसदनात्परत्वमाक्षिप्य समाधत्ते—**अत्रेति** । एकस्य शब्दस्याक्षादिशब्दवदनेकत्र रूढ्यङ्गीकारे हि नानार्थत्वं, एकस्य रूढस्यैव योगवृत्त्याऽर्थान्तरस्वीकारे नानेकार्थत्वमतः 'अन्याय्यं चानेकार्थत्वं' इत्यस्य नायं विषय इति भावेन पक्षान्तरमाह—**यद्वेति** । यद्वा छान्दोग्यभाष्योक्तमन्यदपि सूत्रारूढं कर्तुमाह—**यद्वेति** । **अविरोध इति** । योगरूढिभ्यां द्युशब्दस्य भिन्नार्थत्वेन द्युस्थत्वदिवःपरत्वविरोधो नेत्यर्थः । त्रिपा-

चन्द्रिका

चित्प्रकृत्यात्मनि ततो दिवीति कथितं श्रुतौ ॥

इति च्छान्दोग्यभाष्ये सूचितः । यच्चोक्तं परैः—जागरिते हि जीवस्य शरीरबाह्याकाशः स्थानं, स्वप्ने तु तन्मध्याकाशः, सुप्तौ तु हृदयाकाशः। तथा चावस्थात्रयविशिष्टो जीवः त्रिपात्, उक्तत्रिविधाकाशं च द्युशब्दार्थ इति, तन्न, जाग्रदाद्यवस्थावतो विश्वादिशब्दवाच्यस्य

दक्षिणाक्षिमुखे विश्वो मनस्यन्तस्तु तैजसः ।

इत्यादिश्रुत्या स्थानान्तरोक्तेः । जागरादौ जीवस्य बाह्यादिपदार्थभोगेऽपि "हृदि ह्येष आत्मा" इति श्रुत्या हृदयस्थस्य जीवस्य

प्रकाशः

च्छब्देन नारायणादिरूपत्रयमिति भाष्यादौ व्याख्यातम् । तत्र परोक्तमनूद्य निरस्यति—यच्चेति । विश्वादेर्जाग्रदाद्यवस्थावज्जीवत्वं पररीत्योपेत्य प्रकृतप्रमेयं दूषयति—जाग्रदिति । 'श्रुत्या' माण्डूकश्रुत्या । **हृदि हीति** । द्वितीये "अवस्थितिवैशेष्यादितिचेन्नाभ्युपगमाद्धृदि हि" इति सूत्रोपात्तषट्प्रश्नश्रुत्येत्यर्थः । यत्तु तृतीये "मुग्धेऽर्धसम्पत्तिः परिशेषात्" इत्यत्र भाष्ये—

हृदयस्थात्पराज्जीवो दूरस्थो जाग्रदेष्यति ।

समीपस्थस्तथा स्वप्नं ………………… ॥

इत्यादिस्मृत्या जीवस्य हृदयादन्यत्राक्ष्यादौ स्थितिकथनं, तत्तु सन्निधिविशेषाभिप्रायम् । यथोक्तमैतरेयभाष्ये द्वितीयेऽध्याये—"हृदि स्थितमेव हि तस्य स्वरूपं जागरितेऽप्यक्ष्यादिषु विशेषसन्निहितं भवति दी-

चन्द्रिका

बाह्याकाशादिस्थानत्वे मानाभावाच्च। जीवे अमृतत्वस्य असम्भवाच्च। 'दिवि' 'दिवः' इति वाक्ययोरैकार्थ्यस्य संमतत्वेन 'दिवः' इति वाक्योक्तस्य ज्योतिषोऽपि जीवत्वापत्त्या ब्रह्मत्वसिद्धान्तहानेश्च। "त्रिपादूर्ध्व उदैत् पुरुषः" इत्यादिश्रुतौ—

सुदर्शनाख्यं स्वास्त्रं तु प्रायुङ्क्त दयितं त्रिपात्।

इति भागवते च भगवत्येव त्रिपाच्छब्दप्रयोगाच्च। यच्चोक्तं परैः—"विश्वतः पृष्ठेषु" इत्यत्र विश्वशब्दोऽसङ्कुचितवृत्तिरिति दर्शयितुं "सर्वतः पृष्ठेषु" इत्युक्तमिति, तत्र व्यक्तमेकस्य वैयर्थ्यम्।

केचित्तु—"तथाऽक्षरात्सम्भवतीह विश्वम्" इति श्रुतौ विश्वशब्दः कार्ये प्रयुक्त इति अत्रापि तत्परः, सर्वशब्दस्तु परिशेषात् कारणपर इत्याहुः। तदपि न, "स इदꣳ सर्वमसृजत" इत्यादौ सर्वशब्दः कार्ये प्रयुक्त इति तत्परः, परिशेषाद्विश्वशब्दः कारणपर इति प्रसङ्गात्। "सम्भवतीह विश्वम्" इत्यत्र च सम्भव-

प्रकाशः

पप्रकाशवत्" इत्यादि। अत एवोक्तं—'बाह्याकाशादिस्थानत्वे' इति। **अमृतत्वस्येति**। "त्रिपादस्यामृतं दिवि" इत्युक्तस्येत्यर्थः। "विश्वतः पृष्ठेषु" इत्याद्यन्यथा स्वयं व्याख्याय, तत्र परोक्तं निरस्यति—**यच्चेति**। **इति प्रसङ्गादिति**। तथाचोभयमुभयत्र ग्राह्यमित्येकस्य वैयर्थ्यमेवेत्यर्थः। नन्वेवं कथं विश्वशब्दस्य कार्ये प्रयोग इत्यत आह—**सम्भवतीति**।

चन्द्रिका

तिपदसन्निधानेनैव विश्वशब्दः कार्यपरो न तु स्वतः। अन्यथा—

विश्वतः परमां नित्यं, विश्वात्मानं परायणम्।

इत्यादावपि कार्यमात्रपरः स्यात्। तस्माच्छ्रुतिसूत्रयोरन्योक्तार्थस्यायुक्तत्वात् भाष्योक्त एवार्थ इति॥

टीकाक्षरार्थस्तु—**आदिपदेन वाचो ग्रहणमिति**। "वाग्वै गायत्री" इति श्रुतौ वाक्छब्दार्थगुणवत्तयोपासनार्थं विष्णुर्वागित्युक्तः। तथा च वाक्त्वमपि न विष्णुत्वबाधकमिति दर्शयितुं भाष्ये आदिपदमित्यर्थः। **अनुसन्धेयत्वं च सूचयतीति**। 'आदिपदं' इत्यनुषङ्गः। आदिपदेन "या वै सा गायत्री" इति "या वै सा" इत्यादिना गायत्र्याः पृथिव्यभेदमुक्त्वा "अस्यां हीदं सर्वं प्रतिष्ठितम्" इति पृथिव्याः सर्वाधारत्वमुक्तम्। तच्च विष्णोरेव गायत्रीपृथिव्यादिशब्दार्थत्वे युक्तम्, नान्यथेत्यर्थः॥

प्रकाशः

'परमां' परमश्चासौ अश्च तमित्यर्थः। छन्दस्सूत्रसिद्धान्तटीकायां 'आदिपदेन वाचो ग्रहणं' इत्येतद्दुर्गमत्वात्सुगमयति—**आदिपदेनेति**। "अधिकरणान्तरेऽप्येतन्न्यायस्यानुसन्धेयत्वं च सूचयति" इत्यत्र कर्त्राकाङ्क्षायामादिपदेनेति प्रकृतं प्राक्तनं विपरिणामेन सम्बन्धनीयमित्याह—**आदिपदमिति**। आदिपदेन "या वै सा गायत्री इयं वा सा येयं पृथिवी" इत्यादेः सङ्ग्रह इत्येतत्तात्पर्यमस्फुटत्वादाह—**या वै सेति**। शिष्टं स्पष्टीकृतमुपन्यासमुखेनेति भावः॥

इति गायत्र्यधिकरणम्.

— अथ पादान्त्यप्राणाधिकरणम् —

प्राणो विष्णुरित्युक्तम्। तत्र "तावा एताः शीर्षंच्छ्रियश्श्रिताश्चक्षुश्श्रोत्रं मनो वाक्प्राणः" इत्यत्र प्राणस्य विष्णुत्वं न युज्यते, इन्द्रियैस्सहाभिधानादिति। अत आह॥

ओम् प्राणस्तथाऽनुगमात् ओम्

तत्त्वप्रकाशिका

अत्र लोकतोऽन्यत्रप्रसिद्धप्राणनाम्नो विष्णौ समन्वयप्रतिपादनादस्ति शास्त्रादिसङ्गतिः। श्रुत्यादिसङ्गतिविषयवाक्यविषयसंशयसयुक्तिकपूर्वपक्षान् दर्शयति--प्राण इति। "तद्वै त्वं प्राणः" इत्युक्तः प्राणो विष्णुरित्युक्तम्। ऐतरेयके च कश्चित् "ता वा एताः" इत्यारभ्य बहुषु स्थलेषु प्राणः श्रूयते। तस्य विष्णोरन्यत्वे प्राचीनोऽप्यन्य इति शङ्का स्यादित्ययमवश्यं विचार्यः। स प्राणोऽत्र विषयः। किं विष्णुरुतान्य इति सन्देहः। पूर्वोक्तन्यायोऽन्यत्र प्रसिद्धिश्च सन्देहबीजम्। तत्र न प्राणो विष्णुः किन्तु वाय्वादिरेवेति पूर्वः पक्षः, एतत्प्राणस्येन्द्रियगणे गणितत्वात्। नचैतल्लिङ्गं विष्णाववकाशं लभते, उपपद्यते च मुख्यप्राणादिषु। अतस्तेषामन्यतमस्यैतत्प्राणत्वात्प्राचीनप्राण आनन्दमयोऽप्यन्य एवेति भावः। सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे--अत इति। "तद्वै त्वं प्राणः" इति श्रुताविवात्रापि श्रुतः प्राणो विष्णुरेव, विष्णुलिङ्गानां देवतोपदे-

"तं देवाः प्राणयन्त स एषोऽसुः स एष प्राणः प्राण ऋच इत्येव विद्यात् तदयं प्राणोऽधितिष्ठति" इत्याद्यनुगमादत्रापि प्राणो विष्णुरेव ।

तत्त्वप्रकाशिका

श्यत्वादीनामस्मिन्प्राणे 'अनुगमात्' अनुवृत्तेरभ्यासादित्यर्थः । तथाशब्दः समुच्चयार्थोऽतोऽत्रापीत्याह । तं देवाः प्राणयन्तेति । 'तं' प्राणं देवाः शिष्यादिषु सम्यक् नीतवन्तः । "स एषोऽसुः स एष प्राणः" "स एष भूतिश्चाभूतिश्च" "तं भूतिरिति देवा उपासांचक्रिरे" इति प्राणस्य भूतित्वेन देवतोपास्यत्वमुच्यते । "ता वा एतास्सर्वा ऋचः सर्वे वेदाः सर्वे घोषा एकैव व्याहृतिः प्राण एव प्राण ऋच इत्येव विद्यात्" इति तस्य सर्ववेदोक्तत्वमुच्यते । "अथ देवरथस्तस्य वागुद्धिः श्रोत्रे पक्षसी चक्षुषी युक्ते मनस्संग्रहीता तदयं प्राणोऽधितिष्ठति" इति तस्य देहरथत्वमुच्यते । स चासावयं चेति तदयं, तदिति रथतयोक्तं शरीरं वा, लिङ्गव्यत्ययो वा । लिङ्गेन पूर्वपक्षिते कथं तेनैव सिद्धान्त इत्याशङ्कानुदयाय लिङ्गबाहुल्योक्तिः, बाहुल्यस्यापि प्राबल्यहेतुत्वात् । यदाहुः—

द्विविधं बलवत्त्वं च बहुत्वाच्च स्वभावतः ।

इति । ननु सैद्धान्तिकलिङ्गतोऽपि पूर्वपक्षलिङ्गमेव बलवत्, निरवकाशत्वात्, बाहुल्येन बलवतोऽपि स्वभावबलिनः प्राबल्यात् ।

विष्णुमेवानयन् देवा विष्णुं भूतिमुपासते ।
स एव सर्ववेदोक्तस्तद्रथो देह उच्यते ।

इति स्कान्दे । ब्रह्मशब्दानुगमाच्च ॥

ओम् न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमा ह्यस्मिन् ओम् ॥

तत्त्वप्रकाशिका

यत आहुः—

तयोस्स्वभावो बलवानुपजीव्यादिकश्च सः ।

इति । अतः कथं तैर्विष्णुत्वनिश्चय इत्यतो लिङ्गानामनन्यथासिद्धतां च स्मृत्या साधयति—विष्णुमेवेति । एकप्रकारेण प्रबलात्प्रकारद्वयेनाऽपि प्रबलस्याधिक्येन निर्णयोपपत्तिरिति भावः । अभ्युपेत्य चेदमुदितम्, यावता प्राणैस्सह गणितत्वस्यान्तर्यामिनिष्ठता सेत्स्यति । यदा प्रकारद्वयेनापि दुर्बललिङ्गस्योभयथा प्रबललिङ्गतो बाधसम्भवेन प्राणस्य विष्णुत्वसिद्धिस्तदा किं वाच्यं "एतद्ब्रह्म ब्रह्मणो लोको ब्रह्मेमं पुरुषमुदरं ब्रह्म" इत्यादिनिरवकाशब्रह्मशब्दाभ्यासादिति भावेनानुगमपदं प्रकारान्तरेण व्याचष्टे—ब्रह्मेति ॥

उक्तमाक्षिप्य समादधत्सूत्रं पठित्वाऽऽक्षेपांशं तावद्व्याचष्टे—नेति । यदुक्तं विष्णुरयं प्राण इति, तदयुक्तम्, "तमिन्द्र उवाच ऋषे प्रियं वै मे धामोपागा वरं ते ददामीति । स होवाच त्वामेव जानीयामिति । तमिन्द्र उवाच प्राणो वा अहमस्मृचषे" इति बृहतीसहस्रवक्तुः विश्वामित्रस्येन्द्रेण प्राणतयाऽऽत्मोपदेशात् । न च

"प्राणो वा अहमस्म्यृषे" इति वक्तुरात्मोपदेशादिन्द्र एवेति चेन्न, "प्राणस्त्वं प्राणः सर्वाणि भूतानि" इति बह्वध्यात्मसम्बन्धो ह्यत्र विद्यते ॥

तत्त्वप्रकाशिका

अयमिन्द्रोऽपि विष्णुः, प्रसिद्धस्यैव "इन्द्रो वै वृत्रं हत्वा" इत्यादौ महाव्रतयज्ञे यजमानत्वेन प्रकृतत्वात् । न चास्योपदेशस्य सावकाशत्वं चास्ति । अत इन्द्र एवायं प्राण इत्याशयः । नञध्याहारेण सिद्धान्तांशं व्याचष्टे—नेति । नेन्द्रोऽयं प्राणः, किन्तु विष्णुरेव, प्रागुक्तप्रबलतमलिङ्गादेः । उपदेशविरोध इति चेत्, भवेदयं विरोधो यद्यत्रेन्द्रेण प्राणतयाऽऽत्मोपदेशः क्रियेत । नैतदस्ति, यतोऽस्मिन् प्रकरणे स्वस्थितस्य "प्राणो वा अहमस्मि" इति परमात्मत्वमुक्त्वा तस्यैव प्राणाख्यपरमात्मनः "प्राणस्त्वं प्राणः सर्वाणि भूतानि" इत्यादिना बहुदेहसम्बन्धः सर्वगतत्वमेवेन्द्रेणोक्तं विद्यत इत्यर्थः । अथवेन्द्रे बहुपरमात्मसम्बन्धो विद्यते, तदपेक्षयैवायमुपदेशो न स्वापेक्षया । कुतः, "प्राणस्त्वं" इत्यादिनाऽस्य प्राणस्याध्यात्मत्वेनान्तर्यामित्वेन सर्वगततयोक्तेर्विद्यमानत्वात् । न चैतदिन्द्रे जीवविशेषे युक्तमित्यर्थः । अन्यथा "त्वामेव जानीयां" इति ज्ञातपूर्वेन्द्रस्य मुनेः प्रश्नस्यैवासम्भवात् । सम्भवे वा "प्राणस्त्वं" इत्यादिपरिहारवाक्यासङ्गतेश्च । अस्मत्पक्षे तु तेजोबाहुल्यादिन्द्रेऽन्योपि वर्तते । कोऽसौ, विष्णुश्चेत्, स च कीदृश इत्यभिप्रायद्वयेन

॥ ओम् शास्त्रदृष्ट्या तूपदेशो वामदेववत् ओम् ॥

'शास्त्रं' अन्तर्यामी, "संविच्छास्त्रं परं पदम्" इति हि भागवते ।

तत्तन्नाम्नोच्यते विष्णुः सर्वशास्तृत्वहेतुतः ।
न क्वापि किञ्चिन्नामास्ति तमृते पुरुषोत्तमम् ।

इति पाद्मे । "अहं मनुरभवं सूर्यश्च" इत्यादिवत् ॥

तत्त्वप्रकाशिका

प्रश्ने सति, कस्त्वयीति प्रश्नस्य "प्राणो वा अहं" इति परिहारः, कीदृशोऽसावित्यस्योत्तर इति वाक्ययोजनोपपत्तेरिति ॥

नन्वत्र यदि प्राणपदेनेन्द्रेणापि विष्णुरेव स्वात्मादिसर्वगततयोच्यते, तर्हि मयि प्राण इत्यादिप्रयोगः स्यात्, विष्णावहमित्यादिरूपोपदेशायोगादित्याशङ्कां परिहरत्सूत्रं पठित्वा शास्त्रपदं सप्रमाणकं व्याचष्टे—**शास्त्रेति**। एतत्प्राणस्य विष्णुत्वेऽपि 'प्राणोऽहं' इत्युपदेशो युज्यते, यतोऽयमुपदेशोऽन्तर्यामिरूपभगवदपेक्षयेति सूत्रार्थे स्थिते, अन्तर्यामिण्यप्यहमादिप्रयोगः कथं सम्भवतीत्याशङ्कायां स्मृतिमेवाह—**तत्तादिति** । अन्तर्यामिण्यप्यहमादिशब्दप्रयोगादर्शनात्तदयोग इत्यतः, सूत्रोक्तं दृष्टान्तं विवृणोति—**अहमिति**। यथाऽन्तर्यामिविवक्षया वामदेवोऽहंमन्वादिशब्दान् प्रयुयुजे, तथाऽयमुपदेशो युक्त इति भावः । न च तत्रापि विवादः, वामदेवस्य मन्वादित्वाभावात् । चैतन्यैक्यविवक्षयोक्तिरिति चेन्न, किमत्र साक्षादैक्यमुच्यते, लक्षणया वा । नाद्यः, विरोधात् । न द्वितीयः, लक्ष-

ओम् जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् ओम् ॥

"तावन्ति शतसंवत्सरस्याह्नां सहस्राणि भवन्ति" इति जीवलिङ्गं, प्राणसंवादादि मुख्यप्राणलिङ्गम्, तस्मान्नेति चेन्न,

तत्त्वप्रकाशिका

णाया अमुख्यत्वात् । सममेतदिति चेन्न, "तत्तन्नाम्नोच्यते" इति सर्वशब्दानामन्तर्यामिण्येव मुख्यत्वोक्तेः ॥

पुनरुक्तमाक्षिप्य समादधत्सूत्रमुपन्यस्याऽऽक्षेपांशं तावद्व्याचष्टे— जीवेति । अथापि नात्रोक्तप्राणो विष्णुः, "एष इमं लोकमभ्यार्चत्पुरुषरूपेण, य एष तपति, प्राणो वाव तदभ्यार्चत्प्राणो ह्येष य एष तपति, तं शतं वर्षाण्यभ्यार्चत्, तस्माच्छतं वर्षाणि पुरुषायुषो भवन्ति" इति प्राणस्यैकशतायुष्ट्वस्योपर्यपि "तावन्ति" इत्यादिना बहुस्थलेष्वनुसन्धानात्, शतायुष्ट्वस्य जीवलिङ्गत्वात् "शतायुर्वै पुरुषः" इत्यादिश्रुतेः। "ता अहिंसन्त अहमुक्थमस्म्यहमुक्थमस्मि" इति प्राणस्येन्द्रियैस्सह कलहश्रवणात्, "प्राण उदक्रामत् तत्प्राण उत्क्रान्तेऽपद्यत प्राणः प्राविशत्प्राणे प्रपन्न उदतिष्ठत्" इत्युत्क्रमणप्रवेशादिश्रुतेः, तथा "प्राणो वंश इति स्थविरः शाकल्यस्तद्यथा शालावंशे सर्वेऽन्ये वंशास्समहिताः स्युरेवमस्मिन् प्राणे चक्षु श्रोत्रं मनो वागिन्द्रियाणि शरीरं सर्व आत्मा समाहितः" इति सर्वजीवेन्द्रियदेहधारकत्वोक्तेश्च । प्राणसंवादादीनां च मुख्यप्राणलिङ्गत्वेन "अथ ह प्राणा अहंश्रेयसि व्यूदिरे" इत्यादिश्रुतिसिद्धत्वात् ।

अन्तर्बहिस्सर्वगतत्वेनेत्युपासात्रैविध्यादिहाश्रितत्वाच्च, "स एत-मेव सीमानं विदार्यैतया द्वारा प्रापद्यत" "स एतमेव पुरुषं ब्रह्म ततममपश्यत्" "एतद्धस्म वै तद्विद्वानाह महिदास ऐत-रेयः" इत्यादिना ।

महिदासाभिधो जज्ञ इतरायास्तपोबलात् ।
साक्षात्सभगवान्विष्णुर्यस्तन्त्रं वैष्णवं व्यधात् ।

इति ब्रह्माण्डे । तत्तदुपासनायोग्यतया च पुरुषाणाम् ।

तत्त्वप्रकाशिका

उदासीनौ च तावास्तां केशवश्चाब्जसम्भवः ।

इति विष्णोर्विवादादौ औदासीन्योक्तेश्च । अतोऽत्र प्राणनिष्ठतया जीवमुख्यप्राणलिङ्गसद्भावात्तयोः प्राणत्वमिति भावः । परिहारांशं व्याचष्टे—नेति । विष्णुरेवायं प्राणो न जीवादिः, लिङ्गानां तद-न्तर्यामिभगवद्विषयतयोपपत्तेः । किमर्थमन्तर्यामिकथनमिति चेत्, अ-न्तरादिभेदेन भगवदुपासनस्य त्रैविध्यादेतत्प्रकरणे तत्त्रैविध्यस्योक्त-त्वाच्चेति भावः । अत्रोपासात्रैविध्यमुच्यत इत्यत्र किं लिङ्गमित्यत आह—स इति । 'सः' भगवान् 'एतमेव' मस्तकसीमानं विदार्यैतया द्वारा सुषुम्नया हृदयं प्राप्त इत्यन्तरुपासनायोच्यते । 'सः' प्रागन्तस्स्थो भगवान् 'एतं' प्राप्तं पुरुषमात्मानं ततमं ब्रह्मापश्यदिति सर्वगतोपास नार्थमुच्यते । 'महिदासः' इति बहिरुपासनार्थमुच्यते । न च वाच्य-मत्र स्वरूपमात्रमुच्यते, नोपासनार्थमिति, उपासनां विनोक्तिप्रयो-जनाभावात् । न च महिदासो मुनितयोच्यते, वैयर्थ्यादेव । महिदासस्य

केषां चित्सर्वगत्वेन केषां चिद्धृदये हरिः ।
केषां चिद्बहिरेवासावुपास्यः पुरुषोत्तमः ॥

इति ब्राह्मे ।

अग्नौ क्रियावतां विष्णुर्योगिनां हृदये हरिः ।
प्रतिमास्वप्रबुद्धानां सर्वत्र विदितात्मनाम् ॥

इति च ॥

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये श्रीमदानन्दतीर्थ-
भगवत्पादाचार्यविरचते प्रथमाध्ययस्य प्रथमः पादः.

तत्त्वप्रकाशिका

विष्णुत्वं कुत इत्यत आह—**महिदासेति** । नन्वेकविधोपासनया ब्रह्मापरोक्षसम्भवात् किमुपासनात्रैविध्येनेत्यतः सूत्रशेषं व्याचष्टे—**तत्तादिति** । नैकविधोपासनया सर्वेषां ब्रह्मज्ञानं, अन्तरादिविविधोपासनयोग्यत्वादित्यर्थः । कुतः पुरुषाणामुक्तानेकविधोपास्तियोग्यतेत्यत आह—**केषाञ्चिदिति** । अत्रैव विशेषप्रमाणमाह—**अग्नाविति** । 'अग्नौ प्रतिमासु' इति बहिरुपासनोपलक्षणम् । अतोऽन्यलिङ्गानां तदन्तर्यामिविवक्षयोपपत्तेर्विष्णुरेवायं प्राण आनन्दमयश्चेति युक्ता तज्जिज्ञासेति सिद्धम् ॥ ३१ ॥ अ ॥ १२ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्ब्रह्मसूत्र-
भाष्यस्य टीकायां जयतीर्थमुनिविरचितायां
श्रीमत्तत्त्वप्रकाशिकायां प्रथमा-
ध्यायस्य प्रथमः पादः ॥

चन्द्रिका

ओम् प्राणस्तथाऽनुगमात् ओम्.

अत्र श्रुतिलिङ्गबाहुल्येन गायत्र्यधिकरणसिद्धान्तन्यायेन पूर्वपक्षप्रवृत्तेरनन्तरसङ्गतिः ।

प्रकाशः

ओम् प्राणस्तथाऽनुगमात् ओम् ॥ नन्विदमेतदधिकरणभाष्यदिशा पूर्वप्राणाधिकरणसङ्गतं भाति, तदयुक्तमिव, तथात्वे तदानन्तर्यस्यैव प्राप्तेरित्यतः, सुधोक्तदिशा गायत्र्यधिकरणेन सङ्गति लाभादत्र निवेश इति भावेनाह—**अत्रेति । सङ्गतिरिति** । आपवादिकीत्यर्थः ।

पूर्वसिद्धान्ततो यत्र पूर्वपक्षः प्रवर्तते ।
तत्रापवादिकी...................... ॥

इत्यादेः । **यद्वा**—पूर्वसिद्धान्तोपजीवनादुपजीव्योपजीवकरूपेत्यर्थः । एतेन अन्यप्रापकश्रुतिलिङ्गबाहुल्योपेताः शब्दा उदाहरणमिति सूचितं, सूत्रस्योपलक्षणार्थत्वादिति ध्येयम् । एतच्चाग्रे स्फुटीभविष्यति । भाष्यं तु "मनो वाक्प्राणः" इत्यत्र प्राणो विष्णोरन्यश्चेत्तथा प्राक्तनोऽप्यन्य इति शङ्का स्यादिति तस्य विष्णुत्वावधारणार्थत्वात् सफलेयं चिन्तेति प्रयोजनपरं व्याख्येयमिति भावः । यद्यपि "सर्वे वेदाः" इति सर्ववेदप्रतिपाद्यत्वस्याप्यन्यनिष्ठत्वेन शास्त्रयोनित्वमप्यन्यस्येति शङ्कासमाधानमपि प्रयोजनमिति शक्यं वक्तुं भाति । तथाऽपि तस्याऽऽनन्दमयाधिकरणानाक्षेपकत्वात् तदाक्षेपायैवमुक्तम्, समन्वीयमान-

चन्द्रिका

अत्र प्राणः किं मुख्यवाय्वादिः किं वा विष्णुः इति चिन्ता। तदर्थं किं वाय्वादिश्रुत्याद्यनुसारेण विष्णुश्रुत्यादि नेयम् उत विपरीतमिति। तदर्थं कि वाय्वादिश्रुत्यादिकं निरवकाशम् विष्णुश्रुत्यादिकन्तु सावकाशमुत विपरीतमिति। ननु "अत एव प्राणः" इत्यनेन गतार्थमिदम्। न च पूर्वत्र प्राणशब्दो वायुपरो नेत्युक्तं,

प्रकाशः

प्राणशब्दमुखाक्षेपस्य ततोऽप्यन्तरङ्गत्वाच्चेति ध्येयम्। समर्थयिष्यते चैतत्प्रयोजनम्। **अत्रेति**। ऐतरेयके "ता एताः श्रीर्षच्छ्रियः श्रिताश्चक्षुः श्रोत्रं मनो वाक् प्राणः" इत्यारभ्य बहुषु स्थलेषु श्रुतः प्राणो विषय इत्यर्थः। आदिपदेनेन्द्रो जीवश्च ग्राह्यः। **वाय्वादीति**। वक्ष्यमाणवाय्विन्द्रजीवप्रापकश्रुतिलिङ्गानुसारेणेत्यर्थः। **विष्णुश्रुतीति**। "ब्रह्मेमं पुरुषं" इति ब्रह्मशब्दादीत्यर्थः। अत्र फलफलिभावः स्फुटः। "ननु गतार्थमिदमधिकरणं, सर्वासां प्राणविद्यानां "अत एव प्राणः" इत्यनेनैव भगवद्विषयतायास्समर्थितत्वात्" इति न्यायविवरणटीकां विवरीतुमाक्षिपति—**नन्विति**। प्राणशब्दस्य विष्णौ तत्रैव मुख्यत्वसाधनादिति भावः। न च वाच्यं तत्र "तद्वै त्वं प्राणः" इत्येतदुदाहरणमत्र तु "तावा एताः" इत्यादीति, उदाहरणभेदेनाधिकरणभेदेऽतिप्रसङ्गादित्युक्तत्वात्। नन्वथाऽपि निरसनीयभेदाद्वा पूर्वपक्षप्रापकन्यायभेदाद्वा भेदो भविष्यतीत्यतो निरसनीयभेदं तावदाशङ्क्य निरस्यति—**न चेति**।

चन्द्रिका

इह त्विन्द्रजीवपरो नेत्युच्यते इति भेदः, इह सूत्रे मुख्यप्राणपदायोगात् । न च पूर्वत्र वायुपरत्वस्यैव निरासः, इह तु इन्द्रजीववायुपरत्वानामिति भेदः, अस्य बहुविषयस्य तेनागतार्थत्वेऽप्यनेन तस्याल्पविषयस्य गतार्थत्वात् । निरासकन्यायभेदं विना निरसनीयभेदमात्रेणाधिकरणभेदासिद्धेश्च । न च पूर्वत्र प्रसिद्ध्यवलम्बनेन श्रुत्या पूर्वपक्षे लिङ्गैः सिद्धान्तः, अत्र तु लिङ्गैः पूर्वपक्षे श्रुतिलिङ्गाभ्यां सिद्धान्तः । अत एव तत्र पूर्वपक्षे भाष्ये 'प्रसिद्धेः' इत्युक्तम्, अत्र तु सूत्रे 'लिङ्गात्' इत्युक्तमिति वाच्यम्, श्रुत्या प्राप्तस्य पूर्वपक्षस्य लिङ्गमात्रेण बाधितस्य पुनर्विरोधिश्रुतिलिङ्गबाधेन लिङ्गैरुज्जीवनासम्भवात् । न च श्रुतिबाहुल्यादुज्जीवनं,

प्रकाशः

'इह' अधिकरणे "जीवमुख्यप्राणलिङ्गात्" इति सूत्रे इत्यर्थः । **निरासकन्यायेति** । अन्यथाऽऽनन्दमयाधिकरणादावनेकत्वप्रसङ्ग इति भावः । अस्तु तर्हि प्रापकभेदाद्भेद इति चेन्न, तच्छ्रुतिमात्रमुत लिङ्गमात्रं, ब्रह्मश्रुतिलिङ्गयोरभावात् । अथ तद्बाहुल्यमिति चेत्तत्किं लिङ्गबाहुल्यं उत श्रुतिबाहुल्यमथ श्रुतिलिङ्गबाहुल्यमिति विकल्प्याद्यमाशङ्क्य निरस्यति—**न चेति** । 'लिङ्गैः' श्रीपतित्वादिलिङ्गैः । **लिङ्गैरिति** । प्राणसंवादादिभिः । सौत्रैकवचनं समुदायाशयमिति भावः । **श्रुतीति** । ब्रह्मश्रुत्या सर्वदेवोपदेश्यत्वादिलिङ्गेन च बाधेनेत्यर्थः । द्वितीयमाशङ्क्य निरस्यति—**न चेति** ।

चन्द्रिका

तद्बाहुल्यप्राप्तस्यापि पूर्वपक्षस्य गायत्र्यधिकरणे निरासात् । न च तत्र गायत्रीवाक्पृथिव्यादिश्रुतयो भिन्नविषयाः, अत्र-तु "चक्षुश्श्रोत्रं मनो वाक् प्राणः तत्प्राणे प्रपन्न उदतिष्ठत् स एष प्राणः" इत्यादावेकैव प्राणादिश्रुतिरावृत्तेति वाच्यम्, तत्रापि "गायत्री वा इदं सर्वम् वाग्वै गायत्री सैषा षड्विधा गायत्री" इति श्रवणात् ।

प्रकाशः

तद्बाहुल्यप्राप्तस्येति ।

कथं प्रसिद्धबहुलशब्दानामन्यथार्थता ।

इत्युक्तेरिति भावः । ननु तत्र श्रुतिबाहुल्यप्राप्तस्य विष्णुश्रुतिलि-ङ्गबाहुल्येन निरासः, "बाहुल्याच्छ्रुतिलिङ्गयोः" इत्यनुव्याख्यानो-क्तेरिति चेत्, इहापि सिद्धान्ते श्रुतिलिङ्गबाहुल्यसत्त्वादिति तात्पर्यात् । पूर्ववैषम्यमाशङ्क्य तौल्यमाह—**न चेति** । स **एष इति** । "स एषोऽसुः स एष प्राणः स एष भूः" इति वाक्यमुपादत्ते । ननु न गायत्र्यधिकरणे श्रुत्यावृत्तिप्रयुक्तपूर्वपक्षस्य निरासः, आकाशाधिकरण एव तस्य निरासात् । अन्यथा पौनरुक्त्या-पत्तेः । अत एव प्राक्, गायत्रीवाक्पृथिव्यादिश्रुतय एव दर्शिताः, सुधायां च "गायत्री वा इदꣳ सर्वं वाग्वै गायत्री" इत्यादयः प्रसिद्धा बहवश्शब्दाः श्रूयन्त इत्युक्तम्, टीकायां च "वाक्त्वविधानाच्च" इत्युक्तमिति न गायत्र्यधिकरणेन पौनरुक्त्य-

चन्द्रिका

आकाशाधिकरणविषयवाक्ये आकाशश्रुतेरेवावृत्तेश्च । न च श्रुतिलिङ्ग-बाहुल्यादुज्जीवनम्, अत एवानुव्याख्याने "बाहुल्याच्छ्रुतिलिङ्गयोः" इत्युक्तम् ।

प्रकाशः

मित्यतः तर्ह्याकाशाधिकरणेन तत्स्यादित्याह—**आकाशेति**। श्रुत्यभ्यासप्राप्तस्यापि तत्रैव निरासान्न तेनेह पूर्वपक्षोदय इति भावः । ननु तत्र निरवकाशत्वपरत्वबहुत्वप्रयुक्तप्राबल्यैर्लिङ्गैर्निरासः । उक्तं च—

द्वाभ्यामावृत्तिजातिभ्यामेव हि प्रबला श्रुतिः ।
अगतित्वपरत्वानेकत्वैर्लिङ्गानि तु त्रिभिः ॥

इति । न चेह लिङ्गानि तादृशानि, वक्ष्यमाणदिशा बाहुल्यादौ सत्यपि परत्वायोगादिति चेत्, बहुत्वेन प्रबलानां लिङ्गानां जात्या बहुत्वेन च प्रबलवैष्णवश्रुतियुक्तत्वेन सुतरां तद्विरोधित्वात् । यद्वा—तत्रापि निरवकाशत्वादिप्रयुक्तप्राबल्यमाश्रित्यैव श्रुत्यावृत्तिप्राप्तस्य निरासः । परत्वं तु वास्तवमभिप्रेत्य वा, अनुपसञ्जातविरोधित्वेनाकाशश्रुतेः प्राबल्यशङ्कायां तन्निरासाय "प्रथमेऽश्रवणात्" इति वक्ष्यमाणन्यायेन परत्वस्य प्राबल्यहेतुत्वमभिप्रेत्य वेति तात्पर्यात् । अत्रापि केषाञ्चित्परत्वसम्भवाच्चेति । तृतीयमाशङ्क्य निरस्यति—**न चेति**। 'उज्जीवनं पूर्वपक्षस्य' इत्यनुषङ्गः । "इन्द्रियैस्सहाभिधानात्" इति भाष्येण "एतत्प्राणस्येन्द्रियगणे गणित-

चन्द्रिका

इह भाष्ये टीकायां च लिङ्गमात्रोक्तिः पूर्वपक्षोपक्रममात्रमिति वाच्यम्, इन्द्रे "इन्द्रस्य प्रियं धामोपेयाय तमिन्द्र उवाच प्राणो वा अहमस्मि" इत्यादिश्रुतीनां महाव्रतयाजित्वादिलिङ्गानां, मुख्यप्राणे प्राणादिश्रुतीनां "ता अहिंसन्त" इति प्राणसंवादादिलिङ्गानां, जीवे "पुरुषरूपेण य एष तपति स एष पुरुषः समुद्रः" इत्यादिश्रुतीनां "तावन्ति शतसंवत्सरस्याह्नां सहस्राणि भवन्ति" इति शतसंवत्सरत्वादिलिङ्गानां च बाहुल्येऽपि, इन्द्रादिश्रुतेः "अन्तः" इत्यत्र, प्राणश्रुतेश्च "अत एव प्राणः" इत्यत्र, पुरुषश्रुतेश्च गायत्र्यधिकरणे सावकाशितत्वेन, लिङ्गानां च विष्णौ प्रवृत्तप्रबलश्रुत्यनुसारेण अन्तरधिकरणपूर्व-

प्रकाशः

त्वात्" इति टीकया चैतद्विरुद्धमित्यत आह—इहेति । त्वद-भिमतश्रुत्यादीनां विष्णौ सावकाशत्वान्न तद्बाहुल्यमपि पूर्वप-क्षप्रापकमिति भावेनेन्द्रमुख्यजीवश्रुत्यादिबाहुल्यं स्फुटयन्नाह—**इन्द्र इत्यादि** । विषयसप्तम्य इमाः । **महाव्रतयाजित्वादीति** । "इन्द्रो वै वृत्रं हत्वा महानभवत्" इत्यादिवाक्योक्तमहाव्रतयाजित्वादीनां ग्रहः । **प्राणसंवादादीति** । चक्षुरादिसहपाठोत्क्रमणप्रवेशतन्निमित्तदेहपा-तोत्थानादिरादिपदार्थः । **इत्यादीति** । "स एष पुरुषः पञ्चविधः" इत्यादिरादिपदार्थः । **शतसंवत्सरत्वादीति** । "प्राणो वंश इति विद्यात्" इत्युक्तप्राणवंशत्वादिरादिपदार्थः । **विष्णौ प्रवृत्तेति** । विष्णौ प्रसिद्धब्रह्मशब्दादिश्रुत्यनुसारेणेत्यर्थः । यद्यप्यन्नेतृत्वमिति

चन्द्रिका

पक्षोक्तानामपांनेतृत्वादिलिङ्गानामिव विष्णौ प्रवर्तनीयत्वेन सम्भावितावकाशतया बहुविष्णुश्रुतिबाधकत्वायोगात् । **दृष्टं** हि "दर्शपूर्णमासाभ्यां यजेत" इत्यादौ यजेः प्रवृत्तदर्शपूर्णमासनामानुसारेण षड्यागमात्रपरत्वम् ।

प्रकाशः

वक्तव्यं, तथाऽपि श्रुत्यनुवादायैवमुक्तम् । **बहुविष्णुश्रुतीति** । ब्रह्मादिश्रुतेरत्र बहुधा आवृत्तत्वादिति भावः । **दृष्टं हीति** । चतुर्थेऽध्याये "दर्शपूर्णमासयोरिज्याप्राधान्यमविशेषात्" इति तुरीयपादीयैकादशाधिकरणे दर्शपूर्णमासयोः किं सर्वेषां यागानां प्राधान्यमुताऽऽग्नेयादीनामेव कालयोगिनां प्राधान्यं इतरेषां प्रयाजादीनामङ्गत्वमिति संदिह्य, 'दर्शपूर्णमासाभ्यां' इति नामधेयस्य त्वाख्यातानुसारित्वादाख्यातेन चाविशेषेण सन्निहितसर्वयागान् परामृश्य "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इति फले विनियोगात्सर्वेषां प्राधान्यमिति पूर्वपक्षयित्वा, अप्रसिद्धार्थस्य नामधेयस्याऽऽख्यातपारतन्त्र्येऽपि प्रसिद्धार्थस्य स्वातन्त्र्यात् "दर्शपूर्णमासाभ्यां" इत्यस्य षड्यागानामुत्पत्तौ कालयोगाद्विद्वाक्यद्वयेन च त्रिकद्वयसम्पादनाच्च प्रकृतिप्रत्ययार्थप्रसिद्ध्या प्रसिद्धार्थत्वादाख्यातस्यैव नामपारतन्त्र्यात् षण्णामेव प्राधान्यं, समिदादीनां तु तदङ्गत्वमिति सिद्धान्तितम् । अत्र यथा फलवाक्यस्थयजेर्विद्वद्वाक्यप्रसिद्धदर्शपूर्णमासनामानुसारेण षड्यागमात्रपरत्वं, यथा वा "इन्द्रं मित्रं" इत्यादिश्रुतिप्रसिद्धे-

चन्द्रिका

अन्यथा राजसूययजेरिव सन्निहितसर्वयागपरता स्यात् ।

प्रकाशः

न्द्रादिश्रुत्यनुसारेण "अपां नेतारं" इत्यादिलिङ्गानां विष्णुनिष्ठत्वं, तथा "ब्रह्मशब्दः परे विष्णौ" इत्यादिवाक्यप्रसिद्धब्रह्मशब्दानुसारेण प्राणसंवादादिलिङ्गानां विष्णौ प्रवर्तयितुं शक्यत्वेन न तैः पूर्वपक्षोदय इत्यर्थः । प्रवृत्तनामानुरोधेन सङ्कोचानङ्गीकारे बाधकमाह—**अन्यथेति** । तत्रैव "प्रकरणशब्दसाम्याच्चोदनानामनङ्गत्वम्" इति चतुर्थपादीयाद्याधिकरणे अनुमत्यादीनि विदेवनादीनि च यागायागकर्माणि प्रकृत्य श्रुतं "राजा राजसूयेन स्वाराज्यकामो यजेत" इति वाक्यमुदाहृत्य, किमनुमत्यादीनां यागानां विदेवनादीनामयागानां च फलसम्बन्धेन प्राधान्यमुत यागानामेवेति सन्दिह्य, राजसूयशब्दस्य प्रसिद्धार्थत्वेऽपि तृतीयान्ततया फलसाधनपरत्वावगमात् प्रकृतानां फलापेक्षाणां यागायागरूपाणां कर्मणां नामधेयत्वावगमात् यजेश्च च्छत्रिन्यायेन तेषामेव परामर्शकत्वोपपत्तेः सर्वेषां प्राधान्यमिति पूर्वपक्षयित्वा, भावार्थाधिकरणन्यायेन धात्वर्थस्यैव फलसम्बन्धान्नामार्थस्यातथात्वाद्यजेश्च यागमात्रवचनत्वात्तत्समानाधिकरण्येन राजसूयशब्दस्यापि तन्नामत्वावगमात्तेषामेव फलसम्बन्धात्प्राधान्यं, विदेवनादीनां तु "फलवत्सन्निधावफलं तदङ्गम्" इति न्यायेन तदङ्गत्वमिति सिद्धान्तितम् । तत्र यथा यजेः प्रकृतसर्वयागपरता, तथा प्रकृतेऽपि स्यादित्यर्थः ।

चन्द्रिका

सन्ति च विष्णौ प्रवृत्ताः "ब्रह्मेमं पुरुषं" इति ब्रह्मशब्दाद्याः श्रुतयः। नचेन्द्रश्रुत्यादिकं पश्यन् पूर्वपक्षी तत्सन्निहितं विष्णुश्रुत्यादिकं न पश्यतीति युक्तम्। उक्तं चानन्दमयाधिकरणे ब्रह्मशब्दस्य विष्णौ मुख्यत्वमिति चेत्, मैवं, इन्द्रादिलिङ्गादीनां विष्णौ प्रवर्तयितुमप्यशक्यत्वेन पूर्वपक्षोदयात्। तथा हि—"इन्द्रो वै वृत्रं हत्वा महानभवद्यन्महानभवत्तन्महाव्रतमभवत्"

प्रकाशः

नन्वस्त्वन्यत्र प्रवृत्तनामानुसारेण सङ्कोचः, प्रकृते किमित्यत आह—**सन्ति चेति**। ननु विष्णुश्रुत्यज्ञानेन पूर्वपक्षः किं न स्यादित्यत आह—**न चेति**। ननु ब्रह्मश्रुत्यादेः विष्णौ प्रवृत्तत्वमेवाद्याप्यसिद्धं, येन तद्बलादुक्तं युक्तं स्यादित्यत आह—**उक्तं चेति**। ननु जन्माधिकरण एव ब्रह्मशब्दस्य विष्णौ मुख्यत्वमुक्तम्। अत एवाऽऽनन्दमयाधिकरणे ब्रह्मशब्दं पूर्वपक्षबाधकमाशङ्क्य समाधानमुक्तमिति चेत्सत्यं, जन्माधिकरणे स्वयं समर्थितत्वेऽपि भाष्यादौ तत्रानुक्तेरत्र तूक्तेस्तदभिप्रायेण एवमभिधानात्। एवं न्यायविवरणटीकागताक्षेपांशं प्रपञ्च्य, "विद्याविशेषे अधिकाशङ्कया पुनः प्रत्यवस्थानात्" इति समाधानांशं विवृण्वन् पूर्वपक्षमुज्जीवयति—**मैवमित्यादिना**। अपिपदेन स्वरसतः प्रवृत्तिर्नास्त्येव, बलादपि प्रवृत्तिर्नोपपद्यत इत्याचष्टे। सूत्रे "न वक्तुः" इतीन्द्रस्य, "जीवमुख्यप्राणलिङ्गात्" इति तयोश्च पूर्वपक्षितत्वादिन्द्रप्रापकं तावदाह—**इन्द्र इति**। उदाहरिष्यमाणन्यायविवरणे अन्य-

चन्द्रिका

इत्यादौ यो वृत्रहन्ता इन्द्रो महाव्रतयजमानः प्रकृतः, स एव "तमिन्द्र उवाच प्राणो वा अहं" इत्यत्रापीन्द्रशब्देनोच्यते। न च वृत्रहन्तृत्वमहाव्रतयजमानत्वादिकं ब्रह्मणि युक्तम्। नापि "प्राणो वा अहम्" इति प्रसिद्धेन्द्रे प्रयुक्तोऽहंशब्दो विष्णौ युक्तः। नच 'अहं' इत्यस्य मयीत्यर्थः, विभक्तिव्यत्ययप्रसङ्गात्।

प्रकाशः

लिङ्गेन श्रुत्युज्जीवनस्य सूचितत्वात्तथैवाह—**स एवेति**। अन्यस्य तत्र यजमानत्वे शस्त्रशंसितारं विश्वामित्रं प्रति अनेन "प्राणो वा अहं" इत्युपदेशरूपवरदानायोगादिति भावः। अस्त्वेवं, किं तत इत्यत आह—**न चेति**। पुराणादाविन्द्रस्यैव तथात्वप्रसिद्धेरिति भावः। एतेन "न वक्तुः" इति सूत्रपूर्वपक्षांशटीका विवृता। "न चास्योपदेशस्य सावकाशत्वं वाऽस्ति" इति टीकावाक्यं विवृण्वन् श्रुतिरपि निरवकाशेत्याह—**नापीति**। विष्णौ योगो हि चतुर्धा, तदभेदेन वा, भेदेऽपि विभक्तिविपरिणामेन मयि प्राणोऽस्तीत्यर्थकथनेन वा, मञ्चस्थपुरुषाभिप्रायेण मञ्चाः क्रोशन्तीतिवत् स्वान्तर्याम्यभिप्रायेण लक्षणया वा, अन्तर्यामिणि मुख्यत्वेन वा। नाद्यः, अन्तराधिकरणे इन्द्राद्यभेदस्य निरस्तत्वात्। "पृथक्" इत्यत्र निरसिष्यमाणत्वाच्च। द्वितीयं निरस्यति—**न चेति**। 'अस्मि' इत्यस्यास्तीत्यर्थ इत्यपि ग्राह्यम्। **विभक्तीति**। इन्द्रपरत्वेनोपपत्तौ व्यत्ययादेरयोगादिति भावः।

चन्द्रिका

अन्तर्यामिपरत्वे च लक्षणा स्यात् । न चाहंशब्दः स्वप्रयोक्त्रन्तर्यामिण्येव मुख्यः, "तदात्मानमेवावेदहं ब्रह्मास्मि" "अहं कृत्स्नस्य जगतः" इत्यादावीश्वरप्रयुक्ताहंशब्दस्य अमुख्यार्थत्वप्रसङ्गात् । यथा च "वत्समालभेत" इत्यत्र आलम्भनं गुणकर्मभूतगोदोहनादिसाहचर्यात् गुणकर्म, तथा प्राणोऽप्यप्रधानचक्षुरादि

प्रकाशः

तृतीयं निरस्यति—**अन्तर्यामीति** । चतुर्थमाशङ्क्याह—**न चेति** । "ब्रह्म वा इदमग्र आसीत्" इति प्रकृतं ब्रह्म 'तत्' इति परामृश्यते। अहं ब्रह्मास्मीत्यवेदित्यर्थः ।

अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ।
मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय ।
विष्टभ्याहमिदं कृत्स्नं एकांशेन स्थितो जगत् ।

इत्यादौ भगवत्प्रयुक्ताहंशब्दस्यापि तदन्तर्यामिबोधकत्वप्रसङ्ग इत्यर्थः । एतेन'–"प्राणो वा अहमस्म्यृषे" इति श्रुतिः' इति सुधावाक्यं च विवृतम् । एवमिन्द्रप्रापकश्रुतिलिङ्गयोर्निवरकाशत्वेनेन्द्रप्राप्तिमुक्त्वा वायुप्राप्तिं दृष्टान्तपूर्वमाह—**यथा चेत्यादिना** । प्राणशब्दस्य विष्णुवायुसाधारणस्य साहचर्यमात्रात्कथमवधारणमित्यत उक्तं—**यथा च वत्समिति** । द्वितीये "विशये प्रायदर्शनात्" इति तृतीयपादीयषष्ठाधिकरणे अग्निहोत्रगोदोहाधिकारे "वत्समालभेत" इति श्रुतं वाक्यमुदाहृत्य 'आलभेत' इति यागविधिः

चन्द्रिका

साहचर्यादप्रधानभूतः, न तु प्रधानभूतं ब्रह्म । चक्षुरादिभिश्चातिनिकृष्टैः सर्वोत्कृष्टस्य ब्रह्मणः कलहोऽप्ययुक्तः । शतसंवत्सरत्वं तु जीवादन्यत्र न युक्तमेव ।

प्रकाशः

उत संस्कारविधिरिति विशये, "वायव्यं श्वेतमालभेत" इत्यादाविवासत्यपि देवतासंयोगे प्राणिद्रव्यालम्भनत्वसामान्याद्यागविधिरिति पूर्वपक्षयित्वा, आलम्भस्य स्पर्शमात्रत्वात्तस्य च लोकेऽपि दृष्टत्वेन यागं विनाऽनुपपत्त्यभावात् गुणकर्मभूतगोदोहप्रायपाठदर्शनाद्वत्ससंस्काराख्यगुणकर्मैव चोद्यत इति सिद्धान्तितम् । तद्वदत्राऽपि प्राणो विष्णुरन्यो वेति विशये, चक्षुरादिप्रायपाठादप्रधानो मुख्यप्राण एव भवेदित्यर्थः । अत एव वैयाकरणैस्साहचर्यं धर्मग्राहकमिति वदद्भिः "सर्तिशास्त्यर्तिभ्यश्च" इत्यत्र परस्मैपदिसाहचर्याच्छास्तेः परस्मैपदिन एव ग्रहणमित्युक्तम् । अप्रधानप्रधानपदे हेतुगर्भे । एतेन "एतत्प्राणस्येन्द्रियगणे गणितत्वात्" इति टीका विवृता । **चक्षुरादिभिरिति** । "ता अहिंसन्त अहमुक्थमस्म्यहमुक्थमस्मि" इत्यादिनोक्त इत्यर्थः । एवमिन्द्रवायुप्राप्तिमुक्त्वा, जीवप्राप्तिं च तल्लिङ्गप्राबल्योक्त्या वक्ति—**शतसंवत्सरत्वं त्विति** । "एष इमं लोकमभ्यार्चत् पुरुषरूपेण य एष तपति प्राणो वाव तदभ्यार्चत् प्राणो ह्येष य एष तपति तं शतं वर्षाण्यभ्यार्चत् । तस्माच्छतं वर्षाणि पुरुषायुषो

चन्द्रिका

यद्यपि "तावन्ति शतसंवत्सरस्याह्नां सहस्राणि भवन्ति" इत्यत्र शतसंवत्सरत्वं प्राणनिष्ठं न भाति, बृहतीसहस्रवर्णानां शतसंवत्सरस्याह्नां च षट्त्रिंशत्सहस्रत्वेन सङ्ख्यासाम्यस्यैवोक्तेः । तथाऽपि "तं शतं वर्षाण्यभ्यार्चत्" इत्यत्र "प्राणो वाव तदभ्यार्चत्" इति प्रकृतस्य प्राणस्यान्वयात् "तावन्ति" इत्यत्रापि तस्यैवान्वयः । अत एव टीकायां " प्राणो वाव तदभ्यार्चत्" इत्यादिपूर्ववाक्यं पठितम् । न च तदन्तर्यामिणि लिङ्गानां सावकाशता,

प्रकाशः

भवन्ति" इति वाक्योक्तं शतायुष्ट्वं "शतायुः पुरुषः" इत्यादिश्रुतेः जीव एव युक्तमित्यर्थः । अत्र भाष्ये "तावन्ति" इति वाक्योक्तावपि टीकायां पूर्ववाक्यमुक्त्वा प्राणस्योक्तशतायुष्ट्वस्योपर्यपि "तावन्ति" इत्यादिना बहुस्थलेषु अनुसन्धानादित्युक्तम् । तदभिप्रायं शङ्कापूर्वं व्यनक्ति–**यद्यपीति** । "तस्य ह वा एतस्य बृहतीसहस्रस्य सम्पन्नस्य षट्त्रिंशतामक्षराणां सहस्राणि भवन्ति तावन्ति शतसंवत्सरस्याह्नां सहस्राणि भवन्ति" इत्यत्र प्राणश्रुतेरभावेन प्राणगततयाऽप्रतीतेः कथं प्राणशब्दस्य जीवार्थकत्वं स्यादिति भावः । 'वर्णानां' स्वरव्यञ्जनरूपाणां । **तस्यैवान्वय इति** । तथा च प्राणस्य यच्छतसंवत्सरं, तस्याह्नामित्यर्थ इति भावः । 'अत एव' प्रकृतस्य तत्रान्वयादेवेत्यर्थः । ननूक्तमत्राग्नेतृत्वादिलिङ्गानि सावकाशानीति तत्राह—**न चेति** । यदि

चन्द्रिका

दुःखित्वादेरपि प्रसङ्गात् । अपानेतृत्वादिलिङ्गानामप्यन्तर्यामिगतता अत्रत्यसिद्धान्ताधीना । न च स्वातन्त्र्यादेवेश्वरे प्राणशब्दः, सति विरोधिश्रुत्यादौ तदयोगात् । नहि 'दरिद्रो भृत्यो जयी' इत्यत्र राज्ञि जयिशब्दः । तदेतदभिप्रेत्योक्तं टीकायाम् "न चैतल्लिङ्गं विष्णाववकाशं लभते" इति । अन्विष्याप्यवकाशं न लभतइत्यर्थः। अन्यथा 'न चैत ल्लिङ्गं सावकाशम्' इत्येवावक्ष्यत् । विष्णुश्रुत्यादिकं तु इन्द्रादौ गौणम् ।

प्रकाशः

जीवधर्माणामन्तर्यामिगतत्वमुच्यते, तर्हि दुःखाज्ञानसमवायादिरूपः सर्वोऽपि संसारस्तत्रैव स्यात् । तथा च जीववदल्पशक्तित्वापस्याऽन्तर्यामित्वमपि तस्य न स्यादित्यर्थः । कथं तर्ह्यन्नेतृत्वं सावकाशमित्यतोऽत्रत्यन्यायेनैवेत्याह—अपामिति । "तदधीनत्वादर्थवत्" इति न्यायविषयत्वमाशङ्क्याह—**न चेति** । **गौणमिति** । स्वावरापेक्षया पूर्णत्वाद्ब्रह्मादिशब्दवत्त्वमित्यर्थः । नन्विन्द्रादिषु निर्धारित एक एव प्राण इति पूर्वः पक्षः, अनिर्धारितो यः कश्चिदिति वा, सर्वेऽपीति वा । नाद्यः, अनेकप्रापकसत्त्वेन निर्धारणायोगात् । न द्वितियः, निर्धारणाभावे पूर्वपक्षस्य सन्देहादविशेषापातात् । न तृतीयः, वाक्यभेदेनासम्भवादिति चेत्, अत्राहुः—प्राणादिप्रापकलिङ्गापेक्षया इन्द्रप्रापकश्रुतिलिङ्गानां प्राबल्योपपत्तेः, इन्द्रस्य हस्ताधिष्ठातुरिन्द्रियत्वेनेन्द्रियगणे गणितत्वस्य, तैस्सह कलहस्य

प्रकाशः

चोपपत्तेः । अत एवैतल्लिङ्गस्य त्रितयसाधारण्यमुक्तं सुधायाम् । शतायुष्ट्वस्यापि तथैव कथञ्चिद्योज्यत्वात् ‘इन्द्र एव’ इत्यवधारणोपपत्तेः। मुख्य एव वाऽस्तु, मुख्यप्राणलिङ्गानां उपक्रमे “प्राणो वंशः” इत्यन्ते च श्रवणेन बलवत्त्वात्प्राणश्रुतेश्च मुख्ये लोकतः प्रसिद्धाया बहुधा श्रवणेन तद्बलेनेन्द्रादिप्रापकाणां मुख्ये कथञ्चिन्नेयत्वात् । जीव एव वाऽस्तु, शतायुष्ट्वस्य चात्राभ्यस्यमानत्वेन बलवत्त्वात् इन्द्रियजन्यफलाश्रये तत्सहपाठादेरपि सम्भवादिन्द्रश्रुत्यादेः कथञ्चिन्नेयत्वादिति । द्वितीयपक्षोऽपि युक्त एव, अन्यप्रापकाणामुक्तदिशा बलवत्त्वनिश्चयेन विष्णोरन्यत्वावधारणोपपत्तेः । विशिष्टावधारणस्य व्यर्थत्वात् । अत एव टीकायां विष्णुरन्योवेति संशयो दर्शितः, “तेषामन्यतमस्य” इत्यप्युक्तम् । तृतीयो वाऽस्तु, त्रयाणां प्रापकसद्भावेन सर्वत्र मुख्यतया त्रितयपरत्वं वा, आद्यन्तयोर्लिङ्गदर्शनेन मुख्यस्यैवेदं महाप्रकरणं, तन्मध्ये “एष इमं लोकम्” इत्यारभ्य जीवावान्तरप्रकरणं, तन्मध्ये “विश्वामित्रं” इत्यादीन्द्रप्रकरणमिति वा, कस्यचिन्मुख्यप्राणपरत्वं, कस्यचिज्जीवपरत्वं, कस्यचिदिन्द्रपरत्वमिति विभागेन वा त्रितयपरत्वोपपत्तेः । न च “अर्थैकत्वादेकं वाक्यं” इत्यादेर्नानार्थकत्वे वाक्यभेददोषः, न्यायप्राप्तत्वेन सह्यत्वात् । उक्तं च सुधायां—“न च वाक्यभेदो दोषः, अनन्यगतिकतया प्राप्तत्वात्” इति । अत्रोक्तपक्ष-

चन्द्रिका

नन्वथापि "प्राचीनोऽप्यन्यः" इति प्रयोजनोक्तिरयुक्ता, आकाशाधिकरणे पूर्वपक्षबीजभूताया भूते प्रसिद्धेर्वाक्यद्वयेऽपि तुल्यतया "आकाशः" इति वाक्ये भूतपरत्वे "यदेषः" इति वाक्येऽपि तत्परत्वमिति प्रयोजनसम्भवेऽपि, अत्र प्राचीनपूर्वपक्षादत्रत्यपूर्वपक्षे प्राणस्याविष्णुत्वे यो विशेषहेतुः, तदभावादेव च प्राचीनप्राणस्य

प्रकाशः

त्रये तृतीय एवाभिमत इति भाति, सूत्रे त्रयस्याऽपि पूर्वपक्षितत्वात्, टीकादौ त्रितयप्रापकस्यापि निरवकाशत्वोक्तेः, वाक्यभेदाङ्गीकाराच्चेति। ननुतर्ह्यनेकप्रापकसत्त्वात् सर्वानुग्रहार्थमिन्द्रादीनां विष्ण्वभेदमेवाशङ्क्य समाधानं कुतो न क्रियेत, वाक्यभेददोषस्याप्यभावादिति चेन्न, भेदस्यासूत्रितत्वात्। अन्तरधिकरण एवेन्द्रादिदेवतैक्यस्य निरासात्। उक्तरीत्याऽन्यप्रापकाणां बलवत्त्वात्, विष्णुप्रापकाणां तदभावाभिमानात्तौल्याभावेनाभेदकल्पकोभयान्यथानुपपत्तेरभावाच्चेति। एवं पूर्वपक्षोत्थानं निरवकाशप्रापकोक्त्या समर्थ्येदानीं यद्वाप्यकारोक्तं 'अयं प्राणोऽन्यश्चेत्, "तद्वै त्वं प्राणः"इत्युक्तोऽप्यन्यः स्यात् इति पूर्वोक्ताक्षेपः पूर्वपक्षे फलं, सिद्धान्ते च तत्समाधानम्' इति, तत्र पूर्वपक्षे प्रयोजनोक्तिं समर्थयितुमाक्षिपति—**नन्विति**। ननु यथा "आकाश इति होवाच" इत्यत्र आकाशस्य भूतत्वे "यदेष आकाशः" इति निर्णीतब्रह्मप्रकरणगतस्याप्याकाशस्यान्यत्वं पूर्वपक्षफलं, तथाऽत्र किं न स्यादित्यत आह—**आकाशेति**। **य इति**। निरवकाशश्रुतिलि-

चन्द्रिका

तत्रत्यसिद्धान्तन्यायेन विष्णुत्वोपपत्तेरिति चेत्, मैवम्, यथा प्राभाकरमते कामिनियोज्यान्वयबलाल्लिङादेः स्थायिकार्यार्थत्वे निश्चिते तदन्वयशून्येऽपि नित्याधिकारे तदर्थता, यथा वा मतान्तरे वाक्यशेषेण क्वचिद्यवादिशब्दानां दीर्घशूकाद्यर्थत्वे निश्चिते अन्यत्रापि

प्रकाशः

ङ्गबाहुल्यरूपः । **तत्रत्येति** । निरवकाशश्रीपतित्वादिलिङ्गेनेत्यर्थः । 'एकत्र निर्णीतश्शास्त्रार्थः सर्वत्र' इति न्यायादत्रत्यस्यान्यत्वेऽन्यत्रापि तथा भवितव्यमित्येतत्सदृष्टान्तमाह---**यथेति** । "स्वर्गकामो यजेत" इत्यादौ स्वर्गकामं नियोज्यं प्रति क्रिया लिङादिशब्देन कार्यतया बोधयितुमशक्या । कामी हि काम्यादन्यत्काम्याव्यवहितसाधनमेव कार्यतयाऽवैति, न तु व्यवहितसाधनम् । क्रिया चास्थायित्वेन काम्यव्यवहितत्वात् न कामिनियोज्यान्वययोग्या । तृप्तिकामस्य व्यवहितसाधने पाके कार्यताधीस्तु न तृप्तिकामितया, किन्तु तृप्तिसाधनौदनकामितयैव, अन्यथा सिद्धान्नस्यापि तृप्तिकामस्य व्यवहितसाधने पाके कार्यताधीस्स्यात् । अतः फलपर्यन्तस्थाय्यपूर्वमेव लिङा कार्यत्वेन बोध्यमित्यपूर्वं लिवङ्वाच्यमिति कामाधिकारो नियोज्यान्वयसामर्थ्याल्लिङादेः स्थाय्यपूर्वशब्दितकार्यार्थत्वे निश्चिते "अहरहः सन्ध्यामुपासीत" इत्यादौ नित्ये कर्मणि काम्याश्रवणेन नियोज्यान्वयशून्येऽपि 'एकत्र निर्णीतः शास्त्रार्थः परत्र' इति तत्रापि तथैवाङ्गीकृतं, तद्वदित्यर्थः । **यथा वेति** । 'मतान्तरे,'

प्रकाशः

भाट्टादिमते। यववराहाधिकरणमुक्तं जन्माधिकरणे। "यवमयश्चरुर्भवति" इत्यादौ "यत्रान्या ओषधयोम्लायन्ते एते मोदमाना इवोत्तिष्ठन्ति" इति वाक्यशेषाद्दीर्घशूकार्थत्वे निश्चिते, 'यवान् पच यवैर्यज' इत्यादौ यथा तदर्थत्वं, तद्वदित्यर्थः। ननु 'एकत्र निर्णीतः' इत्यस्यानुसरणेऽपि न प्रयोजनोक्तिर्युज्यते, ऐतरेयके यथा वाय्वादि त्रितयप्रापकसत्त्वेन त्रितयपरत्वमुपेयते, तथा विष्णुलिङ्गादेरपि सत्त्वेन तत्परत्वस्यापि सम्भवात्तत्रान्तर्नये अभेदनिरासेन विष्णोरिन्द्रादिना ऐक्यायोगेऽपि चतुर्थपादीयोदाहरणेषु "अव्यक्तात्पुरुषः परः" इत्यादिषु मुख्यतो विष्णुपरत्वममुख्यतोऽन्यपरत्वमप्यङ्गीकृतं, अन्यथा तारतम्याद्यसिद्धेः, तद्वदत्रापि मुख्यतो विष्णुपरत्वेऽप्यमुख्यवृत्त्येन्द्रादिपरत्वाङ्गीकारमात्रेणापि इन्द्रादिलिङ्गाद्युपपत्तेः प्राक्तनस्याऽपि मुख्यतो विष्णुपरत्वस्य वा, इन्द्रादिलिङ्गानां बलवत्त्वेनात्र मुख्यत इन्द्रादिपरत्वेऽप्यमुख्यवृत्त्या विष्णुपरत्वेन पूर्वतनस्याप्यमुख्यतो विष्णुपरत्वस्य वा, विष्णुतदन्यप्रापकसत्त्वाविशेषेण मुख्यवृत्त्या उभयपरत्वस्यात्रैतरेयके सम्भवेन प्राचीनस्यापि मुख्यत उभयपरत्वस्य वा, ऐतरेयगतस्य प्राणस्य मुख्यवृत्त्येन्द्रादिपरत्वेऽपि तैत्तिरीयगतस्य मासाग्निहोत्रे अग्निहोत्रशब्दस्येव गौण्या वृत्त्या विष्णुपरत्वस्य वा, पूर्वत्र श्रीपतित्वादिविष्णुलिङ्गेन विष्ण्वर्थत्वस्य निश्चितत्वेनात्रापि तदर्थत्वापत्त्या वैपरीत्यस्यैव वा सम्भवेन पञ्चधा विष्णुपरत्वाक्षेपायोगादित्याशङ्क्या-

चन्द्रिका

तदर्थता, तथाऽत्र इन्द्रादिलिङ्गात् प्राणशब्दस्येन्द्राद्यर्थत्वे निर्णीते "तद्वै त्वं प्राणः" इत्यत्रापि तदर्थत्वात् । न चात्रामुख्यवृत्त्या इन्द्रादिपरत्वेऽपि तल्लिङ्गोपपत्तिः, "तद्वै त्वं प्राणः" इत्यत्र तु मुख्यवृत्त्या विष्णुपरताऽस्त्विति वाच्यम्, अत्रेन्द्रादौ मुख्यत्वे बाधकाभावात् । न च विष्णौ मुख्यत्वमेव बाधकम्, तस्याद्याप्यसिद्धेः । इन्द्रादौ योगसम्भवात् मुख्यप्राणे रूढेरपि सत्त्वाच्च । पूर्वपक्षे सर्वत्रापि वैदिकप्रयोगे प्राणशब्दस्येन्द्रादिपरत्वेन विष्णौ विद्वद्रूढेः तद्व्याप्यमहायोगस्य चाभावाच्च । न चात्र मुख्यवृत्त्या इन्द्रादि-

प्रकाशः

द्यं तावन्निरस्यति—**न चात्रेति** । ऐतरेयक इत्यर्थः । **बाधकाभावादिति** । "अव्यक्तात्पुरुषः" इत्यादौ अन्यस्य मुख्यत्वे बाधकं वक्ष्यत इति भावः । ननु प्रागुक्तरीत्या प्राणशब्दस्य विष्णौ मुख्यत्वं वा, इन्द्रादौ योगरूढ्योरसत्त्वं वा, विष्णौ प्रयोगबाहुल्यलब्धविद्वद्रूढिमहायोगसत्त्वं वा बाधकमित्याशङ्क्य क्रमेण निरस्यति—**न चेति** । **अद्यापीति** । प्रागुक्तस्यापीहाक्षेपादिति भावः । **योगेति** । प्रणेतृत्वादेः खण्डितैश्वर्ययुतेऽपि सत्त्वादिति भावः । **सर्वत्रेति** । "प्राणस्य प्राणः" "प्राण एवाकरणः" इत्यादौ । **तद्व्याप्येति** ।

विद्वद्रूढिर्वैदिकास्यात् सा योगादेव लभ्यते ।

इत्युक्तेरिति भावः । द्वितीयपक्षं निरस्यति—**न चात्रेति** । ऐतरेये

चन्द्रिका

परत्वेऽपि पूर्वत्रामुख्यवृत्त्या विष्णुपरता सिद्धान्तिनेष्यते । न चेन्द्रादौ विष्णौ च मुख्यता, सत्यां गतावनेकार्थत्वस्यान्याय्यत्वात् । न च वाक्यद्वयस्थप्राणशब्दस्य मुख्यवृत्त्यैकार्थत्वे पूर्वपक्षिणं प्रति बाधकमस्ति, येन मासाग्निहोत्रे अग्निहोत्रशब्दस्येव, तत्र विष्णौ

प्रकाशः

मुख्यवृत्त्येन्द्रादिपरत्वेऽप्यमुख्यतो विष्णुपरत्वाङ्गीकारेण प्राचीनस्य तथात्वं सिद्धान्तिनोऽनभिमतमित्यर्थः । तृतीयं निरस्यति—**न चेन्द्रादाविति** । अस्य प्राक्तनस्य चेत्यर्थः । ननु 'राजा कुवलयोल्लासी' इत्यादाविव किं न स्यादित्यत आह—**न चेति** । तत्र वक्तृविवक्षादिविरोध इव प्रकृते बाधकाभावादिति भावः । यद्वाऽस्य मुख्यवृत्त्येन्द्रादिपरत्वेऽपि गौण्या वृत्त्या प्राचीनो विष्णुः स्यादिति चतुर्थं पक्षं दृष्टान्तवैषम्योक्त्याऽपाकरोति—**न च वाक्येति** । ऐतरेयतैत्तिरीयस्थेत्यर्थः । सप्तमे "उक्तं क्रियाभिधानं तच्छ्रुतावन्यत्र विधिप्रदेशः स्यात्" इति तृतीयपादीयाद्याधिकरणे कुण्डपायिनामयने श्रुतं "मासमग्निहोत्रं जुहोति" इति वाक्यमुदाहृत्य, किमग्निहोत्रशब्दो नैयमिकाग्निहोत्रधर्माणामतिदेशको नेति संशये, उभयत्रापि जुहोतिसामानाधिकरण्येन निर्देशाविशेषात् नामधेयत्वेन मुख्यत्वान्न धर्माणामतिदेशक इति प्राप्ते, एकत्र मुख्यत्वेऽन्यत्र गौणत्वेनाप्युपपत्तावुभयत्र शक्तिकल्पनस्यान्याय्यत्वात्, नित्याग्निहोत्रे अग्नये होत्रमस्मिन्निति प्रवृत्तिनिमित्तस-

चन्द्रिका

प्राणशब्दस्य गौणता स्यात् । अत एव चानुव्याख्याने पूर्वपक्षे "अन्यस्य मुख्यवाच्यत्वम्" इत्युक्तम् । न च तत्र श्रीपतित्वादिलिङ्गात् प्राणशब्दस्य विष्ण्वर्थत्वे निश्चितेऽत्रापि तदर्थतेति विपरीतं किं न स्यादिति शङ्क्यम्, प्राणसंवादोत्क्रमणप्रवेशादीनां बहुत्वात्, श्रुत्यनुगृहीतत्वात्, साक्षात्प्राणविशेषणत्वश्रवणाच्च । श्रीपतित्वादि-

प्रकाशः

म्भवेन नैयमिके मुख्यत्वादन्यत्र तत्सादृश्यविधित्सया गौण इति तद्धर्मातिदेशक इति सिद्धान्तितम् । तत्र यथा नैयमिकमासाग्निहोत्रयोः प्रकरणभेदेन भेदस्य द्वितीये निश्चितत्वान्मासाग्निहोत्रे प्रवृत्तिनिमित्ताभावेनानेकार्थस्यान्याय्यत्वेन च बाधकेन गौणत्वमुक्तम् । न च तथाऽत्र किञ्चिद्बाधकमस्ति, प्रत्युतैकार्थत्वं अमुख्यप्रवृत्तिकत्वं चाश्रितं भवतीत्यर्थः । **अत एवेति** । वाक्यद्वयस्थप्राणशब्दस्य मुख्यवृत्त्यैकार्थत्वे बाधकाभावादेव ।

......................बाहुल्याच्छ्रुतिलिङ्गयोः ।

अन्यस्य मुख्यवाच्यत्वमिति तन्मात्रगस्य हि ।

इत्युक्तमित्यर्थः । इदमाद्यपक्षेऽपि ज्ञापकतया योज्यम् । पञ्चमं पक्षमनूद्य निरस्यति—**न च तत्रेति** । **प्राणेति** । "अहमुक्थमस्मि" इति प्राणशब्दितेन्द्रियैस्संवादः, "तत्प्राणे उत्क्रान्तेऽपद्यत, तत्प्राणे प्रपन्न उदतिष्ठत्" इत्युत्क्रमणप्रवेशौ तन्निमित्तदेहपातोत्थानशतसंवत्सरत्वप्राणवंशत्वादीनामित्यर्थः । **श्रुतीति** । इन्द्रेण

चन्द्रिका

लिङ्गानां तु वैपरीत्यात् पूर्वस्याविष्णुत्वशङ्कामात्रेण विष्णुत्वनिश्चयाक्षेपसम्भवाच्च । अत एव टीकायां शङ्कापदप्रयोगः । अन्यथा "प्राचीनप्राणोऽप्यन्य एव स्यादेकप्रकरणत्वात्" इत्युत्तराधिकरणप्रयोजनटीकायामिव अत्रापि 'अन्य एव स्यात्' इत्यवक्ष्यत् ।

प्रकाशः

प्रयुक्ताहमादिश्रुतीत्यर्थः । **वैपरीत्यादिति** । अबहुत्वात्, प्राणश्रुतेः सन्दिग्धत्वेनानुग्राहकश्रुत्यन्तराभावात्, "अङ्गचस्सम्भूतः" इत्यनुवाकान्तरगतत्वेन साक्षादश्रवणादित्यर्थः । ननु तत्रापि—

तमेव मृत्युममृतं तमाहुस्तं भर्तारं तमु गोप्तारमाहुः ।

"यस्तद्वेद" "ब्रह्मणैष रमते" "ह्रीश्च ते लक्ष्मीश्च पत्न्यौ" इत्यादीनामपि बहूनां ब्रह्मलिङ्गानां सत्त्वात्, "हरिं हरन्तमनुयन्ति देवाः" इति हरिश्रुत्याऽनुगृहीतत्वात्, अमृतत्वादीनां तद्विशेषणत्वश्रवणाच्च कथं वैपरीत्यमिति चेत्सत्यं, भाष्योक्तश्रीपतित्वादिस्पष्टलिङ्गाभिप्रायेणैवमुक्तिः, तस्य चोक्तवैपरीत्यसम्भवादिति । यद्वा—एतदरुच्यैव टीकोक्तं पक्षान्तरमाह—**पूर्वस्येति** । माऽस्तु नाम प्राचीनोऽपीन्द्रादिरेवेत्यवधारणं, तथाऽप्यत्रत्यप्राणशब्दस्येन्द्रादित्वे प्राचीनोऽपीन्द्रादिर्वा विष्णुर्वेति संशयसम्भवात् तन्मात्रेण विष्णुरेवेत्यवधारणाक्षेपसम्भवादित्यर्थः । **शङ्केति** । तस्य विष्णोरन्यत्वे प्राचीनोऽप्यन्य इति शङ्का स्यादिति शङ्कापदप्रयोग इत्यर्थः । ज्ञापकत्वं व्यनक्ति—**अन्यथेति** । नन्वेवं "तद्वै त्वं प्राणः" इत्यत्र

चन्द्रिका

एकस्य निर्णयस्य अनेकन्यायसाध्यत्वेऽपि निर्णयविरोधितत्तत्पूर्वपक्षन्यायाभासनिरासकन्यायसाध्यावान्तरनिर्णयभेदादधिकरणभेदश्च युक्तः, यथा प्राभाकरमते चोदनाप्रामाण्यनिर्णयस्य आद्याध्यायमात्रसाध्यत्वेऽपि अवान्तरनिर्णयभेदादधिकरणभेदः,

प्रकाशः

प्राणो विष्णुरन्यो वेति संशयस्यात्यत्रसिद्धान्तन्यायेनोत्पन्ननिर्णयेनैव निरासस्सम्भवेन तत्रत्यसिद्धान्तो व्यर्थः। अतो न तस्य विष्णुत्वावधारणमेतत्सिद्धान्तफलं भवितुमर्हतीत्यतः सिद्धान्तप्रयोजनं च साधयति—**एकस्येति । अवान्तरनिर्णयेति ।** प्राणपदप्रवृत्तिनिमित्तस्य जीवनहेतुत्वस्य विष्णुगतत्वनिर्णयस्तत्रत्यन्यायसाध्यः, अन्यगतत्वेन प्रसिद्धलिङ्गानां अन्तर्यामिगतत्वनिर्णयोऽत्रत्यन्यायसाध्यः, उभाभ्यां सर्वत्र प्राणशब्दार्थो विष्णुरेवेति निर्णयः साध्य इत्यर्थः । **यथा प्राभाकरमत इति ।** भट्टमते श्रुतिस्मृत्यादिसाधारण्येन धर्मप्रमाणविचारः आद्याध्यायस्यार्थः, प्राभाकरमते चोदनाप्रामाण्यमात्रविचार इति व्यवस्था । तत्र "चोदनालक्षणोऽर्थो धर्मः" इत्युक्तचोदनाप्रामाण्यनिर्णयस्याध्यायार्थत्वेऽप्यर्थवादाधिकरणे सापेक्षत्वमूलकाप्रामाण्यशङ्कानिरासपूर्वकः प्रामाण्यनिर्णयः, विधिवन्निगदाधिकरणे तु एकेन वाक्येन औदुम्बरत्वसम्बन्धफलसम्बन्धरूपसम्बन्धद्वयविधानाशक्तिमूलकाप्रामाण्यशङ्कानिरासपूर्वकस्तन्निर्णय इत्यवान्तरनिर्णयभेदाद्यथाऽधिकरणभेदस्तथेत्यर्थः ।

चन्द्रिका

यथा वा मतान्तरे "ऊर्जं पशूनाप्नोति" "न स पापं श्लोकं शृणोति" इत्यादेरर्थवादत्वनिर्णयस्य औदुम्बराधिकरणपर्णमय्यधिकरणसाध्यत्वेऽप्यवान्तरनिर्णयभेदादधिकरणभेदस्तद्वत् ।

प्रकाश

यथा वेति । भट्टमत इत्यर्थः । आद्ये "विधिर्वा स्यादपूर्वत्वाद्वादमात्रं ह्यनर्थकम्" इति द्वितीयपादीयद्वितीयाधिकरणे "औदुम्बरो यूपो भवत्यूर्ग्वा उदुम्बर ऊर्क् पशवः ऊर्जैवास्मा ऊर्जं पशूनाप्नोति ऊर्जोऽवरुध्यै" इति वाक्यमुदाहृत्यात्र 'ऊर्जोऽवरुध्यै' इत्येतदौदुम्बरतायाः फलसमर्पकमुतार्थवाद इति संशये, "ऊर्जोऽवरुध्यै" इति तादर्थ्ये चतुर्थीश्रुत्योर्क्शब्दितानां पशूनां साध्यत्वावगमात्साध्यस्य साधनापेक्षित्वात्संनिहितमौदुम्बरत्वमसत्यपि विधौ साधनमेवेति फलसमर्पकमेतदिति प्राप्ते, विध्यभावे उदुम्बरताभवनाक्षिप्तभावनां प्रति सन्निहितत्वेन तस्या एव भाव्यत्वात्फलस्य विप्रकृष्टत्वेनाभाव्यत्वात्तस्यार्थवादत्वमुपेत्यैव विधेरुन्नेयत्वादर्थवाद एव, न फलसमर्पकं "ऊर्जोऽवरुध्यै" इत्येतदिति सिद्धान्तितम् । तथा चतुर्थे "द्रव्यसंस्कारकर्मसु परार्थत्वात् फलश्रुतिरर्थवादः" इति तृतीयपादीयाद्याधिकरणे "यस्य पर्णमयी जुहूर्भवति न सपापं श्लोकं शृणोति" इत्युदाहृत्य, पर्णमयीत्वं क्रत्वर्थमुत पुरुषार्थमथोभयार्थमिति सन्दिह्य, फलश्रवणात् पुरुषार्थमेव, यद्वा—क्रत्वर्थजुहूद्देशेन विधानात्

चन्द्रिका

तस्मात्प्रयोजनोक्तिर्युक्ता । एवमन्यत्राऽपि पूर्वोक्ताक्षेपेण प्रयोजनोक्तिरुपपाद्या ।

प्रकाशः

क्रत्वर्थं, फलश्रवणात् पुरुषार्थं चेति दध्यादिवदुभयार्थमिति द्वेधा पूर्वपक्षयित्वा, संयोगपृथक्त्वाभावेन दध्यादिवदुभयार्थत्वाभावात् 'शृणोति' इति वर्तमानापदेशेन अपापश्लोकश्रवणस्य साध्यत्वाप्रतीतेः पुरुषार्थत्वस्याप्ययोगात् क्रत्वर्थमेव, अपापश्लोकाश्रवणं त्वर्थवाद इति सिद्धान्तितम् । अत्रोभयत्रापि "ऊर्जोऽवरुध्यै" "न स पापं" इति अनयोरर्थवादत्वनिर्णयाविशेषेऽप्यौदुम्बराधिकरणे उदुम्बरतायाः विध्यभावेन साधनत्वाभावमूलकोऽर्थवादत्वनिर्णयः, पर्णमय्यधिकरणे तु अपापश्लोकश्रवणस्य वर्तमानापदेशेन साध्यत्वाभावमूलक इत्यवान्तरनिर्णयभेदादधिकरणभेदस्तथेत्यर्थः । "ऊर्जं पशूनाप्नोति" इत्येतत् "ऊर्जोऽवरुध्यै" इत्यस्योपलक्षणार्थम् । यद्वा—भाष्यवार्तिकादौ शाखान्तरवाक्योक्त्या विचारकरणेऽपि प्रसिद्धशाखायामाप्नोतीत्यन्तवाक्यश्रवणेन तस्य शृणोतीत्यन्तवाक्येन तुल्यविचारत्वमावश्यकमिति दर्शयितुमाप्नोतीत्यन्तमुक्तम् । आक्षिप्तां प्रयोजनोक्तिमुपपाद्योपसंहरति—**तस्मादिति** । **अन्यत्रापीति** । अन्तराद्यधिकरणेष्वित्यर्थः । उपपादितं चैतत्तत्रतत्र, उपपादयिष्यते चोत्तरत्राऽपि । नन्वन्यदेव किञ्चित्प्रयोजनमुच्यतां, किं पूर्वोक्तप्राणाक्षेपोपपादनक्लेशेनेत्यतोऽवश्यं चैतत्, अन्यथा तृतीयपादे स-

चन्द्रिका

एवं च "अत एव प्राणः" इत्यत्र तैत्तिरीयस्थप्राणशब्दसमन्वये उक्तेऽपि अत्र पूर्वपक्षे ऐतरेयवाक्यस्थप्राणस्याविष्णुत्वेन तैत्तिरीयस्थस्यापि विष्णुत्वाक्षेपादुभयत्रप्रसिद्धत्वाभावः प्राणशब्दस्य। "आकाशोऽर्थान्तरत्वादिव्यपदेशात्" इत्यत्र तु "आकाशस्तल्लिङ्गात्" इत्यत्रोक्तस्य "आकाश इति होवाच" इति वाक्यस्थाकाशशब्दो ब्रह्मपर इत्यस्यानाक्षेपादुभयत्रप्रसिद्धत्वम्। अत एव तत्र टीकायां पादान्तरस्थं "तल्लिङ्गात्" इत्यधिकरणं अनाक्षिप्य एकपादस्थद्युभ्वाद्यधिकरणमेव आक्षिप्तम्।

प्रकाशः

मन्वीयमानाकाशशब्दस्येव पूर्वोक्तन्यायान्यत्रप्रसिद्धिभ्यां प्राणशब्दस्योभयत्रप्रसिद्धतापत्त्याऽऽस्याधिकरणस्यैतत्पादासङ्गत्यापत्तेरित्याह—**एवञ्चेति**। यद्वा—प्रयोजनोक्तिं समर्थ्येदानीं पूर्वोक्त्यन्यत्रप्रासिद्धिभ्यां आकाशशब्द इवात्राप्युभयत्रप्रसिद्धतापत्त्याऽत्रासङ्गतिमाशङ्क्य पादसङ्गतिं साधयति—**एवञ्चेति**। एवमाक्षेपे उभयत्रप्रसिद्धता नेत्येतद्व्यतिरेकमुखेनाह—**आकाश इति**। **अत एवेति**। उभयत्रप्रसिद्धार्थत्वलाभादेवेत्यर्थः। अन्यथाऽयमाकाशोऽन्यश्चेत्प्रागुक्तोऽप्यन्यस्स्यादित्येवोच्येत, स च विष्णोरितरश्चेत् सर्वाधारत्वमप्यन्यस्य प्रसज्यत इति नोच्येतेति भावः। 'पादान्तर' इति, 'एक' इति च हेत्वन्तरम्। यद्येवं प्राणशब्दस्योभयत्रप्रसिद्धत्वाभावस्तर्हि ज्योतिश्शब्दस्यापि उक्तन्यायेन तदभावापत्त्या तृतीये निवेशो न स्यादि-

चन्द्रिका

नन्वेवं सति "ज्योतिर्दर्शनात्" इत्यत्र टीकायां'—"तच्च ज्योतिर्यदि विष्णोरन्यत्तदा "ज्योतिश्चरणाभिधानात्" इति पूर्वोक्तमप्यन्यत्स्यात्' इत्युक्तत्वात् अग्निसूक्तेऽपि ज्योतिश्शब्दस्य पूर्वपक्षे विष्णुपरत्वाभावादुभयत्रप्रसिद्धत्वाभावात्तस्य तृतीयपादसङ्गतिर्न स्यादिति चेत्, मैवम्, न हि "ज्योतिर्दर्शनात्" इत्यत्र ज्योतिर्वह्निरिति पूर्वपक्षः, येन वह्नौ प्रसिद्धेः स्वतः सिद्धत्वेनान्यत्रप्रसिद्धता, उभयत्रप्रसिद्धता तु क्वचिद्विष्णुपरत्वेन साध्या स्यात्। किन्तु जीव इति पूर्वपक्षः। न च जीवे स्वतः प्रसिद्धिरस्ति। ज्ञानात्मकत्वात्तु जीवे प्रवृत्तिः। तच्च जीववदीश्वरेऽप्यस्तीति उभयत्रप्रसिद्धता "ज्योतिर्दर्शनात्" इत्यत्र।

प्रकाशः

त्याशङ्कते—**नन्वेवमिति**। **तृतीयेति**। आद्य एव स्यादित्यर्थः। तत्र पूर्वोक्त्यन्यत्रप्रसिद्धिस्यां नोभयसाधारण्यं, किन्तु प्रवृत्तिहेतुसाधारण्याश्रयेण। अतः पूर्वोक्ताक्षेपेऽपि न क्षतिरिति समाधत्ते—**मैवमिति**। एवं तर्हि कथमाद्ये ज्योतिश्शब्दसमन्वय इत्यत आह—**ज्योतिश्चरणेति**। तत्र लोकत एव प्रसिद्धिसत्त्वादिति भावः। ननु यदि प्रागुक्तानाक्षेपेण "आकाशोऽर्थान्तर" इत्यत्रोभयत्रप्रसिद्धता, तर्हि चतुर्थपादे समन्वीयमानयोः 'कारणत्वेन चाकादिषु यथा व्यपदिष्टोक्तेः" "ज्योतिरुपक्रमात्" इत्याकाशज्योति-

चन्द्रिका

"ज्योतिश्चरण" इत्यत्र तु वह्निरिति पूर्वपक्षितत्वादन्यत्रप्रसिद्धता। "कारणत्वेन" इत्यत्र "ज्योतिरुपक्रमात्" इत्यत्र च पूर्वपक्षे पूर्वोक्ताया आकाशज्योतिश्शब्दयोर्विष्णुपरताया अनाक्षेपेऽपि, तत्र प्रागनुक्तसमन्वयस्यावान्तरकारणत्वरूपस्य लिङ्गस्य ओषध्यादिनाम्नो ज्योतिष्टोमवसन्तादिशब्दस्य च समन्वयोक्तेर्न तयोरुभयत्रप्रसिद्धपादान्तर्भावप्रसङ्गः। यद्वा—प्राणादिशब्दानां प्राक्समन्वयोक्तावपि, लोकसिद्धया अन्यत्रप्रसिद्ध्या अन्यत्रप्रसिद्धता। "आकाशोऽर्थान्तर" इत्यत्र त्वाकाशशब्दस्य न पूर्वं समन्वयोक्त्या उभयत्रप्रसिद्धता, किन्तु 'वै नाम' इति निपातद्योतितप्रसिद्धिव्यावर्थत्वेन पूर्वपक्षि-

प्रकाशः

श्शब्दयोरुभयत्रप्रसिद्धता स्यादित्यत आह—**कारणत्वेनेति**। **लिङ्गस्येति**। "अवान्तरं कारणं च" इत्यणुभाष्योक्तेरिति भावः। **ओषधीति**। "पृथिव्या ओषधयः" इत्यादि श्रवणादिति भावः। **ज्योतिष्टोमेति**। यागकालादिवाचिन इत्यर्थः। ननु 'पूर्वोक्त्यन्यत्रप्रसिद्धिभ्यां उभयत्रप्रसिद्धत्वम्, तच्चात्र प्राणशब्दे नास्ति, पूर्वोक्तेराक्षेपात्' इत्युक्तमयुक्तं, अयं प्राणोऽन्यश्चेत् प्राचीनोऽप्यन्य एव न विष्णुरित्याक्षेपायोगेन प्राचीनोऽन्यो वा विष्णुर्वेति शङ्कामात्रत्वात्, तस्य चोभयत्रप्रसिद्ध्याविरोधात् स्यादेव तथात्वं प्राणशब्दस्ये त्याशङ्क्य पक्षान्तरमाह—**यद्वेति**। ज्योतिश्शब्देऽपि प्रवृत्तिहेतुसाधारण्यस्य पूर्वपक्षिणोऽभिमतत्वादिति भावः। **वै नामेति**। नामरूपनिर्वहिता प्रसिद्धाकाश इत्युक्तौ न त्वन्योऽप्रसिद्धाकाश इति

चन्द्रिका

णाऽप्यप्रसिद्धस्य ब्रह्मरूपस्याकाशशब्दवाच्यस्याङ्गीकृतत्वेनेति ज्ञेयम्। तस्मात्पादसङ्गतिः पूर्वपक्षोदयश्च ॥

सिद्धान्तस्तु—"तं देवाः प्राणयन्त" इति देवोपदेश्यत्वं, "तं भूतिरिति देवा उपासां चक्रिरे" इति भूतित्वेन देवोपास्यत्वं, "सर्वे वेदाः" इति सर्ववेदप्रतिपाद्यत्वं, "प्राणो ह्येष य एष तपति" इति सूर्यमण्डलस्थत्वं, "प्राणस्त्वं प्राणः सर्वाणि भूतानि" इति सर्वान्तर्यामित्वं, "सर्वाणि भूतान्यापिपीलिकाभ्यः प्राणेन बृहत्या विष्टब्धानि" इति सर्वव्यापित्वमित्यादीनि प्राणे श्रूयन्ते।

प्रकाशः

गम्यते। न च तदनङ्गीकारे प्रसिद्धाकाश एव तन्निर्वहितेत्युक्तिर्युज्यत इत्यर्थः। चशब्दात् 'प्रयोजनं च युज्यते' इति शेषः।

एवं निरवकाशलिङ्गादिभिः पूर्वपक्षे कृते ततोऽपि प्रबलनिरवकाशविष्णुलिङ्गादिबाहुल्येन सिद्धान्तोत्थितिमाह—**सिद्धान्तस्त्वाति**। 'तं' प्राणं देवाः शिष्यादिषु सम्यङ्नीतवन्त इत्यर्थः। "स एषोऽसुः स एष प्राणः" "एष भूतिश्चाभूतिश्च" "तं भूतिरिति देवा उपासांचक्रिरे" इत्यत्र देवोपास्यत्वं, "सर्वे वेदास्सर्वे घोषाः एकैव व्याहृतिः प्राणः एव" इत्यत्र सर्ववेदोक्तत्वमित्यर्थः। **इत्यादीनीति**। 'लिङ्गानि' इति शेषः। उपलक्षणमेतत्, "ब्रह्मेमं पुरुषं" "उदरं ब्रह्म" इत्यादिब्रह्मशब्दाभ्यासोऽपि ध्येयः। ननु पूर्वपक्षेऽपि लिङ्गबाहुल्यसत्त्वात्कथं निर्णय इत्यतः, तानि सावकाशयि-

चन्द्रिका

तानि च "विष्णुमेवानयन् देवाः" इत्यादिभाष्योक्तस्मृत्या "सर्वे वेदा यत्पदमामनन्ति" "य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी" "पुरुष एवेदं सर्वम्"

अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ।

प्रकाशः

ष्यन्निरवकाशत्वमेषां साधयति—**तानि चेति** ।

विष्णुमेवानयन् देवा विष्णुं भूतिमुपासते ।
स एव सर्ववेदोक्तस्तद्व्यथो देह उच्यते ॥

इति स्कान्दवचनेनेत्यर्थः ।

सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण ब्रवीमि ॥

इत्युपक्रम्य "तद्विष्णोः परमं पदम्" इति काठकोक्तेः सर्ववेदोक्तत्वस्य विष्णोरवगम इत्यर्थः । सूर्यमण्डलमध्यस्थत्वं विष्ण्वेकनिष्ठमित्याह—**य एष इति** । छान्दोग्ये आदित्यान्तर्हिरण्मयपुरुषमभिधाय तस्य पुण्डरीकाक्षत्वलिङ्गोक्त्या विष्णुत्वावगतिरित्यर्थः । विस्तृतं चैतत् "अन्तः" इत्यत्रास्माभिः । सर्वव्यापित्वस्य विष्णुगतत्वे वाक्यद्वयमाह—**पुरुष इति** ।

पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम् ।

इति पुरुषसूक्ते सहस्रशीर्षत्वादिना प्रकृतस्य विष्णोरेव सर्वव्यापित्वमुच्यते, पुरुषसूक्तं च विष्णुपरमिति "तस्मिन् काले महाराजा" इत्यादिना प्रसिद्धमित्यर्थः । "अन्तर्बहिः" इति नाराय-

चन्द्रिका

इत्यादिश्रुतिभिः, "वेदैश्च सर्वैरहमेव वेद्यः" "ध्येयस्सदा सवितृ-मण्डलमध्यवर्ती"

तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च ।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥

इत्यादिभिस्स्मृतिभिश्च विष्णोरेव । परकीयश्रुत्यादिकं तु सावकाशम् । तथाहि—इन्द्रस्य प्रसिद्धेन्द्रत्वेऽपि तत्प्रयुक्ताहंशब्दस्तावत् "अहं

प्रकाशः

णोपनिषदि । आदिपदेन—

सर्वे वेदा युक्तयस्सुप्रमाणाः ब्राह्मं ज्ञानं परमं त्वेकमेव ।

"य आदित्ये तिष्ठन्" "सर्वं खल्विदं ब्रह्म" इत्यादि गृह्यते ।

वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम् ।

इति गीतावाक्येन, "ध्येयः सदा" इति नारसिंहपुराणवाक्येन,

तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च ।

इति

विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ।

इत्यादिगीतावचनेन च विष्णोरेव तानि लिङ्गानीत्यर्थः । तथा च प्राणो विष्णुरेव, तल्लिङ्गानामत्रानुगमादिति सूत्रार्थ उक्तो भवति । ननु पूर्वपक्षलिङ्गान्यपि निरवकाशानीत्युक्तमित्यतश्शास्त्रदृष्टिसूत्रता-त्पर्यमाह—**परकीयेति** । **प्रसिद्धेति** । वृत्रहन्तृत्वादेर्निरवकाशत्वादि-ति भावः । "तमिन्द्र उवाच प्राणो वा अहमस्मृषे" इतीन्द्रे-

चन्द्रिका

मनुः" इति वामदेवप्रयुक्ताहंशब्दवत् श्रुतितुल्यया निरूढया लक्षणया,

सर्वान्तर्यामिको विष्णुस्सर्वनाम्नाऽभिधीयते ।

एषोऽहं त्वमसौ चेति न तु सर्वस्वरूपतः ॥

इत्यादिस्मृतिभिर्मुख्यवृत्त्या वा अन्तर्यामिपरः । न च तत्रापि विवादः, विशिष्टस्य वामदेवस्य मन्वादित्वाभावात् । अहंमन्वादि-

प्रकाशः

ण प्रयुक्तोऽहंशब्दोऽन्तर्यामिपर इत्यन्वयः । लक्षणायां किं प्रयोजनमित्यतो 'मञ्चाः क्रोशन्ति' इत्यादौ मञ्चस्थपुरुषाभिप्रायेण मञ्चपदप्रयोगवन्निरूढत्वेन प्रयोजनानपेक्षणादिति भावेनोक्तं—**निरूढेति** । लक्षणैव दोष इत्यत उक्तं—**श्रुतीति** । "सर्वान्तर्यामिकः" इति आनन्दमयाधिकरणभाष्योदाहृतस्मृत्या,

तत्तन्नाम्नोच्यते विष्णुः सर्वशास्तृत्वहेतुतः ।

इत्येतद्भाष्योक्ताभिस्स्मृत्यादिभिश्चेत्यर्थः । ननु 'वामदेववत्' इत्ययुक्तं, तत्प्रयुक्तस्याहंशब्दस्य अन्तर्यामिपरत्वासिद्धेरित्याशङ्क्याद्याध्यायबृहद्भाष्यदिशा साधयति—**न च तत्रेति** । वामदेवप्रयुक्ताहंशब्दस्यान्तर्यामिपरत्वाभावे तस्यैव मन्वादिभिरैक्यं वाच्यम् । तच्च किं मुख्यतो विशिष्टस्यैवोत चिन्मात्रलक्षणया विशेष्यस्य । आद्यं निरस्यति—**विशिष्टस्येति** । द्वितीयं शङ्कते—**अहमिति** । यदि लक्षणया विशेष्यैक्यं, तर्हि दार्ष्टान्तिके इन्द्रप्रयुक्ताहंशब्दसामानाधिकरण्यात्प्राण इन्द्र इति पक्षे इन्द्रपदेन विशिष्टं, लक्षणया

चन्द्रिका

शब्दे चैतन्यमात्रलक्षणा चेत्, प्राण इन्द्र इति पूर्वपक्षे इन्द्रशब्देन विशिष्टोक्तौ विशिष्टेन्द्राभिन्नस्य प्राणस्य "प्राणस्त्वं प्राणः सर्वाणि" इति सार्वात्म्योक्तिरयुक्ता स्यात्। इन्द्रशब्देन शुद्धोक्तौ तु, प्राणस्य शुद्धब्रह्मत्वेन प्राणो न ब्रह्मेति पूर्वपक्षायोगः। "प्राणो ह्येष य एष तपति" इति पूर्ववाक्यायोगश्च । नहि चिन्मात्रं तापकम्। यद्यपि "अः इँति ब्रह्म तत्राऽऽगतमहमिति

प्रकाशः

विशेष्यमात्रं वा। आद्ये विशिष्टैक्यस्यानङ्गीकारेण विशिष्टेन्द्रात्मकस्य प्राणस्य सर्वाभेदोक्त्ययोगः। द्वितीये प्राणो न ब्रह्मेत्युक्त्ययोग इति पूर्वपक्षिणं प्रत्यनिष्टमाह—**प्राण इन्द्र इतीति**। विशेष्यैक्यमात्रमङ्गीकुर्वतः पूर्ववादिनस्तव पक्ष इत्यर्थः। "नहि मनुसूर्यादिर्भवति वामदेवस्तत्पक्षेऽपि" **इत्यैतरेयभाष्ये** दृष्टान्तेऽभिहितदोषं दार्ष्टान्तिकेऽप्याह—**इति सार्वात्म्येति**। इति पूर्ववाक्यायोग इत्युपलक्षणम्। "अत्र च "अहं भूमिमददामार्याय" इत्यादिना प्रवृत्तिरेवोच्यते। न हि वामदेवेन मन्वादिकर्म क्रियते कदापि" इत्याद्यैतरेयभाष्योक्तं च ग्राह्यम्। नन्वहंशब्दस्यान्तर्याम्यर्थकत्वमनुक्त्वैव प्रयोगबाहुल्येन विष्णावेव मुख्यत्वमुपेत्य विष्णुर्ब्रह्मेतिवदहं सर्वैरप्यहेयः परमात्मा प्राण इतीन्द्रेणोक्तमित्यपि समाधातुं शक्यत्वात् सूत्रादावन्तर्यामित्ववर्णनं किमर्थमित्याक्षिपति—**यद्यपीति**। तत्र ब्रह्मणि अहमितिपदं वाचकतयाऽवगतमित्यर्थः।

चन्द्रिका

तस्योपनिषदहमिति ततोऽहंनामाभवत्" इत्यादिश्रुतेः, "न वा अहमिमं विजानाति" इति, "अहं तत्तेजोरश्मीन्नारायणं पुरुषं जातमग्रतः" इत्यादिश्रौतप्रयोगात्, "अहेयत्वादहंनामा" इत्यादिस्मृतेश्च अहंशब्दोऽहेयत्वाद्यर्थेऽप्यस्ति। "न वा" इत्यादिश्रुतावहंशब्दस्यास्मच्छब्दत्वे हि 'विजानामि' इति स्यात्। "भूरिति शिरः" इत्यादिनाऽक्षिस्थो भगवान् हि तत्राहम्। तथाऽपीह प्राणे "प्राणो वा अहमस्मि" इत्युत्तमपुरुषश्रवणादन्तर्यामिपरतैवोक्ता।

प्रकाशः

'उपनिषत्' रहस्यं नामेत्यर्थः। रूढिमुक्त्वा योगं चाह—**अहेयत्वादिति।**

अहेयत्वादहंनामाऽस्म्यसनान्मनुतेरपि।
ततो वेत्तीति च त्वं स पूर्णत्वात्सर्वनामकः॥

इति ब्रह्माण्ड वचनात्,

अहंनामा हरिर्नित्यमहेयत्वात्प्रकीर्तितः।

इति श्रुतेश्चेत्यपि ध्येयम्। ननु "न वा अरे अहमिमं विजानाति" इति मैत्रेयीं प्रति याज्ञवल्क्योक्ते वाक्ये अहंशब्दस्याहेयत्वार्थत्वं कुत इत्यत आह—**न वा इतीति। उत्तमेति।** अन्यथा "प्राणो वा अहमस्ति" इति श्रूयेतेति भावः। ननु नेदमुत्तमपुरुषरूपं, किन्तु 'असनान्मनुतेरस्मि' इत्यैतरेयभाष्यदिशाऽर्थान्तरपरमेवेति चेत्सत्यं, अस्मीत्यस्योत्तमपुरुषत्वाहानेनैवैतद्भाष्यदिशा वाक्यमर्यादया अर्थान्तरवर्णनमेतदिति ध्येयम्। ननूक्त-

चन्द्रिका

चक्षुरादिसाहचर्यं तु सति संशये निर्णायकम् । उक्तं हि—"विशये प्रायदर्शनात्" इति । अत्र तूक्तलिङ्गादिना निश्चयान्न संशयः । प्राणसंवादोऽपि 'त्वमुक्थमसि त्वमिदं सर्वमसि तव वयं स्मः' इत्युत्कर्षपर्यवसायित्वादन्तर्यामिणि विष्णौ युक्तः । एवं च—

प्रकाशः

मत्राहंशब्दस्यान्तर्यामिणि मुख्यत्वे "तदात्मानमेवाऽवेदहं ब्रह्मास्मि" इत्यादावपि वाजसनेये तथा स्यादिति चेन्न, तत्र बाधेनान्तर्याम्यर्थत्वास्वीकारादिति भावः । एवमिन्द्रप्रापकं विष्णौ सावकाशमिति समर्थ्य वायुलिङ्गान्यपि तथेत्याह—**चक्षुरिति** । यदुक्तं गोदोहनसाहचर्यात् वत्सालम्भनं गुणकर्मेतिवत् अप्रधानसाहचर्यात् प्राणोऽप्रधान इति, तन्न, वैषम्यात् । प्राणो विष्णुरन्यो वेति संशये सत्येव, साहचर्यस्य निर्णायकत्वात् । इह च निरवकाशविष्णुलिङ्गादिना निर्णयसम्भवान्नायं तन्न्यायस्य विषय इत्याह—**विशय इति** । संशये प्रायशब्दितसाहचर्यदर्शनान्निर्णय इत्येव जैमिन्याचार्यैरुक्तमित्यर्थः । हि शब्देन मीमांसकसंमतिमाह । 'त्वमुक्थमसि' अस्माकमुत्थापकोऽसि । अस्य सर्वस्य त्वमेवेशोऽसि, वयं तव दासाः स्मः, त्वमस्माकं स्वाम्यसीत्युत्तरवाक्यस्योत्कर्षपर्यवसायित्वात् स्वस्योत्तमताप्रकाशनायेव निकृष्टैः तेषु अन्तःस्थित्वा संवादमकरोदित्यर्थः । एतेन "लिङ्गानां तदन्तर्यामिभगवद्विषयतयोपपत्तेः" इति टीका विवृता । ननु विष्णोः संवादादिवेलायामौदासीन्यावगतेः कथं

चन्द्रिका

प्राणलिङ्गादिकं यद्यप्यवकाशोज्झितं स्वतः ।
तथाऽप्यन्तर्यामिगततया नेतुं हि शक्यते ॥
"उदासीनौ च तावास्तां केशवश्चाब्जसम्भवः ।"

इत्यौदासीन्यं तु बाह्यरूपेण ।

प्रकाशः

संवादकर्तृत्वं अन्तर्यामितयाऽपीत्यत आह—**उदासीनाविति** । यथोक्तं तृतीयस्कन्धतात्पर्ये सप्तविंशेऽध्याये —

यज्ञान्तस्थः स्वयं पादौ विशन्नोत्थापयद्धरिः ।
शक्तोऽपि ब्रह्मवाय्वोस्तु बलज्ञप्त्यै जनार्दनः ।
तत्स्थ उत्थापयामास ब्रह्मदेहं विशन् प्रभुः ।

इति अन्तर्यामिभिन्नप्रपदद्वाराप्रविष्टरूपाभिप्रायं, न त्वन्तर्यामिरूपविषयं, "न ऋते त्वत्क्रियते" इत्यादिवचनविरोधादित्यर्थः । ननु कथं चतुर्मुखस्य देहधारणादौ औदासीन्योक्तिः, अष्टमे बृहदारण्यकभाष्ये—

प्राणं विना न च ब्रह्मा तं विना प्राण एव च ।
अन्योन्यापाश्रयाच्छक्तौ स्थातुमन्ये कुतस्ततः ॥

इत्यादिवामनस्मृत्या प्राणस्योत्क्रमणे सति ब्रह्मणोऽवस्थान एव शक्त्यभावोक्तेरिति, मैवं, अंशेन प्राणेन सह निर्गतस्याप्यंशेन देहेऽवस्थानसम्भवात्, औदासीन्यस्य सुप्त्यर्थत्वोपपत्तेः । यथोक्तं तृतीयस्कन्धतात्पर्ये तत्रैव—

चन्द्रिका

दुःखित्वादिकं त्वन्तर्यामिणि बाधितम् । "तं शतं वर्षाण्यभ्यार्चत्" इति यच्छतसंवत्सरपर्यन्तं प्राणस्य जीवशरीरेऽवस्थानं न तज्जीवलिङ्गम्, किन्तु "तस्माच्छतं वर्षाणि पुरुषायुषो भवन्ति" इति तद्धेतुकं शतायुष्ट्वम् । तच्च न प्राणे श्रुतम् । तस्मात्—

बहुत्वाच्छ्रुतिसाहित्यादवकाशोज्झितत्वतः ।
बलवद्भिर्विष्णुलिङ्गैः प्राणश्रुत्यादि नीयते ॥

प्रकाशः

अंशेन सुप्तो ब्रह्मा तु त्वंशेन निरगात्तथा ।
स्वदेहाद्वायुसहितो विष्णुना च जगत्प्रभुः ।
तमुत्थापयितुं देवांस्तानृते त्रीन् महाबलान् ।
नाशक्नुवन्नेकसंस्था स्ततस्तत्राविशंस्त्रयः ।
उदतिष्ठद्ब्रह्मदेहः तदा तेषां प्रभावतः ।

इति । नन्वेवं जीवगतदुःखसमवायित्वमपि स्यादित्युक्तमित्यत आह—**दुःखित्वेति** । न हि जातिः पदार्थ इति मते 'घटोऽनित्यः' इत्यनित्यत्वं जातावन्वेतीति भावः । इदानीं जीवप्रापकमन्यथयति—**शतमिति** । 'इमं लोकं' इत्यस्यार्थः—**जीवशरीर इति** । 'तद्धेतुकं' प्राणस्य शतवर्षपर्यन्तं शरीरे अवस्थाननिमित्तकामित्यर्थः । सिद्धान्तमुपसंहरन् सङ्गृह्णाति—**तस्मादिति** । ब्रह्मश्रुतिसाहित्यादित्यर्थः । इयता प्रपञ्चितमन्यलिङ्गानां निरवकाशत्वमुपेत्य पूर्वपक्षकरणं, सिद्धान्ते च भगवल्लिङ्गानां निरवकाशत्वं,

चन्द्रिका

तदेतदभिप्रेत्योक्तम् न्यायविवरणे—"न चानन्यथासिद्धत्वमन्यत्र श्रुतिलिङ्गादेः, अन्यगतलिङ्गादीनामपि तद्गतभगवद्रूपापेक्षया युक्तेः" इति॥

सूत्रक्रमस्तु—आद्ये स्वपक्षहेतूक्तिः। तस्य च "तद्वै त्वं प्राणः" इत्यत्र यथा प्राणो विष्णुस्तथाऽत्रापि प्राणो विष्णुः, तच्छ्रुतिलिङ्गानामस्मिन् प्रकरणे बहुस्थलेष्वनुगमादित्यर्थः। एवं च'—"तद्वै त्वं प्राणः" इति श्रुताविव' इति टीकायाः "तथाशब्दः समुच्चयार्थः" इति

प्रकाशः

अन्यलिङ्गानां विष्णुनिष्ठत्वं च टीकोक्तं आचार्यवाक्यारूढं करोति—**तदेतदिति**। 'अन्यत्र' भागवतोऽन्यविषयस्य श्रुत्यादेः। 'अनन्यथासिद्धत्वं' निरवकाशत्वं। आदिपदेन "प्राणो वा अहमस्मि" इति वाक्यं गृह्यते। इति न च वाच्यमित्यर्थः। कुत एतदित्यत उक्तं—**अन्यगतेति**। इन्द्रादिगतानामप्यहंशब्दादीनां मुख्यतस्तदन्तर्यामिभगवत्सम्बन्धित्वात्तदपेक्षया सावकाशत्वादिति। प्राक् 'श्रुतिलिङ्गादेः' इत्युक्तं, तदेतत्प्राबल्यापेक्षया। इदानीं 'लिङ्गादीनां' इति वचनं लिङ्गनिरवकाशतयैव श्रुत्यादिनिरवकाशतापूर्वपक्षसूचनार्थम्। अत एव पूर्वं श्रुतेः सावकाशत्वमाशङ्क्य, वृत्रहन्तृत्वादिलिङ्गवशेनैव श्रुतिरुज्जीवितेति ध्येयम्। हेतूक्तिमेव विवृणोति—**तस्येति**। **श्रुतीति**। "ब्रह्मेमं पुरुषं" इत्यादिब्रह्मश्रुतिर्देवोपदेश्यत्वादीनि लिङ्गानि। 'अनुगमात्' अनुवृत्तेरभ्यासादिति यावत्।

चन्द्रिका

टीकया सह न विरोधः। द्वितीये "प्राणो वा अहम्" इति इन्द्रप्रयुक्ताहंशब्दरूपबाधकोद्धारः। तत्राध्यात्मसम्बन्धभूमशब्दस्य यदा "प्राणस्त्वं" इत्यादिभाष्यानुसारेण अध्यात्मशब्दस्य देहार्थत्वस्वीकारेण भगवद्देहभूतेन्द्रविश्वामित्रादिबह्वात्मसम्बन्धोऽर्थः, 'अस्मिन्' इत्यस्य चैतत्प्रकरणे इत्यर्थः, तदेन्द्रे भगवतस्सत्त्वात्तदभिप्रायेण "प्राणो वा अहं" इत्युक्तिः। अन्यथाऽस्मिन्नेव प्रकरणे "प्राणस्त्वं प्राणः सर्वाणि भूतानि" इति न स्यात्, पूर्वपक्षेऽपि विश्वामित्रादेः प्राणत्वाभावादिति परिहारार्थः। अत एव सूत्रे भूमपदं, भाष्येऽपि "प्राणस्त्वं" इत्यादेरुपादानम्। यदा त्वध्यात्मसम्बन्धशब्देन आवेशो विष्णोरिन्द्रे विवक्षितः, "अधिकात्मनः परमात्मनः सम्बन्धो ह्यध्यात्मसम्बन्धः" इत्यैतरेयभाष्यानुसारेण

प्रकाशः

नविरोध इति। एकार्थत्वादिति भावः। "न वक्तुः" इत्यत्र टीकायां परिहारद्वयस्योक्तत्वात् तन्मूलं वदन् परिहारद्वयं स्फुटयति–**तत्रेति**। "—"प्राणस्त्वं प्राणः सर्वाणि भूतानि" इति बह्वध्यात्मसम्बन्धो ह्यत्र विद्यते" इति सूत्रभाष्यानुसारेणेत्यर्थः। 'बहु' इति भूमशब्दार्थः। **तदेति**। विष्णोस्सर्वत्र सत्त्वेन "प्राणस्त्वं" इत्यादिसम्भवादिति भावः। 'अन्यथा' स्वगतविष्णवभिप्रायाभावे। **यदा त्विति**। "अध्यात्मसम्बन्धशब्देनाऽऽवेशो विष्णोरिन्द्रे विवक्षितः। भगवता अन्येष्वन्तर्यामिरूपेण सम्बन्धोऽस्त्येव। तस्मिन्निन्द्रे तु विशेषावेशस्तात्कालिकः।

चन्द्रिका

भगवतस्सन्निधानविशेषोऽध्यात्मसम्बन्धभूमशब्दार्थः, 'अस्मिन्' इत्यस्य च इन्द्रे इत्यर्थः, तदेन्द्रे तात्कालिकभगवत्सन्निधानविशेषाभिप्रायेण "प्राणो वा अहं" इत्युक्तिरित्यर्थः। एतच्च ऐतरेयभाष्योदाहृतात्—

आविष्टो विष्णुनाऽथेन्द्रः प्राणेन सह कौशिकम्।

इत्यादिब्रह्माण्डवाक्यादवगन्तव्यम्।

प्रकाशः

आधिकात्मनः परमात्मनः" इत्यैतरेयभाष्यानुसारेणेत्यर्थः। एतच्चेति। तात्कालिकसन्निधानविशेषाभिप्रायेण उक्तमित्येतदित्यर्थः।

आविष्टो विष्णुनाऽथेन्द्रो वायुना सह कौशिकम्।
शंसेत्युक्त्वा निषण्णोभूदिदमन्नं तवेति सः।
ऋक्सहस्रं शशंसाथ यज्ञाङ्गत्वेन भक्तितः।
तच्छ्रुत्वा तुष्टिमगमत्केशवो वायुसंयुतः।
द्वितीयवारं शंसेति प्राह तं च जनार्दनः।
प्रीतये शक्रमाविष्टो विश्वामित्रः शशंस तत्।
अतिप्रियत्वाद्भगवान् पुनरप्याह कौशिकम्।
तृतीयं च शशंसासौ विष्णोरन्यं प्रकल्प्य तत्।
ततोऽतितुष्टो भगवान् ददामि वरमुत्तमम्।
ऊचे स प्रथमे त्वेव निजसालोक्यमीश्वरः।

चन्द्रिका

तृतीये तु तर्हि मयीति स्यादितीदं बाधकोद्धारे यद्बाधकं, तदुद्धारः। तत्र च शास्त्रपदं ब्रह्मणः सर्वशास्तृत्वात्तत्तच्छब्दवाच्यता युक्तेति दर्शयितुम्। अत एव च भाष्ये—

तत्तन्नाम्नोच्यते विष्णुः सर्वशास्तृत्वहेतुतः।

इति स्मृतिरुदाहृता। चतुर्थे जीवादिलिङ्गं तदन्तर्यामिनिष्ठमित्यस्यार्थस्य तृतीयेनेन्द्रप्रयुक्ताहंशब्दस्यान्तर्यामिविषयत्वं वदतोक्तप्रायत्वात्,

प्रकाशः

प्रादाद्द्वितीये सामीप्यं तृतीये पुनरेव च।
वरं ददानीत्युक्तस्स मुनिः प्राह जनार्दनम्।
सम्यक्त्वामेव जानीयामिति मोक्षे सुखोच्चताम्।
इच्छंस्तं प्राह भगवान् इन्द्रस्थो वायुसंयुतः।
सर्वनामाऽहमस्म्येक इति ज्ञानं ममोत्तमम्।
यस्मात्सर्वगुणत्वं स्यात् सर्वनामत्व एव तु।

इत्यादिनेत्यर्थः। **तृतीय इति।** "शास्त्रदृष्ट्या" इत्यत्रेत्यर्थः। यदि स्वगतविष्णवभिप्रायेण 'प्राणोऽहं' इत्युक्तिः, तर्हि 'रथे देवः' इतिवत् 'मयि प्राणः' इति स्यादिति यद्बाधकमित्यर्थः। तदुद्धारप्रकारं सूत्रपदेन दर्शयति—**तत्रेति।** चतुर्थे जीवादिलिङ्गात् तत्प्राप्तिशङ्कायां सत्यां तल्लिङ्गस्यान्यथासिद्धिमनुक्त्वा प्रयोजनोक्तिरयुक्तेत्यत आह—**चतुर्थ इति। उक्तप्रायत्वादिति।** ननु कथं तर्हि परिहारे कृतेऽपि पुनरत्र शङ्केति चेन्मैवं, प्राणसंवादादिलिङ्गानामन्तर्यामिनिष्ठता न वक्तुं युक्ता, तस्य

चन्द्रिका

तदनुक्त्वाऽन्तर्यामिकथनं कस्मादिति शङ्कायामन्तरादिभेदेनोपासात्रैविध्यादित्येवोक्तम् ॥

अन्ये तु—प्रतर्दनं प्रतीन्द्रेण प्रयुक्तं "प्राणोऽस्मि प्रज्ञात्मा" इति

प्रकाश.

तदानीमौदासीन्यावगतेः, तथोक्तौ प्रयोजनाभावाच्चेति विशेषशङ्कोपपत्तेः। अत एव टीकायां—"उदासीनौ च तावास्तां" इति वचनमुदाहृतम्। परिहारस्तु—बाह्यरूपाभिप्रायेण वचनं नेयम्। प्रयोजनाभा वस्तु नास्ति, अन्तर्बहिस्सर्वगतत्वेन चोपासात्रैविध्यार्थत्वात्, तस्य चास्मिन् प्रकरणे "सय एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत" इत्यादिनाऽऽश्रितत्वाच्च 'तद्योगात्' इत्यनुरोधेन त्रैविध्योपपत्तेश्चेत्यर्थः।

अन्ये त्विति। कौषीतकिब्राह्मणे तृतीयेऽध्याये इन्द्रप्रतर्दनाख्यायिकायां प्रतर्दनं प्रति "इन्द्र उवाच मामेव विजानीहि" इत्युपक्रम्य श्रुतमिन्द्रवाक्यं "प्राणोऽस्मि प्रज्ञात्मा तन्मामायुरमृतमित्युपास्व" इति। तत्र प्राणः किं वायुः किं वेन्द्रः उत जीवोऽथ ब्रह्मेति संशये, प्राणशब्दस्यान्यत्रप्रसिद्धेः प्राणो वायुरेवेति प्राप्ते, "यं त्वं मनुष्याय हिततमं मन्यसे यो मां वेद न स्तेयेन न भ्रूणहत्यया स एष प्राण एव प्रज्ञात्माऽऽनन्दोऽजरोऽमृतः" इति हिततमत्वनिखिलस्तेयभ्रूणहत्यादिपापालेपप्रज्ञात्मत्वानन्दत्वादेः ब्रह्मण्येवानुगमाद्वायौ च तदयोगात् ब्रह्मैवायं

चन्द्रिका

वाक्यमुदाहृत्य "मामेव विजानीहि" इति इन्द्रलिङ्गात्, "इदं शरीरं

प्रकाशः

प्राण इत्याद्येनोक्त्वा 'वक्तुः' उपदेष्टुरिन्द्रस्य "प्राणोऽस्मि" इति प्राणत्वेन स्वात्मोपदेशादिन्द्रएव प्राणो न ब्रह्मेति पुनराक्षिप्य, अस्मिन् प्रकरणे "यावद्ध्यस्मिन् शरीरे प्राणो वसति तावदायुः" इत्यायुरवधित्वस्य "प्रज्ञाऽऽनन्दोऽजरः" इति प्रज्ञात्वादेश्चोक्त्याऽध्यात्मशब्दितप्रत्यगात्मसम्बन्धबाहुल्यसत्त्वात्तस्य च पराग्भूतेन्द्रेऽयोगात् "मामेव विजानीहि प्राणोऽस्मि" इति स्वात्मोपदेशस्य च "अहं ब्रह्माऽस्मि" इति शास्त्राधीनदृष्ट्या "अहं मनुरभवं" इति वामदेवस्य मनुत्वादिना स्वात्मोपदेशवदुपपत्तेः ब्रह्मैव प्राण इति द्वितीयतृतीयाभ्यामुक्त्वा, चतुर्थेन सूत्रेण पुनः "न वाचं विजिज्ञासीत वक्तारं विद्यात्" इति वक्तृत्वरूपजीवलिङ्गात् "अथप्राण एव प्रज्ञात्मा इदं शरीरं परिगृह्योत्थापयति" इति प्राणलिङ्गाद्धिततमत्वादिब्रह्मलिङ्गाच्च त्रयाणामप्युपास्यत्वं न तु ब्रह्मण एवेत्याक्षिप्य, तथात्वे उपासात्रैविध्यप्रसङ्गादन्यत्र "प्राणस्य प्राणः" इत्यादौ वाक्यान्तरे ब्रह्मलिङ्गैः प्राणशब्दे ब्रह्मपरत्वस्याऽऽश्रितत्वादिहापि हिततमत्वादिलिङ्गयोगात् "मामेव विजानीहि" इत्युपक्रम्य "प्राणोऽस्मि प्रज्ञात्मा" इत्युक्त्वाऽन्ते "स एष प्राण एव प्रज्ञात्माऽऽनन्दोऽजरोऽमृतः" इत्युपसंहारेण ब्रह्मण्येकवाक्यत्वावगतौ तन्मध्यगतान्यलिङ्गानि ब्रह्मण्येव नेयानीति ब्रह्मैव प्राण इति सिद्धान्त इत्याहुरित्यर्थः । इतीन्द्रलिङ्गादित्यादि । यथाश्रुतभाष्यानुरोधेन

चन्द्रिका

परिगृह्योत्थापयति" इति वायुलिङ्गात्, "वक्तारं विद्यात्" इति जीवलिङ्गाच्च इन्द्रादिरेव प्राण इति प्राप्ते, "यं त्वं मनुष्याय हिततमम्" इति हिततमत्वादिब्रह्मलिङ्गात् ब्रह्मैव प्राण इति सिद्धान्त इत्याहुः। तत्र, न तावत् परमपुरुषार्थसाधनत्वं हित

प्रकाशः

एव मुक्तिः। भामत्यां तु—शरीरधारणरूपलिङ्गस्य वायुगतत्वेऽपि वायुव्यापारस्य परमात्मायत्तत्वाद्वक्तृत्वस्य च वाक्करणकव्यापारवत्त्वरूपस्य-"येन वागभ्युद्यते" इति श्रुतेर्जीवरूपेणोपपत्तेरनेकब्रह्मलिङ्गानुरोधेनेन्द्रलिङ्गानामन्यथासिद्धेः न पूर्वपक्षोदय इत्याक्षिप्य, "यो वै प्राणः सा प्रज्ञा या वा प्रज्ञा स प्राणः सह ह्येतावस्मिन् शरीरे वसतः सहोत्क्रामतः" इति यस्यैव प्राणस्य प्रज्ञात्मना उपास्यत्वमुक्तं, तस्यैव प्राणस्य प्रज्ञात्मना सहोत्क्रमणकथनात्, निर्भेदे ब्रह्मणि द्विवचनसहभावोत्क्रमणानामयोगाद्यथायोगं वाय्वादयस्त्रय एवात्रोपास्याः, वाक्यभेदस्य सह्यत्वादिति पूर्वपक्षयित्वा प्रागुक्तैकवाक्यतामाश्रित्य सिद्धान्तितम्। उक्तं च—

> तस्मादनन्यथासिद्धब्रह्मलिङ्गानुसारतः।
>
> एकवाक्यबलात्प्राणजीवलिङ्गोपपादनम्।

इतीति ध्येयम्। सूत्रार्थान् क्रमेण दूषयिष्यन्नाद्यसूत्रोक्तसिद्धान्तहेतुं तावद्दूषयति—तत्रेति। यदुक्तं हिततमत्वं लिङ्गमिति, तत्किं भामत्युक्तरीत्या पुमर्थहेतुत्वमुत पुरुषार्थरूपत्वमिति विकल्प्याऽऽद्येऽसिद्धं ब्रह्मणीत्याह—**न तावदिति**। अज्ञानोच्छेदस्यैव परमपुरुषार्थत्वात्तस्य च

चन्द्रिका

तमत्वम्, त्वन्मते ज्ञानादेवाज्ञाननिवृत्त्या ब्रह्मणि तस्याभावात् । परमपुरुषार्थत्वं हिततमत्वं चेत्, सर्वोपप्लवरहितं मोक्षदशानुगतं शुद्धचैतन्यं हिततमं वाच्यम् । तस्य हिततमत्वं च न विशिष्टं प्रति, तस्य मोक्षदशायामभावात् । नापि शुद्धं प्रति, तस्याखण्डत्वेन अस्येदं हिततममिति विभागायोगात् । किञ्च हितत्वं विना न हिततमत्वम् । न चाखण्डे हितत्वसामान्यं हिततमत्वविशेषश्च युक्तः । तस्मान्न हिततमत्वं ब्रह्मलिङ्गम् । नापि "तं मामायुरमृतमित्युपास्व" इत्युक्तम् अमृतत्वोपासनकर्मत्वं च ब्रह्मलिङ्गम्, अविद्यमानतदुपासनकर्मत्वस्येन्द्रादावपि सम्भवात् । नापि "स यो मां

प्रकाशः

ज्ञानादेव सिद्धेः । उक्तं च—"परमपुरुषार्थस्यापवर्गस्य परमात्मज्ञानादन्यतोऽनवाप्तेः" इति । परम्परया तद्धेतुत्वस्य जीवेऽपि सम्भवात् । न च मुक्तिहेतुज्ञानविषयत्वं तत्, अशब्दार्थत्वात् । किञ्चात्र प्राणः किं विशिष्टं ब्रह्मेति सिद्धान्त्यते, शुद्धमिति वा । आद्येऽसिद्धेः । द्वितीये "एष ह्येव साधु कर्म" इत्युक्तपुण्यपापकर्तृत्वाद्ययोग इति भावः । द्वितीयं निरस्यति—**परमेति** । तत्किं विशिष्टस्य शुद्धस्य वा लिङ्गम् । नाद्यः, तस्याज्ञानाद्युपप्लववतस्तदयोगात् । द्वितीये विशिष्टं संसारिणं प्रति शुद्धं हिततममित्युच्यते, मुक्तं शुद्धं प्रत्येव वा । आद्यं निरस्यति—**तस्येति** । द्वितीयं निराह—**नापीति** । 'अस्य' इति षष्ठ्यर्थस्य भेदघटितत्वात्कल्पितभेदस्यापि तदाऽभावादिति भावः । **अविद्यमानेति**।

प्रकाशः

वेद न स्तेयेन न भ्रूणहत्यया" इत्युक्तः स्वज्ञानेन सर्वकर्मालेपो ब्रह्मलिङ्गम्, शुद्धे "एष ह्येव साधु कर्म कारयति" "एष लोकाधिपतिः" इत्यादेरयोगात्, विशिष्टज्ञानेन च त्वन्मते सर्वकर्मालेपाभावात्। एवं लिङ्गान्तरं दूष्यम्। इदं चाधिकरणं जीवत्वनिषेधेन ब्रह्मत्वविधानात्तदभेदप्रतिकूलम्॥

केचित्तु—"मामुपास्व" इति इन्द्रलिङ्गात्, जीवलिङ्गानांच जीव·

प्रकाशः

त्वन्मते उपासनविषयासत्त्वस्वीकारात्। तथा च न पूर्वपक्षनिरास इति भावः। सर्वकर्मालेपहेतुज्ञानविषयत्वं शुद्धस्याङ्गीकृत्य, शुद्धं ब्रह्मैव प्रकरणे गीयते इत्युच्यते, उत विशिष्टस्य तदुपेत्य तदेवात्रोच्यत इति विकल्प्य आद्यं दूषयति—**शुद्ध** इति। शुद्धस्य "निष्कलं निष्क्रियं" इत्यादिनौदासीन्यश्रवणादिति भावः। द्वितीयं निरस्यति—**विशिष्टेति। एवमिति**। नापि ज्ञानात्मत्वं, जीवेऽपि सम्भवात्। नाप्यजरत्वामृतत्वलोकपालत्वादीनि, इन्द्रादिदेवे तदुपपत्तेः। किञ्चैतानि प्रज्ञात्मत्वादीनि शुद्धे चेत्, "एष ह्येव साधु कर्म" इत्याद्ययोगः। विशिष्टे चेदसिद्धिरित्यादिरूपेण दूष्यमित्यर्थः। इदं परेषामनारभ्यमेवेत्याह—**इदं चेति**। तथा चाभेदवादिभिः कथमिदमारम्भणीयं, स्वव्याहतत्वादिति भावः॥

रामानुजमतमनूद्य पराचष्टे—**केचित्त्विति**। प्रतर्दनविद्यायां "स होवाच प्राणोऽस्मि प्रज्ञात्मा तं मायुरमृतमित्युपास्व" इत्युपासनकर्मतया इन्द्रप्राणशब्दनिर्दिष्टः किं प्रसिद्ध इन्द्र उत परमात्मेति संशये, "मामेव

प्रकाशः

विशेषेन्द्रे पर्यवसानात्, प्राणलिङ्गे सत्यपि "प्राणोऽस्मि" इति प्राणस्य जीवविशेषेन्द्रविशेषणत्वप्रतीतेर्जीववायुपक्षयोरनुत्थानादिन्द्रः प्राण इति प्राप्ते, "आनन्दोऽजरोऽमृतः" इत्यादिब्रह्मलिङ्गात् ब्रह्मैव

प्रकाशः

विजानीहि प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्व" इतीन्द्रलिङ्गादस्य च "इन्द्रः....त्रिशीर्षाणं त्वाष्ट्रमहनम्" इत्युपक्रमे श्रुतत्वाष्ट्रवधादिभिः प्रसिद्धत्वात्, "आनन्दोऽजरोऽमृतः" इत्यानन्दादिलिङ्गानामुपक्रमावगतत्वाष्ट्रहननादिलिङ्गानुरोधेन नेयत्वादिन्द्र एव। यद्यपि "वक्तारं विद्यात्" इति जीवमात्रलिङ्गं, "इदं शरीरं परिगृह्योत्थापयति" इति पञ्चवृत्तिरूपमुख्यप्राणलिङ्गं चास्ति, तथाऽपि विशेषाकाङ्क्षायां जीवधर्मस्येन्द्रशब्दवाच्यप्रकृतजीवविशेषनिष्ठत्वप्रतीतेः, "प्राणोऽस्मि" इति सामानाधिकरण्येन प्राणस्य जीवविशेषेन्द्रविशेषणत्वप्रतीतेः, प्राधान्येन प्रतिपाद्यत्वशङ्कानुदयान्न तयोरिह प्राप्तिरिति प्राप्ते, "स एष प्रज्ञाऽऽनन्दोऽजरोऽमृतं मनुष्याय हितनमं एष ह्येव साधु कर्म कारयति। तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः एष लोकाधिपतिरेष सर्वेश्वरः" इत्यादिनाऽऽनन्दाजरामृतत्वाहिततमत्वसाध्वसाधुकर्मकारयितृत्वचेतनाचेतनात्मककृत्स्नवस्त्वाधारत्वसर्वलोकाधिपतित्वादिपरमात्मधर्मबाहुल्यात्, स्वावस्थितपरमात्मोपासनाभिप्रायेण "मामुपास्व" इत्युपदेशोपपत्तेरानन्दादिबहुतरगुणानुरोधेन त्वाष्ट्रवधादेः वर्णनीयत्वादिन्द्रप्राणादिनिर्दिष्टो

चन्द्रिका

प्राणइति सिद्धान्त इत्याहुः । तन्न, इन्द्र इत्येव पूर्वपक्षे सति सूत्रे "जीवमुख्यप्राणलिङ्गात्" इति शङ्काऽयोगात् । तत्र जीवशब्दस्य तद्विशेषेन्द्रपरत्वे च वक्तुरात्मोपदेशस्यापि इन्द्रलिङ्गस्यानेनैव संग्रहसम्भवात् "न वक्तुरात्मोपदेशात्" इति पृथक्सौत्रश-

प्रकाशः

जीवादर्थान्तरभूतः परमात्मेति सिद्धान्त इत्याहुरित्यर्थः । उक्तं च—

विद्या प्रातर्दनी सा वदति हिततमोपास्तिकर्मेन्द्रमेव
ख्यातप्राणेन्द्रचिह्नान्वितमपि तदसौ विश्वकर्तेति चेन्न ।
ब्रह्म त्रेधा ह्युपास्यं बहुविधचिदचित्कञ्चुकं स्वात्मना च
प्राणेन्द्रप्रक्रमोऽपि प्रबलतरमहावाक्यवैघट्यभग्नः ॥

इत्यादि । यद्यपि भाष्ये प्राणशब्दनिर्दिष्टो जीव एवोत परमात्मेत्येव संशयो दर्शितः, न त्विन्द्र एवेति । तथाऽपि प्रसिद्धजीवभाव इन्द्र एवेति पूर्वपक्षान्ते कथनाच्छ्रुतप्रकाशे तथैव व्याख्यातत्वाच्च इन्द्रः प्राण इति प्राप्ते इत्युक्तमिति ध्येयम् । सूत्रानानुगुण्येन पूर्वपक्षं निरस्यति—**तन्नेति** । ननु जीवशब्दस्य जीवविशेषेन्द्रपरत्वमुच्यत इति चेत्तथाऽपि मुख्यप्राणपदायोगात्, तस्य त्वन्मते जडत्वेन तद्विशेषेन्द्रपरत्वायोगात् । सामान्यशब्दस्य विशेषपरत्वे लक्षणापत्तेश्च । दोषान्तरं चाह—**तत्रेति** । "मामुपास्व" इति वक्तुरिन्द्रस्य स्वात्मन एवोपदेशादिति त्वया व्याख्यातत्वाज्जीवलिङ्गपदेन वक्तृत्वादेर्ग्रहणमिवाऽऽत्मोपदेशोऽपि ग्रहीतुं शक्यत इति

चन्द्रिका

ङ्गाऽयोगात् । अस्मदीयोदाहरणे तु जीवलिङ्गं शतायुष्ट्वं नेन्द्रे युक्तम् । "मनोवाक् प्राणः" इत्यादौ प्राणोऽपि नान्यविशेषणम् ।

प्रकाशः

तत्सूत्रं व्यर्थमित्यर्थः । उपलक्षणमेतत्, प्राणस्येन्द्रविशेषणत्वेनाप्राधान्ये धर्मिनिर्देशाय सूत्रे "प्राणस्तथा" इति प्राणपदप्रयोगो न स्यात् । किं तु 'इन्द्रस्तथाऽनुगमात्' इत्येव स्यात् । यदत्रोक्तं श्रुतप्रकाशे—प्राणशब्दस्य परमात्मलिङ्गप्रतिपादकवाक्यस्थत्वेन सिद्धान्तहेतुद्योतकत्वात् सूत्रे प्राणपदेन धर्मी निर्दिष्ट इति, तन्न, सिद्धान्तहेतोः "तथाऽनुगमात्" इत्यादिनैव स्फुटं प्रतिभासात्, पूर्वपक्षहेतोः केनाप्यप्रतीतेः तत्सूचनार्थत्वात् प्राधान्याच्च 'इन्द्रः' इत्येव निर्देष्टव्यत्वात् । अत एव त्वद्भाष्ये इन्द्रशब्दस्य जीवविशेष एव प्रसिद्धेरिति पूर्वपक्षहेतुर्बहिरेवोक्त इति ध्येयम् । ननूक्तरीत्या जीवमुख्यप्राणकोटिकपूर्वपक्षासम्भवादगत्या सर्वसमाधेयमेतत् । अन्यथाऽयं दोषो भवतामपि सम इत्याशङ्क्य, स्यादयं दोषोऽद्वैतिनामिदमेवोदाहृत्य त्रितयपरत्वेन पूर्वपक्षयतां, न त्वस्माकं उक्तदोषास्पृष्टोदाहरणान्तरं कुर्वतामित्याह—अस्मदीयेति । नेन्द्र इति । तस्यामरत्वेन बहुकालस्थायिनः शतायुष्ट्वायोगात्, त्वन्मते वक्तृत्वादिजीवलिङ्गस्य तद्विशेषेन्द्रनिष्ठत्वेन तत्र पर्यवसानमिव नास्मन्मते जीवलिङ्गमिन्द्रे पर्यवसाययितुं शक्यत इति स्वातन्त्र्येण जीवकोटिकपूर्वपक्षो युक्तः, प्राणोऽपि नान्यविशेषणतया प्रतीयत इति तत्कोटिकपूर्वपक्षोऽपि युक्त इति सर्वमनवद्यमिति भावः ।

चन्द्रिका

यत्तु परकीयं "न वक्तुः" इति सूत्रव्याख्यानं 'वक्तुः' उपदेष्टुरिन्द्रस्य "प्राणोऽस्मि" इत्यात्मोपदेशान्नेति चेन्न, अस्मिन् प्रकरणे "यावद्ध्यस्मिन् शरीरे प्राणो वसति तावदायुः" इत्यायुरवधित्वस्य "वक्तारं विद्यात्" इति वक्तृत्वप्रज्ञात्मत्वादेश्चोक्तेः प्रत्यगात्मसम्बन्धबाहुल्यमस्ति, तच्च पराचीनेन्द्रे न युक्तमिति, तन्न, 'उपदेशात्' इत्यनेनैव उपदेष्टृत्वरूपवक्तृत्वलाभेन 'वक्तुः' इत्यस्य वैयर्थ्यात्, स्वात्मोपदेशादित्यस्य तु वक्तृपदप्रयोगेऽप्यभावात् । अस्मत्पक्षे च बृहतीसहस्रवक्तारं प्रतीन्द्रस्य विप्रलम्भो न युक्त इति सूचनाय तस्य सार्थक्यात् । इन्द्रेऽपि स्वशरीरावस्थानवक्तृत्वप्रज्ञात्मत्वादेः सम्भवादायुरवधित्ववक्तृत्वयोश्च वायुजीवयोरेव सम्भवेन सदा सर्वगते

प्रकाशः

एवं मतद्वये अधिकरणशरीरमाद्यसूत्रार्थं च निरस्याधुना पूर्वमताभिमतं द्वितीयसूत्रार्थमनूद्य निरस्यति—यत्त्विति । प्राग्विवृतानि सूत्राण्यस्माभिः । 'पराचीने' संसारित्वेन पराग्भूते । ननु 'आत्मोपदेशात्' इत्यनेन स्वोपदेशलाभात्तदर्थं 'वक्तुः' इत्येतदित्यत आह—**स्वात्मेति** । भवतामप्ययं दोष इत्यत आह—**अस्मादिति** । न त्वन्मत इव मन्मते 'वक्तुः' इत्यनेनेन्द्रो गृह्यते, किन्तु विश्वामित्रः । तथाऽपि तद्व्यर्थमिति चेन्न, पूर्वपक्षदार्ढ्यार्थत्वादिति भावः । सिद्धान्तांशार्थं निरस्यति—**इन्द्र इति** । न केवलमन्यथासिद्धत्वं हेतूनामसिद्धिश्चेत्याह—**आयुरिति**। **वाग्वित्वति** । वायुमुख्यप्राणशब्दितपञ्चवृत्तिरूपवाग्वित्यर्थः ।

चन्द्रिका

इद्रिन्यादिरहिते च ब्रह्मणि असम्भवेन ब्रह्मपक्षप्रतिकूलत्वात्। किञ्चा-स्माकं मत इव वक्तुरात्मोपदेशस्य गतिमनुक्त्वा प्रकरणस्य ब्रह्म-परत्वोक्तिरयुक्ता । उक्तं च 'अनुगमात्' इत्यनेनैव प्रकरणस्य ब्रह्मपरत्वम् ।

केचित्तु—परमात्मासाधारणधर्मः अध्यात्मशब्दार्थः। तत्सम्बन्धबहुत्वं

प्रकाशः

सर्वगतत्वान्नावधित्वं, करणशून्यत्वान्न वक्तृत्वमित्यर्थः। **गतिमनुक्त्वेति।** ब्रह्मपरत्वे स्वात्मोपदेशरूपबाधके शङ्किते मन्मत इवान्तर्याम्यादिवि-वक्षया तदुक्तिरिति गत्युक्त्या बाधकमपरिहृत्य प्रकरणस्य ब्रह्म-परत्वोक्तिरयुक्तेत्यर्थः। अयं च दोषस्तवापि तुल्य इति शङ्का-निरासाय वा, गत्युक्तिपरत्वमस्य न युज्यत इत्यगत्यैवमाश्रितमि-त्याशङ्कानिरासाय वोक्तं—**अस्मन्मत इवेति।** नन्वेवं बाधके श-ङ्किते स्वपक्षहेतुं प्रथममनुक्त्वा 'शास्त्रदृष्ट्या' इत्यनेन तत्परिहारः क्रियते। अतो न दोष इत्यत आह—**उक्तं चेति।** तथा च इहैव बाधकपरिहारः कर्तव्य इति भावः। एतेनास्यापि स्वपक्षहेतुप-रत्वे आद्यस्य वैयर्थ्यमित्युक्तं भवति। न च तत्र हिततम-त्वाजरत्वादिकमेव विवक्षितमिह पुनरायुरवधित्वादिकमतो न दोष इति वाच्यं, निरसिष्यमाणत्वादिति भावः।

केचित्त्विति। "मामेव विजानीहि" "मामुपास्व" इत्यादि-वक्तुः त्वाष्ट्रवधादिना प्रज्ञातजीवभावस्येन्द्रस्योपास्यत्वेनाऽऽत्मन एव

चन्द्रिका

अध्यात्मसम्बन्धभूमेत्याहुः । तन्न, उक्तदोषत्वात् । सम्बन्धपदवैयर्थ्याच्च । अन्यथा "अन्तस्तद्धर्म" इत्यादावपि सम्बन्धपदप्रसङ्गात् । 'अस्मिन्' इति सप्तम्यैव सम्बन्धोक्तेश्च । किञ्चेह भूमपदप्रयोगाद्धिततमत्वादिवदानन्दाजरत्वादीनां सर्वेषां ब्रह्मधर्माणामत्रैव विव-

प्रकाश

उपदेशादिप्रक्रमस्य जीवविषयत्वे "आनन्दोऽजरः" इत्याद्युपसंहारस्तदनुगुण एव नेय इति चेत्, अस्मिन् प्रकरणे हिततमत्वसाध्वसाधुकर्मकारयितृत्वादीनां अध्यात्मशब्दितानां परमात्मासाधारणधर्माणां सम्बन्धबाहुल्यमस्तीत्यर्थ इत्याहुरित्यर्थः । **उक्तेति** । उक्तं बाधकमपरिहृत्य ब्रह्मधर्मबाहुल्योक्तिरयुक्ता । न च स्वपक्षहेतुं पूर्वमुक्त्वा पश्चाद्बाधकं शास्त्रसूत्रेण निरसिष्यते । उक्तं च श्रुतप्रकाशे—'पूर्वं परमात्मपरत्वसाधकहेतुरुक्तः । पूर्वपक्षयुक्तेः कः परिहार इत्यतः शास्त्रसूत्रं' इतीति वाच्यं, 'अनुगमात्' इत्यनेनैव स्वपक्षहेतोरुक्तत्वात् । अत्र विशेषस्तु 'किञ्चेह' इत्यत्र निरसिष्यत इति प्रागुक्तदोषग्रस्तत्वादित्यर्थः । **सम्बन्धेति** । 'अध्यात्मभूमा' इत्यनेनैव पूर्णत्वादिति भावः । नन्वसिद्धिपरिहाराय सम्बन्धपदमित्यत आह—**अस्मिन्निति** । आधाराधेयभावस्य सप्तम्यर्थत्वादिति भावः । स्वपक्षहेतुपरत्वे दोषान्तरमाह—**किञ्चेति** । **भूमपदप्रयोगादिति** । एतेन यदत्रोक्तं श्रुतप्रकाशे—आद्यं सूत्रं "स एष प्राण एव प्रज्ञात्माऽऽनन्दोऽजरः" इत्यादिवाक्यमात्रविषयं

चन्द्रिका

क्षासम्भवेन 'अनुगमात्' इति व्यर्थम् । यच्च "शास्त्रदृष्ट्या" इत्यस्य परकीयं व्याख्यानं—इन्द्रः स्वात्मानं यथाशास्त्रमार्गेण ज्ञानेन अहं ब्रह्मेति पश्यन् 'मामेव विजानीहि' इत्युपदिदेश वामदेववदिति, तन्न, चिदचित्संवलनात्मकाहमर्थे ब्रह्मत्वस्य मन्वादित्वस्य चाभावेन "मामेव विजानीहि" "अहं मनुः" इत्यादिव्यपदेशहेतोः

प्रकाशः

व्याख्यातं, न तु परैरिव वाक्यान्तरस्थहेतवोऽप्यत्र विवक्षितत्वेनोक्ताः, 'अध्यात्मसम्बन्धभूमा' इति द्वितीयसूत्र एव बहुवाक्यस्थहेतुबाहुल्यस्य विवक्षितत्वावगमादिति नाद्वैतिमत इवास्माकं पौनरुक्त्यमिति, तन्निरस्तं, अत्रैव बाहुल्यवाचिभूमपदेन सर्वस्य विवक्षितुं शक्यत्वादिति । **आनन्देति** । आद्यसूत्रोक्तानामपीत्यर्थः । एतेन प्राणशब्दचिह्नितसूत्रे प्राणशब्दचिह्नितवाक्यगतहेतोरेव वर्णनीयत्वादित्यपि प्रत्युक्तम् । तेनास्य वैयर्थ्याभावेऽप्यनेन बहुविषयेण तस्य वैयर्थ्यकथनात् । अद्वैतिमते तृतीयसूत्रार्थमनूद्य निरस्यति—**यच्चेति** । दृष्टान्ते दार्ष्टान्तिके च ब्रह्मात्मैक्यज्ञानं तादृशव्यपदेशहेतुरित्यर्थः । किमत्र दार्ष्टान्तिके इन्द्रे दृष्टान्ते वामदेवे चाहमर्थे विशिष्ट एव प्राणशब्दितब्रह्मत्वस्य मन्वादित्वस्य च ज्ञानं "मामेव विजानीहि" इत्यादिव्यपदेशहेतुरुच्यते, उत लक्षितस्य चिन्मात्रस्य चिन्मात्रेणैक्यज्ञानं तस्य हेतुरिति विकल्प्य, आद्यं निरस्यति—**चिदचिदिति** ।

चन्द्रिका

अहंब्रह्मेत्यादिदृष्टेः भ्रान्तिदृष्टित्वेन शास्त्रदृष्टित्वाभावात् । चिन्मात्रैक्यदृष्टेश्च भिन्नविषयत्वेन 'मां विजानीहि' इत्यादिव्यपदेशाहेतुत्वात् । 'माम्' इत्यादौ चिन्मात्रलक्षणायां च "मां विजानीहि, यो मां वेद" इति वित्तिकर्मत्वोक्तिरयुक्ता । किञ्च–शास्त्रशब्दस्य हिताहितशास्तरि

प्रकाशः

द्वितीयं निरस्यति—**चिन्मात्रेति** । 'चिन्मात्रं विजानीहि' 'चिन्मात्रं मन्वादि' इत्येव स्यात्, न तु 'मां' इति 'अहं' इति च । न हि 'ऐक्यं विजानीहि' इति वक्तव्ये 'मां' इति व्यपदेशो युज्यत इत्यर्थः । ननु 'मां' इत्यस्य 'अहं' इत्यस्य च चिन्मात्रमर्थ इत्यत आह–**मामित्यादाविति** । तस्योदासीनस्य सकलकारकशक्तिविधुरस्य कर्मत्वायोगात् । ननूल्लेखित्वमात्रेण 'मां' इत्युक्तिर्न तु कर्मत्वमिति चेत्, "कर्मणि द्वितीया" इति कर्मार्थकद्वितीयाश्रवणादिति भावः । लक्षणापत्तेश्चेत्यपि ध्येयम् । सिद्धान्ते च स्वप्रयुक्तास्मच्छब्दस्य स्वान्तर्यामिण्येव मुख्यत्वोक्तेर्न कोऽपि दोष इति भावः । नन्वथापि भवन्मते शास्त्रशब्दस्यान्तर्यामिणि यौगिकत्वाद्वेदादिशास्त्रे रूढत्वाद्रूढेश्च योगापेक्षया मुख्यत्वस्य रथकारनये स्थितत्वात् शास्त्रशब्दो मुख्यामुख्यन्यायेन वेदादिपरो नान्तर्यामिपर इत्याशङ्क्याह—**किञ्चेति** । "सन्ध्यामुपासीत" "न सुरां पिबेत्" इत्यादिना हितमिदं कर्तव्यं अहितमिदं न कर्तव्यमिति शासकत्वाच्छास्त्रमिति "शासु अनुशिष्टौ" इत्यतः ष्ट्रन्प्रत्यये शास्त्रमिति योगे-

चन्द्रिका

वेदादौ योगसम्भवात् न रूढिः। उक्तञ्च—

भवेतां यदि वृक्षस्य वाजिकर्णौ कथं चन।
अदृष्टां समुदायस्य कः शक्तिं जातु कल्पयेत्॥

इति। शास्तृत्वं च "एकः शास्ता न द्वितीयोऽस्ति शास्ता" इत्यादिश्रुत्या ब्रह्मण्येव मुख्यम्। मुख्यसम्भवे चामुख्यमयुक्तम्। दर्शितश्च भाष्यकृता "संविच्छास्त्रं परं पदम्" इति ब्रह्मणि शास्त्रपदप्रयोगः।

प्रकाशः

नैवोपपत्तेर्न रूढिरित्यर्थः। नन्वेवं रूढिमात्रपरिलोपः, सर्वत्र योगेनैवोपपत्तेरित्यतो यत्र योगाभावस्तत्रैव रूढिरिति भावेन तन्त्रवार्तिकसम्मतिमाह—उक्तं चेति। नामधेयपादे प्रोक्षण्यधिकरणे उक्तमित्यर्थः। तदधिकरणं जन्मादिसूत्रे प्रपञ्चितम्। 'अश्वकर्णः' इति शब्दवाच्ये कस्मिंश्चिद्वृक्षविशेषे यदि वाजिकर्णसदृशौ कर्णौ भवेतां, तर्ह्यश्वकर्णपदस्य सत्स्ववयवार्थेषु तत एवोपपन्नत्वेन कल्पकाभावात् 'समुदायशक्तिं' रूढिं कः कल्पयेन्न कोऽपि। ततस्तत्रावयवार्थाभावादेव रूढिरङ्गीकृता, अत्रावयवार्थोऽस्तीत्यर्थः। नन्वस्तूभयत्र योगस्तथाऽप्यन्तर्यामिग्रहणे को हेतुरिति चेत्, उक्तानुपपत्तिगणएवेति ब्रूमः। हेत्वन्तरं चात्राह—शास्तृत्वं चेति। प्रवृत्तिहेतुपौष्कल्यस्य ब्रह्मण्येव भावादिति भावः। वैदिकप्रयोगबहुल्यरूपरूढिश्चास्तीत्याह—दर्शितश्चेति।

चन्द्रिका

लोकप्रसिद्धिस्तु शास्त्रशब्दस्य वेदादन्यत्रैव । अपि च सकारणकदृष्टिद्वारा व्यपदेशविषयोक्तितोऽपि अस्मद्रीत्या साक्षादेव तदुक्तिर्युक्ता । सौत्रो वामदेवदृष्टान्तोऽपि परपक्षे न युक्तः । "अहं मनुः" इत्यादिनोक्तं ह्यैक्यं चिन्मात्रविवक्षया वक्तव्यम् । न च तद्विवक्षायां "अहं भूमिमददामार्यायाहं वृष्टिं दाशुषे मर्त्याय" इत्यादिविशिष्टविषयमुत्तरवाक्यं युज्यते । भगवद्धर्मो हीन्द्राय भूमिप्रदानादिकम् ।

प्रकाशः

रूढिश्च तत्र नास्तीत्याह—**लोकेति** । यद्वा—योगार्थानुसन्धानशून्यानामपि लौकिकानां शास्त्रपदेन वेदप्रतीतिरूढिरेवेत्याह—**लोकेति** । शास्त्रपदेनान्तर्यामिग्रहणे हेत्वन्तरमाह—**अपि चेति** । 'मां विजानीहि' इति व्यपदेशविषयत्वमिन्द्रस्य "अहं ब्रह्मास्मि" इत्यादिशास्त्रजन्यब्रह्मात्मैक्यज्ञानद्वारेति व्यवधानेन त्वयोच्यते । अस्माभिस्तु साक्षादेवान्तर्यामिदृष्ट्या 'प्राणोऽस्मि' इति व्यपदेशविषयत्वमुच्यते । अतोऽप्यस्मदभिमत एवार्थ इत्यर्थः । ननु दृष्टान्तबलादेवमाश्रीयत इति चेन्न, विशिष्टाभेदायोगेन दूषितत्वात् । चिन्मात्रलक्षणाया अप्युक्तदोषत्वात् । दोषान्तरेणापि दूषयति—**सौत्र इति** । कथं तर्ह्यन्तर्यामिपक्षे योग इत्यत आह—**भगवदिति** । उपेन्द्ररूपेण बलेस्साम्राज्यमादायेन्द्राय दत्तमिति भागवतादिप्रसिद्धिं हिशब्देन द्योतयति ।

चन्द्रिका

केचित्तु—"यस्याऽऽत्मा शरीरम्" इत्यादिशास्त्रेण या दृष्टिः 'जीवो ब्रह्मशरीरं शरीरवाची च शब्दः देवमनुष्यादिवत् शरीरिपर्यन्तः' इत्येवंरूपा, सा शास्त्रदृष्टिरित्याहुः। तन्न, उक्तदोषत्वात्। भगवत्यहंशब्दप्रयोगे शरीरशब्दः शरीरिपर्यन्त इति लोकदृष्टेरपि हेतुत्वेन शास्त्रपदप्रयोगे विशेषहेत्वभावाच्च।

प्रकाशः

केचित्त्विति। प्रज्ञातजीवभावेन इन्द्रेण "मामेव विजानीहि, मामुपास्व" इत्युपास्यस्य ब्रह्मण एव स्वात्मत्वोपदेशोऽयं न प्रमाणान्तरप्राप्तस्वात्मावलोकनकृतः, किन्तु "य आत्मनि तिष्ठन् य आत्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं" इत्यादिशास्त्रेण जीवब्रह्मणोः शरीरशरीरिभावप्रतिपादनात् शरीरवाचिशब्दानां शरीरिपर्यन्तत्वस्य "अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि" इत्यादिशास्त्रेण लब्धत्वात्, तेन शास्त्रेण लोकतश्च जनितया दृष्टचा ब्रह्मणो जीवशरीरत्वं शरीरवाचिशब्दानां शरीरिपर्यवसानं च जानतो वामदेवस्य "अहं मनुरभवं" इत्यादौ स्ववाच्यहंशब्देन स्वशरीरकपरब्रह्मोपदेशवदिन्द्रस्यापि "मामुपास्व" इत्यादिना स्वशरीरकपरमात्मदृष्टिकृत इत्यर्थ इत्याहुरित्यर्थः। **उक्तेति**। शास्त्रशब्दस्य ब्रह्मण्येव मुख्यतया मुख्यसम्भवेऽमुख्यवेदग्रहणायोगादस्मद्रीत्या साक्षादेवोपदेशविषयोक्तिसम्भवे शास्त्रकारणकदृष्टिद्वारोपदेशविषयोक्तेरयुक्तत्वादित्युक्तदोषग्रस्तत्वादित्यर्थः। शास्त्रपदास्वारस्यं चाधिकमित्याह—**भगवतीति**। लोके 'ब्राह्मण-

चन्द्रिका

यत्तु—"जीवमुख्यप्राण" इति सूत्रस्य परकीयं व्याख्यानं, तत्तल्लिङ्गानुग्रहार्थं किञ्चिदत्र जीववाक्यं, किञ्चिन्मुख्यप्राणवाक्यं, किञ्चिद्ब्रह्मवाक्यं, तथा च त्रयोऽप्युपास्या इति चेन्न, उपासात्रैविध्यप्रसङ्गात्, अन्यत्र "प्राणस्य प्राणम्" इत्यादिवाक्यान्तरे ब्रह्मलिङ्गैः प्राणशब्दे ब्रह्मपरताया आश्रितत्वात् इहाऽपि हिततमत्वादिब्रह्मलिङ्गयोगादिति, तन्न, "अपीतौ तद्वत्प्रसङ्गात्" इत्यादिवत प्रसङ्गपदाभावात् । "मामेव विजानीहि" इतीन्द्रलिङ्गस्यापि सत्त्वेन चातुर्विध्यादिति वक्तव्यत्वाच्च । पूर्ववादिनं प्रति इष्टापत्तेश्च।

प्रकाशः

मानय' इत्यादौ शरीरिपर्यन्तत्वप्रतीतेरिति भावः ।

यत्त्विति। विवृतमेतत्प्राक्। **त्रैविध्यप्रसङ्गादिति**। ब्रह्ममात्रग्रहणे तु नैवमिति भावः। कथं तर्हि प्राणशब्दो ब्रह्मणीत्यतः प्रवृत्तं—**आश्रितत्वादिति**। तस्यार्थमाह—**अन्यत्रेति** । **चातुर्विध्यादिति** । नन्विन्द्रलिङ्गं **'शास्त्रदृष्टया'** इत्यनेनैव परिहृतं, न पुनरत्र शङ्कार्हमिति चेत्, तर्हि जीवमुख्यप्राणलिङ्गानामपि ब्रह्मैक्याङ्गीकारेण समाधातुं शक्यत्वेन साम्यात्, तथोपास्यत्वेन पुनः शङ्केत्यस्यापि साम्यादिति भावः । **इष्टापत्तेरिति** । तेनैव त्रिविधोपासनाया अङ्गीकृतत्वादिति भावः । ननु नायं दोषः, उपासनात्रैविध्यस्य पूर्वपक्षयुक्तित्वेन सिद्धान्ते तत्प्रसङ्गस्यानापाद्यत्वात् । किंतु "मामेव विजानीहि" इत्युपक्रम्य "प्राणोऽस्मि प्रज्ञात्मा" इत्युक्त्वा "स एष प्राणः" इत्युपसंहारेण ब्रह्मण्यवगतेनैकवा-

चन्द्रिका

ननूपक्रमोपसंहारैकरूप्यादेकवाक्यताऽवगता । अत एव भामत्यां भाष्यमुल्लङ्घ्य त्रिविधोपसनापरत्वेन वाक्यभेदेन पूर्वपक्षं प्रापय्य, तदेकवाक्यताप्रतीतेः ब्रह्ममात्रपरत्वमिति सिद्धान्तितमिति चेत्, उच्यते–

बुद्ध्यादिपरमत्रैव सा प्रज्ञेत्यादिकं यथा ।

मामुपास्वेत्यादिवाक्यं तथाऽस्त्विन्द्रादिगोचरम् ॥

अत्रैव ब्रह्मपरवाक्यसमुदाये यथा–"यो वै प्राणः सा प्रज्ञा या प्रज्ञा स प्राणः सह ह्येतावस्मिन् शरीरे वसतः सहोत्क्रामतः" इत्येकदेशो ज्ञानक्रियाशक्त्याश्रयबुद्धिप्राणपरः, सिद्धान्तेऽपि प्रज्ञाप्राणशब्दयोरुत्क्रमणादिलिङ्गैर्बुद्धिवायुपरत्वात्, तथा पूर्वपक्षेऽपीन्द्रादिलिङ्गस्वारस्यार्थं तत्तद्वाक्यमिन्द्रादिपरमस्तु । 'आश्रितत्वात्' इत्यत्र च प्रकृतत्रैविध्यस्यैव अन्वयसम्भवे 'ब्रह्मपरतायाः' इत्यध्याहारो न युक्तः । 'तद्योगात्' इति च सर्वनाम्नस्सन्निकृष्टत्रैविध्यपरत्वसम्भवे

प्रकाशः

क्यत्वेनेति वाचस्पतिमतमाशङ्क्य निरस्यति–**नन्विति** । विवृतं चैतत्प्रागस्माभिः । एकवाक्यत्वावगमेऽपि न पूर्वपक्षोपमर्दः संभवतीति भावेनाह–**उच्यत इति** । पूर्वार्धं व्याचष्टे–**अत्रैवेति** । 'एकदेशः' किञ्चिद्वाक्यं । ज्ञानशक्त्याश्रयबुद्धेः क्रियाशक्त्याश्रयप्राणस्य च प्रतिपादकं यथेत्यर्थः । तत्र विगानमाह–**सिद्धान्तेऽपीति** । उत्तरार्धं व्याख्याति–**तथेति** । सूत्रखण्डार्थेऽप्यनुपपत्तिमाह–**आश्रितत्वादिति** । उपलक्षणं चैतत्, 'अन्यत्र'

चन्द्रिका

विप्रकृष्टब्रह्मलिङ्गपरत्वमयुक्तम् । 'तद्योगात्' इत्यस्य 'अनुगमात्' इत्यनेन पुनरुक्तिश्च ।

इतरे तु—प्राणधर्मेण बुद्धिधर्मेण स्वधर्मेण च ब्रह्मोपासायास्त्रैविध्यात् ब्रह्मवाक्येऽपि जीवमुख्यप्राणलिङ्गं न विरुद्धमिति व्याचक्षते । तन्न, अन्यधर्मेणान्योपासने ब्रह्मधर्मादिना जीवोपासायास्त्रैविध्यात्

प्रकाशः

इत्यस्याप्यध्याहार इत्यपि ध्येयम् । **विप्रकृष्टेति** । 'अनुगमात्' इत्यनेनोक्तेत्यर्थः । **पुनरुक्तिरिति** । हिततमत्वादिलिङ्गपर्यालोचनया ब्रह्मत्वावगमादिति व्याख्यातत्वादिति भावः ।

एवं भाष्याभिमतं निरस्येदानीं यत्प्राचां वृत्तिकृतां मतं 'अथवा' इत्यादिना परभाष्य एवोपन्यस्तं, तदनूद्य निरस्यति—**इतरे त्विति** । "शरीरं परिगृह्योत्थापयति" इति प्राणधर्मेण, "प्रज्ञया वाचं समारुह्य वाचा सर्वाणि नामान्याप्नोति" इति प्रज्ञाशब्दितबुद्धिधर्मेण, क्रियाज्ञानशक्तिद्वयाश्रयप्राणबुद्धिरूपोपाधिधर्मेणेति यावत्, "प्राण एव प्रज्ञात्माऽजरः" इत्यादिब्रह्मधर्मेण चैकस्यैव ब्रह्मण उपासनायास्त्रैविध्यादन्यत्र "मनोमयः प्राणशरीरो भारूपः" इत्यादौ उपाधिधर्मेण ब्रह्मण उपासनाया आश्रितत्वादिहापि तद्योगादिति यथाश्रुतमेव, न तु प्रसङ्गशब्दाध्याहार इत्यर्थः । पूर्वं प्राणस्यैकमुपासनं, अपरं जीवस्य, अपरं ब्रह्मण इत्युपासनात्रैविध्येन वाक्यभेदप्रसङ्गो दूषणमुक्तं पूर्वपक्षिणं प्रति । इह तु ब्रह्मण एकस्यैवोपासनात्रयविशिष्टस्य विधानान्न वाक्यभेद इति भावः । यद्यपीदं

चन्द्रिका

जीववाक्येऽपि ब्रह्मलिङ्गं न विरुद्धमिति वैपरीत्यप्रसङ्गात् ॥

केचित्तु—चिद्विशिष्टत्वेन अचिद्विशिष्टत्वेन स्वरूपेण चेत्युपासायाः त्रैविध्यम् । न च वाक्यभेदः, "तं मामायुरमृतमित्युपास्व" इत्येकस्मिन्नेव वाक्ये 'मां' इति जीवविशिष्टायाः 'आयुः' इति प्राणविशिष्टायाः, 'अमृतं' इति स्वेन रूपेण चोपासनाया विधा-

प्रकाशः

मतं भामत्यामेव वाक्यभेदप्रसङ्गेन दूषितं, तथाऽपि प्रबलदोषकथनायैतदुपन्यासः । **जीवेति** । बुद्ध्यवच्छिन्नस्यैव जीवत्वादिति भावः ।

केचित्त्विति । प्रसङ्गशब्दानध्याहारेण भोक्तृजीवशरीरकत्वरूपचिद्विशिष्टत्वानुसन्धानाय, भोग्यभोगकरणभूतप्राणशरीरकत्वरूपाचिद्विशिष्टत्वानुसन्धानाय, स्वरूपेण चिदचिल्लक्षणद्वारमन्तरेण गुणविशिष्टानुसन्धानाय चेति त्रिविधोपासनाय जीवलिङ्गानामत्रोपदेशात् । एवं त्रिविधानुसन्धानस्य "सत्यं ज्ञानमनन्तं ब्रह्म" "विज्ञानं चाविज्ञानं च" इत्यादिषु प्रकरणान्तरेष्वप्याश्रितत्वात् इहापि त्रिविधानुसन्धानस्य युक्तत्वादित्यर्थ इत्याहुरित्यर्थः । श्रुतप्रकाशोक्तं समाधानमाह—**तं मामिति** । यत्र जीवविशेषाणामचेतनविशेषाणां परमात्मासाधरणधर्मयोगः, तत्र चिदचिद्विशेषान्तरात्मत्वानुसन्धानं प्रतिपिपादयिषितमिति भावः । अत्र "शरीरं परिगृह्योत्थापयति" इति प्राणलिङ्गनिर्वाहायाचिद्विशिष्टत्वेनानुसन्धानं यदुक्तं, तदयुक्तं, प्राणस्य चेतनत्वात् । तथा च द्वैविध्यमेवोपासनस्य न

चन्द्रिका

नादित्याहुः। तन्न, "तान् वरिष्ठः प्राण उवाच" "य एवायं मुख्यः प्राणः" "अपहतपाप्मा ह्येषः" इत्यादिश्रुत्या मुख्यप्राणस्य चेतनत्वात् तल्लिङ्गनिर्वाहाय अचिद्विशिष्टोपासनोक्त्ययोगात् ॥

प्रकाशः

त्रैविध्यमिति भावेन दूषयति—**तन्नेति**। **अपहतेति**। नह्यचेतनस्य पापप्रसक्तिरस्तीति भावः। उपलक्षणमेतत्, 'आश्रितत्वात्' इत्यस्य 'इह' इत्यनेनान्वयोपपत्तावन्यत्रेत्यध्याहारायोग इत्याद्यपि ध्येयम्।

एतेन यत्केन चित्प्रलपितं—"प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्व" इत्यत्रेन्द्रवाक्ये उपासनाकर्मत्वेनेन्द्रशब्दनिर्दिष्टः किमिन्द्र उत शिव इति सन्देहे, वृष्टिद्वारा सकलरक्षकत्वरूपप्राणत्वस्य "इन्द्रो राजा जगतो य ईशे" इति श्रुत्या परमैश्वर्येण सर्वोपास्यत्वस्य च सम्भवाज्जीवलिङ्गानां च जीवविशेषेन्द्र एव पर्यवसानात् प्राणलिङ्गे सत्यपि प्राणस्येन्द्रविशेषणत्वप्रतीतेः जीववायुपक्षयोरनुत्थानादिन्द्र एवेति प्राप्ते, अजरामृतत्वादिलिङ्गानामनुगमादुपसंहारेऽवगमाच्छिव एवेति सिद्धान्त इति। उक्तं च—

प्राणोऽस्मीत्युक्त इन्द्रः स हि जगदखिलं प्राणयत्यम्बुवर्षैः
इन्द्रो राजेत्यनेकश्रुतिमितमहिमा स्यादुपास्यश्च मुक्त्यै।
मैवं क्षुण्णः स सृज्यस्तमजरममृतं शक्नुमो नैव वक्तुं
तस्मात्तं मामुपास्वेत्यखिलपरिवृढे योज्यतां शास्त्रदृष्ट्या ॥

प्रकाशः

इति, तन्निरस्तं, इन्द्र इत्येत्र पूर्वपक्षे सति सूत्रे "जीवमुख्यप्राणलिङ्गात्" इति शङ्काऽयोगात्। तत्र जीवादिशब्दस्य तद्विशेषेन्द्रपरत्वे च वक्तुरात्मोपदेशस्यापीन्द्रलिङ्गस्य अनेनैव सङ्ग्रहसम्भवेन "न वक्तुः" इति पृथक् शङ्काऽयोगात्। प्राणस्येन्द्रविशेषणत्वेनाप्राधान्ये सूत्रे धर्मिनिर्देशाय प्राणपदप्रयोगायोगाच्च। प्राणत्वस्य विष्णावेव प्राणाधिकरणे साधितत्वाच्च। अमृतत्वादेः "त्रिपादस्यामृतं दिवि" इत्यादौ विष्णुधर्मत्वस्योक्तत्वाच्च। शिवस्यापि "रुद्रस्य शिर उत्पिपेष" इत्यादेरमृतत्वाद्ययोगाच्च। यदपि—"नवक्तुः" इत्यादीनां रामानुजरीत्याऽर्थकथनं, तदपि तद्दूषणेनैव निरस्तम्। यच्चोक्तं शिवार्कमणिदीपियां— ऐतरेये "प्राणोऽ वा अहमस्मृचषे" इत्यत्र "प्राणः सर्वाणि भूतानि" इत्यादिना सार्वात्मचस्य ब्रह्मलिङ्गस्य सत्त्वेन प्राणस्य ब्रह्मत्वं निश्चितमिति तत्र न सन्देहः। "प्राणोऽस्मि प्रज्ञात्मा" इत्यत्र तु त्वाष्ट्रवधादिन्द्रलिङ्गात् "शरीरं परिगृह्य" इत्यादिप्राणलिङ्गाच्च वैषम्यमिति, मूर्खप्रलपितमेतत्, तत्रेवात्रापि भूयसां ब्रह्मलिङ्गानां सत्त्वात्। तत्र ब्रह्मत्वस्यात्रत्यन्यायं विनाऽन्येनासिद्धेः। इन्द्रादिलिङ्गानां निरवकाशानां भूयसां दर्शितत्वाच्च। तस्यैवोदाहरणे सूत्रोक्तत्रयकोटिकपूर्वपक्षसंभवेन सूत्रस्य सामञ्जस्यस्योक्तत्वाच्च। संशयबीजस्य टीकायामेवोक्तत्वाच्चेति॥

चन्द्रिका

टीकाक्षरार्थस्तु—ननु "एतद्ध स्म वै तद्विद्वानाह हिरण्यदन्वैदः" इति हिरण्यदन्वैदवत् महिदासोऽपि ऋषित्वेनोच्यतामित्यत आह—**नहि महिदासोऽपि मुनितयैवोच्यते वैयर्थ्यादिति।** अस्या उपनिषदः ऐतरेयसञ्ज्ञयैव इतरापुत्रस्य महिदासस्य ऋषित्वसिद्ध्या तदुक्तिनैष्फल्यादित्यर्थः । यद्वा—ऋषिमात्रत्वे महिदासस्य "इतः-प्रदाना ह्येत इतस्सम्भृताः" इत्यादिना देवतापदप्रदातृत्वं तत्पोषकत्वमित्यादीनां उपास्यब्रह्मधर्माणामुक्तेर्नैष्फल्यादित्यर्थः । यद्वा—महिदासस्य मुनित्वेनाप्युक्तिरिष्टा, मुनित्वेनैवोक्तिः न तु ब्रह्मतयेति तु न युक्तम्, "इतःप्रदाना ह्येत इतस्सम्भृताः" इत्यादीनां ब्रह्मधर्मवाचिनां विरुद्धार्थत्वादित्यर्थः ॥

प्रकाशः

अधिकरणान्ते टीकायां "न हि महिदासो मुनितयैवोच्यते, वैयर्थ्यादेव" इत्येतद्वाक्ये वैयर्थ्यादित्ययुक्तम्, ऋषिज्ञानार्थत्वादित्यतोऽवतार्यार्थमाह—**नन्विति।** **ऋषित्वेति।** ऋषिज्ञानस्यान्यथासिद्धेरित्यर्थः । 'वैयर्थ्यात्' इत्यत्र प्रतियोगिनमध्याहृत्यार्थान्तरमाह—**यद्वेति।** इतः प्रदानं येषान्त इति पदप्रदातृत्वं, 'सम्भृताः' इति पोषकत्वमिति ध्येयम् । 'उपास्यानां' ब्रह्मधर्माणामित्यर्थः । विशब्दस्य विरुद्धार्थत्वं मत्वाऽन्यथा योजयति—**यद्वेति।** शिष्टं सुगममिति भावः ।

चन्द्रिका

अत्र चाद्या पञ्चाधिकरणी समन्वयविशेषाप्रतिपादकत्वादध्यायपादबहिर्भूता तदुपोद्घातत्वेनैका पेटिका। तत्राप्याद्यं शास्त्रमात्रोपोद्घातरूपम्। इतरा चतुरधिकरणी तु शास्त्रान्तर्गताऽपि अध्यायोपोद्घातरूपा। आनन्दमयाधिकरणमारभ्यापादपरिसमाप्ति समन्वयपरत्वेन एका महापेटिका। तत्राप्यानन्दमयान्तराधिकरणे बहुविषयकपूर्वपक्षयुक्तत्वेन, अन्तरादिचतुरधिकरणी तु साक्षादानन्दमयाक्षेपकपूर्वपक्षयुक्तत्वेन, तत्राप्याकशादित्रयमन्तरधिकणन्यायातिदेशकत्वेन भूतेप्रसिद्धनामाविषयकत्वेन चैकाऽवान्तरपेटिकेत्याद्यूह्यम्॥

प्रकाशः

एतत्पादीयद्वादशाधिकरणानां प्रमेयस्य सुज्ञानाय पेटिकासङ्गतिमाह—**अत्रेति**। समन्वयसूत्रे सामान्यतः प्रतिपादनात् 'विशेष' इत्युक्तम्। समन्वयाप्रतिपादने किमर्थमत्र निवेश इत्यत उक्तं—**उपोद्घातत्वेनेति**। एतच्चेक्षत्यधिकरणे स्पष्टम्। **तत्राप्याद्यमिति**। यथा चैतत् तथोक्तं जिज्ञासाधिकरणे। **युक्तत्वेनेति**। 'एकाऽवान्तरपेटिका' इत्यन्वयः। आदिपदेन च्छन्दःप्राणाधिकरणयोः बहुश्रुतिलिङ्गविषयत्वेन वा ज्योतिःप्राणद्वाराऽऽनन्दमयाक्षेपकत्वेन वा अन्यत्रप्रसिद्धश्रुतिलिङ्गोत्कीर्तनस्य प्रयोजनोक्तिपरत्वेन वैका पेटिका। एवमुत्तरपादेष्वपि ध्येयमिति भावः।

चन्द्रिका

शब्दास्सामान्याधिदैवाधिभूताध्यात्मगोचराः ।
समूक्ता अधिवेदस्थास्सलिङ्गाश्चात्र चिन्तिताः ॥

अस्मिंश्च पादे "आनन्दमयः" इत्यत्र सामान्यशब्दाः, "अन्तः" इत्यत्र अधिदैवगताः, "आकाशः" इत्यत्र अधिभूतगताः, "अत एव प्राणः" इत्यत्र अध्यात्मगताः, "ज्योतिः" इत्यत्र सूक्तसहिताः, "छन्दः" इत्यत्र अधिवेदगताः, "प्राणस्तथा" इत्यत्र लिङ्गसहिताः शब्दा विचारिता इति ॥

इति श्रीब्रह्मण्यतीर्थपूज्यपादानां शिष्येण श्रीव्यासयतिना विरचितायां श्रीमद्भाष्यटीकाविवृतौ तात्पर्यचन्द्रिकायां प्रथमाध्यायस्य प्रथमः पादः

प्रकाशः

सप्तानामप्यधिकरणानां विषयोपाधीन् सङ्गृह्य विशदयति—**शब्दा इति**। गुणिसामान्यवाचका इत्यर्थः। **लिङ्गेति**। पूर्वपक्षप्रापकानेकलिङ्गसहिता इत्यर्थः। **शब्दा इति**। नामात्मका विष्णौ समन्विता इत्यर्थः ॥

इति श्रीमत्सर्वतन्त्रस्वतन्त्रसुधीन्द्रगुरुपादशिष्य-
राघवेन्द्रयतिकृते चन्द्रिकाप्रकाशे प्रथमाध्या-
यस्य प्रथमः पादः

ओम्

श्रीहयग्रीवाय नमः श्रीगुरुभ्यो नमः.

अथ टीका-चन्द्रिका-प्रकाशसमेते श्रीमद्ब्रह्मसूत्रभाष्ये प्रथमाध्याये द्वितीयःपादः.

—— अथ सर्वगतत्वाधिकरणम् ——

लिङ्गात्मकानां शब्दानां विष्णौ प्रवृत्तिं दर्शयत्यास्मिन् पादे प्राधान्येन। "ब्रह्म ततमम्" इति सर्वगतत्वमुक्तं विष्णोः।

तत्त्वप्रकाशिका

एतत्पादप्रतिपाद्यं दर्शयति—लिङ्गेति। लिङ्गात्मकानामिति। धर्मविशिष्टधर्मिवाचिनामित्यर्थः। 'अन्यत्र प्रसिद्धानां' इति संयोज्यम्। वैश्वानराधिकरणे नामसमन्वयसिद्धेः 'प्राधान्येन' इत्युक्तम्। अत्र लोकतोऽन्यत्रप्रसिद्धाऽऽदित्यश्रुतिसहपठितसर्वगतत्वलिङ्गात्मकशब्दस्य परब्रह्मणि समन्वयप्रतिपादनादस्ति शास्त्रादिसङ्गतिः। श्रुत्यादिसङ्गतिं विषयसंशयौ च सूचयति—ब्रह्मेति। "ब्रह्म ततमं" इति विष्णोस्सर्वगतत्वमुक्तम्। तदेवैतरेयके "एतं ह्येव बह्वृचा महत्युक्थे मीमांसन्त एतमग्नावध्वर्यवः एतं महाव्रते छन्दोगा एतमस्यामेतं दिव्येतं वायावेतमाकाश एतमप्स्वेतमोषधीष्वेतं वनस्पतिष्वेतं चन्द्रमस्येतं नक्षत्रेष्वेतं सर्वेषु भूतेष्वेतमेव ब्रह्मेत्याचक्षते" इत्याम्नायते। तद्यदि विष्णोरन्यस्य स्यात्, तर्हि प्राचीनप्राणोऽप्यन्य

तच्च "तस्यैतस्यासावादित्यो रसः" इत्यादिना आदित्यस्य प्रतीयते। अतोऽब्रवीत्—

ओम् सर्वत्र प्रसिद्धोपदेशात् ओम् ॥ १ ॥

"स यश्चायमशरीरः प्रज्ञात्मा" इत्यादिना

तत्त्वप्रकाशिका

एव स्यादेकप्रकरणत्वात्। अतोऽवश्यं विचार्यं भवति। तत्सर्वगतत्वं विषयः। विष्णोरन्यस्य वेति सन्देहः। "ब्रह्म ततमं" इत्युक्तिरादित्यश्रुतिश्च सन्देहबीजमिति भावः। तत्र सयुक्तिकं पूर्वपक्षयति—तच्चेति। तत्सर्वगतत्वमादित्यस्यैव भवेत्, "तस्यैतस्यासावादित्यो रसः, यश्चासावादित्यः तस्मात्पुरुषं पुरुषं प्रत्यादित्यो भवति" इत्यादिबह्वादित्यश्रुतेः। "सूर्य आत्मा जगतः" इति सौरमन्त्रोदाहरणाच्च। 'एतमस्यां' इति क्षित्यादिषूक्त्वाऽऽदित्येऽस्यानुक्तत्वलिङ्गाच्च। अन्यथा 'एतमादित्ये' इत्युक्तिस्स्यात्, सजातीयचन्द्रादावुदितत्वात्। अत एव न श्रुतेरन्तर्यामिविषयत्वं युज्यते। सर्वजीवानां वा एतत्सर्वगतत्वमुच्यते, "चक्षुर्मयः श्रोत्रमयश्छन्दोमयो मनोमयो वाङ्मय आत्मा" इति तल्लिङ्गश्रवणात्। न च तल्लिङ्गमन्तर्यामिविषयम्, तस्यापरच्छिन्नत्वेन "सर्वेषु भूतेषु" इत्युक्ताल्पौकस्त्वायोगात्। चक्षुर्मयत्वाद्ययोगाच्च। अतो विष्णवन्यस्यैव सर्वगतत्वादन्यस्यैव प्राणत्वमानन्दमयत्वं चेति भावः। सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे—अत इति। "स यश्चायं"

सर्वत्रोच्यमानो नारायण एव, "तदेव ब्रह्म परमं कवीनाम्" "परमं यो महद्ब्रह्म"

वासुदेवात्परः को नु ब्रह्मशब्दोदितो भवेत् ।
स हि सर्वगुणैः पूर्णः तदन्ये तूपचारतः ॥

इति तस्मिन्नेव प्रसिद्धब्रह्मशब्दोपदेशात् ॥ १ ॥

ओम् विवक्षितगुणोपपत्तेश्च ओम् ॥ २ ॥

"स योऽतोश्रुतः" इत्यादि ।

तत्त्वप्रकाशिका

इत्यादिना वाक्येन 'सर्वत्र' पृथिव्यादिपूच्यमानो नारायण एव, "एतमेव ब्रह्मेत्याक्षते" इति सर्वगते ब्रह्मशब्दोपदेशात् । ब्रह्मशब्दस्य च श्रुत्यादौ नारायण एव प्रसिद्धत्वादित्यर्थः । तथा च श्रुतिः—

यच्च किञ्च जगत्सर्वं दृश्यते श्रूयतेऽपि वा ।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥

इति । अत्र "स यश्चायं" इति वाक्योदहरणं पूर्वं विषयवाक्यस्यानुदाहृतत्वात्कृतमशरीरत्वयुक्तिसूचनार्थं च । नहि नारायणेतरचेतनानां स्वतोऽशरीरता सम्भवति ॥ १ ॥

युक्त्यन्तरेण विष्णोरेवात्रोक्तसर्वगतत्वं प्रतिपादयत्सूत्रमुपन्यस्य तदुपात्तश्रुतिमेवोदाहरति—विवक्षितेति । "स योऽतोऽश्रुतोऽगतोऽमतोऽनतोऽदृष्टोऽविज्ञातोऽनादिष्टः श्रोता मन्ता द्रष्टा देष्टा

स हि "न ते विष्णो जायमानो न जातो देव" इत्यादिनाऽश्रुतत्वादिगुणकः। "स सविता स वायुः स इन्द्रः सोऽश्रुतः सोऽदृष्टो यो हरिर्यः परमो यो विष्णुर्योऽनन्तः" इत्यादि चतुर्वेदशिखायाम् ॥ २ ॥

न चादित्यशब्दाच्चक्षुर्मयत्वादेश्च जीव इति वाच्यम्,

ओम् अनुपपत्तेस्तु न शारीरः ओम् ॥ ३ ॥

एकस्य सर्वशरीरस्थत्वानुपपत्तेरेव ॥ ३ ॥

तत्त्वप्रकाशिका

घोष्टा विज्ञाता प्रज्ञाता सर्वेषां भूतनामन्तरपुरुषः" इति सर्वगते अश्रुतत्वादिगुणश्रवणात्, तेषां च विष्णोरेव योग्यत्वेन तस्मिन्नेवोपपत्तेरन्यत्रानुपपत्तेश्च विष्णुरेवायं सर्वगत इति भावः। 'विवक्षिताः' इति वक्तुं योग्याः। नन्वेतद्गुणानां कुतो विष्णुनिष्ठत्वमित्यत आह—स हीति। ते महिम्नः परमन्तं कोऽपि श्रोत्रादिना नापेत्यर्थः। अत्र मुखतोऽश्रुतत्वादिकं विष्णोर्न श्रूयत इत्यतः स्पष्टश्रुतिं चाह—स इति। अत्रातत्वस्यादिमत्वेऽपि तस्य सर्वगतत्वानतिरिक्तत्वेन साध्यत्वादश्रुतत्वादीनामेव ग्रहणम् ॥ २ ॥

ननु यथा ब्रह्मशब्दादश्रुतत्वादिलिङ्गैश्च विष्णुः सर्वगत इत्युच्यते, तथा आदित्यशब्दात्सर्वजीवलिङ्गाच्च आदित्यः सर्वजीवा वा किं न स्युरित्यत आह—न चेति। 'जीवस्सर्वगतः' इति शेषः। तत्र हेत्वाकाङ्क्षायां सूत्रमुपन्यस्य प्रतिज्ञांशस्य सम्बन्धभाष्येणैव व्याख्यतत्वाद्धेत्वंशमेव व्याचष्टे—अनुपपत्तेरिति। भवेदन्य-

ओम् कर्मकर्तृव्यपदेशाच्च ओम् ॥ ४ ॥

"आत्मानं परस्मै शंसति" इत्यादि ॥ ४ ॥

तत्त्वप्रकाशिका

स्य सर्वगतत्वं, यद्यन्यस्मिन्नुपपद्येत । न चोपपद्यते । तथाहि— किं मिलितसर्वजीवानां सर्वगतत्वं उत प्रत्येकमुच्यते । नाद्यः, तत्कथनवैयर्थ्यात्, स्वस्वदेहस्थितिमात्रस्य सिद्धत्वात् । न द्वितीयः, सर्वशरीरगतसुखदुःखादिप्राप्त्यैकस्य सर्वशरीरस्थत्वानुपपत्तेः । अतोऽन्यप्रापकसद्भावेऽपि तस्य सर्वगतत्वानुपपत्तेरेव न जीवोऽयं सर्वगत इत्याशयः । तुशब्द एवार्थः । न च वाच्यं स्वकर्मनिर्मितमेवास्य भोगायतनमिति न भोगाव्यवस्था व्रीह्यादिगतजीवान्तरवदिति, अनादितः सर्वेषां सर्वशरीरस्थत्वे कर्मभेदस्यापि साधयितुमशक्यत्वात् । न चाऽऽदित्यस्यास्तु सर्वशरीरस्थत्वं, भवदभ्युपगमादिति वाच्यम्, तस्यापि ब्रह्मादिसर्वशरीरस्थत्वानुपपत्तेः ॥ ३ ॥

युक्त्यन्तरेण जीवस्यात्रोक्तसर्वगतत्वं पराकुर्वत्सूत्रं पठित्वा तदुपात्तश्रुतिमेवोदाहरति—**कर्मेति** । अत्रोक्तसर्वगतस्य 'आत्मानं' इति कर्मत्वेन व्यपदेशाज्जीवस्य च 'शंसति' इति कर्तृत्वेन व्यपदेशादेकस्यां क्रियायां कर्मकर्त्रोरुत्सर्गतो भिन्नत्वनियमादत्र चापवादकारणाभावाच्च नायं सर्वगतः शारीर इति भावः । न चैकस्सर्वगतो जीवस्सर्वगतं जीवान्तरं शंसतीति योज्यम्, सर्वगतताया सर्वजीवाग्रहणापातात् । तथा प्रतीत्यभावेन क्लिष्टकल्पनत्वाच्च । आदिपदेन "आत्मानं वेद" इत्यस्य ग्रहणम् ॥ ४ ॥

ओम् शब्दविशेषात् ओम् ॥ ५ ॥

"एतमेव ब्रह्मेत्याचक्षते" इति । न हि जीवमेव ब्रह्मेत्याचक्षते। "एष उ एव ब्रह्मैष उ एवात्मैष उ एव सवितैष उ एवेन्द्र एष उ एव हरिर्हरति परः परानन्दः" इति चेन्द्रद्युम्नशाखायाम् ॥ ५ ॥

तत्त्वप्रकाशिका

यदुक्तं ब्रह्मशब्दाद्विष्णुरेव सर्वगत इति, तदयुक्तम्, ब्रह्मशब्दस्य जीवेष्वपि सम्भवात् । न चासौ जीवेऽमुख्य इति तद्ग्रहः, अमुख्यार्थस्यापि चक्षुर्मयत्वादिबाधेन ग्रहणोपपत्तेः । न चाश्रुतत्वादिगुणानुपपत्तिः, "श्रुत्वाऽप्येनं वेद न चैव कश्चित्" इति जीवस्याप्यश्रुतत्वादिश्रवणात् । न च "अनुपपत्तेः" इत्युक्तदोषः, विष्णावपि तस्य साम्यात् । न च "कर्मकर्तृव्यपदेशाच्च" इत्यभिहितदोषप्राप्तिः, चक्षुर्मयत्वादिबाधकेनैकस्यैव कर्मकर्तृत्वोपपत्तेरित्याशङ्कां परिहरत्सूत्रमुपन्यस्य तदुपात्तश्रुतिमेवोदाहरति—शब्देति । नानेन ब्रह्मशब्देन जीव उच्यते, ब्रह्मशब्दस्य "एतमेव" इत्यवधारणाख्यविशेषवत्त्वादित्यर्थः । ब्रह्मशब्दस्य सावधारणत्वेऽपि कुतो न जीवे वृत्तिरित्यत आह—न हीति । सावधारणब्रह्मशब्दवाच्यत्वे मुख्यब्रह्मत्वं स्यात् । न च तज्जीवस्योपपद्यत इति भावः । विष्णावपि सावधारणब्रह्मशब्दश्रुतिः कुत इत्यत आह—एष इति ॥ ५ ॥

ओम् स्मृतेश्च ओम् ॥ ६ ॥

अहमात्मा गुडाकेश सर्वभूताशयस्थितः ।
गामाविश्य च भूतानि धारयाम्यहमोजसा ॥

इत्यादि । न चाप्रामाणिकं कल्प्यम् ॥ ६ ॥

तत्त्वप्रकाशिका

स्मृतिसमाख्ययाऽपि विष्णोरत्रोक्तसर्वगतत्वं साधयत्सूत्रं पठित्वा तां स्मृतिमुदाहरति—स्मृतेश्चेति । न च वाच्यं स्मृतेरपि स्ववचनत्वेन कथं विप्रतिपन्नं प्रति सूत्रकारस्तामुपादत्त इति, तस्याः परोक्तानुवादरूपत्वात् ॥ एवं सूत्राणि व्याख्याय परकृतापव्याख्यां प्रत्याख्याति—न चेति । ईश्वर एव मनोमयत्वादिगुणो न जीव इति प्रतिपादिते, जीवेश्वरयोरैक्यात् कथमेतदित्याशङ्क्य केन चिदुक्तम्—नायं पारमार्थिको भेदः, किन्त्वत्र मिथ्याभूत एव सूत्रकृता विवक्षित इति । तद्भेदस्य मिथ्यात्वं न कल्प्यम्, भेदमिथ्यात्वे मानाभावादित्यर्थः । जीवेशभेदो मिथ्या भेदत्वात् चन्द्रभेदवत् इत्यनुमानं मानमितिचेन्न, मिथ्येत्यस्यासत्त्वाभिप्रायेऽपसिद्धान्तात् । अनिर्वाच्यत्वाभिप्राये अप्रसिद्धविशेषणत्वात् । सत्त्वाभावसाधने तत एवासत्त्वापत्तेः । बाध्यत्वसाधनेऽप्यन्यथाज्ञातस्य सम्यग्ज्ञातत्वं चेद्बाध्यत्वं, तत्सिद्धसाधनम् । त्रिकाले स्वरूपनिषेधविषयत्वं चेदसत्त्वापत्तिः । प्रतीतस्येति चेदसदपरोक्षतया प्रतीयते, वाच्यत्वादित्यसतोऽपि प्रतीतिसिद्धेः । भेदा-

ओम् अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च ओम् ॥ ७ ॥

"सर्वेषु भूतेषु" इत्यल्पौकस्त्वात् चक्षुर्मयत्वादिना जीवव्यप·

तत्त्वप्रकाशिका

भावे भेदत्वसामन्यस्याप्यसिद्धेश्च, व्यक्त्यभावेन सामान्यायोगात्। भेदत्वहेतोरविद्यानिवृत्तिरूपमोक्षात्मभेदे व्यभिचाराच्च। न चासावपि भेदो मिथ्येति युक्तम्, मोक्षनिवृत्त्यापातात्। मिथ्याभूतस्याप्यनिवर्त्यत्वे प्रकृतभेदस्यापि तथात्वं नानिष्टम्। न चात्ममोक्षयोर्भेदाभावः, आत्मनोऽनादिनित्यतया तदभिन्नमोक्षस्य ज्ञानसाध्याविद्यानिवृत्तिरूपत्वानुपपत्तेः। "द्वा सुपर्णा" इत्यादिश्रुतिविरोधाच्च। अन्यतरचन्द्रस्यैवाऽऽरोपितत्वेनारोपितानारोपितभेदस्य सत्यत्वाच्च। अतो न भेदमिथ्यात्वे मानमित्यलम् ॥ ६॥

उक्तार्थमाक्षिप्य समादधत्सूत्रं पठित्वाऽऽक्षेपांशं तावद्व्याचष्टे—**अर्भकेति**। यदुक्तं सर्वत्रोच्यमानो नारायण एवेति, तदयुक्तम्, यथा खलु जीवप्रापकसद्भावेऽप्यनुपपत्त्या तस्य सर्वगतत्वाभावः, तथेश्वरप्रापकसद्भावेऽपि, बाधकसद्भावात्, "सर्वेषु भूतेषु" इत्यस्याल्पस्थानस्थितिकथनात्। चक्षुर्मयत्वादिरूपेण जीवलिङ्गकथनाच्च। आदित्यश्रुतेश्च। न ह्यपरिच्छिन्नस्य सर्वजीवधर्मरहितस्य भगवतोऽर्भकौकस्त्वादिकथनं युज्यते। अतः पक्षद्वयेऽपि समसाधकबाधके न विष्णुरेवायं सर्वगत इति पक्षपातो युक्त इति भावः।

देशाच्च नेति चेत् न, अर्भकौकस्त्वेन चक्षुर्मयत्वादिरूपेण च तस्यैव विष्णोर्निचाय्यत्वात् । सर्वगतत्वेऽप्यल्पौकस्त्वं च युज्यते व्योमवत् ।

सर्वेन्द्रियमयो विष्णुः सर्वप्राणिषु च स्थितः ।
सर्वनामाभिधेयश्च सर्ववेदोदितश्च सः ॥

इति स्कान्दे ॥ ७ ॥

तत्त्वप्रकाशिका

परिहारांशं व्याचष्टे—नेति । न पक्षद्वयस्यापि साम्येन विष्णोस्सर्वगतत्वाभाव इति युक्तम्, बाधकाभावात् । तथा हि—किमपरिच्छिन्नादिरूपस्यार्भकौकस्त्वादिकथनमप्रयोजनमयुक्तं वा । आद्यं दूषयति—अर्भकेति । अपरिच्छिन्नस्य जीवविलक्षणस्यापि हरेरर्भकौकस्त्वेन चक्षुर्मयत्वादिरूपेण चोपास्यत्वान्न तदुक्तिर्व्यर्थेति भावः । द्वितीयेऽपि सर्वगतस्याल्पौकस्त्वं तावन्नायुक्तमित्याह—सर्वगतत्वेऽपीति । नापि जीवविलक्षणस्य चक्षुर्मयत्वाद्ययुक्तम्, "सर्वेन्द्रियमयः" इति स्मृत्या सर्वप्राणिगतेन्द्रियस्वामित्वेन चक्षुर्मयत्वादेरुक्तत्वादित्याशयेनाह—सर्वेति । "सर्वनामाभिधेयश्च" इत्यनेनैवाऽऽदित्यशब्दस्येश्वरवाचित्वं चोक्तं भवति । न चाऽऽदित्येनुक्तिविरोधः, "सर्वप्राणिषु च स्थितः । सर्वनामाभिधेयः" इति स्मृत्याऽऽदित्यादिगतस्यैवाऽऽदित्यादिनामवत्त्वोक्तेः ॥ ७ ॥

पुनरुक्तमाक्षिप्य समादधत्सूत्रमुपन्यस्याऽऽक्षेपांशं तावद्व्याचष्टे—सम्भोगेति । यदुक्तमेकस्य सर्वशरीरस्थत्वं सर्वसमानभोगप्राप्तेरयु-

ओम् सम्भोगप्राप्तिरिति चेन्न वैशेष्यात् ओम् ॥८॥

जीवपरयोरेकशरीरस्थत्वे समानभोगप्राप्तिरिति चेत् न, सामर्थ्यवैशेष्यात् । उक्तं च गारुडे—

सर्वज्ञाल्पज्ञताभेदात्सर्वशक्त्यल्पशक्तितः ।
स्वातन्त्र्यपारतन्त्र्याभ्यां सम्भोगो नेशजीवयोः ॥

इति च ॥ ८ ॥

तत्त्वप्रकाशिका

क्तमिति, तदीश्वरपक्षेऽपि सममेव, जीवपरयोरेकशरीरस्थत्वे परस्यापि जीवसमानभोगप्राप्तेः । न हि दह्यमानगेहगतयोरन्यतरस्यैव दाह इति युक्तम् । तथा चेश्वरपक्षस्यापि दोषित्वान्नायं सर्वगत इति भावः । परिहारांशं व्याचष्टे—**नेति** । न जीवेशयोरेकशरीरस्थत्वेऽपि समानभोगप्राप्तिः, ईश्वरस्य तदप्राप्तौ जीवादपि सामर्थ्यवैशेष्यात्, अग्निस्तम्भनवतो दाहाभाववदिति भावः । किं तत्सामर्थ्यवैशेष्यं, येन समानभोगाप्राप्तिरित्यत आह—**उक्तमिति**। प्राप्तपरिहाराय सत्यपि सामर्थ्ये प्राप्तिस्तु भवत्येव । साऽपि भगवति न सम्भवति, तस्य सार्वज्ञ्येनैष्यत्परिहारसम्भवादिति भावेन सार्वज्ञ्योक्तिः । एवमीश्वरपक्षे विरोधाभावात्, यद्ब्रह्मशब्दस्यामुख्यार्थग्रहणं, अश्रुतत्वादीनां भाक्तत्वकल्पनं, तत्सर्वमपि, परास्तं भवति । तस्माज्जीवप्रापकाणां सावकाशत्वेनासाधकत्वात्, बाधकसद्भावाच्च न जीवः सर्वगतः, किं नाम बाधकाभावात्साधकसद्भावाच्च विष्णुरेवेति प्रागुक्तप्राण अनन्दमयश्च स एवेति सिद्धम् ॥ ८ ॥

चन्द्रिका

॥ श्रीवेदव्यासाय नमः ॥

यैर्लिङ्गैस्साधितः पूर्वं नाम्नां विष्णौ समन्वयः ।
तेषामिहोच्यते लिङ्गजातीयानां समन्वयः ॥

प्रकाशः

टीकायां पादसङ्गत्यनुक्तेस्तामन्यत्रोक्तां दर्शयन् पूर्वपादार्थानुवादपूर्वकमेतत्पादार्थमाह—यैरिति । 'तेषां' लिङ्गानां 'इह' द्वितीयपादे समन्वय उच्यत इत्ययुक्तं, समुद्रशायित्वादिलिङ्गानामिह समन्वयानुक्तेरित्यत आह—लिङ्गेति । प्रागुक्तलिङ्गजातीयानामित्यर्थः । जातीयत्वं च तल्लिङ्गोपेतवाक्यगततैयकवाक्यगतत्वेनेति ध्येयम् । यद्वा—नामसमन्वयहेतुतयाऽभिमतत्वादिना तल्लिङ्गजातीयत्वम् । एतदुक्तं भवति--सर्वश्रुतिगतान्यन्यत्रप्रसिद्धनामानि सर्वाण्यपि तत्र तत्र स्थितैः सर्वैर्लिङ्गैर्भगवन्निष्ठानीति प्राक्साधिते सति, तत्रासन्दिग्धलिङ्गप्रहाणेनेतरेषां समन्वयोऽत्रोच्यत इति । एतेनैतन्निरस्तं, कथं लिङ्गसमन्वयः, किं लिङ्गान्तरेणोत नाम्ना । नाद्यः, समन्वीयमानत्वेन सन्दिग्धत्वात् । न द्वितीयः, अन्योन्याश्रयापत्तेः, सिद्धे नामसमन्वये तेन लिङ्गसमन्वयः, लिङ्गसमन्वये च सिद्धे तेन नामसमन्वयसिद्धिरिति, असन्दिग्धभगवन्नामलिङ्गादिभिरसन्दिग्धलिङ्गसमन्वयोक्तेः । एतेन लिङ्गसमन्वयस्य प्रागुक्तनामसमन्वयहेतुत्वेन वा तस्मिन् सत्येवास्योत्थानेन तत्कार्यत्वेन वा हेतुहेतुमद्भावसङ्गति-

चन्द्रिका

तदुक्तमनुव्याख्याने—

इत्यन्यत्रप्रसिद्धोरुशब्दराशेरशेषतः ।
ज्ञाते समन्वये विष्णौ लिङ्गैर्ह्येष समन्वयः ॥ १ ॥
तेषामन्यगतत्वे तु न स्यात्सम्यक् समन्वयः ।
इत्येवाशेषलिङ्गानां ब्रह्मण्येव समन्वयम् ॥ इति ॥

॥ ओम् सर्वत्र प्रसिद्धोपदेशात् ओम् ॥

प्रकाश

रित्युक्तं भवति। तदुक्तमिति। तृतीयाध्यायतृतीयपादे इत्यर्थः। 'ज्ञाते' प्रथमपादेनेत्यर्थः। 'लिङ्गैः' इति प्रायिकत्वाभिप्रायेण, ब्रह्मश्रुत्यादिनाऽप्यानन्दमयादेः समन्वयोक्तेः। 'एष समन्वयः' नामसमन्वयः। अन्यत्रप्रसिद्धाशेषलिङ्गानां समन्वयं, "आहोभयगतत्वं च" इत्युत्तरवाक्यगतेन 'आह' इत्यनेन द्वितीयान्तस्यान्वयः॥

ओम् सर्वत्र प्रसिद्धोपदेशात् ओम्॥ नन्वत्र टीकायामादित्यश्रुत्या सर्वगतत्वलिङ्गस्यान्यत्र प्रसिद्धिरुक्ता। सा न युक्तेव, तथा हि—अत्र सर्वगतत्वं नाम सर्वहृदयगुहास्थत्वं, यद्वक्ष्यति "सर्वभूताशयस्थितः" इति। तथा च तादृशं "यो वेद निहितं गुहायां" "निहितं गुहासु" "ब्रह्मपुरे ह्येष व्योम्नयात्मा सम्प्रतिष्ठितः" इत्यादौ विष्णावपि सिद्धमिति प्रक्रमस्थादित्यश्रुतिसमाख्याभ्यां उभयत्र प्रसिद्धिरेव लिङ्गस्य स्यात्, नान्यत्र प्रसिद्धिः, यथा भूमाधिकरणे

चन्द्रिका

यद्यपि पूर्वपादान्त्यस्य उत्तरपादाद्यस्य च अधिकरणस्य ना-वान्तरसङ्गत्यपेक्षा, तथाऽपि इह तस्यास्सम्भवात् फलस्यावश्यवक्त-

प्रकाशः

"प्राणो वा आशाया भूयान्" इत्युपक्रमस्थप्राणश्रुत्या, "विष्णु-र्वाव देवेभ्यो भूयान्" इति समाख्यया च भूमत्वस्य प्राण-विष्णूभयसाधारण्यं तद्वदिति चेन्न, वैषम्यात्। तत्र प्रक्रमसमाख्य-योः प्राणविष्णुपरत्वं पूर्वपक्षिणस्सम्प्रतिपन्नमिति तत्र तथात्वं युज्यते, न त्विह, अत्राभिप्रेतलिङ्गस्य सर्वगतत्वस्य विष्णुनिष्ठतायाः पूर्वप-क्षिणः क्वाप्यसम्मतेः। तथा च वक्ष्यत्यध्यायान्ते—"अन्यत्र प्रसि-द्धेषु क्वापि ब्रह्मपरत्वं नेति प्राप्ते तन्निरासः" इति। वक्ष्यति चैतद्भूमाधिकरण एव "सर्वभूतगतत्वरूपार्भकौकस्त्वस्य पूर्वपक्षिणा क्वाप्यनङ्गीकारेण" इत्यादि। एवं तर्हि "अन्तर्हृदये ज्योतिः" इत्यादिना गायत्र्यधिकरणविषयवाक्यस्थार्भकौकस्त्वस्याप्याक्षेपः सम्भवतीति चेत्सत्यं, अव्यवहिताक्षेपसम्भवे तस्यैव वाच्यत्वादिति ध्येयमिति। अत्र भाष्यादौ पूर्वाधिकरणेनाक्षेपसङ्गत्युक्त्या तदा-वश्यकत्वं भाति। तन्न युक्तं, तथात्वे तृतीयाद्यादिस्थानामपि तथा वक्तव्यत्वापत्त्याऽनुक्तेर्न्यूनतापत्तेः। भिन्नपादस्थत्वेन पूर्वसङ्गत्यभावे बाधकाभावाच्चेत्याशङ्क्य समाधत्ते—यद्यपीति। 'तस्याः' पूर्वस-ङ्गतेः। यदत्रोक्तं तन्त्रचूडामणौ—'पूर्वान्त्योत्तराद्ययोर्न सङ्गतिरस्ति, तथात्वे पादविभागभङ्गप्रसङ्गात्' इति, तन्न, प्रमेयभेदेनैव पादभेद-

चन्द्रिका

व्यत्वाच्चैतत्पूर्वपक्षे पूर्वाधिकरणसिद्धान्ताक्षेपो दर्शितो भाष्यादौ । अत्र "सर्वेषु भूतेषु" इत्युक्तं सर्वगतत्वं किमादित्यादेः किं वा विष्णोरिति चिन्ता । तदर्थं "तस्यैतस्यासावादित्यः" इत्यादि पूर्ववाक्यं किमादित्यादिविषयं किंवा ब्रह्मविषयमिति । तदर्थं "एतमेव ब्रह्म" इति ब्रह्मशब्दादयः किं गौणाः किंवा मुख्या इति ।

प्रकाशः

सम्भवादिति भावः । एतेन टीकायां 'श्रुत्यादिसङ्गतिं' इत्युक्तं समर्थितं बोद्धव्यम् । "–"ब्रह्म ततमं" इति सर्वगतत्वमुक्तम्" इति भाष्यं न सङ्गतिमात्रपरं, किन्तु फलपरमपीति भावेनाह—**फलस्येति** । टीकाऽपि तथा योज्येति भावः । एतच्चाग्रे स्पष्टयिष्यते । विषयसंशयटीकां व्यनक्ति—**अत्रेति** । ऐतरेयके श्रूयते—"एतं ह्येव बह्वृचा महत्युक्थे मीमांसन्ते एतमग्नावध्वर्यवः एतं महाव्रते छन्दोगाः एतमस्यां एतं दिव्येतं वायावेतमाकाशे एतमप्स्वेतमोषधीष्वेतं वनस्पतिष्वेतं चन्द्रमस्येतं नक्षत्रेष्वेतं सर्वेषु भूतेष्वेतमेव ब्रह्मेत्याचक्षते" इति । तद्वाक्योक्तं पृथिव्यादिसर्वगतत्वं विषय इत्यर्थः । टीकायां "एतं ह्येव" इत्यादिवाक्योक्तावप्यर्भकौकस्त्वं तत्र न स्पष्टमित्युपसंहारवाक्योक्तिः । अधिकरणविषयोपाधयस्तु "एतद्भावाभिधं लिङ्गं" इत्यादिनाऽग्रे स्पष्टयिष्यन्ते । **आदित्यादेरिति** । आदिपदेन जीवस्य ग्रहणम् । **पूर्ववाक्यमिति** । 'एतं' इत्येतच्छब्दस्य पूर्वपरामर्शित्वं स्वरसतः प्राप्तमिति भावः । **ब्रह्मशब्दादय इति** ।

चन्द्रिका

तदर्थमर्भकौकस्त्वं किं ब्रह्मणि न युक्तमुत युक्तमिति॥ पूर्वपक्षस्तु—अयं सर्वगत आदित्यः, "तस्यैतस्यासावादित्यो रसः" इत्यादिना प्रकृतस्य आदित्यस्यैव 'एतं' इति परामर्शात्।

प्रकाशः

"स योऽतोऽश्रुतः" इत्युक्ताश्रुतत्वादिकमादिपदार्थः। अर्भकौकस्त्वमिति। 'भूतेषु' इति भूतपदोपादानमहिम्ना लब्धमन्यत्रावस्थितत्वे सति भूतमात्रावस्थितत्वरूपाल्पौकस्त्वं यदि न युक्तं, तदा ब्रह्मशब्दादीनां गौणत्वावश्यम्भावेन तद्विरोधाभावात्पूर्ववाक्यमादित्यविषयमिति। "एतमस्यां" इत्यादावेतच्छब्देन तस्यैव परामर्शादादित्यादेरेव सर्वगतत्वं यदा तु युक्तं, तदा बाधकाभावेन ब्रह्मशब्दादीनां गौणत्वायोगेन तद्विरुद्धं पूर्ववाक्यं नादित्यादिविषयं भवितुमर्हतीति विष्णोरेव सर्वगतत्वमिति फलफलिभावः स्पष्टत्वान्नोक्तः। इयं च चिन्तापरम्परा आदित्यकोटिकपूर्वपक्षानुरोधेनोक्ता। जीवकोटिकपूर्वपक्षानुसारेण तु 'सर्वगतत्वं किं जीवस्योत विष्णोः' इति चिन्तानन्तरं, 'तदर्थं एतदित्येतच्छब्दः किं वक्ष्यमाणपरामर्शक उत न, वक्ष्यमाणपरत्वेऽपि चक्षुर्मयत्वादिकं विष्णोर्न युक्तमुत युक्तमिति, तदर्थं मयट् किं प्रसिद्धचक्षुरादिकरणकत्वार्थं उत तत्स्वामित्वाद्यर्थः' इत्यादिरूपेणोह्येति भावः। आदित्यकोटिकपूर्वपक्षं तावदारभते—अयमिति। प्रकृतस्येति। प्रकृतश्चादित्य एव,—"आदित्यो रसः यश्चासावादित्यः पुरुषं पुरुषं प्रत्यादित्यः" इत्यादित्यश्रुतिबाहुल्यात्, "सूर्य आत्मा जगतः" इति सौरमन्त्रोदाहरणाच्च।

चन्द्रिका

ननु लोकतोऽन्यत्रप्रसिद्धस्यापि आदित्यशब्दस्य अन्तराधिकरणन्यायेन विष्णुवाचित्वात् कथं तेन तदन्यस्य प्राप्तिः। न च वाच्यं, तत्र देवतावाचिनां समुद्रान्तस्स्थत्वादिलिङ्गात् विष्णुपरतोक्ता, अत्र तु न विष्णुलिङ्गमस्ति, नहि 'गङ्गायां घोषः' इत्यत्र गङ्गाशब्दस्तीरपर इति 'गङ्गायां मत्स्यः' इत्यत्रापि तथेति, तत्र प्रवृत्तिनिमित्तस्यानन्याधीनत्वादिना विष्णावेव तेषां मुख्यताया उक्तत्वात्।

प्रकाशः

"एतं चन्द्रमसि" इत्युक्त्वा 'एतमादित्ये' इत्यनुक्तत्वलिङ्गाच्च' इति टीकोक्तेरिति भावः। न्यायविवरणटीकायां—"न चैतदन्तस्स्थत्वाधिकरणन्येयेन "उपासात्रैविध्यात्" इति वा परिहृतमिति वाच्यं, सम्भवति हीश्वरे कल्पनैषा। न चासावत्र सम्भवति, "सर्वेषु भूतेषु" इत्यल्पौकस्त्वश्रवणात्" इत्यादिनाऽऽक्षिप्य समाहितम्। तदयुक्तमिव, तत्रैवात्र लिङ्गाभावात्, आदित्यशब्दस्य प्राक् समन्वयानुक्तेश्च, टीकायां प्रापकबाहुल्योक्तेश्चेत्याशङ्क्य "टीकासु च यदस्पष्टं" इति प्रतिज्ञातत्वात्तद्वाक्यं विवरीतुं पूर्वपक्षाक्षेपप्रकारमाह—**नन्विति**। पूर्वन्यायविषयत्वमाशङ्क्याह—**न च वाच्यमिति**। 'तथेति' इत्यनेनान्वयः। **विष्णुपरतेति**। न तु मुख्यताऽपीत्यर्थः। '**तत्र**' अन्तराधिकरणे। आदिपदेनान्यगतं प्रति स्वातन्त्र्येणेति गृह्यते। श्रुतिबहुत्वमुज्जीवकमस्तु, किं लिङ्गेनेत्यतस्तट्टीकोक्तमादित्य-

चन्द्रिका

एतेन "आदित्यो रसः" "यश्चासावादित्यः" "आदित्यो भवति" इत्यादित्यश्रुतेर्बहुत्वात् अन्यप्राप्तिरिति निरस्तम् । विष्णौ मुख्यश्रुति बाहुल्येन अन्यप्राप्त्ययोगात् । न च तत्र तत्प्रकरणस्थानां सवित्रादिशब्दानामेव विष्णुवाचितोक्ता, न तु तत्पर्यायादित्यादिशब्दानामपीति युक्तम्, तथात्वे तत्प्रकरणेऽदितिशब्दस्याप्यभावेन उत्तराधिकरणटीकायामदितिशब्दस्योक्तन्यायेन सावकाशत्वशङ्कानुपपत्तेः ।

देवतान्तरगास्सर्वे शब्दा वृत्तिनिमित्ततः ।
विष्णुमेव वदन्त्यद्धा तत्सङ्गादुपचारतः ॥

इत्यनुव्याख्यानस्थसर्वशब्दविरोधाच्च । तत्रेन्द्रशब्दपर्यायाणामश्रवणेन तत्समन्वयार्थमधिकरणान्तरारम्भापाताच्च ।

प्रकाशः

श्रुतिबाहुल्यमपि नान्यप्रापकमित्याह—एतेनेति । एतच्छब्दार्थमेवाह—विष्णाविति । मन्दानां भ्रमं वारयति—न चेति । टीकायामिति । "न च श्रुतिर्विष्णुविषया किं न स्यादुक्तन्यायात्" इति वाक्येनेत्यर्थः । उक्तन्यायेनेति । अन्तरधिकरणन्यायेनेत्यर्थः । अनुव्याख्यानेति । तृतीयाध्यायतृतीयपादीयानुव्याख्यानस्थेत्यर्थः । सर्वे देवतान्तरगताः शब्दाः शब्दवृत्त्योर्योगरूढ्योर्निमित्तानां बहुलप्रयोगादीनां हरौ सत्त्वात् 'अद्धा' वचनवृत्त्यैव वदन्ति, अन्यत्र तत्सङ्गादुपचारतः प्रयोग इत्यर्थः । ननु तत्र सर्वशब्दस्य सङ्कोचः क्रियतामित्यत आह—तत्रेति । अन्तराधिकरणोदाहरण इत्यर्थः ।

चन्द्रिका

तत्र लिङ्गमात्रेण सवित्रादिशब्दानां विष्णुवाचित्वस्य तत्परत्वस्य वा सिद्धावत्र श्रुतिसहितलिङ्गेनाऽऽदित्यादिशब्दानां विष्णुवाचित्वस्य तत्परत्वस्य वा सुतरां सिद्धेश्च । एतेन "सूर्य आत्मा" इति सौरमन्त्रोदाहरणात्सूर्यप्राप्तिरिति निरस्तम् । उक्तन्यायेन मन्त्रस्थसूर्यशब्दस्यापि विष्णौ मुख्यत्वात् । न च "अन्तः" इत्यादौ चन्द्रादिकतिपयगतत्वादिकमुक्तं, अत्र तु सर्वगतत्वमुच्यत इति भेदः, व्यधिकरणत्वात् । न हि प्रतिपाद्यभेदः शङ्कितः, किन्तु पूर्वपक्षानुदयः । न च "चन्द्रमस्येतं" इति सजातीये चन्द्रादावुक्त्वा आदित्ये अनुक्तत्वाल्लिङ्गात्तत्प्राप्तिः, 'सर्वेषु' इति सर्वशब्देन आदित्यस्यापि ग्रहणसम्भवेन

प्रकाशः

ननु तत्र पर्यायाणामपि निरवकाशविष्णुलिङ्गोपेतानामेव समन्वयो नान्येषामित्याशङ्क्याह—**तत्रेति** । **श्रुतीति** । ब्रह्मश्रुतिसहिताश्रुतत्वादिलिङ्गेनेत्यर्थः । टीकोक्तं सौरमन्त्रोदाहरणरूपं प्रापकान्तरमप्याक्षिपति—**एतेनेति** । आशयमबुध्वा भ्रान्तस्य चोद्यं परिहरति—**न चेति** । अत्र तु पृथिव्यादिसर्वगतत्वमतो न पौनरुक्त्यं, प्रतिपाद्यभेदादिति भावः । **किन्त्विति** । सर्वस्य विष्णुप्रापकत्वेन आदित्यादिप्रापकाभावेन पूर्वपक्षानुदयश्चोद्यत इत्यर्थः । टीकोक्तं प्रापकान्तरमप्याक्षिपति—**न चेति** । आदित्यादन्यश्चेत्सर्वगतोऽत्राभिमतस्तदा 'आदित्ये एतं' इत्यपि श्रूयेतेति भावः ।

चन्द्रिका

सावकाशलिङ्गेन श्रुत्यादिबाधायोगात्। सन्ति चात्र "एतमेव ब्रह्म" इति ब्रह्मशब्दाद्याः श्रुतयः, "स योऽतोऽश्रुतोऽगतोऽमतोऽनतोऽदृष्टः" इत्यश्रुतत्वादिलिङ्गानि च, ब्रह्मशब्दस्य विष्णौ मुख्यतायाः आनन्दमयाधिकरणे सिद्धत्वात्, ज्योतिरधिकरणे च ज्योतिषो विष्णुत्वे अश्रुतत्वादेर्हेतूकृतत्वात्, अदृष्टत्वस्य च विष्णुधर्मतायाः "अदृश्यत्वादिगुणकः" इत्यत्र वक्ष्यमाणत्वात्,

प्रकाशः

सावकाशेति । अनुक्तत्वलिङ्गेनेत्यर्थः । आद्यपदेन "अन्तरपुरुषः" इति पुरुषशब्दादिर्ग्राह्यः । श्रुत्यादीनां विष्णौ गतत्वमुपपादयति–**ब्रह्मशब्दस्येति** । **आनन्दमयाधिकरण इति** । प्रागुक्ताशयोऽनुसन्धेयः । पुरुषशब्दस्य च गायत्र्यधिकरणे मुख्यत्वस्योक्तत्वादित्यपि ध्येयम् । लिङ्गानि च वैष्णवानीत्याह–**ज्योतिरधिकरण इति** । "हृदय आहितं यत्" इत्यत्र ज्योतिराग्निर्विष्णुर्वेति विशये, प्रसिद्धेरग्निरिति प्राप्ते, कर्णादिविचरणाभिधानाद्विष्णुरेवेति चरणपदेन कर्णादिविचरणरूपाश्रुतत्वादेर्ज्योतिषो विष्णुत्वे हेतूकरणात् असिद्धस्य तत्त्वायोगात् तत्रैव मुख्यानीत्यर्थः । "अदृश्यत्वादिगुणको धर्मोक्तेः" इत्यत्र "यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुश्श्रोत्रं" इत्यादावदृश्यत्वादिगुणको विष्णुरन्यो वेति विशये, "अक्षरात्परतःपरः" इति परावधित्वेनोक्ताक्षरशब्देन "यया तदक्षरमधिगम्यते" इति अक्षरसामानाधिकरण्यादन्य इति प्राप्ते, "अथ परा यया तदक्षरं"

चन्द्रिका

"स यो ऽतो ऽश्रुतः" इत्यादिसन्निधाने च "अन्तरपुरुषः" इत्यन्तरत्वश्रवणात्तस्य चान्तर्याम्यधिकरणे विष्णुलिङ्गतायाः सेत्स्यमानत्वात्। न च चक्षुर्मयत्वादिना सर्वजीवानां प्राप्तिः, तस्यापि आनन्दमयाधिकरणन्यायेन प्राचुर्यार्थतया, पादान्त्यप्राणाधिकरणन्यायेन शतसंवत्सरत्वादेरिव अन्तर्यामिविषयतया वा सम्भवात्। पशुशब्दस्य तद्विशेषच्छाग इव, आदित्यश्रुत्या चक्षुर्मयत्वादिजीवलिङ्गानां तद्विशेषादित्ये पर्यवसानेन सर्वजीवप्रापकाभावाच्च।

प्रकाशः

इति परविद्याविषयत्वोक्तेरदृश्यत्वादिगुणकमक्षरं विष्णुरेवेति वक्ष्यमाणत्वादित्यर्थः। "अन्तर्याम्यधिदैवादिषु" इत्यत्र "यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथवी न वेद" इत्यादौ पृथिव्यादिगतत्वेन श्रुतः किं विष्णुरन्यो वेति संशये, पृथिव्यादिशरीरत्वस्याशरीरे विष्णावयोगादन्य इति प्राप्ते, पृथिव्याद्यविदित्वान्तरत्वादिधर्मोपदेशाद्विष्णुरेवेत्यन्तरत्वस्य विष्णुलिङ्गतायास्साधयिष्यमाणत्वादित्यर्थः। एवमादित्यकोटिकपूर्वपक्षमाक्षिप्य जीवकोटिकमप्याक्षिपति—**न चे**ति। परमतदूषणप्रस्तावे सुधायामुक्तं "मनोमयत्वादीनां आनन्दमयाधिकरणन्यायेन सावकाशत्वात्" इति वाक्यं हृदि कृत्वाऽऽह—**प्राचुर्ये**ति। पूर्णज्ञानत्वरूपार्थतयेत्यर्थः। चक्षुःकरणकसम्बन्धमेव मयडर्थमाश्रित्याह—**पादान्त्ये**ति। **पशुशब्दस्ये**ति। षष्ठे "पशुचोदनायामनियमोऽविशेषात्" इत्यन्तिमाधिकरणे "अग्नीषोमीयं प-

चन्द्रिका

न च अर्भकौकस्त्वलिङ्गादन्यस्य प्राप्तिः, तस्यापि विष्णुधर्मतायाः "अन्तस्तद्धर्मोपदेशात्" इत्यत्र "उपासात्रैविध्य" इत्यत्र च उक्तत्वात्। "हृद्यपेक्षया" इत्यादौ वक्ष्यमाणत्वाच्च।

प्रकाशः

शुमालभेत" इत्यत्र किं यः कश्चित्पशुरालब्धव्यः उत च्छाग एवेति संशये, "छागस्य वपाया मेदसोऽनुब्रूहि" इति मन्त्रस्य चोदितार्थप्रकाशनार्थतया पारतन्त्र्याद्भिन्नवाक्यतया, "तेजो वै घृतं" इति घृतार्थवादवैलक्षण्याच्च मन्त्रगतच्छागशब्दस्य पशुमात्रे यौगिकत्वेन वा पाक्षिकानुवादत्वेन वोपपत्तेः पशुशब्दविशेषकत्वादालम्भनचोदनायाः सामान्यपर्यवसानसम्भवेन यः कश्चित्पशुरिति प्राप्ते, चोदनाप्रतिपन्नस्य सामान्यस्य प्रतिव्यक्ति समाप्त्या च्छागेऽप्यवैकल्याद्रूढिप्राबल्येन योगासम्भवान्नित्याम्नातस्य पाक्षिकत्वायोगाच्च च्छाग एवालब्धव्य इति सिद्धान्तितम्। अत्र यथा पशुशब्दस्य तद्विशेषे छागे पर्यवसानं, तद्वदित्यर्थः। टीकोक्तं प्रापकान्तरमपि पराचष्टे—न चेति। अन्तरिति। अन्तस्स्थत्वस्य "निहितं गुहासु" इति गुहास्थत्वरूपतयाऽर्भकौकस्त्वरूपत्वादिति भावः। उपासेति। "सीमानं विदार्यैतया द्वारा प्रापद्यत" इति हृदयस्थत्वोक्तेरिति भावः। एतेन 'उपासात्रैविध्यादिति च' इति न्यायविवरणटीकावाक्यमन्यथाऽपि व्याख्यातं ध्येयम्। हृदीति। तृतीयपादे "हृद्यपेक्षया तु मनुष्याधिकार-

चन्द्रिका

वक्ष्यमाणसिद्धान्तन्यायाच्छादनेन पूर्वपक्षकरणे च तन्न्यायेनैवैतत्सिद्धान्तफलसिद्ध्या एतस्य वैयर्थ्यात् । "सर्वेषु भूतेषु" इत्यनेन सर्वगतत्वस्यैवोक्ततया अर्भकौकस्त्वाभावाच्च । अन्यथा अत्रोक्तः सर्वगतो न विष्णुश्चेत्, पूर्वोक्तोऽपि सर्वगतो न विष्णुः स्यात् इत्याक्षेपायोगात् । मैवम्,

प्रकाशः

त्वात्" इति गुणसूत्रेण "अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति" इत्यत्राङ्गुष्ठमात्रपरिमितहृदयावकाशस्थत्वोक्तेरिति भावः । "शब्दादिभ्योऽन्तः प्रतिष्ठानात्" इत्यादिरादिपदार्थः । ननु वक्ष्यमाणाज्ञानेन पूर्वपक्षोऽस्त्वित्यत आह—**वक्ष्यमाणेति** । 'आच्छादनेन' अनाविष्करणेन, तदाविष्कृत्य तद्वैलक्षण्यादिकमनुक्त्वेत्यर्थः । यद्वा—'आच्छादनेन' अनुपमर्देनेत्यर्थः । अर्भकौकस्त्वमुपेत्य न तत् पूर्वपक्षप्रापकमित्युक्तं, इदानीं तदेव नास्तीत्याह—**सर्वेष्विति** । **अन्यथेति** । भाष्ये "स इदं ब्रह्म ततममपश्यत्" इति पूर्वोक्तसर्वगतत्वमन्यस्येत्याक्षिप्तम् । तन्न स्यात्, अर्भकौकस्त्वस्यान्यगतत्वे प्रागुक्तसर्वगतत्वस्य विष्णुधर्मत्वाविरोधादित्यर्थः । एवमुक्तरीत्या आदित्यश्रुतेस्सावकाशत्वेऽपि "ज्योतिः" इत्यत्र निरवकाशप्रकरणेन ज्योतिश्श्रुतेरिव निरवकाशादित्यलिङ्गवशेनादित्यश्रुतेर्निरवकाशत्वेन वा, पूर्वं विष्णौ समन्वयेऽपि मुख्यत्वस्यानुक्त्या सावकाशत्वस्यैवाभावेन स्वतो निरवकाशत्वेन वा, तन्न्यायाविषयत्वेन तत्रास्यास्समन्वयस्यैवाभावेन वा त्रेधा श्रुतेर्निरवकाशत्वेन तया

चन्द्रिका

"संवत्सर एव प्रध्वंसयन् तस्यैतस्यासावादित्यो रसः" इति संवत्सराधिपतित्वरूपसंवत्सरसारत्वलिङ्गात्, "यश्चासावादित्यः" इति प्रसिद्धार्थयच्छब्दोपबन्धात्, "तस्मात्पुरुषं पुरुषं प्रत्यादित्यो भवति" इति सर्वपुरुषाभिमुख्यलिङ्गाच्चादित्यशब्दस्य प्रसिद्धादित्यपरत्वात् । अत एव भाष्यटीकयोरादित्यशब्दस्य प्रसिद्धपरत्वं लिङ्गाधीनमिति

प्रकाशः

पूर्वपक्षोदयो युज्यत इति भावेनाह—संवत्सर एवेति । "महापुरुष इति यमवोचाम, संवत्सर एव प्रध्वंसयन्नन्यानि भूतानि ऐक्याभावयन्नन्यानि तस्यैतस्यावादित्यो रसः स यश्चायमशरीरः प्रज्ञात्मा यश्चासावादित्य एकमेतदिति विद्यात् तस्मात्पुरुषं पुरुषं प्रत्यादित्यो भवति । तदप्येतदृषिणोक्तं—

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।

आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ॥"

इत्यत्र 'तस्यैतस्य' इति संवत्सरं परामृश्य रसपदेन तदधिष्ठातृत्वोक्तेस्तस्य च रथवेगेन संवत्सरकर्तरि सूर्य एव प्रसिद्धेः, यच्छब्दस्य प्रसिद्धार्थकत्वात्सूर्यस्यैवादित्यत्वेन लोकप्रसिद्धत्वात्, सर्वपुरुषाभिमुख्यस्य सूर्य एव प्रत्यक्षत्वेन विप्णावदर्शनाल्लिङ्गत्रयेण श्रुतेरुज्जीवनादित्यर्थः । एतेन लिङ्गबाहुल्यकथनेन "बहुलिङ्गसाहितश्रुतेरपि सावकाशायाः निरवकाशश्रुत्यादीनामेव बलवत्त्वं" इति न्यायविवरणगतबहुशब्दार्थो विवृतः । अत एवेति । लिङ्गैःश्रु-

चन्द्रिका

दर्शयितुं "तस्यैतस्यासावादित्यो रसः" इत्यादिलिङ्गप्रतिपादकांशोऽप्युपात्तः । उक्तं ह्यनुव्याख्याने—

पुनश्च प्रापकाद्धेतोस्तत्राधिकरणान्तरम् ।

इति । न चैवं सत्यावश्यकत्वाल्लिङ्गैरेव पूर्वपक्षः, लिङ्गसाहचर्यादेव च सर्वगतत्वस्यान्यत्रप्रसिद्धत्वं चोच्यताम्, किं तदुपजीविश्रुत्युपन्यासेनेति वाच्यम्, उक्तलिङ्गानामादित्यविशेषणतयैव प्रतीत्या सर्वगतविशेषणत्वाप्रतीतेः साक्षात्तैः पूर्वपक्षाद्यसम्भवात् । तदेतदभिप्रेत्योक्तं न्यायविवरणे—"बहवो ह्यत्रादित्यशब्दाः क्षित्यादिषूक्त्याऽऽदित्येऽनुक्तिरित्यादिलिङ्गं च" इति ।

प्रकाशः

त्युज्जीवनस्याभिप्रेतत्वादेवेत्यर्थः । अन्यथा श्रुतिबाहुल्यमात्रप्रदर्शनपरत्वे "असावादित्यः" इत्येतावदेवोदाह्रियेतेत्यर्थः । **उक्तं हीति** । आनन्दमयाधिकरणे । 'तत्र' पूर्वाधिकरणव्युत्पादितन्यायविषयेऽप्यर्थे यदधिकरणान्तरमारभ्यते, तत्पूर्वन्यायाच्छादकाधिकाशङ्कालक्षणात्पुनरधिकरणान्तरारम्भप्रापकाद्धेतोर्युक्त इत्यर्थः । ननु टीकारीत्या सर्वगतत्वस्यान्यत्र प्रसिद्धये श्रुत्यनुसरणमित्यत आह —**लिङ्गैरिति । तदेतदिति** । लिङ्गैः श्रुतिमुज्जीव्य तथा पूर्वपक्ष इत्येतदित्यर्थः । एतेन भाष्यन्यायविवरणयोरेकविषयत्वं विवृतम्, "आदित्यो भवितुमर्हति, तदीयश्रुतिलिङ्गानामत्र दर्शनात्" इति न्यायविवरणटीका च विवृता । यद्यप्यत्र आदित्यशब्द एक एव, तथाऽप्यावृत्तिबहुत्वाद्वाऽऽदित्यप्रतिपादकादित्यसूर्यमित्रादिशब्दानां

चन्द्रिका

यद्वा अन्तराद्यधिकरणेष्विन्द्रादिशब्दानां तैस्तैर्लिङ्गैर्विष्णुपरतैव व्युत्पादिता, न तु तत्र मुख्यता ।

प्रकाशः

सत्त्वाद्वा 'बहवः' इत्युक्तम् । यद्यप्यत्र 'शब्दाः' इत्यन्तमेवोदाहार्यं, शिष्टं तु पूर्वपक्षे प्रापकान्तरत्वादुदाहृतम् । आदिपदेन चक्षुर्मयत्वादिकं जीवलिङ्गं ग्राह्यम् । यद्वा—आदिपदेन संवत्सरसारत्वादिप्रागुक्तलिङ्गग्रहः । तेन तदंशोऽपि प्रकृतोपयोग्येवेति भावः । न्यायविवरणे लिङ्गेन श्रुत्युज्जीवनं न स्पष्टं, प्रत्युत श्रुतीनामेव लिङ्गसमकक्षतया प्राबल्यं प्रतीयते । अतस्तत्स्वारस्यानुरोधेन भाष्यादौ लिङ्गांशोक्तेर्भावं विवक्षुः पक्षद्वयमाह—**यद्वेत्यादिना** । **विष्णुपरतैवेति** । तस्या अपि समन्वयरूपत्वात् । इह तु तत्परत्वं नास्ति, तल्लिङ्गाभावादिति भावः । नन्वेवमानन्दमयाधिकरणान्ते,

अतो नारायणो देवो निश्शेषगुणवाचकैः ।
गुणिसामान्यवचनैरपि मुख्यतयोदितः ॥
अध्यात्मगैश्च प्राणाद्यैस्तथैव ह्यधिभूतगैः ।
अन्नादिशब्दैर्भगवानेको मुख्यतयोदितः ॥

इत्युपक्रम्य,

शब्दप्रवृत्तिहेतूनां तस्मिन् मुख्यसमन्वयात् ।
अन्यार्थेष्वल्पता हेतोस्तन्निमित्तत्वतस्तथा ।

इत्यादिना भगवति विद्वद्रूढिमहायोगावभिधाय, "तस्मात्" इति

चन्द्रिका

तस्मान्मुख्यार्थता विष्णोरिति कृत्वा हृदि प्रभुः ।
समन्वयं साधयति........................... ॥

इत्यनुव्याख्याने मुख्यत्वोक्तिः, आकाशादिपदप्रवृत्तिनिमित्तस्य भगवदधीनत्वोक्तिश्च, स्थितायां त्रिपाद्यां प्रवृत्ते "तदधीनत्वात्" इत्यत्र सर्वशब्दानां भगवति मुख्यताया वक्ष्यमाणत्वात्तदभिप्राया । अत एव

प्रकाशः

श्लोके 'तस्मात्' महायोगविद्द्रूढिसत्त्वात्सर्वशब्दमुख्यार्थता विष्णोरुपपन्नेति 'मुख्यत्वोक्तेस्तान्निमित्तत्वतः' इत्यादिनाऽन्यगतप्रवृत्तिनिमित्तस्य भगवदधीनत्वोक्तेश्च, ईक्षत्याधिकरणे वक्ष्यमाणसमन्वयोपयोगितया वाच्यत्वोक्तेश्च टीकायां "तस्मादशेषाधिदैवगतशब्दवाच्यो हरिः" इत्यादिना सर्वत्र तत्तच्छब्दवाच्यत्वोपसंहारात्ताद्विरोध इत्यतः, सर्वस्य गतिमाह—**तस्मादिति** । **उक्तिश्चेति** । 'अनुव्याख्याने' इत्यन्वेति । 'तदभिप्राया' इत्यन्वयः । पादत्रये नानावाक्यगतभगवल्लिङ्गैस्तत्तद्वाक्यगताधिदैविकादिसर्वशब्दानां भगवत्परत्वे, सर्वस्य तदधीनत्वे च निर्णीते सति, किं तेषां तत्परत्वं ऐन्द्र्या गार्हपत्यपरत्वस्येवामुख्यवृत्त्योत मुख्यवृत्त्येति, तथा त्रिपाद्यां तत्तच्छब्दप्रवृत्तिहेतोरीशाधीनत्वोक्तेः किं फलमिति च शङ्कायाः पादत्रयानन्तरमेवोदयात्तच्छङ्कानिवृत्त्यर्थं त्रिपाद्यनन्तरं प्रवृत्ते "तदधीनत्वात्" इत्यव्यक्तनयगुणसूत्रे स्वातन्त्र्यस्य शब्दवृत्तौ मुख्यनिमित्तत्वात्सर्वस्वतन्त्रे भगवति अव्यक्तादिशब्दोपलक्षितसर्वशब्दमुख्यवृत्तिरिति वक्ष्यमाण-

चन्द्रिका

'हृदि कृत्वा' इत्युक्तम्। ईक्षत्यधिकरणे वाच्यत्वोक्तिरपि तदुपयोगितया। टीकायां प्रत्यधिकरणं तत्तच्छब्दवाच्यत्वोक्तिरपि तदभिप्राया। तत्तच्छब्दप्रवृत्तिनिमित्तगुणलाभस्य वक्ष्यमाणसापेक्षत्वेऽपि तत्तत्प्रकरणस्थगुणमात्रलाभः, पूर्वाधिकरणाक्षेपः, समाधानं च तत्तदधिकरणमात्रसाध्यम्। एवं चादित्यादिशब्दानां विष्णौ मुख्यताया अनुक्तत्वात्तैः पूर्वपक्षोदय इति न्यायविवरणाभिप्रायः।

प्रकाशः

त्वात्तदभिप्रायेणात्र मुख्यत्वाद्युक्तिरित्यर्थः। 'तदुपयोगितया' वक्ष्यमाणमुख्यत्वोपयोगितया। अन्यथा ब्रह्मण एव वाच्यत्वे शब्दानां तत्र मुख्यत्वोक्तिरसङ्गता स्यादिति भावः। ननु शब्दप्रवृत्तिनिमित्तस्य गुणस्याव्यक्तनयेनैव लब्धत्वात्किं पूर्वतनैरधिकरणैरित्यत, आह—तत्तच्छब्दप्रवृत्तीति। अवयवशक्तिलभ्यपरमैश्वर्यादिमत्त्वरूपगुणलाभस्येत्यर्थः। ननु तत्र त्रिपाद्यां सिद्धं स्वातन्त्र्यं शब्दप्रवृत्तौ निमित्तं भवति नेति विशये, नेति प्राप्ते, भवतीति सिद्धान्तयिष्यते, न तु तत्तच्छब्दप्रवृत्तिनिमित्तमपि भगवद्गतमिति। तथा च कथमेवमुक्तिरिति चेत्सत्यं, "सूक्ष्मं तु तदर्हत्वात्" इत्यनेनोपलक्षणतयाऽशेषशब्दप्रवृत्तिहेतूनामपि ईशगतत्वव्युत्पादनमस्तीत्याशयात्। यद्वा—'तत्तच्छब्दप्रवृत्तिनिमित्तगुणलाभस्य' इत्यस्य स्वातन्त्र्यरूपगुणलाभस्येत्येवार्थः। स्वातन्त्र्यमपि "तदधीनत्वात्" इत्यत्रैव वक्ष्यतीति भावः। नन्वेवं भाष्यादौ "तस्यै-

चन्द्रिका

अत एवात्र टीकादावादित्यशब्दस्य न विष्णुपरता, तल्लिङ्गाभावात्, प्रत्युत आदित्यलिङ्गसद्भावादिति दर्शयितुं तल्लिङ्गप्रतिपादकांशोऽप्युपात्तः । एवं चोत्तरत्रापि आदित्यादिशब्दैः पूर्वत्रापि प्राणादिशब्दैः पूर्वपक्षोदयस्सुलभः । अन्यथा अन्यश्रुतीनामन्यलिङ्गानां च तदधीनत्वन्यायेन ब्रह्मणि मुख्यत्वस्य सिद्धत्वेनान्यश्रुत्याद्याश्रयणेन पूर्वपक्षः क्वापि नोदीयात् । यद्वा "अन्तः" इत्यत्रेन्द्रादिशब्दानां विष्णौ मुख्यत्वोक्तिरस्तु, तथाऽप्यादित्यशब्दो नान्तराधिकरणविषयवाक्ये श्रुतः, नापि तन्न्यायविषयः, अत्रेव तत्र निरवकाशलिङ्गाभावात् । अत एव टीकादौ तदविषयतां दर्शयितुं देवतालिङ्गप्रतिपादकांशोऽप्युदाहृतः । पर्यायाणामपि तदधिकरणन्यायविषयाणामेव तेन समन्वयसिद्धिः, न तु तदविषयाणाम् । उत्तराधिकरणटीकाऽप्यदितिसजातीयेन्द्रादिशब्दसमन्वयस्योक्तत्वाभिप्राया । अनुव्याख्याने सर्वशब्दोऽपि न्यायविषयसर्वपरः ।

प्रकाशः

तस्यासौ" इति लिङ्गभागोक्तिः किमर्थेत्यतः तदाशयमाह—**अत एवेति** । तन्न्यायाविषयत्वमेवाह—**अत्रेवेति** । नन्वेवमुत्तराधिकरणटीकायामदितिश्रुतेः सावकाशत्वोक्तिरयुक्ता, तस्या अपि तद्विषयवाक्ये अश्रुतत्वात् । तन्न्यायाविषयत्वाच्च । अत एव 'अदितित्वलिङ्गात्' इति वक्ष्यतीत्यत आह—**उत्तरेति** । नन्वेवं "देवतान्तरगाः सर्वे" इत्युक्तिविरोध इत्यत आह—**अनुव्याख्यान इति** ।

चन्द्रिका

तत्राधिदैविकत्वाद्युपाध्युक्तिरपि अधिकरणान्तरविषयाधिभौतिकादिव्यावृत्त्यर्था, न तु सर्वाधिदैविकसङ्ग्रहार्था। तस्माद्युक्तः पूर्वपक्षः। नचैवं यत्सम्बन्धात्सर्वगतत्वस्यान्यत्रप्रसिद्धता, तन्नामसमन्वय एवोच्यतामिति वाच्यम्, अन्तर्यामित्वादेर्लिङ्गस्य पृथिवीशरीरत्वादिलिङ्गसबन्धादेव अन्यत्रप्रसिद्धत्वात्तत्समन्वयार्थं पादान्तरे कार्ये, तत्सङ्गत्यर्थमत्रापि लिङ्गस्यैव समन्वेतव्यत्वात्।

प्रकाशः

नन्वेवं सङ्कोचे "देवतान्तरगाः" इत्याधिदैविकशब्दत्वं "अध्यात्मगैश्च प्राणाद्यैः" इत्यध्यात्मशब्दत्वमित्याद्युपाध्युक्तिरयुक्ता, सर्वसङ्ग्रहार्थत्वात्तस्या इत्यत आह—तत्रेति। ननूक्तरीत्या आदित्यश्रुतेर्निरवकाशत्वे तस्या एव समन्वय उच्यतां, तस्यास्स्वत एवान्यत्रप्रसिद्धत्वात्, किं तत्साहित्येन अन्यत्रप्रसिद्धालिङ्गसमन्वयेन। न चाऽऽद्यपक्षे श्रुतेरप्यन्यसाहित्येनैव अन्यत्र प्रसिद्धिर्नतु स्वत इति वाच्यं, उत्तरपक्षद्वये तदभावात्। आद्येऽपि श्रुतेर्लिङ्गसाहित्येनैवान्यत्रप्रसिद्धता, सर्वगतत्वस्य तु आदित्यश्रुतिसाहित्येनापीति विलम्बितत्वामिति भावेनाऽऽशङ्क्य निरस्यति—**न चैवमिति**। किं सर्वत्रैवं सम्भवेन लिङ्गसमन्वयार्थं पादान्तरमेव मास्त्विति तदाशयः, उत पादान्तरारम्भेऽप्यस्योक्तरीत्याश्रयणेन पूर्वत्रैव निवेशः स्यादिति। आद्य आह—**अन्तर्यामित्वेति**। **अत्रापीति**। ननु वैश्वानराधिकरणस्येव फलतः सा भविष्यति। न च पाचकत्वाद्यनेकलिङ्गसमन्वयार्थमेकनामसमन्वयस्तत्रोच्यत इति वाच्यं, इहापि संवत्सरसारत्वाद्यनेकलिङ्गसमन्वयार्थत्वसम्भवादिति चेत्,

चन्द्रिका

न च यत्र लिङ्गं नामसम्बन्धादन्यत्रप्रसिद्धम्, तदधिकरणं नामसमन्वयपरं आद्यपादस्थं चास्त्विति वाच्यम्, तथात्वे आदित्यादिशब्दप्रवृत्तिनिमित्तगुणस्यान्तराधिकरणेनैव लब्धतया साक्षादपूर्वगुणालाभात् । अर्भकौकस्त्वादिपूर्वपक्षमूलयुक्तेः प्रसिद्धोपदेशादिसिद्धान्तयुक्तेश्च सर्वगतवाक्य इव आदित्यवाक्येऽसत्त्वाच्च । नामपादे नामसमन्वये हेतुतयोक्तलिङ्गसमन्वयस्यैव इह आकाङ्क्षितत्वाच्च । तस्मादादित्यश्रुतितः सूर्यप्राप्तिर्युक्ता । सौरमन्त्रोदाहरणाच्च तत्प्राप्तिः, मन्त्रे "चक्षुर्मित्रस्य" इति चक्षुष्ट्वस्य श्रवणात्तस्य च

प्रकाशः

सत्यं, साक्षात्सङ्गतिसम्भवे फलतस्तदुक्त्ययोगात्, नामसमन्वयस्य वक्ष्यमाणदोषग्रस्तत्वाच्चेति तात्पर्यात् । द्वितीयमाशङ्क्य निराह—**न चेति** । **अन्तरिति** । तत्र सर्वदेवतावाचिपदप्रवृत्तिनिमित्तस्येशगतत्वस्यान्यगतस्य भगवदधीनत्वस्य च साधनादिति भावः । एतच्चाऽऽद्यपक्षानुरोधेनोक्तमिति ध्येयम् । अग्रिमपक्षद्वये आदित्यादिशब्दप्रवृत्तिनिमित्तगुणलाभस्य "अन्तः" इत्यत्राभावाद्युक्त्यन्तरमाह—**अर्भकौकस्त्वादीति** । **हेतुतयोक्तेति** । उक्तलिङ्गजातीयेत्यर्थः । आक्षिप्तं पूर्वोक्तं प्रापकान्तरं च साधयति—**सौरेति** । न च सूर्यादिशब्दः सावकाश इत्युक्तमिति वाच्यं, चक्षुष्ट्वलिङ्गेन तदुज्जीवनादित्याह—**मन्त्रइति**। "आदित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशत्" इति तस्यामेव श्रुतौ चक्षुष्ट्वोक्तेरित्यर्थः । प्रागाक्षिप्तं टीकोक्तं

चन्द्रिका

"आदित्यश्चक्षुर्भूत्वा" इत्यादित्यश्रुत्याऽऽदित्यालिङ्गत्वात्। उक्तादित्यश्रुत्युपोद्बलिताद्विशिष्याऽऽदित्येऽनुक्तत्वालिङ्गाच्च तत्प्राप्तिः। चक्षुर्मयत्वादिलिङ्गाच्च सर्वजीवानां प्राप्तिः, आनन्दमयोक्तस्य "को ह्येवान्यात्" इति

प्रकाशः

प्रापकान्तरमपि समर्थयते—**उक्तेति** । यद्यपि "सर्वेषु भूतेषु" इति सामान्येन भूतपदेनाऽऽदित्यस्यापि ग्रहणात्तद्गतत्वोक्तिरस्ति, तथाऽपि "चन्द्रमस्येतं" इतिवत् 'अदित्य एतं' इति विशिष्यानुक्तत्वलिङ्गात्तत्प्राप्तिः। अन्यथा तथोक्तिः स्यादेव, अनुक्तौ कारणाभावादित्यर्थः। अत एव टीकायां "–'एतमादित्ये' इत्युक्तिस्स्यात्" इत्युक्तम्। एवमादित्यकोटिकपूर्वपक्षं टीकोक्तं समर्थ्येदानीं न्यायविवरणगताऽऽदिपदोपात्तजीवलिङ्गेन "सर्वजीवानां चैतत्सर्वगतत्वं" इति टीकोक्तजीवकोटिकपूर्वपक्षं च समर्थयते—**चक्षुर्मयत्वादीति**। "चक्षुर्मयः श्रोत्रमयश्छन्दोमयो मनोमयो वाङ्मय आत्मा" इति वाक्ये श्रुतानि टीकोक्तान्यादिपदार्थः। ननूक्तमत्र मयटः प्राचुर्यार्थत्वेन पूर्णज्ञानत्वादिना तदुपपत्तेरित्यतः तद्वैषम्यमाह—**आनन्दमयेति**। यद्येष आकाशनामा विष्णुः पूर्णानन्दो नस्यात्, तर्ह्ययं न जगच्चेष्टयेत्, प्रवृत्तिहेतूनां चतुर्णां मध्ये दुःखोद्रेकरागद्वेषशून्यस्य सुखोद्रेकैकनिबन्धनत्वात्प्रवृत्तेः। यद्ययं न चेष्टयेत्तर्हि चेष्टयेन्न कोऽपीति पूर्णानन्दत्वसाधकजगच्चेष्टकत्वरूपहेतुव्यपदेशस्य भावेन तत्र प्राचुर्यार्थत्वेऽपीह तदभावेन तन्न्यायाविषयत्वादित्यर्थः। अत

चन्द्रिका

प्राचुर्यार्थे हेतुव्यपदेशस्य तत्प्रायपाठस्य च अत्राभावेन तन्न्यायाविषयत्वात् । ज्ञानकरणतया प्रसिद्धचक्षुरादिसम्बन्धस्यैव नित्यज्ञानेऽन्तर्यामिण्यसम्भवेन तत्प्राचुर्यस्य सुतरामसम्भवाच्च । चक्षुश्शब्दस्य विष्णुपरत्वे च मयटो वैयर्थ्यम् ।

प्रकाशः

एव "हेतुव्यपदेशात्" इति सूत्रं प्राचुर्यार्थत्वेऽपि योजितमिति भावः । नन्वानन्दमये हेतुव्यपदेशोऽपि विज्ञानमयमनोमयादौ तदभावेऽपि प्राचुर्यार्थत्वं स्वीकृतमित्यत आह—**तत्प्रायेति** । आनन्दमयप्रायपाठस्यैवेत्यर्थः । जीवेऽपि विकारर्थत्वायोगादकामेनाप्युपेयं प्राचुर्यार्थत्वमित्यत आह—**ज्ञानेति** । यद्वा—प्राचुर्यार्थत्वेऽप्यनुपपत्तिमाह—**ज्ञानेति** । ज्ञानकरणत्वेन प्रसिद्धं यच्चक्षुरादि तत्संबन्धस्यैवासम्भवेन तद्बाहुल्यरूपप्राचुर्यस्य सुतरामयोगादित्यर्थः । प्रसिद्धपदेन चक्षुःपदस्याप्रसिद्धार्थस्वीकारे प्रसिद्धिबाध इति सूचितम् । "ज्योतिराद्यधिष्ठानं तु तदामननात्" इत्यत्र द्वितीये चक्षुरादिकरणानामीश्वरप्रयोज्यत्वेन तदीयत्वमुच्यते, न तु जीवस्यैव ज्ञानजनकतया तत्सम्बन्ध इति भावेनोक्तं—**सम्बन्धस्यैवेति** । तत्र हेतुः—**नित्यज्ञाने इति** । एतेनान्तर्यामिविषयतयोपपन्नामिति प्रत्युक्तं, तस्यापि नित्यज्ञानत्वादिति। ननु न ज्ञानकरणमिह चक्षुः, किन्तु "चक्षुषश्चक्षुः" इत्यादाविव विष्णुरेवेत्यत आह—**चक्षुश्शब्दस्येति** । ननु सुधायां "चक्षुर्मयत्वादेस्सावकाशत्वमाशङ्क्य हेत्वन्तरेण पूर्वपक्षे सत्समभ्युच्चय-

चन्द्रिका

न च चक्षुर्मयत्वादीनां आदित्ये पर्यवसानम्, "चत्वारः पुरुषा इति बाध्वः" इति बाध्वचिह्नितोपक्रमस्य "इति ह स्माह बाध्वः" इति बाध्वचिह्नितोपसंहारस्यैव च वाक्यस्यैकत्वात्तन्मध्यस्थादित्यशब्दस्य सूर्यपरत्वेऽपि तदुपरितने "एतं ह्येव बह्वृचाः" इत्यादौ "सर्वेषु भूतेष्वेतं" इन्यन्ते च वाक्ये बहुकृत्वः श्रुतस्य एत-

प्रकाशः

मात्रत्वेन तेषामुपन्यासः" इति, टीकायां च "न च तल्लिङ्गमन्तर्यामिविषयं, तस्यापरिच्छिन्नत्वेनाल्पौकस्त्वायोगात्" इति चक्षुर्मयत्वादेस्सावकाशत्वमुपेत्य सौत्राल्पौकस्त्वमेव मूलयुक्तित्वेनोक्तम् । न्यायविवरणटीकायां च तथैवोक्तम् । तथा च तद्विरुध्यत इति चेन्न, अभ्युपेत्यवादेन तथोक्तावपीह वास्तवाशयेन निरवकाशत्वोक्तेः। अत एवाग्रे टीका "चक्षुर्मयत्वाद्ययोगाच्च" इति । वक्ष्यति चैतदक्षरार्थोक्तिप्रस्तावे । प्रागुक्तं विशेषे पर्यवसानं निराह—**न चेति** । 'बाध्वः' वायुः । "चत्वारः पुरुषा इत्याह" इत्युपक्रम्य, शरीरपुरुषः छन्दःपुरुषो वेदपुरुषो महापुरुष इति पुरुषचतुष्टयं निर्दिश्य, क्रमेण तेषां प्रज्ञात्माकारब्रह्मादित्याख्यरसानुक्त्वाऽन्ते "इति ह स्माह बाध्वः" इत्युपसंहारादेकवाक्यत्वम् । "बाध्वचिह्नित" इति बहुव्रीहिः, वाक्यस्य विशेषणम् । 'बह्वृचा इत्यादौ' इत्याद्यपि बहुव्रीहिरेव, भाषितपुंस्कत्वात् । "तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य" इति पुंवद्भावः। 'तदुपरितने वाक्ये, इति आदौ अन्ते,

चन्द्रिका

च्छब्दस्य "अथैष ज्योतिः" इत्यादाविव वक्ष्यमाणजीवरूपचक्षुर्मयादिपरत्वात्, अर्भकौकस्त्वाच्च न विष्णोः सर्वगतता। "अन्तः" इत्यत्र "अन्तरः" इत्यत्र "अन्तर्यामी" इत्यत्र च सर्वगतत्वाल्पौकस्त्वयोरविरोधो नोक्तः, तत्प्रकरणे सर्वगतत्वस्याभावेन विरोधशङ्काया अनुदयात्, उदये वा तत्रत्यन्यायेनैव परिहार्यत्वात्। "उपासात्रैविध्यात्" इत्यत्र तु अन्तस्स्थत्वाद्युक्तेः प्रयोजनमात्रमुक्तम्, न त्वविरोधः। "हृद्यपेक्षया" इत्यत्र तु तयोरत्राविरोधे

प्रकाशः

चकारात् मध्ये च बहुकृत्वः श्रुतस्य' इति वा वाक्यं व्याख्येयम्। **अथैष इति**। संज्ञाधिकरणमुक्तमानन्दमयाधिकरणे। तत्र यथैतच्छब्दस्य "एतेन सहस्रदक्षिणेन यजेत" इति वक्ष्यमाणयागपरत्वं न तु प्रकृतज्योतिष्टोमपरत्वं, तद्वदित्यर्थः। ननु संज्ञाभेदात्तत्र तथात्वमुपेतमिति चेदिहापि वाक्यभेदात्तथाऽस्त्विति भावः। 'अर्भकौकस्त्वात्' इति सौत्रं प्रापकान्तरमप्याह—**अर्भकेति**। "सर्वेषु भूतेषु" इति श्रुतावित्यर्थः। 'सर्वगतता' द्युपृथिव्यादिसर्वपदार्थगततेत्यर्थः। ननूक्तमत्राल्पौकस्त्वं तत्र तत्र समर्थितमिति, तत्राह—**अन्तरित्यत्रेति**। "पुरुष एवेदं सर्वं" इत्यादिना सर्वगतत्वधर्मस्तत्राप्यस्तीत्यत आह—**उदये वेति**। अत एव संक्षेपभाष्ये "अन्तरः खवत्" इति अन्तर्नये 'व्योमवत्' इत्युक्त्याऽत्रत्यन्यायेनैवाविरोध उक्तः। **अन्तस्स्थत्वादीति**। बहिःष्ठत्वसर्वगतत्वोक्तेरित्यादि-

चन्द्रिका

उक्तेऽपि "अङ्गुष्ठमात्रः पुरुषः" इत्यत्र मात्रशब्दस्य अवधारणार्थत्वात्सर्वगतस्य सावधारणमङ्गुष्ठपरिमाणत्वमयुक्तमिति शङ्किते, मूर्तिविशेषे व्यक्त्यात्मना सावधारणमपि तद्युक्तमिति समाधास्यते। "सर्वेषु भूतेषु" इत्यत्र च अल्पौकस्त्वमुच्यते, भूतादन्यत्राभावप्रतीतेः। अन्यथा भूतपदवैयर्थ्यात्। सिद्धान्तिना "सर्वभूताशयस्थितः" इति स्मृतिसमाख्यया सर्वजीवहृदयस्थत्वस्यैव वक्तव्यत्वाच्च।

प्रकाश

पदार्थः। इह तु तयोर्विरोधात्सर्वगतस्य हरेरल्पौकस्त्वं न युक्तमिति प्राप्ते, 'व्योमवत्' इत्यंशेन समावेशस्समर्थित इति भावः। 'तयोः' सर्वगतत्वाल्पौकस्त्वयोः। व्यक्त्यात्मनेति। सर्वगतत्वस्य शक्त्यात्मनाऽवस्थानेऽल्पौकस्त्वमात्रस्य व्यक्ततया तदभिप्रायेणाङ्गुष्ठमात्रत्वोक्तिरिति वक्ष्यत इत्यर्थः। तथा चाधिकाशङ्कया तस्योत्थितिरित्यर्थः। ननु हृदि विद्यमानावकाशस्याङ्गुष्ठमात्रत्वेन तदपेक्षया तन्मात्रत्वोक्तिरुपचारेणेति सूत्रे भाष्यादौ च प्रतीयते। सत्यं, पक्षान्तरमुपेत्यैवैतत्। अत एव तत्र टीकायां "भगवन्मूर्तिविशेषस्य व्यक्त्या तन्मात्रपरिमाणत्वात्" इत्युक्तमिति भावः। सूत्रमपि हृदि व्यक्तरूपापेक्षयेति व्याख्येयम्। ननूक्तमर्भकौकस्त्वमेवात्र न श्रूयते, अन्यथा पूर्वाक्षेपायोगादिति, तत्राह—सर्वेष्विति। नन्ववधारणाभावात्कथमेतदित्यतो भूतपदोपादानादेव, अन्यथा 'सर्वेषु' इत्येव ब्रूयादिति भावेनाह—अन्यथेति। सिद्धान्तिनेति। अत एव दहरादिकरणे "अल्पश्रुतेरिति

चन्द्रिका

पूर्वाधिकरणाक्षेपस्त्वित्थम्—तस्य सर्वभूतगतस्यैव सिद्धान्तिना सर्वगतत्वाङ्गीकारात्तदभावे तदभाव इति। यद्वा "एतमेव" इत्यवधारणेन विष्णोरन्यस्यैव सर्वभूतगतत्वात् विष्णोर्भूतादन्यत्र सत्त्वेऽपि सर्वगतत्वायोग इति।

प्रकाशः

चेत्तदुक्तम्" इत्यत्राल्पस्थानमाशङ्क्योक्तपरिहारस्मारणं क्रियते, अत्र तत्त्वप्रदीपे च 'सर्वजीवहृदयसुषिराणामल्पत्वात्' इत्युक्तमिति भावः। नन्वेवमल्पौकस्त्वस्यान्यगतत्वे विष्णोः प्रागुक्तसर्वगतत्वस्याक्षेपो भाष्यादावयुक्त इत्यतस्तत्साधयति—**पूर्वेति**। सत्यं, न साक्षादाक्षेपः, अवधारणद्वारा तु सेत्स्यतीति भावः। **विष्णोः सर्वगतत्वायोग इति**। 'किन्त्वादित्यस्य वा सर्वजीवानां वा "ततम्" इत्युक्तसर्वगतत्वमेकप्रकरणत्वात्' इति वाक्यशेषः। तेन "आदित्यनिष्ठत्वात्" इत्यग्रेतनोक्तिर्युक्तेति बोध्यम्। एतेन "तद्यदि विष्णोरन्यस्य स्यात्" इति टीका विवृता ध्येया। ननु सर्वभूतगतस्यान्यत्वे "स योऽतोऽश्रुतोऽगतः" इत्यश्रुतत्वादिकमपि तस्यैवेति प्रागुक्तकर्णादिविदूरत्वमपि तस्यैवेति ज्योतिस्सूत्रमप्याक्षेप्तुं शक्यते। न च सन्निहिताक्षेपं विना व्यवहिताक्षेपो न युक्त इति वाच्यं, उत्तरनयभाष्यादौ जन्मादिसूत्राक्षेपस्य दर्शयिष्यमाणत्वात्। पूर्वपादान्त्यनयेन सङ्गत्यावश्यकत्वनिर्बन्धाभावाच्च। एवञ्चाश्रुतत्वादिविष्णुलिङ्गश्रवणाद्विष्णुरेवात्रोच्यत इति प्रागुक्तशङ्काऽपि नोदे

प्रकाशः

ष्यति, आक्षेपश्च ऋजुर्भवतीति चेन्न, सूत्रोपात्ताल्पौकस्त्वमुखेनैवाऽऽक्षेपस्योचितत्वात्, श्रुतिसङ्गतिप्रदर्शनार्थत्वात्, साक्षात्समन्वीयमानलिङ्गमुखेनाऽऽक्षेपसम्भवे व्यवहिताश्रुतत्वादिमुखेनाऽऽक्षेपायोगाच्चेति तात्पर्यात् । यद्वा—अत्रैव तत्र निरवकाशादित्यादिलिङ्गाभावाद्विष्णौ मुख्यस्याश्रुतत्वादेरादित्ये गौणतास्वीकारेण तदाक्षेपे हेत्वभावात्सन्निहितमेवाक्षिप्तम् । अत एवाग्रे—“ज्योतिः, अदृश्यत्वादि” इत्यादिना तदाक्षेपप्रकारासम्भवं वक्ष्यति । ननु पूर्वपक्षे हृदयनिहितत्वरूपार्भकौकस्त्वस्य क्वाप्यन्यत्र विष्णावसम्मततया निरवकाशेन तेन विचरणरूपाश्रुतत्वादेर्गौणत्वाश्रयणेन ज्योतिरादिसूत्रमप्याक्षेप्यं स्यात् । अत एवाग्रेतनं ‘बाधकाभावात्’ इत्येतदसदिति चेन्न, तत्राश्रुतत्वादीनामनेकेषां बाधादप्येकस्य हृदयस्थत्वस्य कथंचिद्विष्णौ गौणतया वर्णनीयत्वात् । अश्रुतत्वामतत्वादिरूपाविष्णुधर्मसन्दष्टत्वाच्च । अक्षराधिकरणटीकायां वक्ष्यमाणरीत्या तत्र प्रधानश्रुतविचरणरूपाश्रुतत्वादेर्गौणत्ववर्णनायोगाच्च । अत्र त्वादित्यप्रापकाणां बहुत्वेन तत्सध्रीचीनस्यार्भकौकस्त्वस्य मुख्यत्वसम्भवे त्यागायोगाच्चरमश्रुताश्रुतत्वादेर्गौणत्वसम्भवात् ‘बाधकाभावात्’ इत्येतदप्येतदभिप्रायं नेयम् । केचित्तु—“सर्वेषु भूतेषु” इत्यत्र हृदयस्थत्वाश्रवणान्न तदाक्षेप इत्याहुः । तत्पक्षे “उपासात्रैविध्यात्” इत्यादिनाऽगतत्वशङ्कासमाधानादिकं कथमिति चिन्त्यम् ॥

चन्द्रिका

न चार्भकौकस्त्वमन्तर्यामिण्यपि युक्तम्, "एष म आत्माऽन्तर्हृदये ज्यायान् पृथिव्याः" इत्यादिश्रुत्या तस्यापि सर्वगतत्वेन तद्विरुद्धाल्पौकस्त्वायोगात् । न च पूर्वपक्षे "ब्रह्म ततमं" इत्युक्तस्य सर्वगत त्वस्याप्यादित्यनिष्ठत्वात्तस्याप्यल्पौकस्त्वायोग इति वाच्यम्, आदित्यश्रुत्याद्यनुसारेण ततमत्वस्य सङ्कोचनात् । न च ब्रह्मणि तथा,

प्रकाशः

लिङ्गं पूर्वन्यायेन सावकाशमित्याशङ्क्य निराह—**न चेति**। **इत्यादि श्रुत्येति** । एतेन "तस्यापरिच्छिन्नत्वेन "सर्वेषु भूतेषु" इत्युक्ताल्पौकस्त्वायोगात्" इति टीकोपपादिता । ननु "एष म आत्माऽन्तर्हृदयेऽणीयान्व्रीहेर्वा यवाद्वा" इत्यणीयस्त्वमपि श्रूयत इति चेन्न, द्वयोर्विरोधेनाणीयस्त्वस्य जीवधर्मत्वादिना कथञ्चिन्नेयत्वात् इति भावेनोक्तं—**तद्विरुद्धाल्पौकस्त्वायोगादिति** । **आदित्यनिष्ठत्वादिति**। एतच्च प्रागेव विवृतमस्माभिः । ननु ब्रह्मणोऽपि सर्वगतत्वं सङ्कोच्यात्र प्रतिपाद्यत्वमुपेयतामित्यत आह—**न चेति** । एतेन, ननु यथा पूर्वपक्षे किंचिदादित्यवाक्यं किंचिज्जीववाक्यमित्युभय प्रापकसत्त्वाद्वाक्यभेद आश्रीयते, तथा पूर्वप्रकरणं पूर्वोक्तरीत्याऽनेकश्रुतिलिङ्गोपेतत्वेन ब्रह्मपरं, "चत्वारः पुरुषाः" इत्यादि त्वन्यपरमस्तु, अत्रोक्तबाधकानामर्भकौकस्त्वादित्यश्रुत्यादीनां तत्राभावादिति निरस्तम् । "ब्रह्म ततमं" इति पूर्ववाक्यमसङ्कुचितसर्वगतत्वपरं चेत्, "भूतेष्वेतमेव" इत्यवधारणाविरोधेन न ब्रह्म प्रतिपा-

चन्द्रिका

ब्रह्मत्वव्याघातात् । ब्रह्मशब्दस्य च विष्णौ मुख्यत्वेऽप्यल्पौकस्त्वादिलिङ्गादिहामुख्यार्थत्वात्, ज्योतिरदृश्यत्वाद्यधिकरणयोश्च बाधकाभावान्मुख्यस्याश्रुतत्वादेर्विष्णुधर्मत्वेऽपि प्रकृते अर्भकौकस्त्वदिबाधकेन अमुख्यस्य तस्य जीवेऽप्युपपत्तेः । "अन्तर्यामी" इत्यत्र च इह विष्णुलिङ्गत्वेन निश्चितस्यान्तरत्वस्य "यः पृथिव्या अन्तरः" इति श्रवणादन्तर्यामी विष्णुरिति वक्ष्यते, न त्वेतत्सिद्धान्तात्प्राक् तत्रान्तरत्वादीनां विष्णुधर्मत्वनिश्चयः । अत एव तत्र भाष्यकारो वक्ष्यति "स हि "सर्वेषां भूतानामन्तरपुरुषः" इत्यादिना अन्तरः"

प्रकाशः

दयितुमलम्, सङ्कुचिततत्परं चेत्तस्य ब्रह्मत्वव्याघातेन न तत्प्रतिपादयितुं शक्तमित्युभयथा तस्य ब्रह्मपरत्वायोगात्, प्रकृतवाक्यभेद इव पूर्वोत्तरप्रकरणभेदे ज्ञापकाभावात्, अत्राऽऽदित्यश्रुत्याद्यनुसारेण ब्रह्मशब्दाश्रुतत्वादिलिङ्गानामन्यथात्वमिव पूर्वत्राप्यन्यथयितुं शक्यत्वे सर्वत्राऽऽदित्यपरत्वे पूर्वपक्षिणं प्रति प्रबलबाधकाभावात् । अत एव टीकायां "एकप्रकरणत्वात्" इत्युक्तमिति । नन्वत्र ब्रह्मशब्दादयोऽपि ब्रह्मत्वसाधकाः सन्तीत्युक्तमित्यत्राह—**ब्रह्मशब्दस्य चेति** । एतेन "ब्रह्मशब्दस्य जीवेऽपि सम्भवात्" इति टीका विवृता । अश्रुतत्वादेर्गतिमाह—**ज्योतिरिति** । एतेन न तदाक्षेप इति सूचितम् । **बाधकाभावादिति** । उक्ताभिप्रायमेतत् । यदप्यन्तरत्वं विष्णुलिङ्गमिति, तत्राह—**अन्तर्यामीति** ।

चन्द्रिका

इति। अन्तराधिकरणे तु चक्षुरन्तस्स्थत्वं विष्णोरिति वक्ष्यते। न चेह तच्छ्रूयते, किन्त्वन्तरशब्दमात्रमित्याद्यूह्यम्। तस्माद्युक्तः पूर्वपक्षोदयः ॥

प्रकाशः

ननु "अन्तर उपपत्तेः" इत्यत्रान्तरत्वं विष्णुलिङ्गतया सिद्धमित्यत आह—अन्तरेति। तत्र "य एषोऽन्तरक्षिणि पुरुषः" इति चक्षुरन्तस्स्थत्वं श्रूयते, न त्विह तथेत्यर्थः। नन्वथापि "अन्योऽन्तर आत्माऽऽनन्दमयः" इत्यत्रान्तरत्वस्य विष्णुधर्मत्वं सिद्धमिति चेन्न, तत्र देहदेहिभावेनान्तस्स्थत्वमुच्यते,

बहिःष्ठो देहवद्विष्णुरन्तस्स्थो देहिवत्स्मृतः ॥

इति तद्भाष्योक्तेः। न चेह तथा श्रूयते, किन्तु सर्वजीवान्तरत्वम्। उक्तं च—

अन्तस्स्थस्सर्वजीवानां पूर्णत्वात्पुरुषाभिधः।

इति ऐतरेयभाष्ये। नन्वेवमपि "अन्यभावव्यावृत्तेः" इति सूत्रेऽक्षरनयेऽणुत्वमहत्त्वयोरविरोधो वक्ष्यते, अणुत्वमहत्त्वे एवाल्पौकस्त्वसर्वगतत्वे। अत एव वैशेषिकाधिकरणे—

महतोऽल्पत्वमपि हि व्योमवत्प्राह वेदवित्।
यद्यल्पदेशसंस्थानं न सर्वत्रापि नो भवेत् ॥

इत्यादिना "व्योमवच्च" इति सूत्रांशं मनसि निधाय व्योमदृष्टान्तेनात्रोक्तमल्पौकस्त्वरूपमणुत्वं विष्णावुपपादितम्। न च तत्र प्राकृतस्थौल्यादिराहित्यमेवोक्तं,

प्रकाशः

अस्थूलानणुरूपोऽसावैश्वर्यात्पुरुषोत्तमः ।

इति भाष्योक्तेः ।

अन्यवस्तुस्वभावानां स्थौल्यादीनामपाकृतिम् ।
नारायणे श्रुतिर्वक्ति...................... ॥

इत्यनुव्याख्यानोक्तेरिति वाच्यं, "अन्यभाव" इति सूत्रोक्तस्थौल्याद्यभावप्रतिपादनेऽपि सौत्रचशब्देन स्थौल्यादिविरुद्धाणुत्वादेरपि समुच्चिततयाऽणुत्वादेरपि तत्रैवोक्ते । अत एवानुव्याख्याने—

अतो विरुद्धवद्भातमपि व्याख्याय तत्त्वतः ।
योजनीयं हरौ वाक्यं विरुद्धैर्लक्षणैर्युतम् ॥

इत्यणुत्वादिकमप्युक्तम् । भाष्येऽपि "अस्थूलोऽनणुरमध्यमो मध्यमो व्यापकोऽव्यापकः" इति श्रुतौ मध्यमादिपदेन तत्सूचनाच्च । न चात्राविरुद्धत्वेनोक्तस्यैवाणुत्वादेस्तत्र हेतूकरणं, न तु तत्र व्युत्पाद्यतया । अत एव चशब्देन तस्योपादानमिति युक्तं, "इहाणुत्वमहत्त्वयोर्भावयोर्विरोधपरिहारः" इत्याद्यक्षराधिकरणचन्द्रिकाविरोधात् । एवञ्चाग्रे हेतूकरणेन ब्रह्मलिङ्गतया निर्णीतस्याल्पौकस्त्वस्य न समन्वेयतायोग्यत्वं, नापि तेन पूर्वपक्षोदयः । पूर्वपक्षे वा अश्रुतत्वादेर्गौणत्ववर्णनं चायुक्तमिति चेन्नैवं, अल्पौकस्त्वसर्वगतत्वयोरणुत्वमहत्त्वाविनाभूततयाऽन्यत्वात् । तथा च तयोरेवात्राविरोध उच्यते, न त्वणुत्वमहत्त्वयोः । अत एव सुधायां वैशे-

चान्द्रिका

सिद्धान्तस्तु—

"संवत्सरो वै प्रजापतिः" "तत्र संवत्सरं नाम ब्रह्माणम्"

प्रकाशः

षिकनये "अल्पाल्पतरदेशावस्थानेऽल्पाल्पतरपरिमाणमवर्जनीयम्" इत्युक्तं, न तु तदेवैतदिति । नन्वनयोरविरोधोक्तौ तदाक्षेप्ययोरणुत्वमहत्त्वयोरपि स सिद्ध इति न तयोः पुनर्विरोधशङ्कोदेतीति चेन्न, अत्रैतद्द्वाराऽविरोधेऽपि साक्षादविरोधानुक्तेः । तयोर्विरोधे प्राकृतत्वं तन्त्रं, ब्रह्म तु प्राकृतपदार्थव्यावृत्तमिति समाध्युक्तचर्थत्वेन पुनर्विरोधशङ्कोत्थानोपपत्तेरित्याद्यभिप्रेत्योक्तं—**इत्याद्यूह्यमिति** ।

अत्र पृथिव्यादिसर्वगतस्य विष्णुत्वे ब्रह्मशब्दोऽश्रुतत्वादिलिङ्गं च हेतूकृतम् । तच्चादित्यादिप्रापकवशादमुख्यार्थमिति न विष्णुप्रापकमिति यदुक्तं पूर्वपक्षिणा, तत्राऽऽदित्यप्रापकत्वेनोक्तानां भगवत्येव युक्तत्वेन आदित्यप्रापकत्वायोगात् तद्बाधाभावेन ब्रह्मशब्दादेरमुख्यार्थत्वायोगान्मुख्यब्रह्मशब्दादिना सर्वगतो विष्णुरेवेति भावेन सिद्धान्तयन्ति—**सिद्धान्तस्त्विति** । तत्र यदुक्तं संवत्सरसारत्वादिलिङ्गैः श्रुतेः प्रसिद्धादित्यपरत्वमिति, तत्राऽऽद्यं लिङ्गं तावन्नेत्याह—**संवत्सर इति विष्णावेव सम्भवादित्यन्तेन** । अत्र पञ्चम्यन्तप्रधानहेतूनां 'बाधकभावेन' इति वक्ष्यमाणसाध्येनान्वयः । संवत्सरशब्दस्य विरिञ्चिपरत्वे श्रौतस्मार्तप्रसिद्धिं महापुरुषपदप्रयोगं च साधकद्वयमाह—**संवत्सरो वा इत्यादिना** ।

चन्द्रिका

इत्यादिश्रुतिस्मृतिषु उत्तराधिकरणभाष्ये वक्ष्यमाणरीत्या संवत्सरशब्दस्य चतुर्मुखे प्रसिद्धत्वात्, श्रौतप्रसिद्धेश्च बलवत्त्वात् पूर्ववाक्ये च "महापुरुष इति यमवोचाम संवत्सर एव" इति संवत्सरे महापुरुषपदप्रयोगाच्च संवत्सरशब्दस्य चतुर्मुखपरत्वात्, तस्मादुत्तमत्वरूपस्य च तत्सारत्वस्य विष्णावेव सम्भवात्, यच्छब्दोपबन्धस्य "स यश्चायं पुरुषे

प्रकाशः

आदिपदेन "प्रजापतिः प्रजाः सृष्ट्वा व्यस्रंसत संवत्सरो ब्रह्मा विश्वः कतमः स्वयंभूः प्रजापतिस्संवत्सरः" इत्यादिश्रुतिः,

ततस्संवत्सरो नाम ब्रह्मा समभवत्प्रभोः ।

इत्यादिस्मृतिश्च गृह्यते । ननु ब्रह्मणि श्रौतप्रसिद्धिरिव, कालविशेषे लोकप्रसिद्धिरप्यस्तीति चेन्न, "शास्त्रस्था वा तन्निमित्तत्वात्" इति यववराहाधिकरणन्यायेन श्रौतप्रसिद्धेरेवान्तरङ्गत्वेनाविप्लुतत्वेन च शास्त्रे ग्राह्यत्वेनाज्ञप्रसिद्धितो बलवत्त्वादित्याह—**श्रौतेति** । कालपरत्वे महापुरुषपदायोगात्,

संवत्सराभिमानी तु ब्रह्मैव हि महापुमान् ॥

इति स्मृतिसिद्धत्वात् । **तस्मादिति** । "ब्रह्मा देवानां प्रथमस्सम्बभूव" इत्यादिना सर्वदेवोत्तमत्वेनोक्तचतुर्मुखसारत्वं विष्णावेवेत्यर्थः । यच्छब्दोपबन्धरूपलिङ्गं चान्यथयति—**यच्छब्देति** । 'पुरुषे' जीवे । 'आदित्ये' देवतायां च । तत्र लोकप्रसिद्धस्य कस्य चिदभावेऽपि श्रुत्यादिसिद्धस्य हरेरेव ग्रहणं, तद्वदित्यर्थः । ननु तत्र "य

चन्द्रिका

यश्चासावादित्ये" इत्यादाविव श्रुत्यादिप्रसिद्धे ब्रह्मण्यपि सम्भवात्, "आदित्यो ज्योतिरादित्यः" इत्यादौ च ब्रह्मण्यप्यादित्यशब्दस्य प्रसिद्धेः, "पुरुषं पुरुषं प्रत्यादित्यो भवति" इत्यनेन च 'प्रतिगृहं कूपः' इत्यनेनेव सर्वपुरुषगतत्वस्यैवोक्तत्वेन तदाभिमुख्योक्त्य-

प्रकाशः

आत्मनि तिष्ठन्, य आदित्ये तिष्ठन्" इत्यादौ पुरुषादित्यान्तस्स्थः प्रसिद्धः। प्रकृते कथमादित्यत्वेन हरिः प्रसिद्धः इत्यत आह—

आदित्य इति।

आदित्यो ज्योतिरादित्यः स विष्णुर्गतिसत्तमः।

इति सहस्रनामसु विष्णौ प्रयोगादित्यर्थः। नन्वनादौ वेदे कथं सादिपौरुषेयग्रन्थप्रसिद्ध्युपबन्ध इति चेत्, स्मृतिमूलश्रुतिप्रसिद्धौ तात्पर्यात्। स्मृतेस्सादित्वेऽपि तदर्थस्यानादित्वाच्च। उक्तं च विष्णुतत्त्वनिर्णये—

पुराणानि तदर्थानि सर्गेसर्गेऽन्यथैव तु।
क्रियन्तेऽतस्त्वनित्यानि तदर्थाः पूर्वसर्गवत्॥

इति। यदप्युक्तं सर्वपुरुषाभिमुख्यं सूर्यलिङ्गमिति, तन्नेत्याह—

पुरुषं पुरुषमिति। सर्वपुरुषगतत्वं च

अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणस्स्थितः।

इत्यादिश्रुत्या "अल्पौकस्त्वस्य च" इत्यादिना वक्ष्यमाणरीत्या च युज्यत इति भावः।

चन्द्रिका

भावात्, भावे वा आदित्यमण्डलस्यैव पुरुषाभिमुख्यदर्शनात्, अदर्शनेऽपि देवतायास्तदङ्गीकारे च ईश्वरेऽपि तत्सम्भवात् ।

प्रकाशः

प्रतिपूरुषमेतस्मात् स्थितो वै विष्णुनामकः ।
आदित्यादिषु च स्थित्वा द्योतकोऽसौ प्रतिप्रति ।

इति तद्भाष्यं हृदि कृत्वाऽऽह—भावे वेति । आभिमुख्योक्तिभावेऽपि तस्य त्वन्मतेऽप्यादित्यदेवताया अतीन्द्रियत्वेन तत्रादर्शनात्, मण्डलस्याऽऽभिमुख्यदर्शनात् तद्द्वारा तत्रस्थदेवतायामङ्गीकारे तन्निष्ठभगवतोऽपि तद्द्वारा स्यादेवेत्यर्थः । एवं लिङ्गानामपाकरणेन तन्मूलकश्रुतिप्रसिद्धिरप्यपाकृतेति न तत्र यतितव्यमिति भावः । नन्वस्त्वेवमाद्यकल्पे श्रुतेर्लिङ्गैरेवोज्जीवनात्तेषामन्यथासिद्धौ श्रुतेरप्यन्तर्नयन्यायेनान्यथासिद्धिः । उत्तरकल्पद्वये तु कथं, स्वत एव तत्र श्रुतेः निरवकाशतोक्तेरिति चेन्न, इत्थं, वक्ष्यमाणादिशा ब्रह्मश्रुत्यादेर्मुख्यतया विष्णुसाधकत्वेनान्तरधिकरणन्यायविषयतयाऽऽदित्यश्रुतेर्विष्णुपरत्वं वा तत्र मुख्यत्वं वा सेत्स्यतीति । ननु चैवं ब्रह्मश्रुत्यादेरत्र मुख्यत्वे तद्बलादादित्यश्रुतिर्विष्णुपरा, सिद्धे च तस्याः विष्णुपरत्वे बाधकाभावेन ब्रह्मशब्दादेर्मुख्यत्वमित्यन्योन्याश्रयः । न चार्भकौकस्त्वमेव बाधकं, न श्रुतिरित्यस्ति विशेषः, श्रुतेरप्यस्मिन् पक्षे निरवकाशत्वोक्तेरिति चेन्न, "आदित्यो ज्योतिरादित्यः" इत्यादिप्रयोगादादित्यशब्दस्य विष्णाववकाशेन सावकाशत्वस्य ब्रह्मशब्दमुख्यत्वानधीनत्वात् । एतेन,

चन्द्रिका

सौरमन्त्रे च "सूर्य आत्मा जगतस्तस्थुषश्च" इति ब्रह्मलिङ्गसद्भावात्, मन्त्रस्थस्य च "चक्षुर्मित्रस्य वरुणस्याग्नेः" इति चक्षुश्शब्दस्य "चक्षुर्देवानाम्" इतिश्रुत्या ब्रह्मण्येव सम्भवात्, पूर्णदर्शनशक्तित्वादिरूपस्य वा चक्षुरादिस्वामित्वरूपस्य वा चक्षुर्मयत्वादेः "सर्वेन्द्रियमयो विष्णुः"

प्रकाशः

तदावृत्तिर्बाधिकेत्यपि निरस्तम् । **सावकाशत्वादेवेति** । यद्वा— ब्रह्मश्रुत्यादेरुपसंहारस्थत्वेन बलवत्तयाऽऽदित्यश्रुतेर्विष्णुपरत्वम् । वक्ष्यति चैतत् "उपक्रमस्थादित्यश्रुतेः" इत्यादि । एवमादित्यश्रुत्युज्जीवकलिङ्गानामन्यथासिद्धिमुक्त्वेदानीं, यदपि मन्त्रे चक्षुष्ट्वलिङ्गात्सूर्यशब्द आदित्यप्रापक इत्युक्तं, तदयुक्तं, अन्तरधिकरणन्यायविषयतयाऽत्रत्यसूर्यशब्दस्य विष्णुपरत्वादिति भावेन निरवकाशविष्णुलिङ्गं वदन्नन्यलिङ्गस्यान्यथासिद्धिमाह – **सौरमन्त्रे चेति** ।

आदानात्सर्ववस्तूनामत्तृत्वात्प्रलयेऽपि च ।
आत्मेत्युक्तस्स भगवान् जगतस्स्थावरस्य च ॥

इत्युक्तदिशा सर्वनियामकत्वरूपविष्णुलिङ्गादित्यर्थः । "चक्षुर्देवानामुत मर्त्यानां" इति यजुश्शाखास्थश्रुत्यर्थः । "सर्वनामाभिधेयश्च" इत्यनेनैव "आदित्यशब्दस्येश्वरवाचित्वं चोक्तं भवति" इति टीकोपलक्षणमिति भावः। यदप्युक्तं चन्द्रादावुक्त्वाऽऽदित्येऽनुक्तत्वमप्यादित्यलिङ्गमिति, तत्त्वग्रे निरासिष्यत इति **भावेन** चक्षुश्शब्दस्य विष्णावुक्ततया तत्सङ्गतत्वेन चक्षुर्मयत्वादिजीवप्रापकाण्यपि सावकाशयति—**पूर्णेति** ।

चन्द्रिका

इत्यादिभष्योक्तस्मृत्या विष्णौ सम्भवात्, जीवेऽपि चक्षुरादिविकारत्वस्यासम्भवात्। एतच्छब्दस्य च "अथैष ज्योतिः" इत्यादौ अथशब्दादेरिव अत्र प्रकरणविच्छेदकस्याभावेन पूर्वोक्ताशरीरप्रज्ञात्मपर-

प्रकाशः

पूर्णदर्शनशक्तित्वाच्चक्षुर्मय इतीरितः।
तादृक्श्रवणशक्तित्वात्तथा श्रोत्रमयस्स्मृतः॥

इत्यैतरेयभाष्यदिशा मयटः प्राचुर्यार्थत्वेनायमाद्योऽर्थः। "इन्द्रियस्वामित्वेन" इति टीकोपलक्षणमिति भावः। द्वितीयस्त्वेतद्भाष्यदिशेति व्यक्तम्। 'स्मृत्या' इत्युक्त्याऽयमेवार्थः स्मार्तत्वादत्र ग्राह्यो न तु प्रसिद्धकरणसम्बन्ध इति सूचितम्। यदपि जीवपक्षे एतच्छब्दः "अथैषज्योतिः" इत्यादाविव वक्ष्यमाणपर इति, तत्राह—**एतच्छब्दस्येति**। "अथैष ज्योतिः" इत्यादौ ज्योतिष्टोमप्रकरणविच्छेदकस्याथशब्दस्य श्रवणात्तत्र तथात्वेऽपि प्रकृते तथा प्रकरणभेदकं न किञ्चिदस्तीत्यर्थः। ननूक्तमत्र बाध्वचिह्नितोपक्रमोपसंहाराभ्यां भिन्न वाक्यत्वं तस्यावगतमिति। तथा च कथं न प्रकरणविच्छेद इति चेत्, मैवं, "एतामनुविधं संहितां सन्धीयमानां मन्य इति ह स्माह बाध्वः" इत्यनिरुद्धादिचतुर्मूर्त्यात्मकस्य विष्णोस्संहितादेवतात्वरूपावान्तरप्रमेये तात्पर्यज्ञापनाय तदुपक्रमादेरुपपत्तेः, अविच्छेदकत्वात् पुनस्तस्यैव परामर्शेन गुणान्तरविधिसम्भवादिति तात्पर्यात्। **पूर्वोक्तेति**। "स यश्चायमशरीरः प्रज्ञात्मा, यश्चासावादित्य एक-

चन्द्रिका

त्वात्। वक्ष्यमाणस्यापि च अश्रुतत्वादिगुणैर्विष्णुत्वेन तत्परत्वेऽप्यनिष्टाभावात्। अल्पौकस्त्वस्य च 'व्योमवत्' इति सौत्रपदसूचितेन—

एकत्राप्यनवस्थाने सर्वत्रावस्थितिः कथम्।
एकत्रैव तु संस्थानं नैवात्र प्रतिपाद्यते॥

प्रकाशः

मेतदिति विद्यात्" इत्यशरीरप्रज्ञात्मन आदित्यनाम्नश्चैकत्वादिति। 'आदित्यपरत्वात्' इत्यनुक्त्वा 'अशरीर' इत्युक्तिर्विष्णुपक्षेऽशरीरत्वयुक्तिसूचनार्था। एतेन "स यश्चायमित्यादिना" इत्यादिटीका विवृता। उपक्रमादिवशाद्भिन्नवाक्यत्वमुपेत्याह—**वक्ष्यमाणेति**। प्रकृतपरत्वं च टीकाद्युक्तसमर्थनार्थमिति भावः। **अनिष्टेति**। जीवलिङ्गानां सावकाशितत्वादिति भावः। यदप्युक्तमर्भकौकस्त्वाच्च न विष्णोरत्रोक्तसर्वगततेति, तदपि न बाधकमिति भावेनाह—**अल्पेति**। 'सूचितेन न्यायेन' इत्यन्वयः। तमेव न्यायं स्वयं सङ्गृह्याह—**एकत्रेति**। अर्भकौकस्त्वं नाम अल्पदेशेऽवस्थितत्वं, न त्वल्पदेश एवावस्थानवत्त्वम्। तच्च सर्वगतस्य विष्णोराकाशवदेव युज्यते, अल्पदेशे अविद्यमानस्य सर्वगतत्वायोगात्,

यत्र नास्ति पदन्यासः कस्तं विषयमाप्नुयात्।

इति न्यायादित्यर्थः। **एकत्रैवेति**। 'भूतेष्वेव' इत्यश्रवणात्। तथा श्रवणे हि तन्नोपपद्येत, न चैवमित्यर्थः। उक्तन्यायस्य

चन्द्रिका

इति न्यायेन सर्वगतेऽपि सम्भवात्, अनुव्याख्याने च—

स्थितस्य ह्यल्पदेशेषु सर्वगत्वं भवेद्ध्रुवम् ।
एकत्राप्यनवस्थस्य कुत एवाखिलस्थता ॥

इत्युक्तत्वात्, श्रुतौ भूतपदस्य च तत्रोपासनार्थत्वात्सर्वपदेन च आदित्यस्यापि ग्रहणसम्भवेन आदित्ये अनुक्तत्वाभावात्,

प्रकाशः

भाष्यादावस्फुटत्वादाह—**अनुव्याख्यान इति**। द्वितीये वैशेषिकनये,

महतोऽल्पत्वमपि हि व्योमवत्प्राह वेदवित् ।
यद्यल्पदेशसंस्थानं न सर्वत्राऽपि नो भवेत् ।
स्थितस्य हि.............................. ।

इत्यादिनाऽस्य न्यायस्य विवृतत्वादित्यर्थः। यथा खल्वेकैकं वर्णमुच्चारयत एव सर्ववेदोच्चारणं न त्वेकमप्यनुच्चारयतः, तथाऽल्पदेशेषु स्थितस्यैव सर्वगतत्वं भवेदित्यर्थः। एतेनात्र टीकादावेतदविवृतौ बीजमुद्भावितम् । ननूक्तमत्र भूतपदोपादानात्तन्मात्रस्थत्वं सिध्यति, अन्यथा तद्व्यर्थमिति, तत्राह—**श्रुताविति**। **भूतपदस्य चेति**। एतेन "निचाय्यत्वात्" इति सूत्रांशटीकायामर्भकौकस्त्वपदेन भूतमात्रावस्थितत्वं ग्राह्यम्, न तु भूतावस्थितत्वमिति सूचितम्। यदप्यादित्येऽनुक्तत्वं आदित्यत्रापकमिति, तत्प्राक् परिहर्तव्यमपि प्रसङ्गादत्र परिहरति—**सर्वेति**। ननूक्तमत्र विशिष्याऽऽदित्येऽनुक्तत्वलिङ्गादितीति चेन्न,

चन्द्रिका

उक्तरीत्या च बाधकाभावेन ब्रह्मशब्दस्याश्रुतत्वादेश्च अमुख्यत्वायो-

प्रकाशः

"सर्वप्राणिषु संस्थितः। सर्वनामाभिधेयः

इति स्मृत्याऽऽदित्यगतस्यैवादित्यनामवत्त्वोक्तेः" इति टीकोक्तरीत्या च "यश्चासावादित्ये" इत्यादिना लब्धत्वादिति तात्पर्यात्। तत्राऽऽदित्यस्थत्वमस्पष्टमित्येवं समाधानमुक्तम्। एवं "अर्भकौकस्त्वात्" इति सूत्रे निरवकाशत्वादिनाऽऽदित्यश्रुत्यादितो बलवत्त्वेन प्राधान्यादन्योपलक्षकत्वेनोपात्तस्यार्भकौकस्त्वस्य समाधानेन तदुपलक्षितानां संवत्सरसारत्वादीनां सौत्रपदोपात्तानां चादित्यप्रापकाणां स्वपक्षबाधकानां समाधानस्य 'व्योमवन्निचाय्यत्वात्' इति सूत्रांशलब्धस्योक्त्या तद्विवृत्तिपरटीकां व्याख्यायेदानीं "प्रसिद्धोपदेशात्" "विवक्षितगुणोपपत्तेश्च" "शब्दविशेषात्" इत्यादिसूत्रोक्तश्रुतिलिङ्गादिरूपस्य स्वपक्षसाधकस्य सत्त्वादत्रोक्तस्सर्वगतो विष्णुरिति भावेन तत्तत्सूत्रटीकां विवृण्वंस्तेषां पूर्ववाद्युक्तममुख्यत्वं परिहृत्य निरवकाशत्वमाह—उक्तरीत्येति। एतेन स्वपक्षसाधकानि यथासूत्रविन्यासं प्रागुपन्यस्य स्वबाधकभूतानि परसाधकानि पश्चान्निरस्यानि, नतु वैपरीत्यमिति निरस्तम्। तेषां बाधकानां स्वपक्षसाधकानामन्यथासिद्ध्यापादकत्वेन बाधकतया तन्निरासस्यैव प्रथममुपयुक्तत्वात्। सूत्रक्रमबीजं तु वक्ष्याम इति भावः। अत एवान्ते टीकायामेवमीश्वरपक्षेऽपि विरोधाभावाद्ब्रह्मशब्दस्यामुख्यार्थत्वग्रहणमश्रुतत्वादीनां भाक्तत्वकल्पनमित्यादि निरस्तं भवतीत्युक्तम्। ब्रह्मशब्दस्येति।

चन्द्रिका

गात्, भाष्योक्तश्रुत्यादिषु च ब्रह्मशब्दस्य विष्णावेव प्रसिद्धत्वात्, प्रसिद्धसम्भवे च अप्रसिद्धग्रहणायोगस्य सौत्रप्रसिद्धपदेन सूचनात्, ब्रह्मशब्दस्य जीवरूपामुख्यार्थत्वे च जीवादन्यस्य मुख्यब्रह्मणो विष्णोरमुख्यब्रह्मणश्च जात्यादेस्सत्त्वेन अन्यसम्बन्धनिराकरणासम्भवेन

प्रकाशः

आद्यसूत्रोक्तस्य ब्रह्मशब्दस्य द्वितीयोक्तस्याश्रुतत्वादिलिङ्गस्य चेत्यर्थः । अत्रापि पञ्चम्यन्तप्रधानेहतूनां 'सर्वगतो विष्णुरेव' इति साध्येनान्वयः । "ब्रह्मशब्दस्य श्रुत्यादौ नारायण एव प्रसिद्धत्वात्" इति टीकां व्यनक्ति–**भाष्योक्तेति** । "तदेव ब्रह्म परमं कवीनां" "परमं यो महद्ब्रह्म" इत्यादिष्वित्यर्थः । **प्रसिद्धेति** । अन्यथा ब्रह्मशब्दोपदेशादित्येव ब्रूयादिति भावः । यद्यपि लोकतो जीवादावपि प्रसिद्धिः, तथाऽपि वैदिकप्रसिद्धियुक्तस्यैवोपादानमिति भावः। ननु "श्रुत्वाऽप्येनं वेद न चैव कश्चित्" इति जीवस्याप्यश्रुतत्वाद्युपपत्तेश्चक्षुर्मयत्वादिवशेन ब्रह्मशब्दो जीवेऽमुख्यः किं न स्यादित्यतः "शब्दविशेषात्" इति सूत्रभाष्यटीकाभिप्रायान् व्यनक्ति—**ब्रह्मशब्दस्येति** । "सावधारणब्रह्मशब्दवाच्यत्वे मुख्यब्रह्मत्वं स्यात् । न च तज्जीवस्योपपद्यते" इति टीकोक्तमुपपादयति—**जीवरूपेति** । जीवरूपामुख्यार्थत्वे "एतमेव" इत्यवधारणं अन्यस्य मुख्यवृत्त्या ब्रह्मशब्दार्थत्वं वाऽमुख्यवृत्त्या तदर्थत्वं वा व्यवच्छिन्द्यात् । न द्वयमपि युक्तं, तथाभूतस्य ब्रह्मा-

चन्द्रिका

अवधारणायोगात्, ईश्वररूपमुख्यार्थत्वे चान्यस्य मुख्यस्य ब्रह्मणोऽसत्त्वेनान्यसम्बन्धनिराकरणसम्भवात्, भाष्योक्तश्रुत्यादौ च सावधारणब्रह्मशब्दस्य विष्णावेव प्रयोगदर्शनेन इहापि तेन तस्यैव प्रत्यभिज्ञानात्, "ब्रह्मेत्याचक्षते" इत्यनेनोक्तप्रसिद्धेश्च ब्रह्मशब्दार्थत्वेनाप्रसिद्धजीवपरत्वेऽनुपपत्तेः, अश्रुतत्वादेश्च उपसंहारस्थत्वेन बलवत्त्वात्तदनुसारेणोपक्रमस्थादित्यश्रुतेरर्भकौकस्त्वादिलिङ्गानां च नेतव्यत्वात्, अणोश्च जीवस्य सर्वगतत्वायोगात्,

प्रकाशः

देरसत्त्वादित्यर्थः । स्वपक्षेऽवधारणं युक्तमित्याह—**ईश्वरेति** । **भाष्योक्तेति** । "एष उ एव ब्रह्मैष उ एव" इत्यादावित्यर्थः । **प्रसिद्धेश्चेति** । वृद्धप्रसिद्धेरित्यर्थः । पूर्वं श्रौतप्रसिद्धिरुक्तेति भेदज्ञापनाय 'इत्यनेनोक्त' इत्युक्तम् । श्रुतेर्निरवकाशत्वमुक्त्वा लिङ्गस्य तदाह—**अश्रुतत्वादेरिति** । 'विवक्षित' इति सौत्रपदतात्पर्योक्तिः—**उपसंहारस्थत्वेनेति** । "तेषां च विष्णोरेव योग्यत्वेन" इति टीकोक्तिरुपलक्षणमिति भावः । एवं परपक्षे साधकानि निरस्य, स्वपक्षे साधकानि चोक्त्वा "अनुपपत्तेस्तु न शारीरः" इति सूत्रोक्तपरपक्षबाधकोक्तिपरटीकां विवृण्वन् परपक्षे बाधकमाह—**अणोश्चेति** । मिलितसर्वजीवानां सर्वगतत्वपक्षस्य "स्वस्वदेहस्थितिमात्रस्य सर्वेषां सिद्धत्वात्" इति टीकायामेव स्पष्टत्वादिति एकस्य सर्वगतत्वपक्षदूषणस्य विस्तृतिरियम्, टीकायां "सुख-

चन्द्रिका

योगे वाऽऽनादितः सर्वजीवानां सर्वशरीरसम्बन्धे शरीरकर्मादिव्यवस्थाऽयोगेनाभिमानस्यापि प्रसङ्गेन सर्वेषां सर्वशरीरगतदुःखादिभोगप्रसङ्गात्, व्रीह्याशरीरगतजीवान्तरस्य तत्तन्दिद्रियाभिमानिनां च तदीय सर्वशरीरसम्बन्धाभावेन भोगाप्रसङ्गात् ।

प्रकाशः

दुःखादिप्राप्त्यैकस्य सर्वशरीरस्थत्वानुपपत्तेः" इत्युपलक्षणमिति भावः। अणुत्वं "उत्क्रान्तिगत्यागतीनां" इत्यत्र साधयिष्यत इति भावः। नन्वात्मनो विभुत्वमेवोपेयते, गत्यादेरुपाधिवशेनोपपत्तेरिति भावेनाह—**योगे वेति** । अयमर्थः–सर्वजीवानां प्रत्येकं सर्वशरीरगतत्वे सर्वेषां सर्वशरीरगतसुखादिभोगस्स्यात् । न च यथा स्वर्गाच्चुचतस्य स्थूलशरीरप्राप्त्यै मातृयोनिं प्राप्तुमागच्छतो मध्येऽन्यकर्मनिर्मितजीवान्तराधिष्ठितदेहं प्राप्तस्य जीवस्य, यथा वा तत्तदिन्द्रियाभिमानिनां तत्तज्जीवशरीरगतानां तत्तच्छरीरगतसुखादिभोगाभावस्तथेहापि यदीयकर्मनिर्मितो यो देहस्स एव तस्य सुखादिभोगापादको नान्यस्य तद्गतस्यापीति वाच्यं, अनादितस्सर्वेषां सर्वशरीरगतत्वे कर्मव्यवस्थाऽयोगात् । न च यस्य यस्मिन्देहेऽभिमानस्तस्मिन् देहे कृतं कर्म तदीयमिति वा, कर्मनिर्मितत्वाविशेषेऽपि यस्य यत्राभिमानस्तद्गतसुखादिभोग एव तस्य, नान्यगततद्भोग इति वा युक्तं, अनादिकालं सर्वदेहसम्बन्धे सर्वत्र तस्याप्यवर्जनीयत्वादिति । कथं तर्हि व्रीह्यादिगतजीवादौ गतिरित्यत आह—**व्रीह्यादीति** । इन्द्रियाभि-

चन्द्रिका

ईश्वरस्य तु स्वाभाविकशक्तिविशेषेण तदप्रसङ्गात् । "आत्मानं वेद" "आत्मानं परस्मै शंसति" "यस्तित्याज सचिविदं सखायम्" इति च सर्वगतस्य तस्यात्मनो वेदनशंसनत्यागेषु कर्मत्वेन, जीवस्य तु कर्तृत्वेन निर्देशात्, कर्मकर्त्रोश्चोत्सर्गतः भिन्नत्वात्, 'मामहं जानामि' "तदात्मानमेवावेदहं ब्रह्मास्मीति" इत्यादाविव च प्रकृतेऽपवादकाभावात्,

प्रकाशः

मानिनां प्रतिकल्पं भिन्नत्वादिति भावः । एतेन "सर्वशरीरगतसुखदुःखादिप्राप्त्या" इति टीका "ब्रह्मादिसर्वशरीरगतत्वानुपपत्तेः" इति टीका च विवृता । नन्वीश्वरस्यानादितस्सर्वदेहसम्बन्धादुक्तदोषसाम्यमित्यतः "सम्भोगप्राप्तिरिति चेन्न वैशेष्यात्" इति सूत्राभिमतं 'सामर्थ्यवैशेष्यात्' इति टीकाद्युक्तं समाधिमाह—**ईश्वरस्य त्विति** । परपक्षे "कर्मकर्तृव्यपदेशात्" इति सूत्रोक्तं बाधकान्तरं तदुपात्तवाक्योक्तिपूर्वकमाह—**आत्मानमिति** । 'मामहं जानामि' "स्वाध्यायोऽध्येतव्यः" इत्यादावेकस्यैव द्वयं दृष्टमित्यत आह—**कर्मकर्त्रोश्चेति** । विस्तृतं चैतत् "कर्मकर्त्रोरुत्सर्गतो भिदा" इत्यनुव्याख्यानसुधायाम् । **प्रकृत इति** । तत्रैक्यग्राहकप्रमाणमपवादकं, इह च चक्षुर्मयत्वादिजीवलिङ्गस्य विष्णाववकाशितत्वादिति भावः । एतेन "अत्रोक्तसर्वगतस्य 'आत्मानं' इति कर्मत्वेन" इत्यादिटीका विवृता ।

चन्द्रिका

अहमात्मा गुडाकेश सर्वभूताशयस्थितः ।

इति स्मृतिसमाख्यानाच्च अत्रोक्तः सर्वगतो विष्णुरेवेति । तदेतदभिप्रेत्योक्तं न्यायविवरणे—"तथाऽपि निरवकाशाः "एतमेव" इत्यवधारणादयः" इति । अनुव्याख्याने तु—सर्वसंयोगित्वादिमात्रं नात्र प्रतिपाद्यम्, तस्यानन्दादिवद्गुणत्वाभावात् । किन्तु तत्तच्छक्तिप्रबोधनार्थं तत्रतत्रावस्थानम्,

प्रकाशः

"स्मृतेश्च" इति सूत्रोक्तं स्वपक्षे साधकान्तरमाह–अहमात्मेति। "न च स्मृतेरपि स्ववचनत्वेन विप्रतिपन्नं प्रतिसूत्रकारः कथं तामुपादत्त इति वाच्यं, तस्याः परोक्तानुवादरूपत्वात्" इति टीकायामेवोक्तेरिति भावः । 'तथाऽपि' पूर्वपक्षप्रापकश्रुतिलिङ्गाभावेऽपि । 'अवधारणादयः' अवधारणसहितब्रह्मशब्दादयः । एतेन भाष्याद्युक्तं न्यायविवरणोक्तं चैकार्थमिति दर्शितम् ।

तत्रतत्र स्थितो विष्णुः तत्तच्छक्तिप्रबोधकः ।

दूरतोऽप्यतिशक्तस्स लीलया केवलं प्रभुः ।

इत्यनुव्याख्यानेऽन्यथाव्याख्यानं प्रतीयते, तत्सुधायामस्फुटत्वात्सूत्रारूढतया व्यनक्ति—अनुव्याख्याने त्विति । सर्वसंयोगित्वेति । एतेन "अथवा न सर्वगतत्वं हरेरुपपादनीयं, तस्याऽऽनन्दादिवत्स्रष्टृत्वादिवद्वा गुणत्वाभावात्" इति सुधाऽनुवादः कृतः । "तत्किं दूरे स्थितः शक्तिप्रबोधने न शक्तः येन तत्रतत्र तिष्ठति" इति

चन्द्रिका

तच्चायुक्तम्, ईश्वरस्य दूरस्थत्वेऽपि तत्र शक्तत्वादिति प्राप्ते, तत्रतत्रावस्थानं न दूरस्थस्याशक्त्या, किन्तु लीलयैवेति सिद्धान्त इत्युक्तम्। तत् "विवक्षितगुणोपपत्तेः" इति सूत्रस्य 'विवक्षितः' दूरे शक्तस्यापि तत्तच्छक्तिबोधनार्थं तत्रतत्रावस्थानरूपो यो गुणस्तस्य लीलयोपपत्तेरिति वर्णकान्तरमभिप्रेत्य।

सूत्रक्रमस्तु—आद्ये सूत्रे विषयवाक्यस्थश्रुतिरूपस्वपक्षसाधकोक्तिः। द्वितीये तदुत्तरवाक्यस्थलिङ्गरूपसाधकोक्तिः। तत्र च 'विवक्षितत्वं' टीकोक्तरीत्या वक्तुं योग्यत्वम्, वक्तुं योग्ये हि विवक्षा भवति। यद्वा—'विवक्षितत्वं' वक्ष्यमाणत्वं, वक्ष्यमाणे हि विवक्षा भवति।

प्रकाशः

सुधास्थशङ्काभागानुवादः—**तच्चायुक्तमित्यादि**। 'यद्यपि स प्रभुर्विष्णुर्दूरतोऽतिशक्तः' इत्यादिसुधार्थानुवादः—**तत्रतत्रेति**।

पूर्वं सिद्धान्तोक्तरीत्या सूत्राणामन्यथा विन्यासः प्रतीयते, यथाक्रमबीजमाह—**आद्य इति**। "सर्वत्र प्रसिद्धोपदेशात्" इत्यत्र "एतमेव ब्रह्मेत्याचक्षते" इति विषयवाक्यगतहेतूक्तिपरत्वाच्छ्रुतिरूपहेतूक्तिपरत्वाच्च द्वेधा तस्य प्राथम्यम्। "विवक्षितगुणोपपत्तेश्च" इत्यत्र "स योऽतोऽश्रुतोऽगतोऽमतोऽनादिष्टः" इत्युत्तरवाक्यस्थत्वाल्लिङ्गत्वाच्च तदुक्तिपरत्वेन तदानन्तर्यम्। तत्र विवक्षितपदस्य टीकोक्तार्थसमर्थनपूर्वं परोक्तं कैश्चिदुक्तं चाविरुद्धमर्थद्वयं स्वयमाह—**तत्र चेति**। "ये तु श्रुतीनां ब्रह्मगुणेषु तात्पर्याभावं वदन्ति तन्निरासाय विवक्षित-

चन्द्रिका

ततश्च अश्रुतत्वादीनामुपसंहारस्थत्वाद्बलवत्तेत्यर्थः । अथवा—अपौरुषेये वेदे वक्तुमिच्छाया अभावाद्विवक्षितत्वं तात्पर्यविषयत्वम् । ततश्चाश्रुतत्वादीनामप्राप्तत्वादिना श्रुतेस्तत्र तात्पर्यान्न मिथ्यात्वमित्यर्थः । तृतीये साध्यस्य सर्वगतत्वस्य अणौ जीवे स्वरूपेणैवासम्भवरूपपरपक्षबाधकोक्तिः । "स यश्चायमशरीरः" इति श्रुतिश्रुतस्य अशरीरत्वस्य जीवे अनुपपत्तिं सूचयितुं च शारीरपदम् । चतुर्थे जीवे सर्वगतत्वस्य स्वरूपेणासम्भवेऽपि वाक्यशेषस्थकर्मकर्तृभावविरोध इत्येवंरूपबाधकोक्तिः । अत एव तृतीयसूत्रस्थानुपपत्तिशब्दस्य प्रकृतेन सर्वगतत्वेनैवान्वयात्कर्मकर्तृभावानुपपत्तिर्न तदर्थ इति चतुर्थसूत्रसार्थक्यम् ।

प्रकाशः

पदमुपबबन्ध" इत्यादितत्त्वप्रदीपवाक्यं हृदि कृत्वाऽऽह—ततश्चेति । श्रुतिलिङ्गरूपस्वपक्षसाधकोक्त्यनन्तरं परपक्षे बाधकोक्तेरवसरप्राप्तत्वात् द्वाभ्यां तदुक्तिः । तत्र "अनुपपत्तेस्तु न शारीरः" इति तृतीयेऽन्तरङ्गबाधकोक्तिः, चतुर्थे "कर्मकर्तृव्यपदेशाच्च" इत्यत्र बहिरङ्गबाधकोक्तिरिति तदानन्तर्यम् । ननु "अनुपपत्तेः" इत्यत्र प्रतियोगिविशेषाभावात्कर्मकर्तृभावानुपपत्तेरपि तत्रैव विवक्षितुं शक्यत्वात् "कर्म" इति सूत्रं व्यर्थमित्यत आह—**अत एवेति**। वाक्यशेषस्य बहिरङ्गबाधकोक्तिपरत्वादेवेत्यर्थः। **प्रकृतेनेति**। एतस्याप्रकृतत्वेनान्वयायोगादित्यर्थः । तर्ह्यश्रुतत्वादीनामेव प्रतियोगितयाऽन्वयोस्तु, ततोऽ-

चन्द्रिका

यद्यपि विवक्षितगुणा अव्यवधानेन प्रकृताः, तथाऽपि ब्रह्मणि तेषामुपपत्तिं वदता द्वितीयसूत्रेणैव जीवेऽर्थादनुपपत्तेरप्युक्तत्वात् तृतीयसूत्रं न तत्परम्। पञ्चमे यद्यपि प्रथमसूत्रोक्तब्रह्मशब्दस्य जीवेऽप्युपपत्तिशङ्का निरस्यत इति तस्य द्वितीयत्वं युक्तम्, तथाऽप्युत्सर्गतो भेदसाधकस्य कर्मकर्तृभावस्य उपोद्बलकात् "एतमेव" इत्यवधारणान्नापवादशङ्केत्येतदर्थस्याप्युक्तेः पञ्चमता। स्वतन्त्रहेत्वन्तरानुक्तेश्च न तत्र चशब्दः। षष्ठे पञ्चमेन श्रौते स्वपक्षसाधके समाप्ते ऽनन्तरं स्मार्तस्य तत्साधकस्योक्तिः। सप्तमे तर्हि स्मृतिसमाख्यया सर्वगतत्वस्याल्पौकस्त्वरूपत्वादणौ जीवे सर्वगतत्वस्येव सर्वगते ब्रह्मणि अल्पौकस्त्वस्यापि स्वरूपेणैवासम्भव इत्येवंरूपस्य स्वपक्षबाधकस्योद्धारः। अत्र च 'व्योमवत्' इत्यनेन विरोधपरिहारः।

प्रकाशः

पि सन्निहितत्वादित्याशङ्क्य निराह—यद्यपीति। "शब्दविशेषात्" इत्यस्याद्यानन्तर्यमाशङ्क्याह—पञ्चम इति। जीवेऽपीति। अमुख्यवृत्त्येत्यर्थः। एतदर्थस्यापीति। अत एव टीकायां कर्मकर्तृसूत्रमप्येतत्सूत्रावतारिकायामाक्षिप्तमिति भावः। स्वतन्त्रेति। ब्रह्मशब्दस्यान्यथासिद्धिनिरासार्थत्वात् "स्वाप्ययात्" इत्यादाविवेति भावः। 'षष्ठे' "स्मृतेश्च" इत्यत्र। 'सप्तमे' "अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च" इत्यत्र। इत्यनेन विरोधपरिहार इति। स प्रकारः प्रागुक्त इति भावः।

चन्द्रिका

"निचाय्यत्वादेवम्" इत्यनेन चाल्पौकस्त्वोक्तेः प्रयोजनोक्तिः। यद्यपि "नोपासात्रैविध्यात्" इत्यत्रैवाल्पौकस्त्वोक्तेरपि प्रयोजनमुक्तम्, तथाऽपि उपासनार्थं अन्तस्स्थत्वाद्युक्तौ तच्छ्रुतिरप्रमाणं स्यात्, उपासनाया मानसक्रियात्वेन अर्थाभावेऽपि सम्भवात्। नहि सप्रयोजनत्वं प्रामाण्यम्, मणिप्रभायां मणिभ्रमस्य तत्प्रसङ्गात्, तृणादिज्ञानस्य तदभावप्रसङ्गाच्चेति शङ्कामुपासनाया ज्ञानात्मकत्वादर्थाभावोऽसिद्ध इति परिहर्तुं 'चायृदर्शने' इत्यस्माद्धातोर्निष्पन्नस्य निचाय्यशब्दस्य प्रयोगः। अष्टमे सर्वगतस्यापि ब्रह्मणो व्योमवत् भूताश्रयत्वरूपाल्पौकस्त्वसम्भवेऽपि तद्वदचेतनत्वाभावेन जीववद्भोगप्रसङ्ग इत्येवंरूपस्य स्वपक्षबाधकस्योद्धार इति॥

प्रकाशः

एतेन "किमपरिच्छिन्नादिरूपस्य" इत्यादिटीका सूत्रांशविवरणपरेति दर्शितम्। व्यावर्त्याशङ्कापूर्वं निचाय्यपदकृत्यमाह—**यद्यपीति**। **चायृ दर्शन इतीति**। दर्शनस्यार्थाव्यभिचारादिति भावः। 'अष्टमे' "सम्भोगप्राप्तिरिति चेन्न वैशेष्यात्" इत्यत्र। सामर्थ्यविशेषेण तदुद्धार इत्यर्थः।

अत्र प्रत्यधिकरणं टीकायां पूर्वत्रैव विषयोपाध्यनुक्तेस्तत्प्रदर्शनार्थमधिकरणानां बद्धक्रमत्वस्यानुव्याख्यानाऽऽरूढतया प्रदर्शनाथ च "सूत्रे भाष्येऽनुभाष्ये च" इति स्वप्रतिज्ञामनुरुन्धंस्तदनूद्य

चन्द्रिका

अत्र—

एतद्भावाभिधं लिङ्गं क्रियालिङ्गे ततः परम् ।
अन्तर्याम्यन्तरश्चेति क्रियाभावाख्यमुच्यते ।
अदृश्यत्वाद्यभावाख्यं श्रुतिर्लिङ्गाधिका परा ॥

इत्यनुव्याख्याने "सर्वत्र" इत्यत्र सर्वत्रावस्थितिरूपं भावाख्यं लिङ्गं प्रतिपाद्यम्, "अत्ता" इत्यत्र संहाररूपक्रियात्मकं लिङ्गं, "गुहां" इत्यत्रापि कर्मफलभोगरूपक्रियात्मकं लिङ्गं, "अन्तरः" इत्यत्र अन्तस्स्थितिरूपभावसहितं रमणरूपक्रियात्मकं लिङ्गम्, "अन्तर्यामी" इत्यत्रापि तत्सहितं नियमनरूपक्रियात्मकं लिङ्गम्, "अदृश्यत्वादि" इत्यत्र अभावात्मकं लिङ्गं, "वैश्वानरः" इत्यत्र पाचकत्वाद्यनेकलिङ्गसहितं वैश्वनरनामेत्यापादपरिसमाप्त्यधिकरणोपाधयो दर्शिताः । तन्न केवलं सुधोक्तरीत्या तत्तदधिकरणप्रतिपाद्यगुणासाङ्कर्यार्थं, किन्तु सङ्गत्यर्थं च । तथा हि—विद्यमानस्यैव क्रियान्वयात् क्रियातो भावस्य प्राथम्यम् । न हि क्रियासामान्यस्य स्थितिसमान्यापेक्षत्वमिव स्थितिसामान्यस्य क्रियासामान्यापेक्षाऽस्ति ।

प्रकाशः

व्याचष्टे **अत्रेति** । '**तत्सहितं**' भावसहितं । **न केवलमिति** । "ग्रन्थोऽयमपि बह्वर्थः" इत्युक्तेरिति भावः । स्थितिरूपभावस्य प्राथम्यं व्यनक्ति—**न हीति** ।

चन्द्रिका

तत्रापि कर्मफलभोगवत् अत्तृत्वरूपसंहर्तृत्वस्य ब्रह्मण्यसम्भावितत्वाभावात्, तथा कर्मफलात्तृत्वरूपाविशेषं प्रति सामान्यरूपत्वात्, तथा स्थित्यनन्तरं संहारस्य । धीस्थत्वात्प्रातिपादिकश्रुतिसाहित्येन अन्यत्रप्रसिद्धतया सर्वगतत्वसाधर्म्याच्च सर्वगतत्वानतन्तर्यमत्तृत्वस्य, तदानन्तर्यं कर्मफलभोक्तृत्वस्य एकैकरूपलिङ्गोक्त्यनन्तरमेव तान्निरूप्यविशिष्टरूपलिङ्गोक्तिर्युक्तेति भोक्तृत्वानन्तरमन्तराद्यधिकरणद्वयम् । तत्रापि अन्तरत्वस्य श्रुतिसाहित्येनान्यत्रप्रसिद्धतया लिङ्गसाहित्येनान्यत्रप्रसिद्धान्तर्यामित्वात् ज्यायस्त्वात्, तथा आदित्यादिनि

प्रकाशः

अवान्तरक्रमे भाष्यादिसूचितौ हेतू आह—**तत्रापीति** । अधिकरणद्वयेऽपीत्यर्थः । **सामान्यरूपत्वादिति** । सामान्योक्त्यनन्तरमेव विशेषजिज्ञासा भवतीति भावः । "अत्ता" इत्यस्य पूर्वानन्तर्ये "संहर्तृत्वापरपर्यायवाच्यमत्तृत्वं "इत्यादिटीकासूचितं हेतुद्वयमाह—**स्थितीति** । **संहारस्येति** । अत्तृत्वस्य संहाररूपत्वेन वक्ष्यमाणत्वादिति भावः । **प्रातिपदिकेति** । "सर्वत्र" इति नये आदित्यप्रातिपदिकश्रुतिसाहित्येन सर्वगतत्वस्यान्यत्रप्रसिद्धिवददितिश्रुतिसाहित्येनात्तृत्वस्यान्यत्र प्रसिद्धिरुच्यते, "गुहां प्रविष्टौ" इत्यत्र तु नैवमिति पौर्वापर्यमित्यर्थः । **तन्निरूप्येति** । प्रागुक्तभावक्रियारूपोभयनिरूप्येत्यर्थः । टीकासूचितं हेतुमाह—**अन्तरत्वस्येति** । अग्निश्रुतीत्यर्थः । **लिङ्गेति** ।

चन्द्रिका

यामकत्वेनावस्थानविशिष्टरमणरूपमन्तरत्वमयुक्तम्, बहुव्यापारवतः तद्धेतुकविक्षेपेण दुःखादिप्रसङ्गादित्यन्तरत्वे आक्षिप्ते, यद्यदनधीनसत्ताप्रवृत्तिप्रतीतिकं तन्नियमने तस्य दुःखादि, ईश्वरस्तु सत्तादिप्रद इति सत्तादिप्रदत्वरूपान्तर्यामित्वप्रतिपादनात् "अन्तरः" इत्येतदानन्तर्यं "अन्तर्यामी" इत्यस्य । एवं भावरूपलिङ्गसमन्वये समाप्ते तन्निरूप्याभावरूपत्वाददृश्यत्वादेस्तदानन्तर्यम् । एवं केवललिङ्गसमन्वये समाप्ते लिङ्गाधिकनामसमन्वयस्योभयात्मकत्वादन्यता । अन्याऽपि सङ्गतिस्तत्तदधिकरणे प्रदर्श्यते । एवं च अदृश्यत्वाधिकरणात्प्राचीनानानि पञ्चाधिकरणानि भावलिङ्गविषय-

प्रकाशः

पृथिव्यादिशरीरत्वलिङ्गेत्यर्थः ।

रमणं नातियत्नस्य विक्षेपादेव युज्यते ।
इति चेत्सर्वनियमो यस्य कस्मान्न शङ्क्यते ।
स्वात्मनाऽनियतं वस्तु प्रतीपं ह्यात्मनो भवेत् ।

इत्यनुव्याख्यानोक्तमेवावान्तरक्रमे हेत्वन्तरमाह—**तथाऽऽदित्यादीति** । **उभयात्मकत्वादिति** । साक्षादसाक्षात्त्वभेदेनेति भावः । नन्वेतास्सङ्गतयो न स्पष्टं श्रुतिसङ्गत्याक्षेपिकाः । अतस्तदाक्षेपिकाऽन्यैव वाच्येत्यत आह—**अन्याऽपीति** । एवमनुव्याख्यानस्यानन्तर्यसङ्गतिपरत्वं व्याख्याय पेटिकासङ्गतिपरत्वं चाह । **एवं चेति** । यद्वा—अन्तिमं विना षडधिकरणानि साक्षाल्लिङ्गसमन्वयपरत्वेनैका पेटिका

चन्द्रिका

तथैका महापेटिका । तत्राप्याद्यं विना चत्वारि क्रियाविषयत्वेन, तत्राप्याद्यद्वयं क्रियामात्रविषयत्वेन, उत्तरद्वयं तु भावसहितक्रियाविषयत्वेन, पादान्त्योपान्त्ये तु बहुविषयत्वेन एकाऽवान्तरपेटिकेत्याद्यूह्यम् ।

अन्ये तु—"स क्रतुं कुर्वीत मनोमयः प्राणशरीरो भारूपस्सत्यसङ्कल्पः" इति वाक्ये मनोमयत्वादिनोपास्यो जीवः,

प्रकाशः

तत्राप्याद्यचतुष्टयं श्रुतिसाहित्येनान्यत्रप्रसिद्धलिङ्गसमन्वयपरत्वादेकाऽवान्तरपेटिका, "गुहां" इत्यत्रापि प्रत्ययश्रुतिसाहित्येनान्यत्र प्रसिद्धेर्वक्ष्यमाणत्वात् । षष्ठस्य तथात्वेऽप्यभावविषयत्वात्तस्य पृथक्त्वम् । पञ्चमस्य तु लिङ्गसाहित्येनान्यत्रप्रसिद्धसमन्वयपरत्वात्तदेकमवान्तरम् । सप्तमं त्वर्थाल्लिङ्गसमन्वयपरत्वादेकं पृथगिति ज्ञेयमिति भावेनाह—**इत्याद्यूह्यमिति** । यद्वा—"सर्वगोऽत्ता नियन्ता च" इत्यणुभाष्यदिशाऽत्तृत्वरूपलिङ्गसमन्वयपरत्वादत्ताधिकरणं गुहाधिकरणं चैका पेटिका, नियमनरूपैकलिङ्गसमन्वयपरत्वादन्तराद्यधिकरणद्वयमेका पेटिकेति ध्येयमित्याह—**इत्याद्यूह्यमिति** । यद्वा—न केवलं सङ्गत्यादिपरमनुव्याख्यानं, किन्त्वेतान्येवात्र समन्वीयन्ते, न तु परोक्तानि, सप्तैव चाधिकरणानि, न रामानुजमतरीत्या षडेवेत्यादिपरमतखण्डनपरं च ध्येयमिति भावेनाह—**इत्यादीति** । खण्डनप्रकारश्चाग्रे स्पष्ट इति ॥

अन्ये त्विति । "सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपा-

प्रकाशः

सीत अथ खलु क्रतुमयः पुरुषः यथाक्रतुरस्मिन् लोके पुरुषो भवति तथेतः प्रेत्य भवति । स क्रतुं कुर्वीत मनोमयः प्राणशरीरो भारूपः सत्यकामस्सत्यसङ्कल्पः स आकाश आत्मा सर्वकामः सर्वगन्धः सर्वरसस्सर्वमिदमभ्यात्तोऽवाक्यनादरः एष म आत्माऽन्तर्हृदयेऽणीयान् व्रीहेर्वा यवाद्वा सर्षपाद्वा श्यामाकाद्वा श्यामाकतण्डुलाद्वा एष म आत्मान्तर्हृदये ज्यायान् पृथिव्याः ज्यायानन्तरिक्षाज्ज्यायान्दिवो ज्यायानेभ्यो लोकेभ्यः सर्वकर्मा सर्वकामः सर्वगन्धस्सर्वरसस्सर्वमिदमभ्यात्तोऽवाक्यनादर एष म आत्मान्तर्हृदये एतद्ब्रह्मैतमितः प्रेत्याभिसम्भवितास्मि " इति च्छान्दोग्ये तृतीये श्रूयते । तत्र "स क्रतुं कुर्वीत" इति क्रतुशब्दितसङ्कल्पध्यानापरपर्यायोपासनाविधौ मनोमयत्वादिधर्मैर्जीव उपास्यत्वेनोपदिश्यते अथ ब्रह्मेति संशये, "मनोमयः" इत्यादिवाक्योक्तो मनोमयत्वादिविशिष्टो जीव एव, कार्यकारणसङ्घातात्मनो जीवस्यैव मनआदिसम्बन्धस्य प्रसिद्धत्वात् । ब्रह्मणस्तु "अप्राणो ह्यमनाः" इत्यादिना तद्राहित्यात् । "सर्वं खल्विदं ब्रह्म" इति वाक्यं ब्रह्मबोधकमपि " "क्रतुं कुर्वीत" इत्युक्तोपासनायां न कर्मतया ब्रह्मार्पकं, तस्य "क्रतुं कुर्वीत" इति वाक्यविहितोपासनानुवादेन शान्तत्वरूपगुणविधिहेतुसमर्पकत्वात् । इदं सर्वं जगत्तज्जत्वात्तल्लत्वात्तदनत्वाद्ब्रह्मात्मकमेव यस्मात्तस्माद्रागद्वेषौ हित्वा शान्त उपासीतेत्येवंपरत्वात्, "क्रतुं कुर्वीत" इत्युक्तोपासनायां स्ववाक्य-

प्रकाशः

गतमनोमयत्वादिविशिष्टजीवस्यैव कर्मत्वेनान्वयसम्भवेऽन्यपराद्वाक्याद्ब्रह्मणः कर्मत्वेन स्वीकारायोगात् । सत्यसङ्कल्पत्वादिब्रह्मधर्माणां तदभिन्ने जीवे नेयत्वात् । उक्तं च भामत्यां—

क्रतुमित्यादिवाक्येन विहितां क्रतुभावनाम् ।
अनूद्य सर्वमित्यादिवाक्याच्छमगुणे विधिः ॥

इति । एवं प्राप्ते 'प्राणशरीरः' इत्यत्र प्राणः शरीरमस्येति बहुव्रीहित्वात्, समासस्थसर्वनाम्नः सन्निहितपरस्य "सर्वं खल्विदं ब्रह्म" इति पूर्ववाक्ये सर्ववेदान्तेषु प्रसिद्धस्य ब्रह्मशब्दस्योपदेशेन ब्रह्मण एव सन्निहितत्वात्, तत्परामर्शकतया प्राणशरीरपदेन ब्रह्मण एवोपस्थित्या जीवप्रतीत्यभावात्, मनोमयशब्दस्य च विकारप्राचुर्याद्यनेकार्थकमयडन्तस्य साधारणतया जीवविशेषोपस्थापकत्वायोगात्, सत्यकामत्वादिविवक्षितगुणानां ब्रह्मण्येवोपपत्तेः, अन्यपरादपि वाक्यादुपासनकर्माकाङ्क्षानिवर्तकत्वेन ब्रह्मैवोपास्यत्वेनोच्यते । न च जीवधर्मविरोधः, तेषां जीवाभिन्ने ब्रह्मण्यपि युक्तत्वात्, वैपरीत्यस्य चासम्भवात् । तदुक्तं भामत्यां—

समासस्सर्वनामार्थः सन्निकृष्टमपेक्षते ।
तद्धितार्थोऽपि सामान्यान्नापेक्षाया निवर्तकः ॥
तस्मादपेक्षितं ब्रह्म ग्राह्यमन्यपरादपि ।
तथा च सत्यसङ्कल्पप्रभृतीनां यथार्थता ॥

चन्द्रिका

तस्यैव मनःप्राणादिसम्बन्धात्, ब्रह्मणस्तु "अप्राणो ह्यमनाः शुभ्रः" इत्यादिश्रुत्या तद्राहित्यादिति प्राप्ते, ब्रह्मैवोपास्यं, सत्यकामत्वज्यायस्त्वादिलिङ्गात् । जीवधर्मास्तु मनोमयत्वाणीयस्त्वादयो जीवाभिन्ने ब्रह्मणि युक्ताः । न च वैपरीत्यं शङ्क्यम्, विशिष्टचैतन्यरूपस्य जीवस्य ब्रह्मण्यध्यस्तत्वात् । अध्यस्तसर्पासाधारणधर्मैश्च भीषणत्वादिभिः रज्जू रूपवती, न तु रज्जुरुपेणाभिगम्यत्वादिना सर्पो रूपवान्, तदा सर्पस्यैवाभावात् । सर्पदशायां तु अस्ति वास्तवी रज्जुरिति सिद्धान्तः । तदुक्तं भामत्याम्—

समारोप्यस्य रूपेण विषयो रूपवान् भवेत् ।
विषयस्य तु रूपेण समारोप्यं न रूपवत् ॥

प्रकाशः

इति । "क्रतुं कुर्वीत" इत्यस्य ध्यानं कुर्वीत उपासीतेति यावदित्यर्थः । "मनोमयः" इत्यंशोक्तिः पूर्वपक्षयुक्तिसूचनाय, "सत्यसङ्कल्पः" इत्यंशोक्तिः सिद्धान्तयुक्तिसूचनायेति ज्ञेयम् । ननु मनोमयवाक्योक्तो जीवः कुतः, ब्रह्मैव किं नेत्यत आह—तस्यैवेति । ननु जीवस्य मनोमयत्वादयः स्वतः, ब्रह्मणस्तु तद्द्वारा । प्रथमं द्वारस्य बुद्धिस्थत्वात्तदेवोपास्यमस्तु, न पुनर्जघन्यं ब्रह्म, तल्लिङ्गानि च तदभेदाज्जीवेऽप्युपपत्स्यन्त इति भावेनाशङ्क्य निराह—न च वैपरीत्यमिति । 'रूपवती' धर्मवती । 'विषयः' अधिष्ठानं । रूपशब्दो धर्मपरः । अत्रेदं दूषणं ध्येयं—अस्मद्रीत्या पूर्वसङ्गतस्य

चन्द्रिका

इति। आद्यसूत्रस्य च 'सर्वत्र' वेदान्तेषु परमात्मपरतया प्रसिद्धस्य ब्रह्मशब्दस्योपदेशादित्यर्थ इत्याहुः। अत्र ब्रूमः—

तत्त्वतो भात्यधिष्ठाने नारोप्यगतधर्मधीः।

प्रकाशः

संशयपूर्वपक्षबीजयुक्तस्य स्ववाक्यस्थशब्दविशेषोपेतस्य वाक्यस्योदाहरणत्वसम्भवेऽनेवंविधवाक्योक्तचयोगात्। नहि तद्वाक्ये सत्यकामत्वादिब्रह्मधर्माणां सत्त्वात्सन्देहो युज्यते, मनोमयत्वादेरानन्दमयाधिकरणन्यायेन सावकाशत्वात्। अपच्छेदन्यायेन परप्राबल्येन सत्यकामत्वादिना पूर्वस्य मनोमयत्वादेर्बाधसम्भवाच्च। पूर्वप्राबल्येऽपि सत्यकामत्वादेर्बहुत्वेन निरवकाशत्वेन च बलवत्त्वात् पूर्वस्याप्यल्पस्य सावकाशस्य बाधोपपत्तेः। किञ्च यथा त्वन्मते पूर्वाधिकरणे उपक्रमोपसंहाराभ्यां प्रतीतैकवाक्यतानुरोधेन जीवमुख्यप्राणलिङ्गे तदनुगुणतया ब्रह्मणि नीते, तथेहापि "सर्वं खल्विदं ब्रह्म" इत्युपक्रमात् "एतद्ब्रह्म" इत्युपसंहारादेकवाक्यत्वावगमेन ब्रह्मविषयत्वप्रतीतिस्वारस्येन मनोमयत्वादेर्नेयत्वात्। भिन्नविषयत्वप्रतीतिपूर्वकपूर्वपक्षायोगाच्चेति। यदुक्तं—सिद्धान्ते जीवधर्माणां ब्रह्मण्यारोप इति, तन्न युक्तं, रज्जुत्वासाधारणधर्मेण प्रतीतायां रज्जौ भीषणत्वाद्यनारोपस्येव सत्यकामत्वाद्यसाधारणधर्मेण प्रतीते ब्रह्मणि जीवधर्मारोपस्यायोगात् सिद्धान्तानुदय इत्याह—तत्त्वत इति।

चन्द्रिका

ब्रह्मणश्च तथा भानं त्वयाऽप्यत्राभ्युपेयते ॥

यद्यप्यारोप्यस्यासाधारणरूपेण ज्ञानदशायामधिष्ठानमस्ति, अधिष्ठानस्य तु तथा ज्ञानदशायां आरोप्यं नास्ति । तथाऽप्यधिष्ठानं तथा ज्ञानदशायां नारोप्यधर्मेण धर्म्मवत् । नहि रज्जूरज्जुत्वाभिगम्यत्वादिना ज्ञानदशायां भीषणत्वादिमत् । प्रकृते च अधिष्ठानं ब्रह्मत्वसाधकसत्यकामत्वाद्यसाधारणरूपेण भासते । नहि सिद्धान्तः "सत्यकामः" इत्यादिवाक्यशेषाज्ञानमूलः । यद्यपि "सत्यकामः" इत्यादिवाक्यजन्यमधिष्ठानतत्त्वज्ञानं परोक्षम्, तथाऽपि तत्परोक्षभ्रमविरोध्येव। इह चाणीयस्त्वादिविभ्रमः श्रौतत्वात्परोक्षः । अत एवायं न सोपाधिकः, येन तत्त्वज्ञानेऽप्यनुवर्तेत ।

प्रकाशः

अत्र तथा भानमसिद्धमित्यत आह——**ब्रह्मणश्चेति** । सत्यकामत्वादिधर्मैस्सिद्धान्तितत्वादिति भावः । प्रागुक्तानुवादपूर्वं श्लोकं व्यनक्ति——**यद्यपीति** । ननु तत्त्वतो ब्रह्मभानस्य शाब्दत्वेन परोक्षत्वात्कथमारोपविरोधित्वम् । न हि श्वैत्यानुमितिः शङ्खे पैत्यारोपविरोधिनीत्याशङ्क्याह——**यद्यपीति** । **अत एवेति** । परोक्षत्वादेवेत्यर्थः । पैत्यारोपस्त्वपरोक्षः सोपाधिकश्चेति भावः । ननु सत्यकामत्वादिना ब्रह्मणोऽत्र भानेऽपि नाधिष्ठानस्य तत्त्वतो भानम्। न हि सत्यकामत्वादिकमधिष्ठानस्य तत्त्वं, किन्तु शुद्धस्वभावत्वं, न हि तथाऽत्र ब्रह्मणो भानमस्ति, सविशेषस्यैव भानाङ्गीकारादित्य-

चन्द्रिका

किञ्च—त्वन्मतेऽप्यस्य वाक्यस्य सत्यसङ्कल्पत्वादियुक्तसगुणब्रह्मविषयत्वात् जीवसगुणब्रह्मणोश्च निर्गुणेऽध्यस्तत्वात् कथं परस्परमधिष्ठानाध्यस्तभावः। यथोक्तं संक्षेपशारीरके—

स्वाज्ञानकल्पितजगत्परमेश्वरत्वजीवत्वभेदकलुषीकृतभूरिभावा।
स्वाभाविकस्वमहिमस्थितिरस्तमोहा प्रत्यक्चितिर्विजयते भुवनैकयोनिः॥

इति। किञ्च—रज्जुमुद्दिश्य भीषणमिति व्यपदेश इव, ब्रह्मणि मनोमयत्वादिश्रौतव्यपदेशोऽप्रमाणं स्यात्। अपि च—त्वयाऽस्य वाक्यस्य उपासनापरताया असत्योपासनायाश्च स्वीकृतत्वात्, सत्यसङ्कल्पत्वज्यायस्त्वादीनां जीवे स्वरूपेणासत्त्वेऽपि तथोपासनं किं न स्यात्। न च सहश्रुतेषु मनोमयत्वादिकमेव उपास्यं, न तु सत्यसङ्कल्पत्वादिकमित्यत्र हेतुरस्ति।

प्रकाशः

नुशयेनाह—किञ्चेति। जगत्त्वेन परमेश्वरत्वेन जीवत्वेन त्रयाणां प्रतीच्यारोपितत्वप्रतीतेरिति भावः। ननु यस्सत्यकामः सोऽणीयानिति सत्यकामत्वादियुतमुद्दिश्य अणीयस्त्वादिविधौ यत्सत्यकामत्वाद्यारोपाधिष्ठानं तदेवाणीयस्त्वाद्यारोपाद्यधिष्ठानं भविष्यति, वल्मीके यः स्थाणुः स पुरुष इतिवदित्यत आह—किञ्चेति। ननु तत्त्वावेदकप्रामाण्याभावोऽभ्युपेयत एवेति अत आह—अपि चेति। हेतुरस्तीति। ननु मयोमयत्वादिकं ब्रह्मणि व्यावहारिकं, सत्यकामत्वादिकं तु जीवे प्रातीतिकम्। न च श्रुतेर्व्यावहारिकपरत्व-

चन्द्रिका

सूत्राक्षरार्थोऽप्ययुक्तः,

प्रकाशः

सम्भवेऽत्यन्ताप्रामाण्यापादकप्रातीतिकपरत्वं युक्तमितिचेन्न, "अप्राणो ह्यमनाः शुभ्रः" इति श्रुत्या तदभाववेदनेन तस्यापि ब्रह्मणि प्रातीतिकत्वात् । जीवेऽपि त्वन्मते व्यावहारिकतया ब्रह्मणि प्रातिभासिकत्वावश्यम्भावाच्चेति भावः । उपलक्षणमेतत् । यदप्य-णीयस्त्वादिर्जीवधर्मो ज्यायस्त्वादिर्ब्रह्मधर्म इति, तन्न, "अणोरणी-यान्महतो महीयान्" इत्यणीयस्त्वस्यापि ब्रह्मणि श्रुतत्वात् । न चोभयं विरुद्धं, तर्हि प्रथमोपस्थिताणीयस्त्वाङ्गीकारेण ज्यायस्त्व-स्यैव चरमस्य परित्याज्यत्वात् । श्रुत्यन्तरविरोधस्योभयत्र तुल्य-त्वात् । विरोधशान्तिप्रकारस्य "व्योमवत्" इत्यनेन सूत्रकृतैवो-क्तत्वाच्च । तदुक्तमनुव्याख्याने—

महतोऽल्पत्वमपि हि व्योमवत्प्राह वेदवित् ।

इतीत्यपि ध्ययेम् । एवमधिकरणशरीरं सिद्धान्तानुदयेन निरस्येदानीं सूत्रार्थासामञ्जस्यमाह—**सूत्रेति** । एवं हि सूत्रार्थानाहुः—'मनो-मयत्वादिनोपास्यं ब्रह्मैव' इतिसाध्यमध्याहार्यम् । हेत्वर्थः प्रागुक्तः । '**विवक्षितगुणोपपत्तेश्च**'—'विवक्षितानां' वक्तुमिष्टानां तात्प-र्यविषयीभूतानामिति यावत्, तेषां सत्यकामत्वादीनां ब्रह्मण्येवो-पपत्तेः । '**अनुपपत्तेस्तु न शारीरः**'—प्रागुक्तसत्यसङ्कल्पत्वा-दीनां जीवेऽनुपपत्तेः । '**कर्मकर्तृव्यपदेशाच्च**'—"एतमितः प्रेत्याभि-

चन्द्रिका

आद्यसूत्रे हेतुमात्रस्योक्तत्वेन मनोमयत्वादिनोपास्यं ब्रह्मेति प्रतिज्ञांशस्याध्याहर्तव्यत्वात् । द्वितीये सत्यकामत्वादिमिथ्याभूतगुणेषु श्रुतितात्पर्योपपत्तिसहितत्वयोरभावेन विवक्षितोपपत्तिपदयोरस्वारस्यात् ।

प्रकाशः

सम्भवितास्मि" इत्यत्र 'एतं' इति द्वितीयया ब्रह्मणः कर्मत्वेन 'अभिसम्भवितास्मि' इति प्रथमया जीवस्य कर्तृत्वेन व्यपदेशाच्च न शारीरोऽत्रोपास्यः । 'शब्दविशेषात्'—समानप्रकरणे श्रुत्यन्तरे "यथा व्रीहिर्वा यवो वा श्यामाकतण्डुलो वा एवमयमन्तरात्मन्पुरुषो हिरण्मयः" इति जीवब्रह्मबोधकसप्तम्यन्तप्रथमान्तरूपशब्दविशेषाच्च न शारीरोऽत्रोच्यते ।

ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।

इति स्मृतेश्च न शारीरः । "एष म आत्माऽन्तर्हृदये" इत्यल्पायतनत्वात् "अणीयान् व्रीहेर्यवाद्वा" इति अणीयस्त्वव्यपदेशाच्च न सर्वगतः परमात्मा मनोमयत्वादिगुणक इति चेत्, सर्वगतस्यापि ब्रह्मणो हृदयपुण्डरीके निचाय्यत्वाद्द्रष्टव्यत्वादेवं व्यपदेशः 'व्योमवत्' यथा व्योम सर्वगतमपि सूचीपाशाद्यपेक्षयाऽर्भकौकोऽणीयो व्यपदिश्यते तद्वत् । ब्रह्मणः सर्वप्राणिहृदयसम्बन्धात् सुखादिसम्भोगप्राप्तिरिति चेन्न, अपहतपाप्मत्वादिवैशेष्यादिति । तत्सर्वं क्रमेण दूषयति—आद्य इति । उपलक्षणमेतत् 'सर्वत्र' इत्यस्य वैयर्थ्यादित्यपि ध्येयम् । मिथ्येति । त्वन्मते तेषामारोपितत्वा-

चन्द्रिका

तृतीये सत्यकामत्वादिगुणानां ब्रह्मण्युपपत्तिं वदता द्वितीयेनैव तेषां जीवे अनुपपत्तेरर्थादुक्तत्वेन तेन पौनरुक्त्यात् । चतुर्थे आधाराधेयभावस्येव "एतमितः प्रेत्याभिसम्भवितास्मि" इति कर्मकर्तृभावस्यापि विरुद्धविभक्तिकशब्दं वदता शब्दविशेषशब्देनैव ग्रहणसम्भवेन पञ्चमेन पौनरुक्त्यात् । पञ्चमेऽपि "एष म आत्मान्तर्हृदये ज्यायान्" इति वाक्यशेषे अन्तरस्थत्वेनोक्तस्य मनोमयत्वादिगुणकस्य "एवमयमन्तरात्मन् हिरण्मयः" इति समानप्रकरणे श्रुत्यन्तरे जीवस्य यः शब्दः 'अन्तरात्मन्' इति सप्तम्यन्तस्ततोऽन्यो 'हिरण्मयः' इति प्रथमान्तो यो ब्रह्मणः शब्दः, तेन शब्दविशेषेण मनोमयत्वादिगुणको न जीव इति त्वदुक्तस्य शब्दविशेषस्य श्रुत्यन्तरस्थत्वेन अस्मदुक्तस्य प्रस्तुतब्रह्मशब्दे सावधारणत्वरूपविशेषस्येव स्वप्रकरणस्थत्वाभावात् । स्वतन्त्रहेत्वन्तरपरत्वेन चतुर्थ इवात्रापि चशब्दप्रसङ्गाच्च । एवं सूत्रान्तरेऽप्यनुपपत्तिरूह्या ।

प्रकाशः

दिति भावः। **आधारेति**। "अयमन्तरात्मन्" इति सप्तमीप्रथमाभ्यामुक्तस्येत्यर्थः । **वदतेति** । वक्तृत्वमुपचरितं, प्रतिपादकेनेति यावत् । **अन्तरात्मन्निति** । "सुपां सुलुक्" इति सप्तम्या लुकि "न ङिसम्बुद्ध्योः" इति नलोपाभावे च रूपमिति सप्तम्यन्तत्वं बोध्यम् । **एवं सूत्रान्तर इति** । षष्ठे

चन्द्रिका

अत्रापि परमतेऽपि "अनुपपत्तेस्तु न शारीरः" इत्यादिना भेदस्य, "विवक्षितगुण" इत्यनेन गुणानां चोक्तेरैक्यनिर्गुणत्वप्रतिकूलता स्फुटैवेति ॥

केचित्तु—"सर्वं खल्विदं ब्रह्म" इत्यादिवाक्यं ब्रह्मविषयम्, मनोमयवाक्यं तु जीवविषयमिति भिन्नविषयत्वेन यः परकीयपूर्वपक्षः, तस्यैकविषयत्वसम्भवे अयोगादेवं पूर्वपक्षः—

प्रकाशः

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।

इति स्मृतौ आधारत्वपर्यवसन्नषष्ठ्यन्तजीवसम्बन्धिशब्दादन्यस्य 'ईश्वरः' इति प्रथमान्तब्रह्मवाचिशब्दस्य सद्भावेनास्याः स्मृतेरेव "अयमन्तरात्मन्" इति श्रुत्यन्तरस्येव पञ्चमेनैव ग्रहणसम्भवेन तस्य वैयर्थ्यात्, सप्तमे सर्वगते ब्रह्मण्ययुक्तानामल्पौकस्त्वादीनां उपासनार्थं व्यपदेशे जीवेऽप्ययुक्तानां ज्यायस्त्वादीनामुपासनार्थं व्यपदेश इति वैपरीत्यापातात्, अष्टमे पूर्वत्र सर्वगतत्वेऽप्यल्पौकस्त्वाद्यनुपपत्त्या प्रकरणस्य ब्रह्मविषयत्वं निराकुर्वता पूर्वपक्षिणा सर्वगतत्वेऽनिष्टापादनायोगात्, स्वाभाविकाभेदे सुखादिभोगस्यावैशेष्यस्य चावर्जनीयत्वात् इत्याद्यूह्यमित्यर्थः । 'इत्यादिना' सूत्रचतुष्टयेन । न च मिथ्यात्वेनोपपत्तिः, श्रुतेरप्रामाण्यापत्तेः, अस्य स्पष्टं टीकादौ निरासाच्चेति ॥

केचित्तु—सर्वमिति । परैः "सर्वं खल्विदं ब्रह्म" इति वाक्यं ब्रह्मपरमित्युपेत्य "क्रतुं कुर्वीत" इति वाक्यविहितो-

चन्द्रिका

"सर्वं खल्विदं ब्रह्म" इति ब्रह्मशब्दनिर्दिष्टो जीव एव, सर्वशब्दनिर्दिष्टब्रह्मादिस्तम्बपर्यन्तकृत्स्नात्मकताया अनादिसंसारे कर्मवशाज्जीवे सम्भवात्, निखिलहेयप्रत्यनीके च ब्रह्मणि तदयोगात्, जन्मादिकारणतायाश्च कर्मद्वारा जीवेऽपि सम्भवात्, ब्रह्मशब्दस्य च जीवेऽपि प्रयोगादिति। सिद्धान्तस्तु—जीवस्य जीवान्तरात्मकत्वाभावेन सर्वा-

प्रकाशः

पासनानुवादेन शान्तत्वरूपगुणविधिपरत्वान्नोपासनायां कर्मतया ब्रह्मार्पकं, किन्तु मनोमयवाक्यमेव जीवं कर्मतयाऽर्पयतीत्युक्तम्। एते तु, सर्वात्मकं ब्रह्म शान्तः सन्नुपासीतेत्यत्रैवोपासना विधीयते, "क्रतुं कुर्वीत" इति तु मनोमयत्वादिगुणविधानाय प्राग्विहितोपासनानुवादः। ततश्च सर्वात्मकं ब्रह्म मनोमयत्वादिगुणकमुपासीतेति समग्रवाक्यार्थः इत्येकवाक्यतामाहुः। तथा च ब्रह्मपदनिर्दिष्टो यदि जीवस्तर्हि स एव तथोपास्यः। यदि ब्रह्म, तर्हि तदेव तथोपास्यमिति सेत्स्यतीति ब्रह्मपदनिर्दिष्टमेव किं जीव उत परमात्मेति विचार्यते। तत्र पूर्वपक्षाद्यनुवदति—**सर्वं खल्विदं ब्रह्मेतीति**। अत्र ब्रह्मोद्दिश्य 'इदं सर्वं' इत्युच्यमानं सर्वात्मकत्वं चतुर्मुखादितृणपर्यन्तजगदात्मकत्वम्। तच्चानाद्यविद्याकर्मवशेन नानायोनिषु जननसम्भवेन जीव एव भवति, न तु सर्वदोषदूरे परमात्मनीत्यर्थः। कथं तर्हि "तज्जलान्" इत्युक्तसृष्ट्यादिहेतुत्वमित्यत आह—**जन्मादीति**।

चन्द्रिका

त्मकत्वायोगात्, सर्वात्मकता च सर्वप्रकारकतेति स्वीकारेण प्रकारभूतशरीरगतानां दोषाणां प्रकारिणि ब्रह्मण्यप्रसङ्गात्, ब्रह्मशब्दकारणतयोश्च जीवेऽस्वारस्यात्, ब्रह्मैव सर्वात्मकमिति। सूत्राक्षरार्थस्तु—'सर्वत्र' "सर्वं खलु" इति निर्दिष्टे जगति तत्समानाधिकरणेन ब्रह्मशब्देन तदात्मकतयाऽभिधीयमानं परं ब्रह्मैव, खलुशब्देन सर्वात्मकतायाः, "तज्जलान् इति" इति हेतुत्वार्थेनेतिशब्देन च जन्मादिकारणतायाः प्रसिद्धत्वेनोपदेशात्, कारणत्वादेश्च

प्रकाशः

सर्वप्रकारकतेतीति । सर्वविशेषणकत्वं देवतिर्यङ्मनुष्यशरीरकत्वमिति यावत्। 'सर्वत्र' इति पदं प्रतिज्ञापरं मत्वा सूत्रार्थमनुवदति—**सर्वत्रेति**। 'सर्वत्र' इत्यनुवादः, जगतीति व्याख्या। हेत्वंशार्थमाह—**खल्विति**। 'प्रसिद्धोपदेशात्' इत्यस्य प्रसिद्धत्वेनोपदेशादित्यर्थः। कस्येति प्रतियोग्याकाङ्क्षायां "तज्जलान्" इतिवाक्योक्तस्य जन्मादिहेतुत्वस्य 'सर्वमिदं' इत्युक्तसर्वात्मकतायाश्चान्वयः। सार्वात्म्यस्य प्रसिद्धत्वं खलुशब्देन, हेतुत्वस्य प्रसिद्धत्वमितिशब्देनोच्यते, इतिशब्दस्य हेत्वर्थत्वात्, प्रसिद्धस्यैव हेतुत्वात् जन्मादिहेतुत्वं प्रसिद्धमिति गम्यत इति, सार्वात्म्यहेतुत्वयोः खल्वितिशब्दाभ्यां प्रसिद्धत्वेनोपदेशादिति सूत्रार्थः पर्यवस्यतीत्यर्थः। अस्तु जन्मादिकारणत्वस्य प्रसिद्धत्वेनोपदेशः, ततश्च किमित्यत आह—**कारणत्वादेश्चेति**।

चन्द्रिका

"आनन्दाद्ध्येव खल्विमानि भूतानि" इत्यादिश्रुत्यन्तरे ब्रह्मण्येव प्रसिद्धत्वादित्याहुः । तन्न, त्वन्मते अन्तरधिकरणे छान्दोग्योक्तस्यादित्यान्तस्स्थस्य जीवत्वे "यश्चासावादित्ये" इत्यानन्दवल्ल्युक्तस्यापि जीवत्वमिति पूर्वपक्षवत्, "सर्वं खल्विदं" इत्यत्रोक्तस्य कार-

प्रकाशः

आनन्दाद्ध्येव खल्विति । "यतो वा इमानि भूतानि जायन्ते" इति श्रुत्यन्तरे ब्रह्मणि प्रसिद्धस्यैव जगत्कारणत्वस्येहाऽऽम्नानात्, विवक्षितगुणानामुपपत्तेश्च ब्रह्मेत्येवावगम्यत इत्यर्थः। यथोक्तमधिकरणसारावल्यां—

सर्वत्वं कर्मभिस्स्वैर्जनिमति घटते ब्रह्मशब्दोऽत्र चैवे-
त्यल्पस्थानोऽल्पमानस्सुखतदितरभुक् जीव एवेति चेन्न ।
तज्जत्वादेरनूक्तेर्विविधगुणभिदादर्शनात्सर्वतादेः
स्वारस्यादप्यणुत्वं ह्युपधिकृतमिहोपास्तये ज्यायसि स्यात् ॥

इति । अत्र प्राग्वद्ब्रह्मधर्माणामेव भावेन संशयपूर्वपक्षयोरयोगात्, सत्यकामत्वादिभिरनेकैर्निरवकाशैः पूर्वस्यापि सर्वात्मत्वादेः कथञ्चिन्नेयत्वात्, स्वप्रकरणे शब्दविशेषाभावेनोदाहरणानौचित्यादिति ध्येयम् । यदुक्तं "यतो वै" इत्यादिवाक्यान्तरे ब्रह्मणि प्रसिद्धस्यैवेहाऽऽम्नानादिति, तत्र पूर्वपक्षे सर्वकारणवाक्ये ब्रह्मकारणत्वाक्षेपसम्भवेन न क्वापि ब्रह्मकारणत्वप्रसिद्धिः । तथा च न सिद्धान्तोदय इति सदृष्टान्तमाह—**तन्नेत्यादिना ।** "य एषोऽन्तरादित्ये हिरण्मयः पुरुषः" इत्युक्तस्येत्यर्थः ।

चन्द्रिका

णस्य जीवत्वे "यतो वै" इत्यादावुक्तस्यापि तस्य जीवत्वमिति पूर्वपक्षस्य सम्भवेन कारणताया वाक्यान्तरे ब्रह्मणि प्रसिद्ध्यभावात् । किञ्च—"आनन्दाद्ध्येव खलु" इत्यत्र हिशब्दखलुशब्दयोः "यतो वा इमानि" "आत्मावा वा इदम्" इत्यादौ वैशब्दादेः श्रवणेन तत्रापि श्रुत्यन्तरप्रसिद्ध्यपेक्षा स्यात् । अपि च "अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते" "प्राणाद्ध्येव खल्विमानि भूतानि" इत्यत्रेव खलुशब्दादेः श्रवणेऽप्यब्रह्मपरता किं न स्यात् । अक्षरार्थोऽप्ययुक्तः, सर्वात्मकत्वस्य हि साध्यत्वे तत्प्रतिपादनाय श्रुत्यनुगमाय च सूत्रे 'सर्वं' इति निर्देशः स्यात् ।

प्रकाशः

'तस्य' कारणस्य । तथा च सौत्रहेतोरसिद्धिरिति भावः । ननु "यतो वै" इत्युपक्रम्य "आनन्दाद्ध्येव खल्विमानि" इति श्रवणात्, आनन्दस्य ब्रह्मवल्ल्यामनेकन्यायैर्ब्रह्मत्वेन निर्णीतानन्दमयस्थानपतितत्वेन ब्रह्मत्वात् जीवत्वं न वक्तुं शक्यमिति चेत्, तर्ह्यत्रापि पूर्वपक्षानुदयस्योक्तत्वात् । यद्यत्र प्रसिद्धिद्योतकखलुशब्दात्तत्प्रसिद्ध्यर्थं श्रुत्यन्तरानुसरणं, तर्हि तत्रापि तथा श्रवणान्न क्वापि व्यवस्था स्यादिति । दोषान्तरमाह—किञ्चेति । 'प्रसिद्धोपदेशात्' इति हेतोर्व्यभिचारं चाह—अपि चेति । अन्नादेर्ब्रह्मत्वस्य त्वयाऽनङ्गीकारादिति भावः । सूत्रार्थं निराह—अक्षरार्थोऽपीति । ब्रह्मशब्दाभिधेयस्य परब्रह्मत्वं सर्वात्मत्वं च द्वयमपि यदि

चन्द्रिका

नहि 'सर्वत्र' इत्यनेन सर्वात्मकता लभ्यते, किन्तु सर्वगतता। सौत्रप्रसिद्धशब्दस्य भावप्रधानता च कल्प्या।

प्रकाशः

साध्यत्वेनाभिमतं, तर्हि सर्वं ब्रह्मेति वाच्यं, न तु सर्वत्र ब्रह्मेति, तथोक्तौ पराभिमतासिद्धिं व्यनक्ति—न हीति। एतेनास्मदर्थे सूत्रानुगुण्यं सूचितम्। उपलक्षणमेतत्। 'सर्वत्र' इत्यनेन सर्वस्मिन् जगतीत्युक्तावपि ब्रह्मशब्देनोच्यमानं ब्रह्मैवेत्यंशस्य बोधकपदाभावेनाध्याहार्यत्वात्। यदत्रोक्तं श्रुतप्रकाशे—'नाशब्दं' इति वा, 'नेतरः' इति वा, 'अन्यः' इति वा पूर्वपादादनुवर्तते वा, "न शारीरः" इति वक्ष्यमाणमपकृष्यते वा। तस्य पर्यवसानाद्ब्रह्मैवेति लभ्यते, नाध्याहार इति, तन्न, ब्रह्मशब्देनाभिधीयमानमित्यस्यैतावताऽध्याहारापरिहारात्। अस्मद्रीत्याऽऽध्यायपरिसमाप्ति प्रत्यधिकरणमनुवर्तमानेन 'तत्तु' इति पदेनैव साक्षात्साध्यबोधसम्भवे, अत्यन्तव्यवहितस्यानुवर्तनेनापकर्षणेन वा पर्यवसानद्वारा साध्यबोधोक्तेरयुक्तत्वात्। अत एव द्वितीये "व्यवायान्नानुषज्यते" इत्यत्र "सं यज्ञपतिराशिषा" इति वाक्ये क्रियाध्यहार इत्युक्तमित्यपि ध्येयम्। इतराणि सूत्राणि प्रागुक्तदिशा निरसनीयानीति भावः। तथा हि—यदुक्तं—'विवक्षितगुणोपपत्तेः' 'विवक्षितानां' वक्ष्यमाणानां उपसंहारस्थानामिति यावत्, मनोमयत्वादीनां "अवाक्यनादरः" इत्यन्तानां गुणानां परमात्मन्येवोपपत्तेः परमात्मैवात्रोच्यते,

चन्द्रिका

यच्चोक्तं "अर्भकौकस्त्वात्" इति सूत्रे "एष म आत्मान्तर्हृदयेऽणीयान् व्रीहेर्वा यवाद्वा सर्षपाद्वा" इत्युक्तमणीयस्त्वमौपाधिकं, तदुपाधेर्हृदयस्योक्तत्वात्, "ज्यायान् पृथिव्याः" इत्यादिनोक्तमहत्त्वं तु स्वाभाविकं तदुपाधेरनुक्तत्वादिति । तन्न, "हृद्यपेक्षया" इत्यत्र हृदयस्याङ्गुष्ठमात्रप्रमाणतायास्त्वयाऽप्युक्तत्वात्, तस्य सर्षपादणीयस्त्वेऽनुपाधि-

प्रकाशः

विवक्षितगुणानामुपपत्तेः न शारीरोऽत्रोच्यते, "इतः प्रेत्याभिसम्भवितास्मि" इति प्राप्यप्राप्तृतया ब्रह्मजीवयोः कर्मकर्तृभावेन व्यपदेशाच्च, "एषम आत्मान्तर्हृदये" इति षष्ठ्यन्तप्रथमान्तरूपात्, वाजिसनेयकानां श्रुतौ च "एवमयमन्तरात्मन्पुरुषो हिरण्मयः" इति सप्तम्यन्तप्रथमान्तरूपाज्जीवब्रह्मणोश्शब्दविशेषाच्च, "सर्वस्य चाहं हृदि सन्निविष्टः" इत्यादिस्मृतेश्च न शारीर इति, तन्न, ब्रह्मणि विवक्षितगुणानामुपपत्त्युक्त्याऽर्थाज्जीवे तदनुपपत्तेरुक्तत्वात् तेन तृतीयस्य पौनरुक्त्यम् । चतुर्थषष्ठगृहीतयोः "एतमितः प्रेत्य" इति "सर्वस्य चाहं" इति श्रुतिस्मृत्योरपि "एष म आत्माऽन्तर्हृदये" इति विरुद्धविभक्तिकशब्दग्राहकेण पञ्चमेनैव ग्रहणसम्भवात्तेन तयोः पौनरुक्त्यम् । 'शब्दविशेषाच्च' इति चशब्दाध्याहारश्चेत्यादि ध्येयम् । सप्तमे दूष्यभागमनूद्य निराह—यच्चेति । सूत्रार्थस्तु—पूर्वमत इव ध्येयः । त्वयेति । "हृद्यपेक्षयातु मनुष्याधिकारत्वात्" इत्यत्र "उपासकहृदयस्याङ्गुष्ठप्रमाणत्वात्" इति त्वद्भाष्योक्तेरिति भावः ।

चन्द्रिका

त्वात् । किञ्च "प्रशस्यस्य श्रः" "ज्य च" "वृद्धस्य च" इत्यत्र "वृद्धस्य" इति सूत्रेण वृद्धशब्दस्येव "ज्य च" इत्यनेन सूत्रेण प्रशस्यशब्दस्यापि ज्यादेशविधानात्, इह श्रुतावणीयस्त्वं स्वाभाविकं, ज्यायस्त्वं तु अतिशयेन प्रशस्यत्वमिति किं न स्यात् । एतदप्यभिप्रेत्योक्तं भाष्ये—"न चाप्रमाणिकं कल्प्यम्" इति, न तु टीकोक्तरीत्या भेदसत्यत्वमात्रमभिप्रेत्य ।

प्रकाशः

'तस्य' हृदयस्य आत्मनि सर्षपादणीयस्त्वसम्पादनेऽनुपाधित्वात्, तत्परिमितस्यैव तत्रोपाधित्वेन वाच्यत्वादित्यर्थः। अत एव श्रुतप्रकाशे–'अत्र हृदयमल्पत्वोपाधिभूतं श्रुतं, न तु ज्यायस्त्वोपाधिः श्रुतः, पृथिव्यादयः तदुपाधय इति न शङ्कनीयं, ततोऽपि ज्यायस्त्वश्रवणात्। न हि ततोऽधिकपरिमाणत्वं तदुपाधिकं भवितुमर्हति' इत्यधिकपरिमाणस्य न्यूनपरिमाणोपाधित्वं निराकृतम् । तद्वदेवेहापि न्यूनपरिमाणस्य ततोऽधिकपरिमाणहृदयोपाधिकत्वमयुक्तमिति । नन्वणीयस्त्वज्यायस्त्वयोर्विरोधादेकस्यावश्यपरित्यागे कथञ्चिदौपाधिकत्वेन समाधेयमित्यतोऽविरोधप्रकारमाह—**किञ्चेति** । अत्र ज्यायस्त्वं नाम नातिशयितमहत्त्वं, किन्तु प्रशस्ततमत्वमुच्यते, ज्यायश्शब्दस्यार्थद्वयेऽपि व्युत्पन्नत्वात्, प्रशस्यशब्दस्यातिशायने ईयसुन्प्रत्यये कृते "प्रशस्यस्य श्रः" इति सूत्रात्प्रशस्यस्येत्यनुवर्त्य "ज्यच" इति सूत्रेण ज्यादेशो विहितः । तदनन्तरं "वृद्धस्य च" इति सूत्रे वृद्ध-

प्रकाशः

शब्दस्यापीयसुन्प्रत्यये परतः "ज्य च" इति सूत्राज्ज्यशब्दमनुवर्त्य ज्यादेशो विहितः। तथा च 'ज्यायान्' इत्यस्यातिशयेन वृद्धत्वमतिशयेन प्रशस्तत्वं चेति द्वयमप्यर्थो भवति। तथा च प्रकृते ऽतिशयेन वृद्धिमत्त्वरूपमर्थं हित्वा प्रशस्ततमत्वरूपार्थमादायाणीयस्त्वं स्वाभाविकमित्यङ्गीक्रियतामित्यर्थः। इदमङ्गीकृत्योक्तम्। वस्तुतस्तु—पूर्वोक्तरीत्याऽणुत्वमहत्त्वयोस्स्वाभाविकत्वेऽपि न विरोधलेश इति ध्येयम्। एतेन, यत्केनचिदुक्तं—आद्यसूत्रद्वयमेकमधिकरणम्। तत्र "मनोमयः प्राणशरीरः" इति वाक्ये मनोमयत्वादियुतो जीवः शिवो वेति विशये, "यथा क्रतुमयः पुरुषः यथाक्रतुरस्मिन् लोके पुरुषो भवति तथेतः प्रेत्य भवति" इति कर्मवशादिहामुत्र भ्रमतो जीवस्य प्रस्तुतत्वात्, 'सति' यथार्थेऽसङ्कल्प इत्यादिविभागेन सत्यसंङ्कल्पत्वादेरुपपत्तेर्जीवइति प्राप्ते, "सर्वं खल्विदं ब्रह्म तज्जलानिति" इति सर्वकारणस्योपास्यत्वेनोपदेशात् विवक्षितसत्यकामत्वादिगुणानामुपपत्तेश्च शिव एव तथाविध इति सिद्धान्त इति, तन्निरस्तं, संशयाद्ययोगेनोदाहरणानौचित्यस्योक्तत्वात्। सूत्राक्षरासामञ्जस्यस्य स्फुटत्वात्।

तच्च ब्रह्म जलान् साक्षाद्योऽसौ विष्णुर्जलेऽनिति।
महाज्ञानात्मकत्वात्तु प्रोक्तो विष्णुर्मनोमयः।
यस्माद्बलशरीरोऽसावतः प्राणशरीरकः।

इत्यादिस्मृतिविरुद्धत्वाच्च। "अनुपपत्तेः" इत्यादेरधिकरणान्तरत्वेऽत्रोक्तार्भकौकस्त्वसम्भोगप्राप्त्यादिशङ्कासमाधानाभावेन सिद्धान्ता-

प्रकाशः

नुत्थितेश्च । अणीयस्त्वस्यासमाधानाच्चेति ध्येयम् । यदपि "अनुपपत्तेस्तु" इत्यादिषट्सूत्रीमधिकरणान्तरं मत्वा,

पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतम् ।
नारायणं महाज्ञेयं...................... ॥

इत्याद्युदाहृत्य, नारायणशब्दवाच्यश्चतुर्मूर्त्यात्मा विष्णुश्शिवो वेति संशये, "समुद्रेऽन्तं विश्वशम्भुवं" इति समुद्रान्तस्स्थत्वादिविष्णुलिङ्गानामच्युतादिश्रुतीनां सत्त्वेन विष्णुरिति प्राप्ते, "पशूनां पतये वृक्षाणां पतये जगतां पतये" "विश्वाधिको रुद्रो महर्षिः" इत्यादौ शिवे प्रसिद्धस्य विश्वपतित्वादेर्विष्णावनुपपत्तेः शिव एवेति सिद्धान्त इति, तदपि न, विष्णौ निरूढश्रुतिलिङ्गानां बाहुल्येन संशयादेरयोगात् । विश्वपतित्वादेः पालकत्वेन प्रसिद्धे विष्णौ "न ते विष्णो जायमानः"

य उ त्रिधातु पृथिवीमुत द्यामेको दाधार भुवनानि विश्वा ।
सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठन्ति प्रदिशा विधर्मणि ॥

इत्यादिश्रुतिभिः "श्रियः पतिर्यज्ञपतिः प्रजापतिः गिरां पतिर्लोकपतिः" इत्यादिस्मृत्या विष्णोरेव प्रसिद्धेः । "विश्वाधिकः" इत्यादिनिरवकाशचतुर्मुखजनकत्वलिङ्गेन रुद्रशब्दस्य विष्णावेवोपपत्तेः। अस्य स्वपक्षसाधकत्वे "अन्तस्तद्धर्मोपदेशात्" इत्यादाविव समन्वीयमानं लिङ्गं नाम वा निर्दिश्य तद्धर्मोपदेशादित्यन्वयमुखेन वचनं विना, व्यतिरेकमुखेन सूत्रविन्यासायोगादिति दिक् ॥

ननु 'न च तल्लिङ्गमन्तर्यामिविषयम्' इति चक्षुर्मयत्वादेरन्यथासिद्धौ

चन्द्रिका

टीकाक्षरार्थस्तु—पूर्वं चक्षुर्मयत्वादिकमन्तर्यामिणि अङ्गीकृत्याल्पौकस्त्वं न युक्तमित्युक्तम् । इदानीं जीवधर्मत्वात्तस्य तदपि न युक्तमित्याह—**चक्षुर्मयत्वाद्ययोगाच्चेति** । **सर्वगतत्वानातिरिक्तत्वेनेति** । "अत सातत्यगमने" इति धातोः, "सन्ततो ह्यत उच्यते" इति वचनाच्च अतत्वं सर्वगतत्वानतिरिक्तमित्यर्थः । **व्रीह्यादिगतजीवान्तरवदिति** । स्वर्गाच्चुयतः स्थूलशरीरसम्बन्धार्थं पित्रादिशरीरप्रवेशायान्यकर्मनिर्मितव्रीह्यादिशरीरगतो जीवो जीवान्तरशब्दार्थः । **सर्वगततया सर्वजीवाग्रहणापातादिति** । सर्वजीवानां

प्रकाशः

शङ्कितायां तत्समाधानमकृत्वाऽल्पौकस्त्वायोगमभिधाय व्यवधानेन तदुक्तिरयुक्तेत्यत आह—**पूर्वमिति** । तात्पर्यं तु प्रागेव विवृतमिति भावः । विवक्षितसूत्रे टीकायां "अतत्वस्यादिमत्वेऽपि तस्य सर्वगतत्वानतिरिक्तत्वेन साध्यत्वादश्रुतत्वादीनामेव ग्रहणम्" इत्युक्तम् । तत्रातत्वस्य सर्वगतत्वरूपत्वं व्यनक्ति—**अतेति** । सातत्यगमनार्थादतधातोराचि कृते 'अतः' इति भवति ।

देशतः कालतश्चैव गुणतश्चापि पूर्तितः ।
अत इत्युच्यते विष्णुः सन्ततो ह्यत उच्यते ॥

इत्यैतरेयभाष्योक्तवचनाच्चेत्यर्थः । ननु व्रीह्यभिमानिजीवे कुट्टनभर्जनादिना दुःखाभावात्कथं तद्दृष्टान्त इत्यत आह—**स्वर्गादिति** । कर्मकर्तृसूत्रे "न चैकस्सर्वगतो जीवस्सर्वगतं जीवान्तरं शंसतीति योऽयं, सर्वगततया सर्वजीवाग्रहणापातात्" इति वाक्यं दुर्गमत्वाद्द्वेधा व्याचष्टे—**सर्वेति** । 'सर्वगतवाक्ये' "सर्वेषु भूतेष्वेतं" इति वाक्ये । "तथा

चन्द्रिका

कर्मत्वाभावे सर्वगतवाक्ये सर्वगततया ये सर्वजीवाः प्रकृतास्तेषां "स य एवमेतमात्मानं" इति कर्मीभूतात्मविशेषणेनैतच्छब्देन ग्रहणं न स्यात्। ग्रहणे च सर्वजीवानां कर्मत्वापत्तेः। तथा चैतच्छब्दस्य प्रकृतसर्वपरत्वसम्भवे तदेकदेशपरत्वमयुक्तमित्यर्थः। यद्वा—'एतं' इत्यनेन सर्वजीवानामनिर्देशे एतच्छब्दस्वारस्यार्थं सर्वगतवाक्येऽपि सर्वगततया सर्वेषां ग्रहणं न स्यात्। तथा च सर्वे जीवाः सर्वगता इति पूर्वपक्षिणा यद्गृहीतं तद्धीयेतेत्यर्थः। **तथा प्रतीत्यभावेनेति**। कर्मीभूतात्मविशेषणेन चक्षुर्मयत्वादिना जीवसामान्यलिङ्गेन जीवमात्रस्यैव प्रतीतेरित्यर्थः। न केवलं कर्मत्वं जीवविशेषस्येत्ययुक्तम्, किन्तु कर्तृत्वमपि, "योऽवगुरेत् तं शतेन यातयेत्" इत्यत्रैव "यः शंसाति अस्य वेदा दुग्धदोहा भवन्ति" इति सामान्येनैव प्रत्यवायश्रवणात्। अन्यथा केषांचित्प्रत्यवायो न स्यादित्यपि द्रष्टव्यम्। **असदपरोक्षतया प्रतीयते वाच्यत्वात् इति**। धर्माधर्मादेरापि ईश्वराद्यपरोक्षत्वान्न तत्र व्यभिचार भावः॥

प्रकाशः

प्रतीत्यभावेन क्लिष्टकल्पनत्वाच्च" इति तदुत्तरवाक्यं व्यनक्ति—**कर्मीभूतेति**। कर्मीभूतजीवसङ्कोचे क्लिष्टकल्पनत्वमुपपाद्य, यदुक्तं कश्चित्सर्वगतो जीव इति "स य एव" इत्यत्र तच्छब्देन सर्वगतः कश्चिद्गृह्यत इति, तत्रापि क्लिष्टकल्पनत्वं ध्येयमित्याह—**न केवलमिति**। 'अवगुरेत्' निन्देदित्यर्थः। शिष्टमुपन्यासमुखेन स्पष्टमिति भावः॥

इति सर्वगतत्वाधिकरणम्.

— अथ अत्तृत्वाधिकरणम् —

"जन्माद्यस्य यतः" इत्युक्तम्। तत्रात्तृत्वं "स यद्यदेवासृजत तत्तदत्तुमध्रियत सर्वं वा अत्तीति तददितेरदितित्वं" इत्यदितेः प्रतीयते।

तत्त्वप्रकाशिका

अत्र लोकतोऽन्यत्रप्रसिद्धादितिशब्देन सहोक्तात्तृत्वलिङ्गस्य हरौ समन्वयप्रतिपादनादस्ति शास्त्रादिसगतिः। श्रुत्यादिसङ्गतिं विषयवाक्यमुदाहृत्य विषयसंशयौ सयुक्तिकं पूर्वपक्षं च सूचयति— जन्मेति। "जन्माद्यस्य यतः" इति सूत्रे जन्मादिकारणत्वं विष्णोरुक्तम्। तन्मध्यपतितं संहर्तृत्वापरपर्यायवाच्यमत्तृत्वं बृहदारण्यके कस्य चिच्छ्रूयते। 'सः' अदितिर्यद्यदसृजत, तत्तदत्तुं मनोऽध्रियतादच्च। कुत, सर्वात्त्री सा, सर्वमत्तीति यत्तदेव ह्यदितेः 'अदितित्वं' अदिति शब्दप्रवृत्ति निमित्तम्। अन्यथा तन्न स्यादिति। तच्च यदा हरेरितरस्य स्यात्तदा प्रागुक्तलक्षणस्यातिव्याप्तिप्रसङ्गादवश्यं निर्णेयमेव। तदत्तृत्वं विषयः। किं विष्णो रन्यस्य वेति सन्देहः। लक्षणसूत्रमदितिश्रुतिश्च सन्देहबीजम्। अदितेरेव तदत्तृत्वमिति पूर्वः पक्षः, "तददितेः" इत्यदितिश्रुतेः। न च श्रुतिर्विष्णुविषया किं न स्यादुक्तन्यायादिति वाच्यम्, अदितित्वलिङ्गात्। नह्यदितिभिन्नस्यादितित्वं सम्भवति। अतो न प्रागुक्तं ब्रह्मलक्षणं युक्तमिति भावः। नन्वेतदत्तृत्वं अदितेश्चेत्कथं 'सः' इति पुल्लिङ्ग

"स यद्यदेवासृजत" इति पुल्लिङ्गं च "कूटस्थोऽक्षर उच्यते" इत्यादिवत् । अत्रोच्यते—

ओम् अत्ता चराचरग्रहणात् ओम् ॥ ९ ॥

न हि चराचरस्य सर्वस्यात्तृत्वं अदितेः ।

तत्त्वप्रकाशिका

युक्तं स्यादतस्तेन श्रुत्यादिबाध इत्यत आह—स इति । यथा रमायां पुंशक्तिमत्त्वात्पुल्लिङ्गप्रयोगः "कूटस्थोऽक्षर उच्यते" "सोऽहं वायुं दिशां वत्सं वेद" इत्यादौ, तथाऽत्रापि सम्भवतीति भावः । यदाहुः—

पुल्लिङ्गेनोच्यते स्त्री च पुंवच्छक्तिमती क्वचित् ।

इति। ननु 'सः' इति प्रकृतसंवत्सरपरामर्शान्नैतच्चोद्यावकाशः, मैवम्, "स तया वाचा तेनात्मनेदं सर्वमसृजत" इत्युक्तस्यैव "सयद्यदेव" इत्यनुवादात्, तत्र च विरिञ्चस्य तृतीयया प्रकृतत्वाद-दित्याख्यमृत्योरेव प्रथमया प्रकृतत्वात् । तथा च 'सः' अदितिस्संवत्सरेण यद्यदसृजतेति योजनायामस्ति चोद्यावकाशः । सिद्धान्तयत्सूत्रमवतारयति—अत्रेति । विष्णुरेवात्ताऽत्रोच्यते, "सर्वं वा अत्ति" इति चराचरस्याद्यतया ग्रहणादिति सूत्रार्थः । चराचरग्रहणेऽपि कुतो नादितेरत्तृत्वमित्यत आह—न हीति । 'चराचरस्य' इति सूत्राक्षराण्यनूद्य श्रुत्यनुसारेण 'सर्वस्य' इति व्याख्यानम् । सूत्रस्य श्रुतिविसंवादप्रतीतिनिरासोऽस्य प्रयोजनम् । चराच-

स्रष्टा पाता तथैवात्ता निखिलस्यैक एव तु ।
वासुदेवः परः पुंसामितरेऽल्पस्य वा न वा ॥

इति स्कान्दे ।

एकः पुरस्ताद्य इदं बभूव यतो बभूव भुवनस्य गोपाः ।
यमप्येति भुवनं साम्पराये स नो हरिर्घृतमिहायुषेऽत्तु देवः॥

इति श्रुतिः ॥ ९ ॥

ओम् प्रकरणाच्च ओम् ॥ १० ॥

अप्संवत्सरसृष्ट्यादिना तत्प्रकरणाच्च ।

तत्त्वप्रकाशिका

रात्तृत्वं विष्णोरपि कुत इत्यत आह—स्रष्टेति । अस्वान्त्र्येणाल्पस्य भवन्ति । स्वातन्त्र्यापेक्षया न वा । य एकोऽस्य पुरस्ताद्बभूव, सृष्टाविदं जगद्यतो बभूव, अथ यश्च भुवनस्य गोप्ता, यं च मुक्तिप्रलययोर्भुवनं प्रविशति, स हरिर्न आयुरर्थे घृतमाहुतिरूपमत्त्वित्यर्थः । न च वाच्यम् श्रुतिलिङ्गाभ्यां पूर्वपक्षे कथं लिङ्गमात्रेण निर्णय इति, लिङ्गस्योक्तरीत्या निरवकाशत्वात् । अदितिश्रुतेर्विष्णावपि सावकाशत्वात् । लिङ्गस्य चादितिशब्दवाच्यत्वमदितित्वमिति सावकाशत्वात् । सावकाशश्रुतिलिङ्गाभ्यां निरवकाशलिङ्गमात्रस्य प्राबल्यात् ॥ ९ ॥

एवं निरवकाशलिङ्गबलात्सावकाशश्रुतिलिङ्गयोर्बाधोपपत्तेर्विष्णुरेवात्तेति सिध्यति, किं पुनर्निरवकाशप्रकरणेन चेत्यर्थं प्रतिपादयत्सूत्रं पठित्वा व्याचष्टे—प्रकरणाच्चेति । "नैवेह किं चनाग्र

नेहासीत्किञ्चनाप्यादौ मृत्युरासीद्धरिस्तदा ।
सोत्मनोमनसाऽस्राक्षीदप एव जनार्दनः ॥
शयानस्तासु भगवान्निर्ममेऽण्डं महत्तरम् ।
तत्र संवत्सरं नाम ब्रह्माणमसृजत्प्रभुः ॥
तमत्तुं व्याददादास्यं तदासौ विरुरावह ।
अथ तत्कृपया विष्णुः सृष्टिकर्मण्ययोजयत् ॥
सोऽसृजद्भुवनं विश्वमद्यार्थं हरये विभुः ।

इति ब्रह्मवैवर्ते ॥ १० ॥

तत्त्वप्रकाशिका

आसीन्मृत्युनैवेदमावृतमासीदशनायया ऽशनाया हि मृत्युस्तन्मनोकुरुतात्मन्वीस्यामिति । सोऽर्चन्नचरत्तस्यार्चत आपोऽजायन्त तद्यदपां शर आसीत्तत्समहन्यत, सा पृथिव्यभवत्तस्यामश्राम्यत्सोऽकामयत, द्वितीयो म आत्मा जायेतेति, स मनसा वाचा मिथुनं समभवदशनाया मृत्युस्तद्यद्रेत आसीत्स संवत्सरोऽभवत्तं जातमभिव्याददात्स भाणमकरोत्सैव वागभवत्स ऐक्षत, यदि ह वा इममभिमंस्ये कनीयोऽन्नं करिष्य इति। स तया वाचा तेनात्मनेदं सर्वमसृजत" इत्यस्मिन् प्रकरणे मृत्युमात्रावशेषाप्संवत्सरसृष्टिसंवत्सरादनोद्यमादिश्रवणादेतत्प्रकरणस्य वैष्णवत्वं ज्ञायते । अतो निरवकाशप्रकरणबलाच्च विष्णुरेवात्तेत्याशयः । नन्वप्संवत्सरसृष्टयादिनाऽत्रोच्यमानेनापि कथमस्य विष्णुप्रकरणत्वनिश्चय इत्यतोऽप्संवत्सरसृष्टयादेर्विष्णुलिङ्गत्वादिति भावेन तत्र स्मृतिमाह—नेहासीदिति। तस्माद्विष्णोरेवेदमत्तृत्वमिति युक्तमेव लक्षणमिति स्थितम् ॥१०॥

चन्द्रिका

॥ ओम् अत्ता चराचरग्रहणात् ओम् ॥

अत्र पूर्ववैषम्यप्रदर्शनेन पूर्वपक्षोत्थानादनन्तरसङ्गतिः । अत्र "सर्वं वा अत्तीति तददितेरदितित्वम्" इत्युक्तमत्तृत्वं किमदितेर्विष्णोर्वेति चिन्ता । तदर्थं सर्वशब्दसङ्कोचकमस्ति न वेति । तदर्थं

प्रकाश

श्रीः । ओम् अत्ता चराचरग्रहणात् ओम् । अत्र भाष्यदिशा जन्मादिसूत्रानन्तर्यभानेऽपि तत् फलपरमिति भावेन पूर्वेण प्रत्युदाहरणसङ्गतिमाह—अत्रेति । वैषम्यं चाग्रे स्पष्टम् । एतेन टीकोक्तरीत्याऽदितिश्रुतेस्सावकाशत्वात् लिङ्गस्य निरवकाशत्वात् स्वत एव लिङ्गमन्यत्रप्रसिद्धं, न तु श्रुतितः, प्रत्युत लिङ्गाच्छ्रुतिरेव पूर्वत्रेवान्यत्रप्रसिद्धेति कथं लिङ्गस्य तत्साहित्येन तथात्वोक्तिरिति निरस्तम् । पूर्ववैषम्यस्य श्रुतेर्निरवकाशत्वस्य च वक्ष्यमाणत्वात् । लोकतः श्रुतेरेवान्यत्र रूढत्वाच्च । अत एव टीकायां 'लोकतः' इत्युक्तम् । न चैवं नामैव समन्वीयतामिति वाच्यं, पादसङ्गत्यर्थं सर्वात्तृत्वरूपापूर्वगुणलाभार्थं च लिङ्गस्यैव समन्वयोक्तेरिति । संशयटीकां व्यनक्ति—अत्रेति । "स यद्यदेवासृजत तत्तदत्तुमध्रियत सर्वं वा अत्तीति तददितेरदितित्वम्" इति बृहदारण्यके तृतीयेऽध्याये 'सः' अदितिः यद्यदेवासृजत तत्तदत्तुं मनोऽध्रियत आदच्च । कुतः, सर्वात्त्री सा । सर्वं ह्य अत्तीति यत्, तदेव ह्यदितेरदितित्वमिति टीकोक्तदिशा

चन्द्रिका

"सर्वं वै" इति वाक्यं किं प्रसिद्धेऽर्थे शब्दान्वाख्यायकं किं वा प्रसिद्धार्थं बाधित्वा योगोक्त्या "तत्तदत्तुमध्रियत" इति प्रतिज्ञाते सर्वात्तृत्वे हेतुपरमिति ॥

प्रकाशः

श्रुतं सर्वसंहर्तृत्वरूपमत्तृत्वमित्यर्थः। प्रसिद्धेऽर्थ इति। अदितिरूपदेवतायां अदितिशब्दप्रवृत्तिनिमित्तव्युत्पादकमित्यर्थः। हेतुपरमिति। यस्मात्सर्वात्तृत्वादेव अदितित्वमतः सर्वमत्तुं मनोऽकुरुतेति हेतुपरमित्यर्थः। यद्यन्वाख्यायकं तदा तत्र सम्भावितकतिपयात्तृत्वस्यैव ग्राह्यत्वेन सर्वशब्दसङ्कोचाददितिरेवेति पूर्वपक्षे फलम्, यदि हेतुपरं तदा सङ्कोचकाभावाद्विष्णुरेवेति सिद्धान्ते फलमिति स्पष्टत्वान्नोक्तम्। अत्र सन्दिग्धश्रुतिलिङ्गाभ्यां निश्चितलिङ्गप्रकरणयोरेव बलवत्त्वं, "सन्दिग्धश्रुतिर्लिङ्गं चादितिशब्दोऽदितित्वं च" इति न्यायविवरणे श्रुतेरेव सन्दिग्धत्वविशेषणात्, लिङ्गस्य तदविशेषणात्, भाष्यटीकायां न्यायविवरणटीकायां च श्रुतेरन्तर्नयन्यायेन सावकाशत्वमुपेत्य लिङ्गस्य निरवकाशत्वेन पूर्वपक्षः कृतः। तस्मिन्पक्षे लिङ्गस्य निरवकाशत्वं "नन्वत्र" इत्यादिना वक्ष्यमाणादिशोपपादनसापेक्षम्। श्रुतेरपि निरवकाशत्वे तु नोपपादनक्लेश इति भावेन न्यायविवरणस्थचशब्देन द्वयोरपि प्रत्येकं पूर्वपक्षप्रापकत्वभानात्तदनुरोधेन द्वयोरपि प्रत्येकं निरवकाशत्वं न्यायविवरणाभिमतम्। सन्दिग्धपदेन श्रुतेः सावकाशत्वोक्तिस्तु अन्तर्नये

चन्द्रिका

पूर्वपक्षस्तु—युक्तमादित्यश्रुतिसहचरितमपि सर्वगतत्वं विष्णौ, "अन्तः" इत्यत्र तत्पर्यायसवितृशब्दसमन्वयस्य सिद्धेः। अदितिशब्दपर्यायस्यापि न तत्र सिद्धिः। तथा च अदितिरेवात्त्री, "तददितेरदितित्वं" इत्यदितिश्रुतेरादितित्वलिङ्गाच्च।

प्रकाशः

सजातीयेन्द्रादिदेवतावाचिशब्दस्य समन्वितत्वात् सिद्धान्तिना सावकाशयितव्यत्वाभिप्रायत्वादिति। श्रुतेर्निरवकाशत्वं च द्वेधा, पूर्वमदितिशब्दपर्यायस्यापि विष्णावसमन्वयाद्वा श्रुतिबाधकनिरवकाशविष्णुलिङ्गाभावेनान्तर्नयन्यायाविषयत्वाद्वेत्यभिप्रेत्य, तत्राद्यं पूर्ववैषम्यप्रदर्शनपूर्वं व्यनक्ति—**युक्तमित्यादिना**। द्वितीयं "अथ वा" इत्यादिनाऽग्रे विवरिष्यत इति ध्येयम्। अत्रैवं योजना—अदितिरेवात्तृत्वेनोच्यते, "तददितेरदितित्वं" इत्यदितिश्रुतेः। न चाऽऽदित्यश्रुतौ सत्यामपि सर्वगतत्वं विष्णोरिवात्तृत्वमपि किं न स्यादिति वाच्यं, युक्तमादित्यश्रुतीत्यादि। **सवितृशब्देति**। "सवितारं बृहस्पतिं" इति तत्र श्रवणादिति भावः। एवं श्रुत्यैव पूर्वपक्षे तद्दार्ढ्याय लिङ्गं चाह—**अदितित्वेति**। श्रुतेर्निरवकाशत्वोक्त्यैवादितित्वलिङ्गस्य विष्णौ निरवकाशत्वं सिद्धमेव, तच्छब्दप्रवृत्तिनिमित्तरूपत्वात्तस्य। अतो न तत्रोपपादनापेक्षेति भावेन वा, "अथवा"इत्यत्राग्रे स्पष्टमित्यभिप्रेत्यवाऽदितित्वलिङ्गाच्चेत्येवोक्तम्। टीकायामेवमदृष्टेः किमस्य मूलमित्यतो न्यायविवरणटीकोक्तवर्णकाद्वर्णकान्तरमेतदिति भावे-

चन्द्रिका

तदुक्तं न्यायविवरणे—"श्रुतिर्लिङ्गं च अदितिशब्दोऽदितित्वं च" इति। नन्वत्र टीकायामुक्तन्यायेन श्रुतेस्सावकाशत्वे शङ्किते तामनुक्त्वा, लिङ्गमुक्त्वा, "नह्यदितिभिन्नस्यादितित्वं" इति लिङ्गस्य निरवकाशत्वं चोक्तम्, तत्कथम्, अदितिश्रुतेर्ब्रह्मणि मुख्यत्वे अमुख्यत्वे वा अदितित्वलिङ्गस्यापि तत्र मुख्यस्यामुख्यस्य वा सम्भवादिति चेत्, उच्यते, तीरादौ गङ्गादिपदप्रयोगेऽपि 'तीरे गङ्गात्वं' इत्यप्रयो-

प्रकाशः

नाह—तदुक्तमिति। "सन्दिग्धश्रुतिर्लिङ्गं च" इत्यादिरूपेण तत्र पाठेऽपि 'श्रुतिर्लिङ्गं च' इत्यनुवादस्तु सन्दिग्धपदं, टीकायां "श्रुतेः सावकाशत्वोक्तिस्तु" इत्यादिना वक्ष्यमाणाभिप्रायमिति सूचयितुम्। "श्रुतिर्लिङ्गं च" इत्युक्तस्य यथाक्रमं विवरणं "अदितिशब्दोऽदितित्वं च" इति। नन्वस्त्वेवमुक्तदिशा श्रुतिर्निरवकाशेति, लिङ्गमपि तादृशं, श्रुतिस्सावकाशेति पक्षे कथमित्याक्षिपति—**नन्विति**। "न च श्रुतिर्विष्णुविषया किं न स्यादुक्तन्यायात्" इत्यन्तरधिकरणन्यायेन शङ्कित इत्यर्थः। पूर्वपादे प्रतिनयमधिदैवाधिभूतादिशब्दानां विष्णौ शक्तिरप्यस्तीत्युच्यत इति पक्षमभ्युपेत्याह—**श्रुतेर्ब्रह्मणि मुख्यत्वे इति**। तात्पर्यमात्रमेवोच्यते न तु शक्तिरिति पक्षमुपेत्याह—**अमुख्यत्वे वेति**। यद्वा—लोकरूढ्यभावमदनरूपप्रवृत्तिनिमित्ताभावं वाऽभिप्रेत्याह—**अमुख्यत्वे वेति**। **लिङ्गस्यापीति**। तच्छब्दप्रवृत्तिहेतुत्वात्तस्येति भावः। द्वेधा समाधिमाह—**तीरेति**।

चन्द्रिका

गात्, श्रुतेर्ब्रह्मण्यमुख्यत्वेन सम्भवेऽपि लिङ्गस्यामुख्यत्वेनाप्यसम्भव इति टीकाभिप्रायः। यद्वा—अन्तरधिकरणन्यायेन रूढिबाधेन श्रुतेर्ब्रह्मपरत्वसम्भवेऽपि "अनश्नन्" इत्यादिश्रुत्या अनत्तुर्ब्रह्मणोऽत्तृत्वरूपादितित्वलिङ्गं न सम्भवतीति टीकाभिप्रायः। न च कर्मफलात्तृत्वसाधकेनोत्तराधिकरणेन अत्रत्यानत्तृत्वशङ्का

प्रकाशः

'सम्भवेऽपि' इत्यभ्युपगमवादं सूचयत्यपिपदेन। वस्तुतोऽदितिशब्दस्य तत्पर्यायस्य वा प्रागसमन्वयेन मुख्यत्वेन ब्रह्मणि सम्भवायोगात्, सजातीयेन्द्रादिशब्दसमन्वयोक्तिमात्रेणादितिशब्दप्रवृत्तिहेतोर्हरावसिद्धेः "ब्रह्मण्यमुख्यत्वेन सम्भवेऽपि" इत्युक्तम्। मुख्यत्वेन सम्भवे तु तच्छब्दप्रवृत्तिनिमित्तस्यादितित्वस्य ब्रह्मणि मुख्यत्वेन सम्भव एव स्यादिति भावः। पूर्वमदितित्वं गोत्वादिवज्जातिरूपमित्युपेत्य समाहितं, अधुनाऽदनकर्तृत्वमित्युपेत्याह—**यद्वेति**। अत्रापि भगवल्लिङ्गमस्तीत्युपेत्याह—**अन्तरधिकरणन्यायेनेति**। पूर्वपादे प्रतिनयं लिङ्गादिभिर्नाम्नां तत्परत्वमेवोक्तं, न तु तत्र शक्तिरपीति पक्षमुपेत्योक्तं—**ब्रह्मपरत्वसम्भवेनेति**। **अनश्नन्नित्यादीति**। यद्यपीयं श्रुतिः कर्मफलाशनं नेत्याह, पिप्पलमिति सन्निधानात्, अन्यथोत्तराधिकरणपूर्वपक्षटीकादावेतदुक्तिर्न स्यात्। तथाऽपि "न तदश्नाति किञ्चन" इत्यादौ तात्पर्यम्। अत एवादितिपदोक्तिः। एतच्छ्रुत्युक्तिस्तूत्तराधिकरणवैषम्योक्त्यर्थ, शङ्कोत्था-

चन्द्रिका

दण्डापूपनयपराहतेति वाच्यम्, तत्रात्रसिद्धामत्तृत्वसामान्यमुपेत्य कर्मफलात्तृत्वरूपस्तद्विशेषो नेति या शङ्का तस्या निरसिष्यमाणत्वेन, अत्रत्यपूर्वपक्षदशायां तत्रत्यसिद्धान्तानुन्मेषात् । अत एव तत्र भाष्ये विशेषाक्षेपार्थं "सर्वात्तैकः पर उक्तः" इत्यत्तृत्वसामान्यानुवादः । अथ वा—वक्ष्यमाणरीत्या अत्र विष्णुलिङ्गाभावेन अन्तरधिकरणन्यायाविषयतया 'अदितेः' इत्यत्रेव 'अदितित्वं' इत्यत्रापि अदितिप्रातिपदिकस्य प्रसिद्धादितिपरत्वात्ततः परेण त्वप्रत्ययेनापि तद्गतधर्म एव वक्तव्यः ।

प्रकाशः

पनाय वा, सामान्यनिषेधपरत्वमभिप्रेत्य वेति । **दण्डापूपेति** । यथा दण्डं भक्षयतोऽपूपभक्षणं न दुश्शकं, तद्वददनविशेषसाधनेऽदनसामान्यस्यानायासेन सिद्धत्वादित्यर्थः । एतत्सिद्धान्तोपजीवनेनैव तस्य प्रवृत्तेरित्याह—**तत्रेति** । अन्यथा भावार्थाधिकरणेन स्वर्गकामाधिकरणस्य वैयर्थ्यापत्तेः, स्वर्गकामनयसिद्धापूर्वोपजीवनेनैव तस्य प्रवृत्तेरिति भावः । एवं टीकोक्तं श्रुतेः सावकाशत्वेऽपि लिङ्गस्य निरवकाशत्वं द्वेधोपपाद्य, अधुना प्रागुक्तन्यायविवरणस्य तात्पर्यान्तरमाह—**अथ वेति** । **वक्ष्यमाणेति** । "सर्वशब्दस्तु योग्यसर्वपरः" इति वक्ष्यमाणरीत्येत्यर्थः । **अदितेरित्यत्रेवेति** । श्रुतिबाधकलिङ्गाभावेनान्तर्नयन्यायाविषयत्वेन श्रुतेर्विष्णौ निरवकाशत्वाद्यथा प्रसिद्धादितिदेवतापरत्वं तद्वदित्यर्थः । तावता वाक्यस्य

चन्द्रिका

एवं च "तद्दध्नो दधित्वं" इत्यादाविव प्रसिद्धादित्युद्देशात् प्रसिद्धार्थ एव शब्दान्वाख्यानस्याऽऽकाङ्क्षितत्वाच्च श्रुतिर्लिङ्गं च निरवकाशमिति न्यायविवरणाभिप्रायः। अत एव न्यायविवरणस्थचशब्दस्वारस्यम्।

प्रकाशः

कोऽर्थ इत्यत आह— **एवं चेति**। श्रुतेः प्रसिद्धार्थत्वे सतीत्यर्थः। तद्दध्न इति। "एतदस्मै दधिकुरुतेत्यब्रवीत्। तदस्मै दद्ध्यकुर्वन् तदेनमधिनोत्तद्दध्नो दधित्वम्" इति पूर्ववाक्ये प्रकृतस्य प्रसिद्धस्यैव दध्नः 'तदेनमधिनोत्' 'धिनु पुष्टौ' अपुष्णात्, 'धिवि प्रीणने' अप्रीणाद्वा। तत्पोषकत्वाद्येव प्रसिद्धदध्नो दधिपदवाच्यस्य दधित्वं दधिपदप्रवृत्तिनिमित्तमिति प्रसिद्धस्यैव दधिपदेनोद्देशात् तद्वाक्यं यथा तत्र तच्छब्दान्वाख्यानपरं, तथेदमपि देवमातर्यदितौ अदितिशब्दप्रवृत्तिनिमित्तोक्तिपरमित्यर्थः। एतेन— "अदितेरदितित्वं" इति हि श्रूयते। त्वप्रत्ययश्च जातेर्वाचकः, यथा पृथवीत्वं गोत्वमित्यादौ। तदसम्भवे स्वरूपस्यैव, यथाऽऽकाशत्वं चन्द्रत्वं इत्यादौ। तस्माददितित्वं न जतिः, व्यक्तेरभेदात्। ततोऽदितित्वं अदितेस्स्वरूपमेव। न चादितिस्वरूपमीश्वरस्य संभवति, अत्यन्तभिन्नत्वात्। न चादितिशब्दो भगवत्पर इत्यनुपपत्त्यभावः, अदितित्वेनादितिशब्दस्य तत्र विधित्सितत्वेनानुवादानुपपत्तेः। अन्यथा अन्योन्याश्रयप्रसङ्गादिति पूर्वपक्षी मन्यते इति न्यायविवरणटीका

चन्द्रिका

टीकायां श्रुतेस्सावकाशत्वोक्तिस्तु सजातीयदेवतावाचिशब्दसमन्वयस्य सिद्धत्वमभिप्रेत्येति द्रष्टव्यम्। श्रुतौ सर्वशब्दस्त्वदित्यदनयोग्यसर्वपरः। स्वीकृतश्च सिद्धान्तिनाऽप्यत्रैव प्रकरणे "सर्वस्यैतस्यात्ता भवति, सर्वमस्यान्नं भवति, य एवमेतददितेरदितित्वं वेद" इत्युत्तरवाक्यस्थसर्वशब्दस्य सङ्कोचः। यद्वा—श्रुतिबलाददितेरेव असङ्कुचितसर्वात्तृत्वमस्तु। अत्र चाद्यः पक्षः "अदितिरपि स्वभोग्यस्यान्नपानादेर्भोक्त्री" इति सुधोक्तः। द्वितीयस्तु अत्र टीकायाम्, न चाऽऽद्यपक्षे भाष्यस्थजन्मादिसूत्रोक्तासङ्कुचितसर्वसंहर्तृत्वस्य

प्रकाशः

विवृता। टीकाविरोधं निराह—**टीकायामिति**। **सजातीयेति**। अत एव न्यायविवरणटीकायां "न च श्रुतिरिन्द्रादिश्रुतिरिव विष्णौ सावकाशा" इत्येवोक्तमिति भावः। नन्वत्र सर्वात्तृत्वरूपं विष्णुलिङ्गं, "नैवेह किञ्चन" इति विष्णुप्रकरणं च। अतो लिङ्गप्रकरणाभ्यां श्रुत्यादिबाधेन विष्णुरेवात्ता स्यादित्यतो लिङ्गस्य सावकाशत्वं तावदाह–**श्रुताविति**। अदितिश्रुत्यदितित्वलिङ्गरूपबाधकात्सङ्कोचो न्याय्य इति भावः। बाधकात्सङ्कोचस्तवापि सम्मत इत्याह—**स्वीकृतश्चेति**। वेदितुरधिकारिणो ब्रह्मण इवासङ्कुचितसर्वादनस्य बाधादिति भावः। अत्र **टीकायामिति**। अत्तृत्वं विष्णोरन्यस्य वेति संशयं प्रदर्श्यान्यस्येत्युपपादनात्, अन्यथाऽन्यस्यापि वेत्युक्तिप्रसङ्गात्, अन्ते 'लक्षणं न युक्तं' इति सामान्यत उपसंहाराच्च

चन्द्रिका

अतिव्याप्त्युक्तिरयुक्तेति वाच्यम्, अदितेस्स्वातन्त्र्येचण कतिपय-संहर्तृत्वे ब्रह्मणस्सर्वसंहर्तृत्वायोगेन कतिपयसंहर्तृत्वस्य लक्षणत्वेनातिव्याप्तिसम्भवात् । न चादेर्भक्षणार्थत्वेन अदितेरत्तृत्वेऽपि पक्षद्वयेऽपि संहर्तृत्वस्य नातिव्याप्तिरिति शङ्क्यम्, "मृत्युनैवेदं" इत्युपक्रमे मृत्युशब्दात्, "यद्यदेवासृजत तत्तदत्तुमध्रियत" इति च सृष्टिप्रतियोगित्वाद्भक्षणस्यापि संहारविशेषत्वात्, ऊर्णनाभ्यादिवच्च भगवतस्संहर्तृत्वस्यात्तृत्वरूपत्वात् । "अद्यते ऽत्ति च भूतानि"

स सर्गकाले च करोति सर्वं संहारकाले तु तदत्ति भूयः ।

"स्रष्टा पाता तथैवात्ता" इत्यादौ संहारेऽदधातुप्रयोगाच्च । अत एव टीकायां "संहर्तृत्वापरपर्यायवाच्यमत्तृत्वं" इत्युक्तम् । "नैवेह किञ्चनाग्र

प्रकाशः

एतदवसीयते । अतिव्याप्तीति । टीका त्वन्यनिष्ठत्वप्रसङ्गादिति व्याख्येयेति भावः । टीकायां "संहर्तृत्वापरपर्यायवाच्यमत्तृत्वं" इत्युक्तेर्व्यावर्त्यशङ्कां दर्शयन् संहर्तृत्वरूपत्वं साधयति—**न चेत्यादिना।** **मृत्युनेति** । मृत्युपदस्य मारकपर्यायत्वादिति भावः । संहारेऽद धातोश्शक्तिं चाह—**भक्षणस्येति** । रूढिं चाह—**अद्यत इत्यादिना**। स्मार्तप्रयोगं चाह—**स सर्गेति** । "अत्ता निखिलस्यैक एव तु" इति निखिलपदप्रयोगात्स्रष्टृत्वप्रतियोगित्वात्संहर्तेति गम्यत इति भावः। एवं लिङ्गस्य सावकाशत्वमुक्त्वा प्रकरणस्यापि तदग्रे विवक्षुर्निरवकाशत्वं तावदुपेत्योपपत्तिमाह—**नैवेहेति** । "नैवेह किञ्चनाग्र

चन्द्रिका

आसित् ” इत्यादिनाऽस्य प्रकरणस्य वैष्णवत्वेऽपि, दर्शपौर्णमासप्रकरणात् “पूषा प्रपिष्टभागः” इत्युक्तं पौष्णं पेषणमिव, विष्णुप्रकरणात् “तददितेरदितित्वं” इत्यादिकमुत्कृष्यतां, प्रकरणाच्छ्रुतिलिङ्गयोर्बलीयस्त्वात्। अथवा–यथा “अभिक्रामन् जुहोति” इति दर्श-

प्रकाशः

आसीत् मृत्युनैवेदमावृतमासीत् अशनाया हि मृत्युः। तन्मनोऽकुरुत आत्मन्वी स्यामिति। सोऽर्चन्नचरत्तस्यार्चत आपोऽजायन्त। तद्यदपाꣳ शर आसीत् तत्समहन्यत। सा पृथिव्यभवत्। तस्यामश्राम्यत्। सोऽकामयत द्वितीयो म अत्मा जायेतेति। स मनसा वाचा मिथुनं समभवत्। अशनाया हि मृत्युः। तद्यद्रेत आसीत् स संवत्सरोऽभवत्। तं जातमभिव्याददात्। स भाणमकरोत्। सैव वागभगवत्। स ऐक्षत यदि हवा इम मभिमंस्ये कनीयोऽन्नं करिष्ये इति। स तया वाचा तेनात्मनेदꣳ सर्वमसृजत” इति मृत्युमात्रावशेषात्संवत्सरसृष्टिसंवत्सरादनाद्यमादिश्रवणेन प्रकरणस्य वैष्णवत्वेऽपीत्यर्थः। **दर्शपौर्णमासेति**। तृतीयस्य तृतीये पादे अष्टादशेऽधिकरणे “पौष्णं पेषणं विकृतौ प्रतीयेताचोदनात्प्रकृतौ” इति सूत्रे दर्शपौर्णमासप्रकरणे “पूषा प्रपिष्टभागः” इति श्रुतं पूषदेवताकं पेषणम्। तत्र प्रकरणे पूषाभावात्, यत्र पूषा तत्र वाक्यमुत्कृष्यत इत्युक्तम्। तद्वदिदमपि अत उत्कृष्य, यत्रादितिप्रकरणमस्ति, तत्र निवेश्यतामित्यर्थः। **अभिक्रामन्निति**।

चन्द्रिका

पौर्णमासप्रकरणेऽश्रुतस्य अभिक्रमणस्य तदङ्गप्रयाजान्वयार्थं प्रयाजानामवान्तरप्रकरणं, तथा विष्णुप्रकरणेऽदितेरवान्तरप्रकरणमस्तु। यद्वा–अदितिश्रुतिबलात् "नैवेह" इत्यादिमहाप्रकरणमप्यदितेरेवेति ॥

प्रकाशः

तत्रैव आद्यपादे "कर्तृगुणे तु कर्मसमवायाद्वाक्यभेदस्स्यात" इति दशमेऽधिकरणे दर्शपौर्णमासप्रकरणे प्रयाजसमीपे "अभिक्रामन् जुहोति" इति होमानुवादेन विधीयमानमभिक्रमणं प्राकरणिकसर्वहोमाङ्गमुत प्रयाजहोमाङ्गमिति संशये, फलाभावेनेत्थंभावतिरोधानेनाङ्गानामित्थंभावाकाङ्क्षानुत्थानात्, उत्थाने वा तेषामव्यवस्थयाऽन्योन्याङ्गाङ्गिभावापत्तेः, प्रयाजानामवान्तरप्रकरणाभावात्, सन्निधेश्च दौर्बल्यात्, प्रकरणेन दर्शपौर्णमासभावनासम्बन्धात्तदीयसर्वहोमाङ्गमिति प्राप्ते, "समानयत उपभृतः, यो वै प्रयाजानां मिथुनं वेद" इत्यभितः प्रयाजसम्बन्धिनोऽभिक्रमणस्य अन्यत्रान्वयायोगात्, प्रयाजानामवान्तरप्रकरणसम्भवेनाव्यवस्थाप्रसङ्गाभावात्, प्रबलेनावान्तरप्रकरणेन प्रयाजहोमाङ्गमिति सिद्धान्तितं, तद्वदित्यर्थः। प्रकरणस्य वैष्णवत्वमभ्युपेत्योक्तं, इदानीं तदेव नेत्याह––यद्वेति। "स यद्यदेव" इति पुल्लिङ्गनिर्देशस्तु "पुंशक्तियोगाद्युज्यते" इति भाष्यादावेवोक्तम्। विवरिष्यते चाक्षरार्थोक्तिप्रस्ताव इति भावः।

"सन्दिग्धश्रुतिलिङ्गाभ्यां निश्चितलिङ्गप्रकरणयोरेव बलवत्त्वम्" इति न्यायविवरणं हृदि कृत्वा भाष्यटीकयोरुक्ते पूर्वपक्षसिद्धान्तप्रापकयोस्साव-

चन्द्रिका

सिद्धान्तस्तु—

सर्वात्तृत्वादिकं नैव विष्णोरन्यस्य युज्यते ।
विष्णावदितिशब्दस्तु श्रुतः श्रुत्यन्तरे स्फुटम् ॥
न च बाधं विना सर्वशब्दस्सङ्कोचमर्हति ।
पूषादिवच्च नात्रास्ति बाधो येनापकर्षणम् ॥
अवान्तरप्रक्रिया तु सन्दंशात्कल्प्यते स च ।
अभिक्रामन् जुहोतीति वाक्येऽस्ति प्रकृते तु न ॥

प्रकाशः

काशत्वनिरवकाशत्वे सङ्गृह्णाति—सर्वेति । आदिपदेन प्रकरणम् । अत्रैवं ध्येयं—अत्ता विष्णुरेव, "सर्वं वा अत्ति" इत्यद्यतया चराचराख्यसर्वस्य ग्रहणात् । "नैवेह किञ्चन" इति विष्णुप्रकरणाच्च । ताभ्याम दितिश्रुतिलिङ्गयोर्बाधात् । न च ते सावकाशे, श्रुतिलिङ्गे तु निरवकाशे इत्युक्तमिति वाच्यं, यतस्सर्वात्तृत्वादिकमिति सम्बध्यत इति । श्रुतेः सावकाशत्वोक्तचैव तच्छब्दप्रवृत्तिनिमित्तस्यादितित्वलिङ्गस्यापि तत्सिद्धमिति 'अदितिशब्दस्तु' इत्येवोक्तम् । ननु सर्वशब्दसङ्कोचेन अदितावपि लिङ्गं युक्तमित्यतः, सूत्रे 'चराचर' इति श्रौतसर्वशब्दार्थोक्त्या सूचितमाह—न च बाधं विनेति । या तु प्रकरणादुत्कर्षोक्तिस्तत्राह—पूषादीति । यदप्यभिक्रमणदृष्टान्तेनावान्तरप्रकरणकल्पनं, तद्वैषम्यमाह—अवान्तरेति । 'स च' सन्दंशः ।

चन्द्रिका

भाष्योक्तश्रुत्यादिना सर्वात्तृत्वं निरवकाशम् । अन्वाख्यानपक्षेऽपि देवमातरि रूढिबाधार्थमिह सर्वात्तृत्वमेवादितिशब्दप्रवृत्तिनिमित्तमिति श्रुत्या स्वयमेवोक्तत्वाददितिश्रुतिरदितित्वलिङ्गं च विष्णावेव मुख्यम् । न चाबाधे श्रुत्युक्तं निमित्तं त्यागार्हम् । "अनश्नन्"

प्रकाशः

पूर्वार्धं व्यनक्ति—भाष्येति । "एकः पुरस्तात्" इत्यादिश्रुत्या "स्रष्टा पाता" इति स्मृत्या चेत्यर्थः । ननूक्तमत्र प्रसिद्धार्थ एवेत्यादि, तत्राह—अन्वाख्यानेति । अदितिशब्दव्युत्पादनपक्षेऽपीत्यर्थः । प्रसिद्धादितिपरत्वत्यागेनापूर्वार्थस्वकारायैव सर्वमत्तीति सर्वात्तृत्वरूपप्रवृत्तिहेतुकथनादित्यर्थः । एतेन "सर्वं वा अत्ति" इति यतस्सर्वात्तृत्वरूपमदितेरदितिशब्दार्थस्य विष्णोरदितित्वमदितिशब्दप्रवृत्तिनिमित्तमिति श्रुत्यर्थ उक्तो भवति । ननु श्रुतौ सर्वात्तृत्वरूपनिमित्तोक्तावपि न तन्निमित्तेन विष्णौ यौगिकत्वं युक्तं, किन्तु जातिनिमित्तक एवायं, दधिशब्दे तथा दर्शनेन रूढेर्बलवत्त्वादित्यत आह—न चेति । "कम्पनात्" इत्यत्राज्ञरूढितो वैदिकयोगबलवत्ताया वक्ष्यमाणत्वादिति भावः । एतेन "तीरादौ गङ्गादिपदप्रयोगेपि" इत्यादिनोक्तशङ्का परस्ता । श्रुतिरेव बाधिकेत्यत आह—अनश्नन्नितीति । अशुभभोक्तृत्वनिषेधपरतया गतिर्वक्ष्यत इत्यर्थः । "न तदश्नाति" इत्यस्याक्षरनये गतिर्वक्ष्यत इत्यपि ध्येयम् । एतेन 'यद्वा' त्यादिनोक्तलिङ्गनिरवकाशत्वशङ्का प्रत्युक्ता । प्रागुक्तदधि-

चन्द्रिका

इत्यादेस्तूत्तराधिकरणे गतिर्वक्ष्यते। "यदेनमधिनोत्तद्ध्नो दधित्वं" इत्यादि तु यदि प्रसिद्धदधिविषयं, तर्हि जातिनिमित्तकस्य दधिशब्दस्येदमन्वाख्यानमात्रम्। यदि त्वप्रसिद्धविषयं तर्ह्यबाधात् निमित्तपरमेव। युक्ता चादितिशब्दस्य "अदितिर्हीदं सर्वम् यदिदं किञ्च" "अदिति-

प्रकाशः

दृष्टान्तं प्रत्याह—**यदेनमिति**। दर्शपौर्णमासप्रकरणे ऐन्द्रदधिशब्दनिर्वचनार्थोऽयमर्थवादः। 'एनं' इन्द्रं 'अधिनोत्' अप्रीणयदिति यत्तद्ध्नो दधित्वमिति अन्वाख्यानमात्रं अवयवार्थकथनमात्रम्। ननु पूर्वत्रादितिपदस्य विष्णावप्रयोगान्न तत्र निमित्ताकाङ्क्षा। तथा च विष्णवर्थत्वेऽदितिशब्दस्य तत्राप्रसिद्धत्वेनादितेरित्यनुवादो वाऽदितित्वमित्यत्र निमित्तोक्तिर्वा न युक्तेत्यतोऽत्र श्रुतावदितिशब्दस्य पूर्वत्राप्रयोगेऽपि, श्रुत्यन्तरे प्रयोगसत्त्वेन लोकतो विष्णौ प्रसिद्ध्यभावेऽपि वेदतो विष्णौ प्रसिद्धेस्तत्र निमित्ताकाङ्क्षायामदितेरदितिशब्दवाच्यस्य विष्णोस्तत्सर्वात्तृत्वमदितित्वमदितिशब्दप्रवृत्तिनिमित्तमित्यर्थोपपत्तिरिति भावेनाह—**युक्ता चेति**। एतेन "विष्णावदितिशब्दस्तु" इत्यर्धं विवृतम्, 'अथवा' इत्यादिनोक्तश्रुतिलिङ्गनिरवकाशत्वशङ्का च निरस्ता, "अदितिश्रुतेर्विष्णावपि सावकाशत्वात्। लिङ्गस्य चादितिशब्दवाच्यत्वमदितित्वमिति सावकाशत्वात्" इति टीका च विवृता। ननु विष्णावदितित्वनिमित्तेनैवादितिशब्दस्य विधित्सितत्वेन निमित्तोक्तेः पूर्वमदितेरिति कथमनुवाद इति चेन्न, "इग्यणस्सम्प्रसारणं" "अग्नये जुष्टं निर्वपामि" इत्यादाविव भाविसंज्ञोपपत्तेः। यथोक्तं न्याय-

चन्द्रिका

दैवतामयी" इत्यादौ ब्रह्मणि प्रयोगात्तत्र निमित्ताकाङ्क्षा। न हि लौकिकप्रयोग एव निमित्ताकाङ्क्षा, "यदाजिमीयुस्तदाज्यानामाज्यत्वम्" इत्यादावदर्शनात्। किञ्च—

पूर्वत्रादितिशब्दस्य प्रयोगान्नानुशासनम्।
शब्दस्य किन्तु पूर्वोक्तात्तृत्वे हेतुरिहोच्यते॥

प्रकाशः

विवरणटीकायां—"अदितेरिति भाविनी संज्ञा विज्ञायते। यथा 'अस्य सूत्रस्य शाटकं वय' इति। अन्यथा परस्यापि दुर्घटमेतत्। अविवक्षितनिमित्तां प्रसिद्धिमाश्रित्य ममानुवादः सम्भवतीति चेत्, ममापि तत्समम्। इयांस्तु विशेषः—परस्य लौकिकी प्रसिद्धिः, मम वैदिकीति" इति। **लौकिकेति**। तत्र विप्लुतिसम्भवात् निर्दोषवैदिकप्रयोगे तु तदसम्भवादिति भावः। **यदाजिमिति**। छन्दोगब्राह्मणे ज्योतिष्टोमप्रकरणे बहिष्पवमानस्तोत्रनामनिर्वचनार्थोऽयमर्थवादः। यानि स्तोत्राण्यवष्टभ्य देवाः 'आजिं' युद्धं ईयुः, तदेवाज्यानां स्तोत्राणामाज्यत्वमित्यर्थः। "तस्योपनिषत्सत्यमिति, सदित्यन्नं तीत्यमृतं ते उभे यच्छति" इत्यादिरादिपदार्थः। पूर्वं न्यायविवरणटीकारीत्या अन्यत्रप्रयुक्तादितिशब्दान्वाख्यानपरत्वं विवृतं, इदानीमेतट्टीकोक्तं हेतुपरत्वं विवृणोति—**किञ्चेति**। **पूर्वोक्तात्तृत्व इति**। "तत्तदत्तुमध्रियत आदच्च" इति पूर्ववाक्योक्तात्तृत्व इत्यर्थः। **हेतुरिति**। यतस्सर्वात्तृत्वादेवादितिशब्दवाच्यत्वमतस्सर्वात्तृत्व-

चन्द्रिका

न हीह पूर्ववाक्येऽदितिशब्दः प्रयुक्तः, येन तदनुशासनं युक्तं स्यात्। न च "तत्तदत्तुं" इति पूर्वप्रतिज्ञातसर्वात्तृतायां श्रुत्यन्तरे ब्रह्मणि प्रयुक्तस्य सर्वात्तृत्वनिमित्तकस्य अदितिशब्दस्य हेतूकरणे सम्भवति स्थलान्तरस्थादितिशब्दस्य निर्वचनं युक्तम्। अत एव टीकायां विषयवाक्यार्थोक्तिदशायां हेतुत्वमुक्तम्। एवं च न सर्वशब्दस्य संकोचः, बाधकाभावात्। पूर्ववाक्ये "स यद्यदेवासृजत तत्तदत्तुम्," इति वीप्सया कृत्स्नोक्तेश्च। "सर्वस्यैतस्यात्ता" इत्यादौ तु सर्वशब्दस्य बाधकवशात्सङ्कोचः। अत एव सूत्रे लाघवाय श्रुत्यनुगमनाय च सर्वशब्दे प्रयोक्तव्ये, सर्वशब्दस्य सङ्कोचनिरासाय चराचरशब्दः प्रयुक्तः। न चाबाधेऽपि प्रकरणात्

प्रकाशः

निमित्तकादितिशब्दवाच्यत्वादेव सर्वमाददितिहेतुरुच्यत इत्यर्थः। **स्थलान्तरस्थेति**। विष्णौ श्रुत्यन्तरे प्रयुक्तस्येत्यर्थः। **हेतुत्वमुक्तमिति**। तत्तदत्तुं मनोऽध्रियत आदञ्च कुतस्सर्वात्त्री सा सर्वमत्तीति यत्तदेव ह्यदितेरदितित्वनिमित्तमित्युक्तमित्यर्थः। "न च बाधं विना" इत्यर्थं व्यनक्ति—**एवं चेति**। न केवलं बाधकाभावः, असङ्कुचितवृत्तिकत्वे ज्ञापकं चास्तीति भावेन सुधोक्तमाह—**पूर्वेति**। यदपि स्वीकृतश्च सिद्धान्तिना सङ्कोच इति, तत्राह—**सर्वस्येति**। असम्भवस्यैव बाधकत्वादिति भावः। पूषादिवच्चेत्यर्थं व्यनक्ति—**न चेति**। उक्तरीत्या श्रुतिलिङ्गयोस्सावकाशत्वेनोभयोरबाधकत्वादिति भावः। उक्तं चाऽर्थवादाधिकरणे "प्रकरणे च सम्भवन्नपकर्षो न कल्प्येत

चन्द्रिका

उत्कर्षः, अभिक्रमणस्य अवान्तरप्रकरणं च, तस्य प्रयाजविषयैर्वाक्यैः पूर्वं पश्चाच्च संदष्टत्वात् । न च अत्तृत्वस्यादितिविषयैर्वाक्यैः संदंशोऽस्ति । अदितेरेव महाप्रकरणमिति तु "नेहासीत्किंचन" इत्यादिभाष्योक्तस्मृत्यैव निरस्तम् । तदेतदभिप्रेत्योक्तं न्यायविवरणे—"सन्दिग्धश्रुतिलिङ्गाभ्यां निश्चितयोर्लिङ्गप्रकरणयोरेव बलवत्त्वम्" इति । अत्र चाद्ये सूत्रे लिङ्गोक्तिः, द्वितीये तु प्रकरणोक्तिरिति स्फुटः सूत्रक्रमः ॥

अत्र परैरुक्तं—

यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः ।
मृत्युर्यस्योपसेचनं........................... ॥

प्रकाशः

विध्यानर्थक्यं हि तं प्रति" इति सूत्रे बाधकाभावेऽपकर्षणं नेत्येतदिति भावः । अवान्तरेति श्लोकं व्याचष्टे—**अभिक्रमणस्येति** । "समानयत उपभृतः" इति पूर्वं "यो वै प्रयाजानां मिथुनं" इति पश्चाच्च प्रयाजविषयैर्वाक्यैरित्यर्थः । यदपि यद्वाऽदितिश्रुतिबलादित्यादि, तन्न, प्रकरणस्य निरवकाशत्वादित्याह—**अदितेरिति** । टीकाप्रमेयं न्यायविवरणमूलमिति भावेनाह—**तदेतदिति। सन्दिग्धेति।** 'सन्दिग्धत्वनिश्चितत्वे' सावकाशत्वनिरवकाशत्वे । प्रकरणाल्लिङ्गस्य बलवत्त्वात् सूत्रक्रम इत्याह—**अत्र चेति** ॥

अत्र परैरिति । मायावादिभिरित्यर्थः । विषयवाक्ये 'अत्ता' इति

चन्द्रिका

इति काठकवाक्ये ओदनोपसेचनपदाभ्यां सूचितोऽत्ता जीव एव, अत्तृत्वस्य भोज्यतया प्रसिद्धौदनसम्बन्धेन भोक्तृत्वरूपत्वात् ब्रह्मणश्चाभोक्तृत्वादिति प्राप्ते, सत्यमभोक्तृ ब्रह्म, तथाऽपि तदेवात्तृ, अत्तृत्वस्य संहर्तृत्वरूपत्वात्, तस्याक्रिये शुद्धे ब्रह्मणि असम्भवेऽपि मायोपाधिके सम्भवात् । भक्तवाचिनश्चौदनशब्दस्य भोक्तृप्रतियोगिभोज्यत्वं न मुख्यवृत्त्याऽर्थः। अमुख्यवृत्त्या चेत्तर्ह्योदनगतं संहर्तृप्रतियोगिसंहार्यत्वमेव अर्थोऽस्तु। एवं च ब्रह्मक्षत्रादिपदानां न मुख्यार्थत्यागः, जीवपक्षे तु तत्त्यागः। न हि कश्चिदपि जीवः सर्वस्य ब्रह्मक्षत्रस्य मृत्योश्च भोक्ताऽस्तीति सिद्धान्त इति। अत्र ब्रूमः—

प्रकाशः

पदाश्रवणात्तल्लाभमाह—**ओदनेति**। अद्यत्वे सत्यदनसाधनमुपसेचनं, तयोरदनीयवाचित्वात्प्रतिसम्बन्ध्यत्ता लभ्यत इत्यर्थः। भोज्यतया प्रसिद्धो य ओदनः तत्सम्बन्धेनेत्यर्थः। **अभोक्तृत्वादिति**। पूर्वत्र सम्भोगसूत्रेऽभोगोक्तेः "अनश्नन्" इत्यादिश्रुतेश्चेति भावः। **मायेति**। मायोपाधेः परस्यास्ति संहर्तृत्वमिति कल्पतरूक्तेरिति भावः। संहर्तृत्वलाभप्रकारमाह—**भक्तेति**। अन्नवाचिन इत्यर्थः। को विशेष इत्यत आह—**एवं चेति**। मुख्यार्थत्यागमुपपादयति—**नहीति**। ब्रह्मणस्तु सर्वसंहर्तृत्वं युज्यत इति भावः। यदुक्तममुख्यत्वाविशेषाद्ब्रह्मक्षत्रादिशब्दमुख्यत्वायौदनादिपदस्य संहार्यत्वमेवार्थोऽस्त्विति, तत्रामुख्यत्वाविशेषेऽप्यन्तरङ्गत्वाद्भोक्तृत्वप्रतिसम्बन्धि भोज्यत्वमेव लक्ष्य-

चन्द्रिका

भोक्तृताऽपि विशिष्टेऽस्तु यथा संहर्तृता तव ।
अभोक्तृत्वं निविशतां शुद्धे कौटस्थ्यवत्सुखम् ॥

अभोक्तृत्वश्रुतेर्निर्विकारत्वश्रुतिवच्छुद्धविषयत्वसम्भवेन मायोपाधिके संहर्तृतेव भोक्तृताऽप्यस्तु । एवं च ब्रह्मक्षत्रादिशब्दानां न मुख्यार्थत्यागः, तद्भोक्तृत्वस्य ब्रह्मणि सम्भवात्, ओदनादिपदोपस्थापितस्यान्तरङ्गस्य भोज्यत्वस्यापि न त्यागः । न हि 'अग्निर्माणवकः' इत्यत्राग्निशब्दः पैङ्गल्यादिकमिव द्रव्यत्वाद्युपस्थापयति, न वा "प्रोद्गातृणां" इत्यत्रोद्गातृशब्दोऽन्तरङ्गभूतान् प्रस्तोत्रादीनिव षोड-

प्रकाशः

ताम्, ब्रह्मक्षत्रादिशब्दस्य मुख्यत्वं च शक्यसम्पादमिति भावेन तदीयसिद्धान्तरचनां निरस्यति—**भोक्तृतेति** । अनशनश्रुतेर्गतिमाह—**अभोक्तृत्वमिति** । निविशतामिति "नेर्विशः" इत्यात्मनेपदम् । उत्तरार्धव्यक्तिपूर्वं पूर्वार्धं व्यनक्ति—**अभोक्तृत्वेति** । को विशेष इत्यतोऽन्तरङ्गत्वादित्याह—**ओदनेति** । ननु मुख्यत्वेऽन्तरङ्गत्वं बहिरङ्गत्वं वा अप्रयोजकमित्यतः, उपस्थितिवैशेष्यादन्तरङ्गमेवादर्तव्यं, न बहिरङ्गमित्येतदुपपादयति—**न हीति** । इदं गौणवृत्तेरन्तरङ्गस्योपस्थित्युपपादनं । लक्षणायामाह—**न वेति** । यद्वा लौकिकवैदिकोदाहरणप्रदर्शनार्थं द्वयम् । उक्तमधिकरणशरीरं "जन्माद्यस्य" इति सूत्रे । एकत्र वचनसम्बन्धादिभिरन्तरङ्गभूतान् प्रस्तोत्रादीनिव बहिरङ्गभूतान् षोडशर्त्विजो यथोद्गातृशब्दो न लक्षयति, तथौदनशब्दोऽ-

चन्द्रिका

शर्त्विजो लक्षयति, येनात्राप्योदनशब्दः संहार्यत्वमुपस्थापयेत् । अपि च "सर्वं वा अत्ति" इति मदीयविषयवाक्य इव त्वदीये वाक्ये सूत्रे प्रतिज्ञातोऽत्ता हेतूक्तं चराचरग्रहणं च न साक्षादस्ति ॥ यच्चोक्तं परैः—"प्रकरणात्" इति सूत्रस्य "न जायते म्रियते वा विपश्चित्" इति परमात्मन एव प्रकृतत्वाच्च स एवात्तेत्यर्थ इति, तन्न, "न जायते" इत्यस्मादुत्तरवाक्ये "न हन्यते हन्यमानेऽपि देहे" इति देहसम्बन्धस्य,

प्रकाशः

पीत्यर्थः । सुधोक्तमुदाहरणानौचित्यं चाऽऽह—**अपि चेति** । ओदनोपसेचनपदाभ्यामत्तेत्यस्योपलक्षणीयत्वेनोक्तत्वान्न साक्षादत्तेति श्रुतम्, ब्रह्मक्षत्रादिपदेन लक्षणया चराचरग्रहणस्योक्तत्वात् तदपि न साक्षाच्छ्रुतम् । अतोऽस्मदुदाहणमेव सूत्रानुगुण्याद्युक्तमित्यर्थः । ननु त्वद्वाक्येऽपि सर्वपदस्यैव श्रवणाच्चराचरपदाश्रवणान्न सूत्रानुगुण्यमिति चेन्न, तस्य सङ्कोचनिवृत्त्यर्थं सर्वशब्दव्याख्यानाय चराचरेत्युक्तत्वादिति प्रागेवोक्तत्वादिति भावः । द्वितीयसूत्रार्थमप्यनूद्य निराह—**यच्चेति** । **उत्तरवाक्यइति** ।

अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमानेऽपि देहे ।

इत्यव्यवहितोत्तरवाक्ये । उपलक्षणमेतत्, पूर्वत्रापि,

एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते ।

चन्द्रिका

हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम् ।
उभौ तौ न विजानीतः .... ॥

इति हन्तृत्वादिभ्रान्तेश्च जीवलिङ्गस्य दर्शनेन "न जायते" इत्यादेर्जीवविषयत्वात् । अत्रापि परमतेऽप्यत्तुर्जीवत्वं निषिद्ध्य ब्रह्मत्वोक्तेस्तैदक्यप्रतिकूलता व्यक्तैव ॥

टीकाक्षरार्थस्तु—इति योजनायामस्ति चोद्यावकाश इति । यद्यपि "स यद्येद्व" इत्यत्र 'सः' इत्यस्य संवत्सराख्यचतुर्मुखपरत्वमेव बृहदारण्यकभाष्ये उक्तम्,

यद्यद्ब्रह्मासृजत्पूर्वं तत्तदत्ति जनार्दनः ।

प्रकाशः

इति जीवस्यैव प्रथमान्ततया प्रकृतस्यान्वयाच्च, विपश्चित्त्वविशेषणेन प्रागुक्तज्ञानिन एवान्वयप्रतीतेश्च,

भावाभावौ न विदुषो यस्माज्जीवो न कश्चन ।

"न जायते म्रियते वाऽपि" इत्यादिस्मृतिविरोधाच्चेत्यपि ध्येयम् । परस्येदं नारभ्यमेवेति भावेनाह—अत्रापीति । न केवलं पूर्वत्रेत्यपेरर्थः । एतेनैतदेव वाक्यमुदहृत्य शिवनिष्ठं संहर्तृत्वमिति वदतः कस्यचिन्मतं प्रत्युक्तं बोध्यं, विषयवाक्यानानुगुण्यादिरुक्तत्वादिति ।

अत्र टीकायां पूर्वपक्षग्रन्थे "स यद्यद्व" इत्यत्र पुल्लिङ्गानुपपत्तिचोद्यं भाष्यकारीयमाक्षिप्य समाहितम् । तत्राक्षेपबीजप्रदर्शनपूर्वं तद्वाक्यं व्यनक्ति—यद्यपीति । तद्भाष्योक्तस्मृतिमाह—यद्यदिति ।

चन्द्रिका

इति स्मृतेः। उत्तरत्र "सोऽकामयत भूयसा यज्ञेन भूयो यजेय" इत्यादौ चतुर्मुखपरत्वदर्शनाच्च। पूर्वत्रापि "स तया वाचा तेनात्मना" इति प्रथमान्तोक्तमृत्युतोऽपि तृतीयान्तोक्तसंवत्सरस्याव्यवधानेन प्रकृतत्वाच्च। संवत्सरसृष्टमत्तुमेव मृत्योस्संवत्सरादनान्निवृत्ततया संवत्सरस्यैव स्रष्टृत्वस्योचितत्वाच्च। कर्तुरपि संवत्सरस्य भगवत्स्वातन्त्र्यविवक्षया 'तेन' इति करणत्वेन निर्दिष्टस्यापि 'सः' इति कर्तृत्वेन निर्देशोपपत्तेश्च। तथाऽपि समानविभक्तिकत्वं परामर्शे तन्त्रमिति भ्रमेण 'सः' इत्यनेन आदित्याख्यमृत्योरेव परामर्श इति

प्रकाशः

उत्तरत्रेति। 'सः' इत्यस्येत्यनुषज्यते। तच्छब्दस्य सन्निहितपरत्वात् चतुर्मुखस्य सन्निहितत्वात्तत्परत्वं युक्तमित्याह—**पूर्वत्रापीति**। **संवत्सरसृष्टमिति**। पूर्वत्र "स ऐक्षत यदि हवा इममभिमंस्ये कनीयोऽन्नं करिष्य इति। स तया वाचा तेनाऽऽत्मनेदꣳसर्वमसृजत" इत्यनेन यदि इमं संवत्सरशब्दितं भक्षयामि तर्ह्यल्पमन्नं मे भविष्यति। अत एनमभक्षयित्वा तन्मुखेन सर्वसृष्टिं कारयित्वा तत्सृष्टमेव सर्वं भक्षयामीति बुद्ध्या तन्मुखेन सर्वसर्जनात् भक्षणान्निवृत्तिरवश्यमवगम्यत इति तदन्यथानुपपत्त्या च चतुर्मुखपरत्वमित्यर्थः। ननु पूर्वं तस्य सन्निहितत्वेऽपि तृतीयया करणत्वेनैव निर्देशान्न कर्तृवाचिना परामर्शो युक्त इत्यत आह—**कर्तुरिति**। टीकोक्तं स्पष्टीकृत्य तदुपलक्षणमिति

चन्द्रिका

पूर्वपक्षे पुल्लिङ्गानुपपत्तिचोद्यावकाशोऽस्त्येव। ननु तथाऽपि न चोद्यावकाशः, "स ऐक्षत" इत्यादौ पुल्लिङ्गेनैव तच्छब्देन 'मृत्युना' इति मृत्युशब्देन च प्रस्तुततया 'गुरोर्दारास्समागताः, ते पूज्याः' इत्यादाविव पुल्लिङ्गोपपत्तेः। न च "अशनाया हि मृत्युः" इति स्त्रीलिङ्गेन अशनायाशब्देन प्रस्तुतत्वात् 'सः' इति पुल्लिङ्गानुपपात्तिरिति वाच्यम्, तथात्वे सिद्धान्तेऽपि तदनुपपत्तेरिति चेत्, उच्यते—दारखट्वादिशब्देषु पुल्लिङ्गस्त्रीलिङ्गादिश्शब्दसाधुतैव, न त्वर्थसाधुता। न चार्थसाधुत्वे सम्भवति शब्दसाधुत्वमात्रं युक्तम्। एवं चादितौ पुल्लिङ्गो मृत्युशब्दोऽप्ययुक्तः। परमपुरुषे तु स्त्रीलिङ्गोऽप्यदितिशब्दः प्रकृत्यधिकरणन्यायेन युक्तः। तथा चास्ति चोद्यवकाश इति भावः। **अदितिशब्दवाच्यमिति**। अदितिशब्दप्रवृत्तिनिमित्तमित्यर्थः॥

प्रकाशः

भावेन भाष्यं प्रकारान्तरेण स्वयमाक्षिप्य समाधत्ते—**ननु तथाऽपीति**। कथं तर्हि विष्णावदितिशब्दप्रयोग इत्यत आह—**परमेति**। पुरुषेति हेतुगर्भम्। अदितेरित्यनेनैव तद्वाच्यत्वलाभाददितित्वमिति व्यर्थमित्यतआह—**अदितिशब्देति**। शिष्टं सुगममिति भावः॥

इत्यत्तृत्वाधिकरणम्॥

— अथ गुहाधिकरणम् —

सर्वात्तैकः पर उक्तः ।

ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे ।

छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिनाचिकेताः ॥

इति पिबन्तौ प्रतीयेते, तौ काविति,

तत्त्वप्रकाशिका

अत्र लोकतोऽन्यत्रप्रसिद्धस्य कर्मफलभोक्तृत्वलिङ्गस्य विष्णौ समन्वयसमर्थनादस्ति शास्त्रादिसङ्गतिः । श्रुत्यादिसङ्गतिं विषयवाक्योदाहरणपूर्वकं विषयं च सूचयति–**सर्वेति** । सन्देहप्रकारं दर्शयति—**ताविति** । "अत्ता चराचरग्रहणात्" इति सर्वात्तृत्वमेकस्य हरेरुक्तम् । तन्मध्यपतितं कर्मफलात्तृत्वं पातृशब्दवाच्यं काठके कयोश्चित्प्रतीयते । यौ सुकृतनिर्मितशरीरे हृदयगुहां प्रविष्टौ तत्रापि सर्वजीवोत्तमेऽतिपूर्णे वायौ प्रविष्टौ सुकृतफलं भुञ्जानौ तौ ब्रह्मविदः पञ्चमहायज्ञवन्तो द्युपर्जन्यादिपञ्चाग्निविद्यानिष्ठा वा त्रिवारकृतनाचिकेताः छायातपौ वदन्तीति । तद्यदा विष्णोरन्यस्यैव स्यात्, तदा न तस्य सर्वात्तृत्वम्, यदि चान्यस्यापि भवेत्तदा लक्षणस्यातिव्याप्तिरित्यवश्यं निर्णेयमेव । तत्कर्मफलभोक्तृत्वं विषयः । किं विष्णोरन्यस्य वेति सन्देहः । सर्वात्तृत्वोक्तिरन्यत्र प्रसिद्धिश्च सन्देहबीजम् । न परमात्मन एवेदं कर्मफलभोक्तृत्वमुच्यते, अपि तु जीवसहितस्येति पूर्वः पक्षः, 'पिबन्तौ' इति द्विवचनश्रुतेः ।

उच्यते—

॥ओम् गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ओम्॥

गुहां प्रविष्टौ पिबन्तौ विष्णुरूपे एव,

तत्त्वप्रकाशिका

न च सर्वात्तृत्वेन तद्बाधः, श्रुतेर्निरवकाशत्वात्। कर्मबन्धविधुरस्येश्वरस्य कर्मफलभोगायोगाच्च, "अनश्नन्नन्यः" इत्यादिश्रुतेः। न चैवं जीवेशग्रहणेऽप्यनुपपत्तिः, जीवस्य भोक्तृत्वेन तत्सहितेश्वरे छत्रिन्यायेन भोगोपचारोपपत्तेः। न च सर्वात्तृत्वोक्तिविरोधः, कर्मफलभोगं विनाऽपि संहर्तृत्वमात्रेण तदुपपत्तेः। तथाऽपि जीवेशत्वे को हेतुः, एकस्य जीवत्वं पातृत्वान्यथानुपपत्त्या ग्राह्यम्। न च द्वितीयोऽचेतनः, सजातीयग्रहणस्यैव न्याय्यत्वात्। न च द्वावपि जीवौ युक्तौ, एकस्मिन्नेव शरीरे भोक्तृजीवद्वयायोगात्। अतः पातृत्वं जीवस्यैव, द्वयोरप्युपचार इति नेश्वरस्यैव सर्वात्तृत्वम्। तथा च लक्षणमयुक्तमिति भावः। अथ सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे—उच्यत इति। यौ पिबन्तौ प्रतीतौ तौ विष्णुरूपे एव, गुहाप्रविष्टत्वलिङ्गादित्यर्थः। 'विष्णू' इति वक्तव्ये 'विष्णुरूपे एव' इत्युक्त्या द्विवचनं द्विरूपाभिप्रायेण सावकाशमित्युक्तं भवति। ननु विष्णोस्सर्वशरीरेष्वेकैकरूपेण प्रवेशात्कथं रूपद्वयाभिप्रायेणापि द्विवचनोपपत्तिरित्यतस्सूत्रसूचितश्रुतिमुदाहरति—घर्मेति। दीप्तौ भगवन्तौ तेजोब्रह्मात्मकं शरीरं विशेषेण गुहास्थाने

घर्मा समन्तात्त्रिवृतं व्यापतुस्तयोर्जुष्टिं मातरिश्वा जगाम ।
इत्यादिना तद्दर्शनात् ।

आत्माऽन्तरात्मेति हरिरेक एव द्विधा स्थितः ।
निविष्टो हृदये नित्यं रसं पिबति कर्मजम् ॥

इति बृहत्संहितायाम् ।

शुभं पिबत्यसौ नित्यं नाशुभं स हरिः पिबेत् ।
पूर्णानन्दमयस्यास्य चेष्टा न ज्ञायते क्वचित् ॥

इति पाद्मे ।

तत्त्वप्रकाशिका

प्राप्तौ, तयोस्सेवां कर्तुं मातरिश्वाऽपि त्रिवृतं जगामेति द्विरूपतया हरेः शरीरे स्थित्युक्तेर्युक्तं रूपद्वयाभिप्रायेण द्विवचनमिति भावः । अस्तु द्विरूपतया विष्णुर्देहनिष्ठः, तथाऽपि तस्य कर्मफलभोगाभावान्नैतद्वाक्यप्रतिपाद्यत्वमित्यत आह—आत्मेति । तथा च गीतासु—

श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च ।
अधिष्ठाय मनश्चायं विषयानुपसेवते ॥

इति । ननु किमीश्वरो दुःखं सुखं वा कर्मफलं भुङ्क्ते । नोभयमपि, पूर्णानन्दत्वादित्यत आह—शुभमिति । पूर्वार्धेनाद्यपक्षमनभ्युपगमेन परिहृत्य, द्वितीयमभ्युपैति । उत्तरार्धेन तु पूर्णानन्दस्याप्यचिन्त्यैश्वर्यबलेन सुखभोगोपपत्तिरिति द्वितीयपक्षदूषणं परिहरति । विष्णोर्भोक्तृत्वाभ्युपगमे "अनश्नन्नन्यः" इत्यादिश्रुतिविरोध

"यो वेद निहितं गुहायाम्"। इत्यादिना प्रसिद्धिं हिशब्देन दर्शयति ॥ १ ॥

॥ओम् विशेषणाच्च ओम्॥

यस्सेतुरीजानानामक्षरं ब्रह्म तत्परम्।

इति।

तत्त्वप्रकाशिका

इत्यतोऽप्याह—शुभमिति। अशुभभोगाभावविषयं तद्वाक्यमिति भावः। तथा हि वाक्यशेषः—

तस्येदाहुः पिप्पलं स्वाद्वग्रे तन्नोन्नशद्यः पितरं न वेद।

इति। ननु कथं गुहानिष्ठत्वलिङ्गात्पिबतोर्विष्णुत्वनिश्चयो जीवेऽपि तद्युक्तेरित्यत आह—**यो वेदेति**। लिङ्गस्य जीवे सम्भवेऽपि श्रुत्यादिप्रसिद्धमेव ग्राह्यमिति भावः। **इत्यादिना प्रसिद्धिं हि शब्देन दर्शयतीति**। विष्णोरेव गुहानिविष्टत्वमित्यादिना वाक्येन प्रसिद्धमितीममर्थं सूत्रकारो हिशब्देन दर्शयतीत्यर्थः।

एवं निरवकाशलिङ्गस्य सावकाशश्रुतितोऽपि प्राबल्याद्विष्णोर्भोक्तृत्वसम्भवाच्च स एव पातेति सिद्ध्यति। किमु निरवकाशश्रुत्याऽपीत्यर्थं प्रतिपादयत्सूत्रं पठित्वा तदभिप्रेतश्रुतिमेवोदाहरति—**विशेषणाच्चेति**। "यस्सेतुः" इति पिबतोरेकवचनेन विशेषणात् एक एव पाता, स च ब्रह्मत्वविशेषणाच्च विष्णुरेवेति भावः। ब्रह्मशब्दस्य भगवदेकवाचित्वं स्मारयति—

पृथग्वक्तुं गुणास्तस्य न शक्यन्तेऽमितत्वतः ।
यतोऽतो ब्रह्मशब्देन सर्वेषां ग्रहणं भवेत् ॥
एतस्माद्ब्रह्मशब्दोऽयं विष्णोरेव विशेषणम् ।
अमिता हि गुणा यस्मान्नान्येषां तमृते प्रभुम् ॥

इति ब्राह्मे । न च जीवे समन्वयोऽभिधीयते ।

"सत्य आत्मा सत्यो जीवः सत्यं भिदा सत्यं भिदा सत्यं भिदा मैवारुवण्यो मैवारुवण्यो मैवारुवण्यः" इति पैङ्गिश्रुतिः ।

तत्त्वप्रकाशिका

पृथगिति । तस्य गुणा अमितत्वतो विविच्य यतो वक्तुं न शक्यन्ते, अतस्तस्मिन् ब्रह्मशब्दः प्रयुज्यते, यतो ब्रह्मशब्देन सर्वगुणानां ग्रहणं भवेत्, एवं सर्वगुणवाची यतो ब्रह्मशब्दः, एतस्मात् विष्णोरेव वाचको नान्येषां, तस्यैवामितगुणत्वात्, तं विनाऽन्येषां तदभावादित्यर्थः । एवं सूत्रद्वयं व्याख्याय परकृतापव्याख्यां निराकरोति—**न चेति** । अत्र प्रतीतौ पिबन्तौ किं बुद्धिजीवौ जीवेश्वरौ वेति सन्देहे, बुद्धिजीवाविति प्राप्ते सिद्धान्तितम् । जीवेश्वरावेतौ भवतोऽन्यतरस्य पातृत्वेन जीवत्वे सिद्धे द्वितीयस्य चेतनतयैव भाव्यत्वात्, 'अस्य गोर्द्वितीयोऽन्वेष्टव्यः' इत्यादौ सजातीयग्रहणस्यैव लोके दर्शनादिति व्याख्यानमयुक्तम्, समन्वयासङ्गतत्वात् । न ह्यस्मिन्नध्याये जीवे समन्वयोऽभिधीयते, येन जीवेश्वरावेवेति साधनं सङ्गतं स्यादतो नासौ व्याख्या युक्तेति भावः । न च च्छायातपत्वविशेषणा-

"आत्मा हि परमः स्वतन्त्रोऽधिगुणो जीवोऽल्पशक्तिरस्वतन्त्रोऽवरः" इति च भाल्लवेयश्रुतिः ॥

यथेश्वरस्य जीवस्य भेदस्सत्यो विनिश्चयात् ।
एवमेव हि मे वाचं सत्यां कर्तुमिहार्हसि ॥
यथेश्वरश्च जीवश्च सत्यभेदौ परस्परम् ।
तेन सत्येन मां देवास्त्रायन्तु सहकेशवाः ॥

इत्यादेर्नासत्यो भेदः ॥ १२ ॥

तत्त्वप्रकाशिका

देतत्कल्प्यम्, विद्वदविदुषोः सुखदुःखकारणत्वेन तदुपपत्तेः । न हि च्छायातपशब्दौ विद्याविद्यावद्वाचकौ । किञ्च पिबतोर्बुद्धिजीवत्वे किं छिन्नम्, किं वा जीवेश्वरत्वे लब्धम्, परेणापि जीवे तदभ्युगमात । ईश्वरे समन्वयसिद्धिरिति चेन्न, ईश्वरे लिङ्गस्यौपचारिकत्वाभ्युपगमात् । एवञ्च जीव एव समन्वयस्साधितः स्यात् । ततश्च किं पूर्वपक्षिणाऽपराद्धम्, तेनापि पातृत्वस्य बुद्धौ लाक्षणिकत्वाभ्युपमात् । नात्र जीवे समन्वयकथनमसङ्गतम्, जीवेशभेदस्यासत्यत्वादित्यत आह—सत्य इति । 'सत्यं' सत्या 'आरुवण्यः दोषिभिर्भर्जनीयः । यथा सत्यभेदौ, तथैव ज्ञातेन तेन सत्येन कारणेन । अतो हरिरेव सुकृतफलभोक्तेति न तस्य सर्वात्तृत्वलक्षणायोग इति स्थितम् ॥ १२ ॥

चन्द्रिका

॥ ओम् गुहां प्रविष्टात्मानौ हि तद्दर्शनात् ओम् ॥

पूर्वत्रादितिप्रातिपदिकश्रुतिबलादन्यत्रप्रसिद्धक्रियालिङ्गसमन्वय उक्तः, अत्र तु 'पिबन्तौ' इति प्रत्ययश्रुतिबलादन्यत्रप्रसिद्धक्रियालिङ्गसमन्वय उच्यत इत्यवान्तरसङ्गतिः ।

प्रकाशः

॥ ओम् गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ओम् ॥

पूर्वसङ्गतिमाह—**पूर्वत्रेति** । **क्रियेति** । अदनरूपक्रियेत्यर्थः । **प्रत्ययेति** । द्विवचनरूपेत्यर्थः । **क्रियेति** । कर्मफलभोक्तृत्वरूपेत्यर्थः । प्रकृतिप्रत्यययोः पौर्वापर्यात्तन्मूलपूर्वपक्षनिरासकयोरप्यधिकरणयोः पौर्वापर्यमित्युक्तं भवति । ननु कर्मफलभोक्तृत्वं लोकत एवान्यत्र प्रसिद्धं, न द्विवचनश्रुतिसाहित्यमपेक्षते । उक्तं च टीकायां—"लोकतोऽन्यत्रप्रसिद्धस्य कर्मफलभोक्तृत्वलिङ्गस्य" इति । तत्कथं "प्रत्ययश्रुतिबलादन्यत्रप्रसिद्ध" इत्युक्तिरिति चेत्, उच्यते—अस्मिन् पादे पूर्वत्रोत्तरत्र चान्यसाहित्येनैवान्यत्र प्रसिद्धेरुक्तत्वादत्रापि तथा भाव्यमिति भावेन वा, पूर्वं सर्वात्तृत्वस्य विष्णावुक्तौ तन्मध्यपतितकर्मफलात्तृत्वस्याऽपि सामान्यत उक्तत्वादन्यत्र प्रसिद्ध्यर्थमन्यसाहित्यमावश्यकम् । अत एव टीकायां "न च सर्वात्तृत्वेन बाधः, श्रुतेर्निरवकाशत्वात्" इति द्विवचनश्रुत्यैव बाधः शङ्कितः । "लोकतः" इति टीका तु प्राग्विशिष्यानुक्तत्वाशयेति भावेन वा, लोकतोऽन्यत्रप्रसिद्धत्वेऽन्यसाहित्येनाप्यन्यत्र प्रसिद्धे-

चन्द्रिका

अत्र पिबन्तौ किं

प्रकाशः

त्तसत्त्वात्तदभिप्रायेण वैतदुक्तिरिति। यद्यपि पूर्वत्र प्रातिपदिकार्थ-प्रत्ययार्थयोर्विष्णौ सम्भवेऽपीह तयोरसम्भवादिति पूर्ववैषम्येण पूर्वपक्षप्रवृत्तेः प्रत्युदाहरणरूपाऽपि वक्तुं शक्या। तथाऽपि सा वक्ष्यमाणदिशा सुज्ञानेति नोक्ता। ननु तथाऽपि "सर्वात्तैकः पर उक्तः" इति भाष्ये, "तद्यदा विष्णोरन्यस्यैव स्यात्तदा न तस्य सर्वात्तृत्वं" इति टीकायां च पूर्वाक्षेपस्य दर्शितत्वात्तद्वि-रोधः। न च तत्प्रयोजनमात्रपरं, इहोभयपरत्वेऽपि तस्य बाधका-भावादिति चेत्सत्यं, तस्य वक्ष्यमाणादिशोपपादनसोपक्षत्वे झडिति सुज्ञानत्वाभावेन तदपरित्यागेनैव सङ्गत्यतरकथनमेतदित्यदोषः। ननु न प्रत्ययश्रुतिबलादन्यत्रप्रसिद्धता, प्रत्ययाज्जीव एवेत्य-प्रतीतेः, तस्य द्वित्वबोधकत्वेन जीवेश्वरोभयप्रापकत्वादिति चेन्न, सिद्धान्तकोटितोऽन्यत्र प्रसिद्धेरेवान्यत्रप्रसिद्धिशब्दार्थत्वात्। अत्र विष्णोरेव सिद्धान्तकोटित्वेन जीवसहितस्य ततोऽन्यत्वात्। अत एव द्विवचनश्रुत्या कर्मफलात्तृत्वमुभयत्रप्रसिद्धमित्यपि चोद्यं परा-स्तम्। विष्णोरेवेति सिद्धान्तकोटौ कर्मफलात्तृत्वस्य द्विवचनश्रुत्या प्राप्तेः, तथा द्वयोः प्राप्तत्वेऽपि जीवेश्वरावित्यस्य न्यायेनैव व्यु-त्पाद्यत्वादिति। विषयसंशयटीकां व्यनक्ति—**अत्रेत्यादिना**।

ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे।

चन्द्रिका

जीवेश्वरौ

प्रकाशः

छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिनाचिकेताः ॥

इत्यत्र काठके ऋतपानकर्तृत्वेनोक्तो विषय इत्यर्थः टीकायां स्पष्टः । ननु 'गुहां प्रविष्टौ' इत्येतदेव धर्मीकृत्य सन्दिह्यताम् । तथा च सौत्रनिर्देशोऽपि साक्षात्सङ्गतस्स्यात् । अन्यथा 'पिबन्तौ' इत्येव ब्रूयात् । न च तस्य ब्रह्मलिङ्गत्वेन संशयायोगः, गुहाप्रविष्टत्वस्य "हृदि ह्येष आत्मा" इति जीवेऽपि सम्भवात् । द्विवचनश्रुतिबलेन गुहाप्रविष्टत्वं जीवेश्वरयोरिति पूर्वपक्षसम्भवाच्चेति चेन्मैवं, गुहाप्रविष्टत्वस्य "सर्वत्र प्रसिद्धोपदेशात्" इति नये विष्णौ सिद्धत्वात्तत्समन्वयेऽपूर्वगुणालाभात्, पातृत्वसमन्वये तु कर्मफलभोक्तृत्वस्यापूर्वगुणस्य लाभात् । प्रागुक्तलक्षणस्य साक्षादाक्षेपसम्भवाच्च । तत्र प्रातिपदिकार्थस्य प्रत्ययार्थस्य च द्वयोरप्यनुपपत्त्या पूर्वपक्षे विशेषहेतुसत्त्वाच्च । अत एव सूत्रे आत्मपदेनाऽऽदेयं मातीति व्युत्पत्त्या पातृत्वमुच्यते । वक्ष्यमाणदिशा गुहाप्रविष्टत्वस्य विष्णावेव प्रसिद्ध्या संशयायोगाच्च । सौत्रनिर्देशस्य तु गतिर्वक्ष्यते । **जीवेश्वरा**विति । एतेन "विष्णोरन्यस्य" इति टीका विष्णोरेवान्यस्यापि वेति व्याख्येयेत्युक्तं भवति । ननु बुद्धिजीवौ प्राणजीवौ बुद्धिप्राणौ वा संभवतः, कथं जीवेश्वराविति विशिष्योक्तिः । मैवं, पातृत्वेनैकस्य जवित्वावश्यम्भावेन 'अस्य गोर्द्वितीयेन भाव्यं' इत्यादौ

चन्द्रिका

किं वेश्वररूपविशेषौ इति चिन्ता । तदर्थं गुहावेशब्रह्मशब्दादिकं किममुख्यम् किं वा मुख्यमिति । तदर्थं पिबत्प्रातिपदिकार्थभूतं भोक्तृत्वं किं ब्रह्मणि न युक्तमुत युक्तमिति । तदर्थमभोक्तृत्वश्रुतिः ब्रह्मणि भोक्तृत्वमात्रनिषेधपरा उताशुभभोक्तृत्वनिषेधपरा वेति ।

प्रकाशः

सजातीयस्येवात्रापि सजातीयस्यैव द्वितीयस्येश्वरस्य ग्राह्यत्वात् । न च जीवान्तरमेव ग्राह्यमिति युक्तं, एकस्मिन् देहे भोक्तृजीवद्वयायोगात् । न च वैन्यादौ जीवद्वयं दृष्टमिति वाच्यं, तस्य प्रबलनिमित्तादिना क्वाचित्कत्वेन प्रतिशरीरं जीवद्वयायोगात्, ब्रह्मप्रकरणाच्च तस्यैव द्वितीयत्वस्योचितत्वादिति भावः । **रूपविशेषाविति ।** ईश्वरद्वयाभावेनेश्वरावित्यनुक्त्वा "रूपविशेषौ" इत्युक्तम् । **ब्रह्म शब्दादिकमिति ।**

यस्सेतुरीजानानामक्षरं ब्रह्म यत्परम् ।

इत्युक्तसेतुत्वादिरादिशब्दार्थः । मुख्यमितिचिन्तानन्तरं, मुख्यत्वे बाधबाधकमस्त्युत नेति चिन्ता स्फुटत्वान्नोक्ता । **श्रुतिरिति ।** "अनश्नन्" इत्यादिश्रुतिर्यदि भोक्तृत्वसामान्यनिषेधपरा, तर्हि प्रातिपदिकार्थभोक्तृत्वाद्ययोगात्पिबत्प्रातिपदिकार्थरूपबाधकसत्त्वेन ब्रह्मशब्दादेर्मुख्यत्वायोगेन जीवेश्वराविति पूर्वपक्षे फलम् । यदि विशेषनिषेधपरा, तदा ब्रह्मणि भोक्तृत्वयोगेन बाधकाभावाद्ब्रह्मशब्दादेर्मुख्यत्वादीश्वररूपविशेषाविति

चन्द्रिका

तथा द्विवचनं किं ब्रह्मणि न युक्तमुत युक्तमिति ॥ पूर्वपक्षस्तु—युक्तं पूर्वोक्तमत्तृत्वं ब्रह्मणि, प्रातिपदिकार्थस्य संहर्तृत्वस्य प्रत्ययार्थस्यैकत्वस्य च सम्भवात् ।

प्रकाशः

सिद्धान्ते फलमिति स्फुटत्वान्नोक्तम् । अत्र द्वौ पूर्वपक्षौ, प्रातिपदिकार्थमुपजीव्य प्रवृत्तः प्रत्ययार्थमुपजीव्य प्रवृत्तश्चेति । 'आत्मानौ' इति प्रातिपदिकप्रत्ययाभ्यां द्वयोर्गतेर्वक्ष्यमाणत्वात् । तत्राद्योपयुक्तचिन्तापरम्परेयम् । द्वितीयोपयुक्तामाह—**तथेति** । किं वा मुख्यमिति चिन्तानन्तरमियं चिन्ता ध्येया । यदि द्विवचनं न युक्तं, तदा बाधकसत्त्वेन ब्रह्मशब्दादेरमुख्यत्वेन जीवेश्वराविति फलिष्यति । यदि तु युक्तं, तदा बाधकाभावाद्ब्रह्मशब्दादेर्मुख्यत्वेनेश्वररूपविशेषाविति फलिष्यतीतिभावः । नन्वियं चिन्ता प्रातिपदिकार्थभूतं भोक्तृत्वं द्विवचनं च न युक्तमुत युक्तमिति पूर्वत्रैव निवेश्यतामिति चेन्न, तदर्थमभोक्तृत्वश्रुतिरिति वक्ष्यमाणचिन्ताया अनन्वयापत्तेः, तस्याः प्रातिपदिकार्थमात्रविषयत्वादिति ॥ 'आत्मानौ' इति सौत्रद्विवचनान्तात्मपदेन 'पिबन्तौ' इति श्रुतप्रकृतिप्रत्यययोर्द्वयोरपि गत्युक्त्या तदनुरोधेन टीकायामुक्तं द्वाभ्यां पूर्वपक्षं टीकासूचितपूर्ववैषम्योक्तिपूर्वकं व्यनक्ति—**युक्तमिति** । 'अत्ति' इत्यत्र धातुरूपप्रकृत्यर्थस्य तिङ्प्रत्ययार्थस्येति वा, 'अदितेः' इत्यत्रादितिप्रातिपदिकार्थस्य

चन्द्रिका

इह तु प्रातिपदिकार्थः कर्मफलभोक्तृत्वं प्रत्ययार्थौ द्वित्वं च कर्मबन्धरहिते निर्भेदे च ब्रह्मणि न युक्तम् । अन्यथा "सप्तदश प्राजापत्यान् पशूनालभते" इत्यादौ सङ्ख्यया कर्मभेदो न स्यात् ।

प्रकाशः

सुप्रत्ययार्थस्येति वाऽर्थः । इह तु प्रातिपदिकार्थ इति । ऋतपिबत्प्रातिपदिकयोरर्थ इत्यर्थः । 'प्रत्ययार्थः' औप्रत्ययार्थः । ननु भेदाभावेऽपि ब्रह्मणि द्वित्वं युज्यतां, को दोष इत्यत आह— अन्यथेति । द्वितीये "पृथक्त्वनिवेशात्सङ्ख्यया कर्मभेदस्स्यात्" इति द्वितीयपादीयसप्तमाधिकरणे "सत्पदश प्राजापत्यान्पशूनालभते" इति वाक्ये किं सप्तदशपशुद्रव्यक एको यागः उतैकपशुद्रव्यका अनेके सप्तदश यागा इति संशये, प्राजापत्यशब्देन देवतासम्बन्धोपसर्जनकद्रव्यमेवोच्यते । यच्च प्रधानं तस्यैवार्थान्तरेण बहुत्वेनान्वयो नोपसर्जनदेवतासम्बन्धस्य । तथा च बहुभिः पशुभिः व्यासज्यैका देवता सम्बध्यते । द्रव्यदेवतासम्बन्धैक्यादेको याग इति प्राप्ते, प्रथममेव प्रकृतिप्रत्यययोरन्वयाद्देवताविशिष्टमेव द्रव्यं प्राजापत्यशब्देनाभिहितं पश्चाद्विशिष्टेनैव रूपेण सङ्ख्ययाऽन्वेति । तथा च भिन्नैः द्रव्यदेवतासम्बन्धैर्भिन्ना एव यागाः कल्प्यन्ते । एवञ्च सति चोदकावगतमेकपशुनिष्पन्नैकादशावदानद्रव्यकत्वं यागस्यानुगृहीतं भवति नान्यथेति सिद्धान्तितम् । यदि 'पिबन्तौ' इत्यत्र द्वित्वसङ्ख्यया भेदो न स्यात्तदा तत्रापि

चन्द्रिका

अन्नमयादीनां तु "स एवा एष पुरुषोऽन्नरसमयः" इत्यादौ यत्र ब्रह्मतोक्ता, तत्रानेकत्वं न श्रुतम् । यत्र च "अन्नमयप्राणमयमनोमयविज्ञामयानन्दमया मे शुद्धचन्ताम्" इत्यत्रानेकत्वं श्रुतम्, तत्र न ब्रह्मतोक्ता, किन्तु संज्ञाधिकरणन्यायेन अन्नमयप्राणमयेत्यादिसंज्ञाभेदेन अन्नमयादीनां भेदे शङ्किते, दाक्षायणयज्ञादिशब्दवत् प्राणमयादिशब्दाः प्रकृते ब्रह्मणि गुणविधायका न तु संज्ञामात्रम्, ततो न भेदका इत्यादिपरिहारस्तत्राभिप्रेतः ।

प्रकाशः

सङ्ख्यया कर्मभेदो न स्यादित्यर्थः । आदिपदेन "द्वा सुपर्णा" "द्वे ब्रह्मणी वेदितव्ये" इत्यादौ चेतनभेदो न स्यादिति गृह्यते । नन्विदमानन्दमयाधिकरणेनैव परिहृतं, "बहुरूपत्वाच्च" इति,

अनन्योऽप्यन्यशब्देन तथैको बहुरूपवान् ।
प्रोच्यते........................... ॥

इति भाष्योक्तेरित्यतः, "न हि तत्र द्विवचनं बहुवचनं वा शङ्कितं, तद्भावात्, किन्नाम शब्दभेदादिना भेदः" इति न्यायविवरणटीकानुरोधेन तां विशदयन्नेव परिहारमाह—**अन्नमयादीना-मिति** । 'यत्र' ब्रह्मवल्ल्यां । यत्र **चेति** । नारायणोपनिषदि । संज्ञाधिकरणं जिज्ञासासूत्रे, दाक्षायणयज्ञाधिकरणं आनन्दमयनय एव विवृतम् । न्यायद्वयस्य शङ्कापरिहारोपयोगः तत्रैव दर्शितः । ननु तत्र बहुत्वाश्रवणेन "बहुरूपत्वाच्च" इति भाष्ये, "अत एक स्स पञ्चधा"

चन्द्रिका

तथाचान्नमयादीनां ब्रह्मत्वं स्वीकृत्यैव अत्र पूर्वपक्षः। अथवा—ब्रह्मावयत्वेऽपि ब्रह्मत्वमिति तत्र व्युत्पाद्यम्, अत्र त्वनेकत्वेऽपि ब्रह्मत्वमिति। तथा चान्नमयादीनामनेकत्वादब्रह्मत्वमिति शङ्काया अप्यत्रत्यसिद्धान्तेनैव परिहार्यत्वादत्रत्यपूर्वपक्षेऽन्नमयादीनामपि ब्रह्मत्वाक्षेपः। अत एव न्यायविवरणे "न चावयवत्वविरोधः" इति तत्रोक्तं, अत्र 'द्विवचनश्रुतेरपि निरवकाशत्वं नास्ति' इति। न च 'दाराः' इत्यादौ बहुवचनमिव अत्र द्विवचनं शब्दसाधुत्वेनैव प्रसिद्धम्।

प्रकाशः

इत्यनुव्याख्याने च कथं तत्समाधानोक्तिः। "न चानन्दमयाधिकरणन्यायेन परिहारः बाधकाभावात्" इति अत्रत्यसुधावाक्यं च कथमित्यतोऽभ्युपेत्यवादेनेति भावेन परिहारान्तरमाह—**अथवेति**। तत्रानेकत्वसङ्ख्यासमाधानं चात्रत्यसिद्धान्तन्यायेनैवेति भावः। **द्विवचनेति**। निरवकाशतया प्रतीयमानाया अपीत्यर्थः। एतेन "पिबन्ताविति द्विवचनश्रुतेः" इति टीका विवृता। ननु न द्विवचनं निरवकाशं, तस्य शब्दसाधुत्वमात्रार्थत्वेन वा, एकवचनान्तस्यैव च्छान्दसद्विवचनान्तत्वेन वा, द्वित्वबोधनेऽपि तस्योद्देश्यविशेषणत्वेनाविवक्षितया वा, द्विवचनस्यपूर्वोत्तरवाक्यानुरोधेनैकवचनान्ततयोहेनैकत्वप्रापकत्वेन वा, द्विवचनप्रतिरूपकत्वेन वा द्वित्वाप्राकत्वेनैकस्मिन्नप्युपपत्तेरिति चोद्यानि क्रमेण निरस्यन्नाद्यं निराह—**न च दारा इति**। **प्रसिद्धमिति**।

चन्द्रिका

न च बाधकं विना 'पिबन्तौ प्रविष्टौ छायातपौ' इति बहूनि द्विवचनानि वचनव्यत्ययेन एकस्मिन्नपि युक्तानि। न च "ग्रहं सम्मार्ष्टि" इत्यादाविवोद्देश्यविशेषणत्वात् सङ्ख्या न विवक्षितेति युक्तम्, ब्रह्मणि ऋतपानस्य अप्राप्तत्वात्।

प्रकाशः

"अथ पुंभूम्नि दाराः" इत्यादिवन्नैघण्टुकप्रसिद्धेरभावात् तथा कल्पनमयुक्तमित्यर्थः। द्वितीयं निराह—**न च बाधकमिति**। "व्यत्ययो बहुलम्" इति "सुपां सुलुक्" इत्यादिशास्त्रेणैकवचनस्य द्विवचनमिति वचनव्यत्ययकल्पनं "अहल्यायै जारा" इत्यादौ विभक्तिव्यत्यय इव सति बाधके। नहीह जीवेश्वरविषयत्वेनोपपत्तौ किञ्चिद्बाधकमस्तीत्यर्थः। गुहाप्रविष्टत्वादिबाधकं तु निरसिष्यत इति भावः। तृतीयमाशङ्क्य निराह—**न च ग्रहमिति**। छन्दोधिकरणे ग्रहाधिकरणं विवृतम्। "ऐन्द्रवायवं गृह्णाति मैत्रावरुणं गृह्णाति" इत्यादिनोत्पन्नानां "ग्रहैर्यजेत" इति होमसाधनत्वेन प्राप्तानां संमार्गरूपसंस्कारविधानार्थं 'ग्रहं' इति ग्रहशब्दस्योद्देश्यत्वात्तद्गता सङ्ख्या न विवक्षितेति वक्तुं युक्तम्। इह तु ऋतपानस्य ब्रह्मण्यप्राप्ततया विधेयत्वान्न तथा सम्भवति, किन्तु "पशुना यजेत" इत्यादाविव विधेयगतत्वेन विवक्षितैवेत्यर्थः। ननु टीकायां यौ सुकृतनिर्मितशरीरे हृदयगुहां प्रविष्टौ तत्रापि सर्वजीवोत्तमे अतिपूर्णे वायौ

चन्द्रिका

"ऋतं पिबन्तौ" इत्यस्योद्देशकत्वेऽपि 'छायातपौ' इत्यादेः विधायकत्वावश्यम्भावाच्च । ग्रहैकत्वस्य वाक्यभेदापत्त्या विध्यसंस्पर्शेऽपि प्रत्येकं ग्रहेष्वेकत्वस्य स्वरूपतः सत्त्वेन अनुवादत्ववत् प्रकृते ब्रह्मणि द्वित्वस्य स्वरूपत एवाभावेन अनुवादत्वासम्भवाच्च । न च 'पिबन्तौ' इत्यादिकमन्यत्र द्वित्ववाच्येव सदिहातिदेशतः प्राप्तम्, येन "अग्नये जुष्टं निर्वपामि" इति मन्त्रस्य

प्रकाशः

प्रविष्टौ सुकृतफलं भुञ्जानौ तौ ब्रह्मविदः पञ्चमहायज्ञवन्तः द्युपर्जन्यादिपञ्चाग्निनिष्ठा वा, त्रिवारकृतनाचिकेताः छायातपौ वदन्तीति पिबन्तावनूद्य च्छायातपत्वविधेरुक्तत्वात् कथमेवमित्यत आह—**ऋतमिति** । गुहाप्रविष्टत्वादिरादिपदार्थः । एकस्यैवोद्देश्यत्वादिति भावः । तथाच 'छायातपौ' इत्यत्र द्विवचनं निरवकाशमित्यर्थः । 'पिबन्तौ' इति द्विवचनश्रुतेरित्युक्त्वा टीकायां "श्रुतेर्निरवकाशत्वात्" इत्युक्तं, तत्स्वारस्यमनुरुध्य 'पिबन्तौ' इत्यस्यानुवाद्यत्वेऽपि ग्रहवैलक्षण्येन तत्रत्यद्विवचनस्येश्वरेऽनुपपन्नतामाह—**ग्रहेति** । एकत्वस्य विधेयान्वयायोद्देश्यकोटिप्रवेशे ग्रहस्याप्युद्देश्यत्वेन प्रत्युद्देश्यं वाक्यपरिसमाप्त्या, ग्रहं सम्मृज्यादेकं संमृज्यादिति वाक्यभेदः । विधेयकोटिप्रवेशे सम्मार्गस्यापि विधेयत्वेन विधेयभेदात्, ग्रहं सम्मृज्यात् स च समार्ग एक इति वाक्यभेदापत्त्येत्यर्थः । चतुर्थमाशङ्क्य निराह—**न च पिबन्तावित्यादिकमिति** । मन्त्रोहाधि-करणमुक्तं जिज्ञासाऽधिकरणे । " अग्नये जुष्टं निर्वपामि " इति दार्शपौर्ण-

चन्द्रिका

सौर्येऽतिदेशतः प्राप्तस्य सूर्यायेत्यूहवत् द्विवचनान्तस्यैकवचनान्ततयोहस्स्यात् । नचैकस्मिन्नेव यागे "समिधो यजति" इत्यादौ बहुवचनान्तसमित्पदमिवैकस्मिन्नेव ब्रह्मणि द्विवचनान्तं पिबत्पदमस्त्वति वाच्यम्, रूढस्य समिच्छब्दस्य बहुवचनप्रतिरूपकनामधेयत्ववत्

प्रकाशः

मासिकाग्नेयहविर्निर्वापमन्त्रस्य "सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः" इति विहिते सौर्ययागे "आग्नेयवत्सौर्यः कर्तव्यः" इत्यतिदेशतः प्राप्तस्य यथा 'सूर्याय' इति प्रातिपदिकमात्रे ऊहस्तथा 'पिबन्तौ' इति द्विवचनान्तस्य पिबन्तमित्येकवचनरूपप्रत्ययमात्रोहः स्यात् । न चात्र तथाऽतिदेशतः प्राप्तं, इहैवास्याऽऽम्नानादित्यर्थः । पञ्चममाशङ्क्याह—**न चैकस्मिन्निति** । समन्वयाधिकरणेऽभ्यासाधिकरणं विवृतम् । तत्र हि समिदादीनां यागनामत्वमुक्तम् । एकसमिदाख्यप्रयाजवाचिनोऽपि समिच्छब्दस्य रूढत्वेन 'उच्चैर्वृक्षः' इत्यादाविव बहुवचनप्रतिरूपकत्वेनोपपत्तावपीह यौगिकत्वात् तथा न वक्तुं युज्यत इत्यर्थः । ननु नवमे द्वितीयपादान्तिमाधिकरणे "प्रयाजेऽपीति चेत्" इत्यत्र "समिधो यजति" इत्यादौ समिदादिकं देवतात्वेनोद्दिश्य तत्संस्कारत्वेन यागा विधीयन्ते अथारादुपकारकतया यागा इति विशये, सामवायिकत्वलाभात्संस्कारविधिरिति प्राप्ते, तथात्वे देवतालिङ्गस्य "यदग्नये सायं जुहोति" इत्यादाविव चतुर्थ्या निर्देशस्याभावेन

चन्द्रिका

यौगिकस्य 'पित्रन्तौ' इत्यादेस्तदयोगात् । छायात्वं च ब्रह्मणो न युक्तम्, जीववदविद्याश्रयत्वासम्भवात् ।

प्रकाशः

चतुर्थ्यर्थे द्वितीयाया उपचारापत्तेः आरादुपकारकत्वेन यागविधिः, समिदादिशब्दास्तु मन्त्रवर्णप्राप्तदेवतां निमित्तीकृत्य नामधेयानि देवता एव वाऽनुवदन्ति, न चानुवादे उपचारो दोष इति सिद्धान्तितत्वात् श्येनशब्दस्य पक्षिविशेषे रूढस्य तत्सादृश्याद्गौण्या वृत्त्या यागनामत्वमिव, देवतागणविशेषे निरूढस्य समिच्छब्दस्य तत्प्रकाशकमन्त्रसम्बन्धापादितदेवतासम्बन्धे यागे लाक्षणिकत्वात् न रूढत्वमस्ति। उक्तं च शाबरभाष्ये "समिदादिमन्त्रकत्वाद्यजीनां समदादिशब्दा वाचकाः" इति । लक्षणायां लिङ्गव्यत्यय इव वचनव्यत्ययोऽपि न दोष इति चेन्न, पौर्णमास्यधिकरणपूर्वपक्षे फलवाक्यस्थ 'दर्शपूर्णमासाभ्यां' इति पदस्य द्विवचनप्रतिरूपकाव्ययत्वमाश्रित्य प्राकरणिकसर्वयागनामधेयत्वमुक्तं, तद्वत्प्रकृतेऽपि वक्तुं शक्यमित्यभिप्रायेणैवमुक्तमित्यविरोधः । देवतायां निरूढत्वाभिप्रायेण वा एवमुक्तिः । द्विवचनस्य सम्भाविताकाशनिरासेन "श्रुतेर्निरवकाशत्वात्" इति टीकां समर्थ्य तदुपलक्षणमिति भावेन लिङ्गान्तरस्यापि तदाह—छायात्वं चेति । आतपत्वस्य विद्यावत्त्वेनोपपत्तावपि इदमयुक्तम् । यद्यपि

छाया त्वविद्या सम्प्रोक्ता जन्याविद्याऽऽनपस्स्मृतः ।
जीवगृध्रस्य तौ पक्षावधऊर्ध्वपथोः पृथक् ॥

चन्द्रिका

तस्मादत्र पिबन्तौ जीवेश्वरावेव, ईश्वरस्याभोक्तृत्वेऽपि च्छत्रिन्यायेन पातृत्वव्यपदेशः, गुहाप्रविष्टत्वब्रह्मशब्दौ तु जीवेऽपि युक्ताविति ॥

सिद्धान्तस्तु—

गुहावेशाद्ब्रह्मशब्दात् मेतुत्वादक्षरत्वतः ।

पारत्वादभयत्वाच्च ब्रह्मैवात्र निगद्यते ॥

प्रकाशः

तौ विष्णोस्तु न विद्येते नित्यं विद्यास्वरूपिणः ॥

इत्यष्टमस्कन्धपञ्चमाध्यायतात्पर्योक्त्या द्वयमपीशे न युक्तं, तथाऽपि पररीत्यैवमुक्तमिति ध्येयम् । यथोक्तं न्यायविवरणटीकायां— "छायातपत्वं चाविद्यावत्त्वेन जीवेश्वरयोरुपपद्यते" इति । **तस्मादिति** । प्रातिपदिकार्थप्रत्ययार्थयोर्विष्णुमात्रेऽनवकाशत्वादित्यर्थः । "न चैवं जीवेशग्रहणेऽप्यनुपपत्तिः" इत्यादिटीकां व्यनक्ति—**ईश्वरस्येति** । एकस्य च्छत्रित्वेऽपि तत्साहित्यादन्येष्वपि 'छत्रिणो गच्छन्ति' इति यथा व्यपदेशस्तथा भोक्तृजीवसन्निधानादीश्वरोऽपि तथोपचर्येत इत्यर्थः । निरवकाशविष्णुलिङ्गादिबाध इत्यत आह— **गुहेति** । जीवस्यापि "हृदि ह्येष आत्मा" इति गुहास्थत्वात् ब्रह्मशब्दस्य "बृह जातिजीवकमलासन" इति जीवेऽपि प्रयोगादिति भावः ॥

निरवकाशभगवल्लिङ्गैः प्रकृतिप्रत्ययार्थौ कथञ्चिन्नेयाविति भावेन सूत्रोक्तान् सिद्धान्तहेतून् संगृह्णाति—**गुहावेशादिति** । आद्यसूत्रोक्तोऽयं

चन्द्रिका

गुहानिहितत्वं यद्यपि जीवेऽप्यस्ति, तथाऽपि "यो वेद निहितं गुहायाम्" "गुहाहितं गह्वरेष्ठं पुराणं" "गुहां प्रविश्य तिष्ठन्ती" इत्यादिश्रुतिषु ब्रह्मण्येव तस्य प्रसिद्धत्वात्, तेन ब्रह्मत्वासिद्धिः । न हि 'मैथिलः' इत्युक्ते यः कश्चिन्मिथिलाभवो भासते, किन्तु यस्तत्र प्रसिद्धस्तदधीश्वरः ।

यस्सेतुरीजानानामक्षरं ब्रह्म यत्परम् ।
अभयं तितीर्षतां पारं .... ॥

प्रकाश

हेतुः । द्वितीयसूत्रोक्तानाह—ब्रह्मेति । टीकोपलक्षणं, भाष्ये "परं" इत्यन्तोक्तेः, तत्त्वप्रदीपे "अक्षरशब्देन विशेषणाच्च" इत्युक्तेरिति भावः । 'अत्र' पिबन्तावित्यत्र । ननूक्तं गुहाप्रविष्टत्वं जीवेऽपि युक्तमित्यतः प्रसिद्धवाचकसौत्रहिशब्दसूचितं तन्निरवकाशत्वं न्यायविवरणटीकोक्तरीत्या साधयति—गुहेति । यो वेदेति । "ब्रह्मविदाप्नोति परं" इति पूर्वत्र ब्रह्मण एव तत्र प्रस्तुतत्वादिति भावः । ननु 'ब्रह्मशब्दात्' इत्ययुक्तं, तस्यापि प्राक् सावकाशत्वादित्यतो "विशेषणाच्च" इत्यस्यार्थान्तरमुपेत्य तस्य निरवकाशत्वमाह—यस्सेतुरिति । यद्यपि "ब्रह्म यत्परं" इत्येतावदेवोपयुक्तं, तथाऽपि सेतुत्वादिस्फोरणाय कृत्स्नवाक्योक्तिः । यद्यपि भाष्यादौ केवलब्रह्मशब्द एव निरवकाश इत्युक्तं, तथाऽपि तदपरित्यागेन

चान्द्रिका

इत्युत्तरवाक्ये च परत्वेन विशेषणात् परब्रह्मण्येव ब्रह्मशब्दः। सेतुत्वादिकं तु "एष सेतुः" इत्यादिश्रुतिभिः ब्रह्मलिङ्गत्वेन निश्चितम्। न चोत्तरत्र "यस्सेतुः" इत्यादिभिः, पूर्वत्र च "यस्य ब्रह्म च क्षत्रं च" इत्यादिभिः ब्रह्ममात्रविषयैर्वाक्यैः सन्दष्टं "ऋतं पिबन्तौ" इत्यादिकं बाधकाभावेऽप्यब्रह्मविषयमिति युक्तम्।

प्रकाशः

ब्रह्मवित्परमाप्नोतीति यत्प्रथमसूचितम्।

इत्यानन्दमयनयानुभाष्यसुधयोरुक्तरीत्योपायान्तरप्रदर्शनमेतदित्यदोषः। सेतुत्वादेर्निरवकाशत्वं व्यनक्ति—सेतुत्वेति। "धृतेश्च" इति दहरनयगुणसूत्रे "एष सेतुर्विधृतिरेषां लोकानां असम्भेदाय" इति सर्वाश्रयत्वरूपसेतुत्वस्य, उत्तराधिकरणे "एतदमृतमभयमेतद्ब्रह्म" इत्यभयत्वस्य, अदृश्यत्वाद्यधिकरणे "यया तदक्षरमधिगम्यते" इत्यक्षरत्वस्य विष्णौ सेत्स्यमानत्वाद्विष्णोरन्यत्रानवकाशमित्यर्थः।

अक्षयाद्रतिरूपत्वादक्षेषु रमणादपि।

अक्षरं भगवान् विष्णुरोमित्युच्चत्वहेतुतः॥

इति स्मृतेश्चेति। नन्वस्तु "यस्सेतुः" इत्यादिवाक्यं ब्रह्ममात्रपरं, "ऋतं" इति वाक्यं तूभयपरमस्तु, कर्मफलात्तृत्वद्विवचनश्रुत्योर्भावादित्यत आह—न चेति। 'अब्रह्मविषयमपीति युक्तं' इत्यन्वयः। ननु हरेरभोक्तृत्वं वा द्विवचनोक्तद्वित्वं वा बाधकमित्यतः "तस्य कर्मफलभोगाभावान्नैतद्वाक्यप्रतिपाद्यत्वं" इत्यादिटीकां वि-

चन्द्रिका

न चेश्वरस्य अभोक्तृत्वमेव बाधकम्, "एतत्सर्वं परेआत्मनि संप्रतिष्ठते" इति प्रस्तुत्य "एष हि द्रष्टा स्प्रष्टा श्रोत्रा घ्रात्रा रसयिता" इत्यादि श्रुतेः।

अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च।
श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च।
अधिष्ठाय मनश्चायं विषयानुपसेवते॥

इत्यादिस्मृतेश्च। न च "श्रोत्रं" इत्यादिकं जीवविषयं, पूर्वत्र

प्रकाशः

वृण्वन्, अभोक्तृत्वं तावन्निराह—न चेत्यादिना पुण्यमेवामुं गच्छतीत्यन्तेन। एतदिति। षट्प्रश्नोपनिषदि चतुर्थप्रश्ने "परे आत्मनि" इति परत्वविशेषणेन परमात्मानमेव परामृश्य द्रष्टृत्वादेरुक्तेरित्यर्थः। "अहं हि" इति वाक्ये अहमिति कृष्णेन प्रयुक्तत्वात् ब्रह्मविषयत्वं सिद्धमिति टीकोक्तद्वितीयस्मृतेस्तत्साधयति—न चेति। उभयत्राऽऽदिपदेन,

गृहीत्वैतानि संयाति वायुर्गन्धानिवाऽऽशयात्।

इति "यतन्तोऽप्यकृतात्मानो नैनं पश्यन्ति" इत्यादेर्ग्रहः। एतद्वाक्योक्तिस्तु भोगस्येन्द्रियसाध्यत्वात्कथमीश्वरस्य भोग इति शङ्काव्युदासायेति बोध्यम्। उक्तं च च्छान्दोग्यभाष्ये ऽष्टमाध्यायान्ते—

"भूतैर्महद्भिर्य इमाः पुरो विभुर्निमाय शेते यदमूषु पूरुषः।
भुङ्क्ते गुणान् षोडश षोडशात्मकस्सोऽलंकृषीष्ट भगवान्वचांसि मे॥

चन्द्रिका

"यच्चाप्युत्क्रामतीश्वरः" इत्यादेः, उत्तरत्र "पश्यन्ति ज्ञानचक्षुषः" इत्यादेरयोगात् । "अनश्नन्नन्यः" इत्यादिकं तु "तस्येदाहुः पिप्पलं स्वाद्वग्रे" इतीश्वरस्य स्वादुभोक्तृत्वोक्तेः, तथा "प्रविक्तहारतर इव भवत्यस्माच्छारीरादात्मनः" इति श्रुत्यन्तरे भगवदाहारस्य

प्रकाशः

इत्यादौ भगवत एवेन्द्रियैर्भोगोक्तेश्च ।

ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे ॥

इति च" इत्यादि । ईश्वरस्य भोक्तृत्वोक्तावनशनश्रुतिविरोध इत्यत आह—**अनश्नन्निति** । 'अशुभभोगाभावविषयं' इत्यन्वयः । कुतः सङ्कोच इत्यतः "असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात्" इति न्यायेन टीकोक्तवाक्यशेषबलादिति भावेन तमाह—**तस्येति** । आथर्वणेऽस्याश्रवणेऽपि ऋक्शाखायामस्ति श्रवणमिति भावः ।

तस्येदाहुः पिप्पलं स्वाद्वग्रे तन्नोन्नशद्यः पितरं न वेद ।

इति वाक्यशेषे, यः 'अग्रे' अग्र्यः श्रेष्ठः तस्यैव स्वादु 'पिप्पलं' कर्मफलमाहुः, यः पितरं न वेद, अत एव 'नशत्' नाशवान् तस्य स्वादु पिप्पलं नेति हरेरेव सुखभोक्तृत्वोक्तेरित्यर्थः । ननु श्रुतित्वाविशेषाद्भोक्तृत्वश्रुतेरेवार्थान्तरमस्त्वित्यतो गीताभाष्योक्तमाह—**तथेति** । 'श्रुत्यन्तरे' वाजसनेये षष्ठाध्याये द्वितीयब्राह्मणे "इन्धो हवै नामैष योऽयं दक्षिणेऽक्षन् पुरुषः" इति प्रकृतस्य परमात्मनः "तस्मादेष प्रविविक्ताहारतर इव भवत्यस्माच्छारीरादात्मनः" इति शारीरशब्दितजीवाहाराद्विभक्ताहारवत्त्वोक्तेरित्यर्थः । अवतारेषु स्थूलमपि भुङ्क्ते

चन्द्रिका

जीवाहाराद्विविक्तत्वोक्तेः, तथा "शुभं पिबत्यसौ" इत्यादिभाष्योक्तस्मृतिभिरशुभभोगस्यैव निषेधात्, तथा—

प्रकाशः

इतीवशब्दः। न च प्रविक्ताहारो जीव एवेति वाच्यं, तस्य 'शारीरात्' इति जीवाद्भेदोक्तेः। न च शारीराज्जागरावस्थाज्जीवात्स्वप्नसुषुप्त्यवस्थस्स एव प्रविविक्ताहार इत्यवस्थौपाधिकं जीवस्य भेदमङ्गीकृत्य व्याख्यायतामिति वाच्यं, स्वप्नसुषुप्त्यवस्थितस्यापि शारीरत्वेन शारीरशब्देनैव गृहीततया ततो भेदायोगात्।

शारीरस्स त्रिधा भिन्नो जाग्रदादिष्ववस्थितेः।

इति गारुडोक्तेः। नन्ववस्थात्रयवतः शारीरत्वेऽपि 'अस्मात्' इति विशेषणादत्र जागरावस्थो गृह्यते। तस्माच्च भेदः स्वप्नावस्थस्योक्तविधया सम्भवति। अन्यथा 'अस्मात्' इति व्यर्थमिति चेन्न,

शारीरौ तावुभौ ज्ञेयौ जीवश्चेश्वरसंज्ञितः।

इत्यादिस्मृत्येश्वरस्यापि शारीरत्वेन तद्व्यावृत्त्यर्थतया 'अस्मात्' इत्यस्य सार्थक्यादिति। व्यक्तमेतद्गीताभाष्ये सप्तमेऽध्याये—"न चात्र जीव उच्यते" इत्यादिनेति भावः। नन्वान्दमयनयाद्युक्तदिशा पूर्णानन्दस्य हरेः किं कर्मफलभोगेनेत्यतः, श्रुत्यर्थसङ्कोचबीजस्मृतीराह—तथेति।

शुभं पिबत्यसौ नित्यं नाशुभं स हरिः पिबेत्।
पूर्णानन्दमयस्यास्य चेष्टा न ज्ञायते क्वचित्॥

चन्द्रिका

अन्यूनानधिकत्वाच्च पूर्णस्वानन्दभोजनात् ।
विरागाच्च परस्यास्य भोक्तृत्वप्रतिषेधनम् ॥

इत्यदिस्मृतिभिरभोक्तृत्वश्रुतेर्गतिकथनात्, "क्रीडा भोगो न चान्यथा" इत्यादिस्मृत्या क्रीडारूपभोगसम्भवस्योक्तत्वाच्च अशुभभोगाभावविषयम् । प्रत्युत जीवपक्ष एव "ऋतं सत्यं तथा धर्मः" इति स्मृतेर्द्धर्मफलवाचि ऋतपदं न युक्तम्, तस्याधर्मफलं प्रत्यपि भोक्तृत्वात् । ईशपक्षे तु तद्युक्तम्, "पुण्यमेवामुं गच्छति" इति

प्रकाशः

आत्माऽन्तरात्मेति हरिः एक एव द्विधा स्थितः ।
निविष्टो हृदये नित्यं रसं पिबति कर्मजम् ॥
शुभान् पिबति भोगान् स च्छायेव विदुषां प्रभुः ।

इत्यादिस्मृतिभिरित्यर्थः। श्रुतेः प्रथमस्कन्धतात्पर्योक्तविषयान्तरं चाह– अन्यूनेति । भोगेऽभोगे चेत्यर्थः । इत्यादिस्मृतिभिरिति ॥

प्रविविक्तभुग्यतो ह्यस्माच्छारीरात्पुरुषोत्तमः ।
अतोऽभोक्ता च भोक्ता च स्थूलाभोगात्स एव तु ॥

इत्यादिस्मृतिरादिपदार्थः । अशुभेति । जीववद्रागपूर्वकोपजीवनार्थं भोगाभावविषयं चेत्यपि बोध्यम् । ऋतमिति ।

ऋतं सत्यं तथा धर्मः सुकृतं चाभिधीयते ।

इति सप्तमगीताभाष्योक्तस्मृतेरित्यर्थः । पुण्यमिति । "पुण्यमेवामुं गच्छति । न ह वै देवान्पापं गच्छति" इति बृहदारण्यकश्रुतौ

चन्द्रिका

श्रुतेः। नापीशपक्षे द्विवचनानुपपत्तिः,

प्रकाशः

पुण्यफलभोगस्यैवोक्तेरित्यर्थः। यद्यप्यमुं सप्तान्नविद्यावेदितारं पुण्यमेवाप्नोति न पापमित्येवार्थः। उक्तं च—

सप्तान्नोपासने योग्या देवा एव ततो हि यत्।
देवांश्च पापं नाप्नोति तस्मात्पापं न तस्य तु ॥

इति। तथा ज्ञानपादे—

पुण्यमेवामुमाप्नोति न देवान्पापमाप्नुयात् ॥

इत्यनुव्याख्यानसुधायां—"अमुं सप्तान्नविद्योपासनेन नैरकतया परपुरप्रवेशिनं परकृतं पुण्यमेवाप्नोति, न पापं, कुतः, देवो ह्यसौ जातः। न हि देवान् पापं प्राप्नोतीत्यर्थः" इत्युक्तम्। तथाऽप्यमुं सप्तान्नोपासकं देवमित्यर्थत्वेन देवत्वस्य हेतुत्वोक्तेर्देवोत्तमं हरिं पुण्यं गच्छति, पापं तु नेति किमु वाच्यमित्याशयेनैतदुक्तिः। अत एव गीताभाष्ये सप्तमे—"पुण्यो गन्धः इति भोगापेक्षया। तथा च श्रुतिः पुण्यमेवामुम्" इत्यादिना ब्रह्मपरतयेयं श्रुतिरुदाहृता, व्याख्याता च प्रमेयदीपिकयां—"अमुं उपासकं। कुतः। तस्य देवत्वात्। तथाऽपि कुतः। न ह्वै देवमात्रस्य पुण्यभोगनियमे देवोत्तमस्य सुतरां तत्सिद्धिः" इति। एवमभोक्तृत्वं बाधकं नेत्युपपादनेन "तस्य कर्मफलभोगाभावात्" इत्यादिटीका विवृता। अधुना द्विवचनमपि न बाधकमित्याह—**नापीत्यादिना विष्णोरेव द्विरूपत्वादित्यन्तेन।**

चन्द्रिका

यतः—

यथैकस्मिन्नेव पाशेऽदितिः पाशानिति श्रुतिः ।

तथैकस्मिन्नीश्वरेऽस्तु पिबन्ताविति वागपि ॥

यथा नवमे द्विबहुपत्नीकेष्वपि प्रयोगेषु "पत्नीं सन्नह्य"

प्रकाशः

द्विवचनानुपपत्तेश्चतुर्थं परिहारं विवरिष्यन्, द्विवचनमनुपपन्नमिति वदतो यदभिप्रेतं द्विवचनबोध्यस्य द्वित्वस्यैकस्मिन् ब्रह्मण्ययोगात्त-दनुरोधेन पिबत्प्रातिपदिकं छत्रिन्यायेन भोक्तृभोक्तृसमुदाये लक्षणया वर्तत इति, तत्तावदयुक्तं, गुणभूतप्रत्ययार्थानुरोधेन प्रधानभूत-प्रातिपदिके लक्षणाया अन्याय्यत्वात् । किन्तु प्रातिपदिकस्य मुख्यार्थं भोक्तारमुपेत्यैव तदनुरोधेन प्रत्ययार्थद्वित्वमेव कथं चिन्नेयमित्येकं परिहारं "अभेदैकत्ववत्येव वटे द्रव्यान्तरसहिते द्वित्वदर्शनात्" इति सुधावाक्यानुसारेण सदृष्टान्तमाह - **यत इत्यादिना किञ्चेत्य-न्तेन** । 'यतः' इत्यस्य श्लोकेनान्वयः, यस्मात्, 'पाशान्' इति बहुवचनमिवैकस्मिन्नपि द्विवचनं युज्यते, तस्मान्न द्विवच-नानुपपत्तिरिति । 'पाशान्' इति श्रुतिरित्येतदुपलक्षणमिति भावेन पूर्वार्धं व्यनक्ति—**यथा नवम इति** । तृतीये पादे "अपूर्वे त्वविकारोऽप्रदेशात्प्रतीयते" इति पञ्चमेऽधिकरणे दर्शपूर्णमासप्रकरणे "पत्नीं सन्नह्य" इति मन्त्रः किमेकद्विबहुपत्नीकेष्वविकारेण प्रयोक्तव्य उत द्विबहुपत्नीकप्रयोगयोर्द्विबहुवचनाभ्यां ऊहितव्य इति विशये,

चन्द्रिका

इत्येकवचनान्तो मन्त्रः, यथा वाऽग्नीषोमीयपशुसम्बन्धिन्येकस्मिन्नेव पाशे "अदितिः पाशान्" इत्यग्नीषोमीयपशुप्रकरणस्थमन्त्रगतं

प्रकाशः

एकपत्नीके समवेताभिधायित्वसम्भवान्नैकवचनमन्यार्थ्यनिगदम् । अतो द्विवचनबहुवचनयोरूहितव्य इति प्राप्ते, स्यादेवं, यद्येकपत्नीकाभिप्रायकमिदमाम्नानं स्यात्, न चैवं, सर्वप्रयोगाणां समानविधानत्वात्सर्वाभिप्रायेणेदमाम्नानम् । तस्मात्सर्वेष्वविकारेणैकवचनान्त एव प्रयोज्य इति सिद्धान्तितम् । तत्र यथैकत्वाभावेऽप्येकवचनान्तो मन्त्रो निविशते, तथेहापि ब्रह्मणि द्वित्वाभावेऽपि द्विवचनान्तवागस्त्वित्यर्थः । यथा वेति । तत्रैव "विप्रतिपत्तौ विकल्पः स्याद्गुणे त्वन्यार्थ्यकल्पनैकदेशत्वात्" इति चतुर्थेऽधिकरणेऽग्नीषोमीयपशौ "अदितिः पाशान् प्रमुमोक्तु देवः" इति बहुवचनान्तपाशमन्त्रः श्रुतः । स किं प्रकृतावेव निविशतेऽथ बहुपाशकेषु "अग्नेयं कृष्णग्रीवमालभेत" इत्यादिना विहितेषु पशुगणेषूत्कृष्यत इति संशये, एकस्मिन् बहुवचनस्यायोगादुत्कर्ष इति प्राप्ते, पाशप्रातिपदिकार्थान्वितं विभक्त्यभिहितं कर्मकारकं प्रकृतावपि पाशकर्मकमोचनाभिधानेन सम्भवन्निवेशं नोत्कर्षं सहते, सङ्ख्यामात्रं त्वसम्भवदपि गुणत्वान्न प्रातिपदिकं प्रधानभूतं कारकं वाऽलमुत्क्रष्टुम्, अतो न सङ्ख्यावशेन मन्त्रस्योत्कर्षः, बहुवचनस्य त्वेकस्मिन्नपि पाशे योगोऽवयवबहुत्वाभिप्रायेण च्छान्दस इति सिद्धान्तितम् । तथेहाप्येक-

चन्द्रिका

बहुवचनम् । अन्यथा हि बहुपाशयुक्तेषु पशुगणेषु पाशमन्त्रस्योत्कर्षः स्यात् । स च नेष्टः, गुणभूतप्रत्ययार्थबहुत्वस्यानुसरणाय तदाश्रयत्वेन प्रधानभूतप्रातिपदिकार्थोत्कर्षायोगेन एकस्मिन्नपि बहुवचनस्य कथं चिन्नेयत्वात् । तथेहापि एकस्मिन्नपि ब्रह्मणि द्विवचनमन्येन सह द्वित्वादस्तु, अस्यापि ब्रह्मप्रकरणस्थत्वात् ।

प्रकाशः

स्मिन्नेव ब्रह्मण्यन्येन सह द्वित्वादस्तु द्विवचनमित्यर्थः । एकवचनस्याद्यं बहुवचनस्य द्वितीयमिति विवेकः । "अन्यथा" इति । तदधिकरणपूर्वपक्षापादनम् । अस्त्वित्यत आह—**स चेति** । उक्तं च शाबरभाष्ये—"गुणे त्वन्याय्यकल्पना स्यान्न प्रधाने, गुणश्च विभक्त्यर्थः, प्रधानं प्रातिपदिकार्थः" इत्यादि । नन्वस्याग्नीषोमीयप्रकरणस्थत्वात्तत्प्रकरणानुग्रहाय तत्र कथञ्चिन्निवेश उक्तः । अत एव तत्र "प्रकरणविशेषाच्च" इति गुणसूत्रमित्यत आह—**अस्यापीति** । उत्तरत्र "यस्सेतुः" इत्यादिभिः, पूर्वत्र "यस्य ब्रह्म च क्षत्रं च" इत्यादिभिर्ब्रह्मविषयैर्वाक्यैः सन्दष्टत्वेन गुहाविष्टत्वादिना लिङ्गेन च ब्रह्मप्रकरणस्थत्वावगमात् एवञ्चान्येन सह द्वित्वादेव द्विवचनोपपत्तौ न तदनुरोधेन लक्षणया प्रकृत्यर्थो बाधनीय इति । ननु विषमोऽयमुपन्यासः, तत्र प्रकृत्यर्थस्योत्कर्षभिया प्रत्ययार्थस्य बाध उक्तः, इह तूक्तरीत्या ईश्वरस्य भोक्तृत्वाज्जीवस्य च भोक्तृत्वस्य प्रत्यक्षादिसिद्धत्वात्, पिबत्प्रातिपदिकेन जीवेश्वरयोर्ग्रहणे

चन्द्रिका

"युवं हि स्थः स्वर्पती इति द्वयोर्यजमानयोः प्रतिपदं कुर्यात्" इति श्रुतं यजमानद्वित्वादि तु द्व्यादिप्रातिपदिकार्थत्वात्

प्रकाशः

प्रातिपदिकार्थस्य भोक्तृत्वस्य प्रत्ययार्थस्य द्वित्वस्य च मुख्यस्यैव सम्भवादिति चेन्नैवं, ऋतशब्दितधर्मफलभोक्तृत्वस्य च जीवेऽनुपपत्त्या तस्य लक्षणीयत्वात्। अत एव टीकादौ पूर्वं द्विवचनस्येश्वरे सावकाशत्वोक्तावप्यत्र पूर्वमृतपानकर्तृत्वस्येश्वरैकनिष्ठत्वमुक्तम्। ननु कथं तर्हि तृतीयाध्यायतृतीयपादे "द्वित्वबहुत्वयुक्तं वा चोदनात्तस्य" इति चतुर्दशेऽधिकरणे "युवं हि स्थः स्वर्पती इति द्वयोर्यजमानयोः प्रतिपदं कुर्यात्" "एते असृग्रमिन्दवः इति बहुभ्यो यजमानेभ्यः" इत्यत्र प्रत्ययार्थसङ्ख्यानुरोधेन प्रातिपदिकमुत्कृष्यत इत्यतस्तद्वैषम्यमाह--युवं हि स्थ इति। स्तोत्रस्यादौ पठनीया ऋक् प्रतिपदित्युच्यते। एतामृचं प्रतिपदं प्रथमां कुर्यादित्यर्थः। नन्विदं सूत्रकृदेव पर्यहार्षीत्, यदाह—"अर्थाभावात्तु नैवं स्याद्गुणमात्रमितरत्" इति, सत्यं, तस्य प्रत्ययार्थाधीनोत्कर्षभ्रमनिरासाय स्पष्टीकरणमेतत्। तत्र किं प्रतिपदावेकयजमानकज्योतिष्टोमेऽथ द्विबहुयजमानकेषु कुलायाहीनादिषूत्कृष्टव्ये इति संशये, नित्ये कृपणशक्तिकृताङ्ग्त्यागाङ्गीकाराद्यदैको यजमानो ज्योतिष्टोममनुष्ठातुं न शक्नुयात्तदा "वसन्ते वसन्ते ज्योतिषा यजेत" इत्याख्यातोपात्तगुणभूतोपादेयकर्तृगतमेकत्वं क्रत्वङ्गमपि त्यक्त्वा द्वौ

चन्द्रिका

सङ्ख्यानभिधानेऽपि कारकाभिधानेन प्रत्ययस्य सार्थक्यवत् प्रातिपदिकस्य सार्थक्याभावात्, रामकृष्णावित्यादाविव च प्रकृते रूपविशेषेणेव यजमाने रूपविशेषेण द्वित्वासम्भवाच्च एकयजमानकदर्शपूर्णमासप्रकरणादुत्कृष्टम्। "यस्मिन् पञ्च पञ्च जनाः" इत्यत्र तु बहुत्वस्य प्रातिपदिकार्थत्वेऽपिब्रह्मणो बहुरूपत्वाददोषः।

प्रकाशः

बहवो वा यजेरन्निति ज्योतिष्टोम एव प्रतिपन्निवेशसम्भवान्नोत्कर्ष इति प्राप्ते, अशक्तिन्यायस्योपादेयाङ्गविषयत्वाद्यजमानगतैकत्वस्य कालादिवदनुपादेयत्वात्तत्त्यागायोगेन प्रकृतौ निवेशासम्भवात्कुलायादिषूत्कर्ष इति सिद्धान्तितम्। तत्र प्रकृतौ यजमानद्वित्वाभावादुत्कर्ष इति सत्यं, तथाऽपि प्रत्ययार्थाभावान्नोत्कर्षः, तस्य कारकाभिधानेनापि चारितार्थ्यात्, किन्तु प्रातिपदिकार्थाभावेनैवेति, प्रातिपदिकार्थस्य प्रकृतेऽनवकाशं द्वेधाऽऽह—**सङ्ख्येति**। 'दर्शपूर्णमासप्रकरणात' इति लेखकदोषमूलः पाठोऽयं, ज्योतिष्टोमप्रकरणस्थत्वात् स्तोत्रप्रतिपद्विधानस्येत्याहुः। ननु प्रातिपदिकार्थसङ्ख्यायाः प्रकृतावसम्भवेन यद्युत्कर्षस्तर्हि "न सङ्ख्योपसङ्ग्रहात्" इति नये "यस्मिन् पञ्च पञ्च जनाः" इति प्रातिपदिकार्थस्य बहुत्वस्यैकस्मिन्नसम्भवेऽपि कथं तत्रैव निवेशोऽभ्युपगत इत्यत आह—**यस्मिन्निति**। न च यजमाने तथा सम्भवतीत्युक्तमिति भावः। ननूक्तं "उद्गातृचमसमेकस्य श्रुतिसंयोगात्" इत्यधिकरणे "प्रैतु होतुश्चमसः प्र ब्रह्मणः प्रोद्गातॄणां"

चन्द्रिका

ननु "प्रोद्गातॄणां" इत्यत्रेव विभक्त्यर्थानेकत्वानुग्रहाय प्रकृतेऽपि च्छत्रिवत्प्रातिपदिकलक्षणैव युक्तेति चेत्, न, तत्रैव प्रकरणे उद्गातृशब्दलक्षणीयानां प्रस्तोत्रादीनां छन्दोगानामिवात्र ब्रह्मप्रकरणे लक्षणीयस्यान्यस्याभावात् । अत एव 'पाशान्' इत्यत्र बहुत्वाय प्रातिपदिकलक्षणा नाश्रिता । उद्गातृपदेन च्छन्दोगानामिव पाशशब्देन बन्धकद्रव्यलक्षणायां प्रकरणे बन्धकबहुत्वस्याभावात्, यागसाधनद्रव्यमात्रलक्षणायां च पाशमन्त्रस्थस्य 'प्रमुमोक्तु' इत्यस्या-

प्रकाशः

इति मन्त्रगतबहुवचनानुग्रहाय प्रातिपदिकलक्षणाश्रयणादिहापि तथा स्यादित्याशङ्क्य वैषम्येण समाधत्ते—**नन्वित्यादिना** । विवृतमेतज्जन्मादिसूत्रे । छन्दोगत्वरूपधर्मस्येवेह कस्य चिदभावादित्यर्थः । न च जीवादिस्तथा, ब्रह्मप्रकरणत्वव्याघातादिति भावः । **अत एवेति** । लक्षणोपयोगिधर्माक्रान्तस्य कस्य चिदभावादेवेत्यर्थः । तादृशो धर्मो बन्धकद्रव्यत्वं वा, यागसाधनत्वं वा, न द्वयमपि युज्यते इत्याह—**उद्गात्रिति** । नन्वेवं तर्हि ब्रह्मप्रकरणेऽन्यस्याभावेनान्येन सह द्वित्वमस्त्विति कथमिति चेदप्राकरणिकेन येन केन चिदस्तु । श्रौतस्य कथमेवं निर्वाह इति चेत्, उक्तानुपपत्तिबलादेवेत्यवेहि । वस्तुतः श्रुतितात्पर्यविषयत्वमेव द्वित्वस्य नास्ति, पूर्वोक्तैकवचनान्तवाक्यविरोधादिति भावेन,

यस्सेतुरिति चैकत्वचनेन विशेषणात् ।

चन्द्रिका

नन्वयात् । किञ्च—यद्यपि टीकायां 'यौ गुहां प्रविष्टौ तौ छायातपौ वदन्ति' इत्युक्तत्वेन 'छायातपौ' इत्यनेनोक्तं द्वित्वं विधेयविशेषणम्, तथापि "अग्नीनादधीत" इत्यादौ बहुत्वस्य उद्देश्य-विशेषणत्वेऽपि विवक्षादर्शनेन "सत्रादुदवसाय पृष्ठशमनीयेन यजेरन्" इत्यत्र च बहुत्वस्यविधेयविशषणत्वेऽपि अविवक्षादर्शनेन

प्रकाशः

इत्यनुव्याख्यानसूचितं परिहारान्तरमाह—**किञ्चेति**। 'द्वित्वस्याविवक्षाऽस्तु' इत्यन्वयः। ननूक्तं विधेयगतमित्यतस्तदनूद्याह—**यद्यपीति**। **विवक्षेति**। "वसन्ते ब्राह्मणोऽग्नीनादधीत ग्रीष्मे राजन्यश्शरदि वैश्यः" इति वाक्ये 'अग्नीन्' इत्यत्र बहुत्वस्याविवक्षायां गार्हपत्याहवनीयान्वाहार्यपचनरूपाग्नित्रयाधीनसिद्धिर्न स्यादिति भावः । **सत्रादिति**। दशमस्य द्वितीये पादे "तेषां तु वचनाद्वियज्ञवत् सह प्रयोगस्स्यात्" इदि त्रयोदशेऽधिकरणे "सत्रात्" इति वाक्यविहितः पृष्ठशमनीय उदवसायिभिस्संहत्य प्रयोक्तव्य उतैकैकेनेति संशये, 'यजेरन्' इत्याख्यातोपात्तबहुत्वस्योपादेयकर्तृगामित्वेन विवक्षितत्वात् संहत्येति प्राप्ते, स्यादेवं, यदि बहुत्वं विधीयेत। 'उदवसाय' इति क्त्वाप्रत्ययादुदवसानसमानकर्तृकत्वावगमात् , तत्र बहूनां कर्तृत्वात्प्राप्तमेव बहुत्वं न विधेयम्। न चाविहितमङ्गं भवति, उदवसानेन गम्यमानमपि बहुत्वमविवक्षितं, तस्मादैकैकश्येन प्रयुञ्जीरन् इति सिद्धान्तितम्।

चन्द्रिका

निर्ज्ञातविशेषणत्वमेवाविवक्षायां तन्त्रमिति ग्रहैकत्वनये ।स्थितत्वादिह च "यस्य ब्रह्म च क्षत्रं च" इत्यादिपूर्ववाक्ये 'यस्य' इत्येकवचनेनैकत्वसङ्ख्याया निर्ज्ञातत्वात् द्वित्वस्य अविवक्षास्तु । "सप्तदश प्राजापत्यान्" "द्वा सुपर्णा" इत्यादौ तु प्रागेकत्वस्यानवधृतत्वात् "अनश्नन्नन्यः" इत्यादिवाक्यशेषाद्यनुसाराच्च भेद आश्रितः । न ह्यौत्सर्गिकस्य क्वचिदपवादेनान्यथात्वे सर्वत्रापि तथात्वं युक्तम् ।

प्रकाशः

निर्ज्ञातेति । निर्णीतविरुद्धविशेषणत्वमेवेत्यर्थः । **ग्रहैकत्वेति** । तत्र हि "दशैतानध्वर्युः प्रातस्सवने गृह्णाति" इति ग्रहाणां निर्ज्ञातैकत्वविरुद्धसङ्ख्याकत्वादेकत्वस्याविवक्षोक्तेरित्यर्थः । **यस्येतीति** । "यस्सेतुरिति चैकत्ववचनेन" इत्युपलक्षणमिति भावः । कथं तर्हि क्वचित्सङ्ख्यया भेदोक्तिरित्यत आह—**सप्तदशेति** । प्राग्विवृतमेतदधिकरणम् । **वाक्यशेषादीति** । "स्थित्यदनाभ्यां च" इत्यत्र वक्ष्यमाणदिशा साशनानशनत्वरूपभेदकधर्मप्रतिपादनात् "तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति" इति वाक्यशेषानुसारात् "द्वा सुपर्णा" इत्यत्र द्वित्वसङ्ख्यया व्यक्तिभेद आश्रित इत्यर्थः । तथा प्राजापत्यशब्दाभिहितदेवताविशिष्टद्रव्यस्यैव सप्तदशत्वसङ्ख्यान्वयानुसाराच्च यागेषु भेद आश्रित इत्यादिशब्दार्थः । अन्यथा सङ्ख्यया कर्मभेदो न स्यादिति प्रागुक्तदोषमुद्धरति—**न हीति** । 'औत्सर्गिकस्य' सङ्ख्यया भेद इत्यस्य । **क्वचिदिति** । 'पिबन्तौ'

चान्द्रिका

उक्तं ह्यनुव्याख्याने—

उत्सर्गतोऽपि यत्प्राप्तमपवादविवर्जितम् ।
व्यभिचार्यपवादेन मानमेव भविष्यति ॥

इति । अत्र तु गुहाप्रवेशादिना ब्रह्मत्वेन निश्चितस्य पातुः पूर्वत्र "यस्य ब्रह्म च क्षत्रं च" इति, "मृत्युर्यस्य" इति, "क इत्था" इति, उत्तरत्र च "यस्सेतुः" इत्याद्येकवचनाच्चैकत्वमवधृतम् । अत एव "एकादश प्रयाजान् यजति" इत्यत्र पञ्चप्रयाजानामेवावृत्त्या एका-

प्रकाशः

इत्यादौ । 'अपवादेन' निरवकाशलिङ्गप्रकरणनिर्ज्ञातविरुद्धविशेषणत्वादिनेत्यर्थः । **उक्तं हीति** । भक्तिपादे । अपवादेन व्यभिचार्यपीत्यर्थः । प्रकृते किमपवादकमित्यत आह—**अत्र त्विति** । एकत्वावधारणमेवापवादकमित्यर्थः । **अत एवेति** । "पञ्च प्रयाजा इज्यन्ते" इति प्रयाजानां निर्ज्ञातसङ्ख्याकत्वादित्यर्थः । पञ्चमे तृतीयपादे "विवृद्धिःकर्मभेदात्पृषदाज्यवत्तस्य तस्योपदिश्यते" इत्याद्याधिकरणे "एकादश प्रयाजान्यजति षडुपसदः" इति श्रुतसङ्ख्या प्रत्येकं भवति किं वा सर्वसंवादिनीति संशये, प्रयाजानुपसदश्चोद्दिश्य सङ्ख्याविधानादुद्देश्यानां च साहित्यस्याविवक्षासम्भवात्प्रतिप्रयाजं प्रत्युपसदं सङ्ख्या स्यादिति प्राप्ते, एकैकशस्समुदितानां वा स्वरूपेण सङ्ख्यान्वयो न सम्भवति, एकस्य पञ्चानां चैकादशत्वायोगात् । अतः सङ्ख्यान्वयसिद्धये प्रयाजाः प्रयोगं लक्षयन्ति, तं लक्षयन्तस्तन्त्राभिधाना-

चन्द्रिका

दशत्वमित्युक्तं पञ्चमे। नवमेऽपि "अतिजगतीषु स्तुवन्ति" इति बहुवचनं "विश्वा पृतना" इत्येकस्यामेव अतिजगत्यां ऋचि सप्तकृ-

प्रकाशः

त्सहावगतास्तथैव लक्षयन्ति, सङ्ख्या चेयमनेकवृत्तिस्वभावा समस्तलक्षितप्रयोगगतापि शक्नोति सर्वेषां प्रयाजानां उपकर्तुम्, अतस्सर्वसंवादिनी स्यादिति सिद्धान्तितम्। प्रयोगाऽऽवृत्त्या दशसङ्ख्या सम्पत्तौ तत्रैकस्य चरमस्याऽऽवृत्त्या एकादशत्वमिति ध्येयम्। तथा नवमे द्वितीयपादे "नैमित्तिकं तूत्तरोत्तरत्वमानन्तर्यात्प्रतीयेत" इति चतुर्थेऽधिकरणे द्वितीयवर्णके चिन्तितम्। द्वादशाहे चतुर्थेऽहनि त्रैशोकन्नाम साम विहितम्। तच्च "अतिजगतीषु स्तुवन्ति" इत्यतिजगत्यामुत्पन्नम्। पूर्वत्र हि समच्छन्दस्के तृचे सामगानं कार्यमिति विचारितम्। इह च तृचमध्ये आद्या "विश्वा पृतना अभिभूतं" इत्यातिजगती। उत्तरमृग्द्वयं च "नेमिं नमन्ति चक्षसा मेषं" इति, "समीरे भासो अस्वरन्" इति बृहतीछन्दस्कं पठ्यते। तत्र तृचगाने कर्तव्ये किं बृहत्योस्त्यागेनातिजगत्यौ द्वे आनीय समच्छन्दस्कासु तिसृषु ऋक्षु गानं कार्यमुत विषमास्वेवेति संशये, समासु गानं इति पूर्वत्र निर्णीतत्वात् "अतिजगतीषु स्तुवन्ति" इति बहुवचनानुग्रहाय च समासु गानमिति प्राप्ते, उत्तरयोर्बृहत्योः पाठस्य क्रत्वर्थत्वात्तत्परित्यागे च तयोरानर्थक्यात् "एकविंशः षोडशो वैराजं" इति श्रुतैकविंशत्वसंख्यासम्पत्त्यै चैकस्यामृचि सप्तकृत्वोऽभ्यस्यमानायां

चन्द्रिका

त्वोऽभ्यासमात्रेण, न तु जगतीव्यक्तिबहुत्वेनेत्युक्तम्। किञ्च—

सम्बन्धादि यथैकस्मिंस्तथाऽनेकत्वमिष्यताम्।
प्रमितत्वाद्विरोधं तु विशेषो वारयिष्यति॥

दृश्यते हि 'प्रमेयत्वं प्रमेयम्' "आनन्दो ब्रह्मणः" 'भेदो भिन्नः' इत्यादावेकस्मिन्नेव विशेषणविशेष्यभावेन सम्बन्धः।

प्रकाशः

अभ्यासापेक्षयाऽतिजगतीबहुत्वस्योपपत्तेः विषमच्छन्दस्कासु गानमिति सिद्धान्त इति। 'न तु' इति तदधिकरणपूर्वपक्षनिरासः। एवं प्रत्ययार्थानुगुण्येन प्रातिपदिकबाधायोगात् तदनुरोधेन प्रत्ययार्थ एवान्यसाहित्येन वाऽविवक्षितत्वेन वा कथं चिन्नेय इति प्रौढ्या परिहारद्वयमुक्तम्। इदानीं नन्वत्रान्यस्याश्रवणात्तत्साहित्येन कथं द्वित्वमिति शङ्कां, ग्रहेष्वेकत्वस्य स्वरूपतः सत्त्वेनानुवादत्ववत्प्रकृते ब्रह्मणि द्वित्वस्य स्वरूपत एवाभावेन अनुवादत्वमपि न सम्भवतीति प्रागुक्तशङ्कां च निरसितुं,

.... द्वित्वं चैकस्य युज्यते।
यस्सेतुरिति चैकत्ववचनेन विशेषणात्॥

इत्यनुव्याख्यानानुरोधेन द्वित्वस्य विवक्षामुपेत्य द्वित्वैकत्वयोस्समावेशमाह—किञ्चेति। दृष्टान्तविवरणपूर्वं श्लोकं व्याचष्टे—दृश्यते हीति। एकस्मिन्नेवेति। "विज्ञानमानन्दं ब्रह्म" इत्यादावानन्दब्रह्मणोरेकत्वं सिद्धमिति भावः। 'सम्बन्धः' इत्यनन्तरं 'तथेहाप्येकस्मिन्

चन्द्रिका

"नेह नाना" इत्यादिना तु ब्रह्मणि भेद एव निषिद्धः, न त्वनेकत्वसङ्ख्या। प्रत्युत "अयं वै हरयोऽयं वै दश च सहस्राणि च बहूनि चानन्तानि च तदेतद्ब्रह्मापूर्वमनपरमनन्तम्" इत्यादिश्रुत्या हि सा विहिता। विरोधं तु भेदप्रतिनिधिर्विशेषो वारयिष्यति।

प्रकाशः

ब्रह्मण्यनेकत्वमस्तु' इति योज्यम्। ननु श्रुत्याऽनेकत्वनिषेधान्नैवमित्यत आह—नेह नानेति। 'किञ्चन' गुणकर्मादिकं 'नाना' भिन्नं नेति भेदस्यैव निषेध इत्यर्थः। इत्यादिश्रुत्येति। चतुर्थबृहदारण्यकश्रुत्येत्यर्थः। आदिपदेन "युक्ता ह्यस्य हरयः शता दश" इति, "तस्य ह वा एतस्य परमस्य त्रीणि रूपाणि कृष्णो रामः कपिलः" इति, "तस्य ह वा एतस्य परमस्य पञ्च रूपाणि दशरूपाणि शतरूपाणि सहस्ररूपाणि अमितरूपाणि" इत्यादि गृह्यते। एतेन 'प्रमितत्वात्' इत्येतद्विवृतं भवति। भेदेति। घटपटयोर्भेदः द्वित्वनिर्वाहकः। इह तु भेदस्य "नेह नाना" इति निषेधात् "अयं वै दश च" इत्यादिना एकत्वानेकत्वयोः प्रमितत्वात् यथा सोमकार्यनिर्वाहकेण सोमप्रतिनिधिना पूतीकेन सोमकार्यं, तथेहापि भेदकार्यं अविरोधकेन भेदप्रतिनिधिना स्वरूपसामर्थ्यापरपर्यायेण विशेषेण भविष्यतीत्यर्थः। समर्थितश्च विशेषपदार्थो मूलग्रन्थेषु तत्र तत्र, न्यायामृते द्वितीयपरिच्छेदे चेति भावः। यद्यप्यनुभाष्यसुधयोः "ऋतं पिबन्ताविति द्विवचनविषयतया प्रकृतयोर्द्वित्वाधारयोः "यस्सेतुः" इत्येकवचनेन विशेषणा-

चन्द्रिका

किञ्च ब्रह्मण आनन्दमात्रात्मकत्वे तत्स्फुरणाभावः, ज्ञानमात्रात्मकत्वे आनन्दाभावः इत्युभयथाऽपि मोक्षस्यापुरुषार्थत्वं स्यात्, परमतेऽपि सुखप्रकाशस्य पुरुषार्थत्वात्, ज्ञानानन्दोभयात्मकत्वे तु सिद्धमेकस्याप्यनेकत्वम् । एवं च यथा नवमे "मेधपतये मेधं मेधपतिभ्यां मेधम्" इत्यत्र मेधपतिशब्दार्थयोरग्नीषोमयोरेकवचननिर्वाहाय देव-

प्रकाशः

दभेदैकत्वाधारतावगमादिति यावत्" इत्यादिना प्रकृतवाक्य एव द्वित्वैकत्वयोरैकाधिकरण्यं प्रमितमित्यविरोध उक्तः । तथाऽपि तस्य स्पष्टत्वाद्वा विचारहीनवाक्यान्तरेऽपि प्रमितत्वमस्तीति भावेन वा "अयं वै हरयः" इत्यादिश्रुत्यन्तरोक्तिः । सुधायां प्रमितत्वोक्तावपि कथं निर्वाह इति शङ्कापि, "विरोधं तु" इत्यादिनाऽपाकृता । इदानीं

आत्माऽन्तरात्मेति हरिरेक एव द्विधा स्थितः ।

इति भाष्यानुरोधेन 'आत्मानौ' इति सौत्रपदसूचितपरिहारमाह— **किञ्चेति** । सिद्धमेकस्यप्यानेकत्वमिति सत्यं, कथं निर्वाह इति चेद्विशेषबलादित्येको निर्वाहः प्रागुक्तः । अन्यमपि दृष्टान्तपूर्वकमाह— **एवञ्चेति** । एकस्यानेकत्वे प्रमिते सतीत्यर्थः । नवमे तृतीयपादे "मेधपतित्वं स्वामिदेवतस्य समवायात्सर्वत्र च प्रयुक्तत्वात्तस्य चान्याय्यनिगदत्वात्सर्वत्रैवाविकारः स्यात्" इति द्वादशेऽधिकरणे चिन्तितम् । अग्नीषोमीये पशावध्रिगुप्रैषे "आशासाना मेधपतिभ्यां

प्रकाशः

मेधं" इति क्वचिच्छाखायां श्रुतम् । क्वचित्तु "मेधपतये मेधं" इति । तत्र किमुभयोर्विकृतिष्वविकारः, उत द्विवचनस्य देवतापर ऊहः, एकवचनस्य तु यजमानपर ऊहः, अथवोभयोः यजमानपर ऊहः, किं वोभयोर्देवतापर ऊह इति चतुर्धा संशये, मेधपतिशब्देन मेधस्य पशोः स्वामी यजमानः देवताभूतौ चाग्नीषोमौ चेत्युभयेऽप्युच्यन्ते, तेन द्विवचनमेकवचनं चान्याय्यनिगदमित्यनूह इत्येकः पक्षः । सम्भवत्यर्थपरत्वे अन्याय्यनिगदत्वायोगात्प्रकृतौ द्विवचनान्तो देवतावचनः, तेनासौ देवताविवृद्धावूहितव्यः, एकवचनान्तस्तु यजमानवचनः, तेन तद्विवृद्धावूहितव्य इति द्वितीयः । एकोऽयं मन्त्रः शाखाभेदेन किञ्चिद्भिन्नः श्रुतः, तेन यजमानपरत्वे मेधपतये यो मेधः पशुस्तमाशासाना इति सम्बन्धः, देवतापरत्वे मेधपतिभ्यामाशासाना इति । न चैकस्य वाक्यस्य वचनव्यक्तिद्वयं सम्भवतीत्युभाभ्यां यजमानस्य वा देवताया वाऽनियमेनाभिधानं, तत्र देवतापरत्वेऽग्नीषोमयोर्द्वित्वादेकवचनमयुक्तं, यजमानपक्षे तु द्वित्वं पत्न्यभिप्रायत्वेन अवकल्पत इति, प्रकृतौ स्वामिपरावुभावपि स्वामिवशादूहितव्याविति तृतीय इति प्राप्ते, मेधमाशासाना इत्युक्ते किमर्थमाशासाना इत्यपेक्षा भवति, तत्र मेधपतिभ्यामाशासाना इत्यपेक्षितार्थपूरणाय सम्बध्यते, न च यजमानायासावाशास्यते, तस्यैव स हि देव-

चन्द्रिका

तात्वेनैकत्वम्, देवतात्वस्य व्यासक्तत्वात्, द्विवचननिर्वाहाय तु देवतात्वाधिष्ठानरूपेण द्वित्वमिति द्वित्वैकत्वयोस्समुच्चयः, तथेहापि ब्रह्मणस्स्वरूपेणैकत्वं, रूपविशेषेण तु द्वित्वमिति श्रौतयोर्द्वित्वैकत्वयोः समुच्चयोऽस्तु, "इन्द्रोमायाभिः पुरुरूप ईयते" "यदेकमव्यक्तमनन्तरूपम्" "एकं रूपं बहुधा यः करोति"

पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः ।

इत्यादिश्रुतिस्मृतिभिरेव समुच्चयावगतेः । तदेतदभिप्रेत्योक्तमनुव्याख्याने—"द्वित्वं चैकस्य युज्यते" इति । न्यायविवरणे च—

प्रकाशः

ताभ्यामाशास्यते, अतो देवतावचनं, एकवचनं त्वग्नीषोमयोरुभयोर्व्यासक्तं देवतात्वं, तेन देवतात्मना तयोरेकत्वात् तदभिप्रायम्, द्विवचनं तु 'अग्नीषोमौ देवते' इति वदधिष्ठानापेक्षं, तेन द्विवचनमधिष्ठानसङ्ख्यावशात्, एकवचनं तु देवतासङ्ख्यावशाद्विकृतिषूहितव्यमिति सिद्धान्त इति । एवञ्च यथा ब्रह्मणः स्वरूपेणैकत्वेऽपि ज्ञानानन्दोभयात्मकत्वेनानेकत्वं मायिनां मते, यथा च मीमांसकमते 'मेधपतये' इत्यादौ द्वित्वैकत्वयोर्देवतात्वादिरूपभेदेनोपपत्तिस्तथेहापीत्यर्थः । ननु तत्र वचनद्वयेन द्वित्वमेकत्वं चावगतमित्यत आह—इन्द्र इति । तदेतदिति । प्राचीनमिदं चेति मतद्वयमभिप्रेत्येत्यर्थः । अन्त्यपक्षं मूलारूढं करोति—**न्यायविवरणे चेति** । एतेन "द्विवचनं द्विरूपाभिप्रायेण" इति टीका न्याय-

चन्द्रिका

"द्विवचनश्रुतेरपि न निरवकाशत्वं, विष्णोरेव द्विरूपत्वात्" इति। "न सङ्ख्योपसङ्ग्रहादपि नानाभावात्" इत्यत्र तु निर्भेदस्य ब्रह्मणः आधाराधेयभावानुपपत्त्याशङ्का निर्भेदत्वे ऽप्यनेकत्वस्यापि सत्त्वात् तन्मात्रेणाधाराधेयभावोपपत्तिरिति समाधास्यते, न तु अत्रेव एकस्यानेकत्वानुपपत्त्याशङ्का, येन पुनरुक्तिः स्यात् । अत एव तत्र टीका "आधाराधेयत्वादिलिङ्गेन अन्यत्रैवप्रसिद्धानां पञ्चज-

प्रकाशः

विवरणमूलेति सूचितम् । नन्वत्रैव द्वित्वस्य भगवति व्युत्पाद्यत्वेऽत्रैव चतुर्थपादे "न संख्योपसङ्ग्रहादपि नानाभावादतिरेकाच्च" इति तृतीयेऽधिकरणे

यस्मिन् पञ्च पञ्च जना आकाशश्च प्रतिष्ठितः ।
तमेव मन्य आत्मानं विद्वान् ब्रह्मामृतोऽमृतम् ॥

इति वाक्ये 'पञ्च पञ्च' इति वीप्सया प्रतिशरीरं पञ्चत्वसङ्ख्याविशिष्टतया जनशब्देनोक्तः किं विष्णुरन्यो वेति संशये, पञ्चजनशब्दस्य बहुत्वसङ्ख्याविशिष्टवस्तुवाचित्वाद्बहुत्वस्येश्वरे विरुद्धत्वादन्य इति प्राप्ते, स्वगतभेदशून्यस्यापि नानारूपत्वेन बहुत्वसङ्ख्योपसङ्ग्रहाविरोधाद्विष्णुरेवेति सिद्धान्तितत्वेन तेन गतार्थमिदमित्यत आह—न सङ्ख्येति । तत्र न बहुत्वानुपपत्तिः पूर्वपक्षयुक्तिः, किन्तु 'यस्मिन्' इति सप्तम्या निर्दिष्टस्य "तमेव" इति वाक्यशेषबलेन विष्णुत्वात्तदाधेयतयोक्तानां पञ्चजनाकाशशब्दोक्तानां न विष्णु-

चन्द्रिका

नादिशब्दानां" इति । यद्वा एकस्यानेकत्वमपि तत्र सिद्धान्ते व्युत्पाद्यम् । अत एव तत्र "बहुरूपत्वादधिकरणाधेयत्वादिकं तस्यैव युज्यते" इति न्यायविवरणे अनेकत्वसंङ्क्षचोक्त्यर्थ आदिशब्दः । अत्र तु कर्मबन्धरहितस्यापि भोक्तृत्वमात्रमिति भेदः । तत्राऽऽद्यपक्षे "न संख्या" इति सूत्रे सङ्ख्योपसङ्ग्रहशब्दोक्ता एकस्यानेकत्वानुपपत्तिः पूर्वपक्षेऽभ्युच्चययुक्तिः, अपिशब्दोक्ताधाराधेयभावानुपपत्तिस्तु मूलयुक्तिः । द्वितीयपक्षे तु "गुहां प्रविष्टौ" इति सूत्रे "आत्मानौ

प्रकाशः

त्वमेकस्यैवाधाराधेयभावायोगादिति प्राप्ते, अत्र सिद्धेनानेकत्वेन तत्समाधानं तत्र करिष्यते । अत एव तत्र टीका "न ह्येकस्यैवाधाराधेयभावो युज्यते" इत्यादि । न त्वनेकत्वं व्युत्पाद्यते, येन पौनरुक्त्यमित्यर्थः । एतेन न्यायविवरणटीकायां आनन्दमयनयेन गतार्थत्वशङ्का स्यादिति तु दिक्प्रदर्शनपरमिति भावः । ननु तत्र टीकायां न्यायविवरणेच 'आधाराधेयत्वादि' इत्यादिपदास्वारस्यं, टीकायां बहुत्वानुपपत्त्या पूर्वपक्षकरणं चास्वरसमित्यतः, सर्वस्वारस्यायाह— **यद्वेति** । कथं तर्ह्यपौनरुक्त्यमित्यत आह—**अत्र त्विति** । पक्षद्वयेऽप्युभयत्रानेकत्वोक्तेरपौनरुक्त्यं स्पष्टयति—**तत्राद्य इति** । सङ्ख्योपसङ्ग्रहादपि न विरोध इत्युक्त्या पूर्वपक्षे सङ्ख्यानुपपत्तिरर्थादुक्तेत्यर्थः । **अभ्युच्चयेति** । यथा परमते ईक्षतिनये प्रायपाठे निरस्तेऽप्यभ्युच्चयत्वेन "अत एव प्राणः" इत्यत्र तदुक्तिः, यथा

चन्द्रिका

हि" इति द्विवचनेन आत्मान्तरात्माख्यरूपद्वयोक्तिः सिद्धान्ते ऽभ्युच्चययुक्तिः, आदेयं मातीति व्युत्पत्त्या आत्मशब्दोक्तं शुभभोक्तृत्वं मूलयुक्तिः। यद्वा—अत्र भोक्तृत्ववदनेकत्वे व्युत्पादितेऽपि न तत्र केवलं आधाराधेयभावानुपपत्तिशङ्का, किन्तु द्वित्वयुक्तस्यास्तु ब्रह्मत्वं, गुहाप्रविष्टत्वादिलिङ्गात्, पञ्चत्वयुक्ते तु न ब्रह्मलिङ्गाद्यस्ति, इत्येकस्यानेकत्वानुपपत्तिरूपसामान्यन्यायस्य अनपवाद इति शङ्का, "प्राणस्य प्राणम्" इत्यादि ब्रह्मलिङ्गानि सन्तीत्यादि समाधानं चेत्याद्यूह्यम्।

प्रकाशः

वा "सर्वत्र" इति नये स्वमते हेत्वन्तरेण पूर्वपक्षे चक्षुर्मयत्वादेरभ्युच्चयत्वेनोक्तिः, तथैव सुधायामुक्तेः, तथेहापीत्यर्थः। "प्राणादयो वाक्यशेषात्" इति तत्रत्यगुणसूत्रव्यावर्त्यपूर्वपक्षानुरोधेन पक्षान्तरमाह–यद्वात्रभोक्तृत्ववदिति। 'किं तु' इत्यस्य 'अनपवादः' इत्यन्वयः। अत एव तत्र टीकायां "ऋतं पिबन्तावित्यादाविव स्वगतभेदशून्यस्यापि परमात्मनो बहुरूपत्वेन बहुत्वोक्तिः किन्न स्यादिति चेन्न, प्रतिशरीरमात्माऽन्तरात्मेतिवद्बहुत्वे मानाभावात्" इत्युक्तमिति भावः। ब्रह्मलिङ्गानीति। प्राणादीनां प्राणत्वादिप्रदत्वलिङ्गानीत्यर्थः। इत्यादीत्यादिपदेनाधाराधेयभावोऽपि रूपभेदाद्युज्यत इति समाधानं गृह्यते। इत्याद्यूह्यमिति। अत्रैकस्यानेकत्वे आत्मान्तरात्मेतिवत्तत्र प्रतिशरीरं बहुत्वे मानं नेति शङ्कायां

चन्द्रिका

"नाणुरतच्छ्रुतेः" इत्यत्र तु "व्याप्ता ह्यात्मानश्चेतनाः" इति वाक्ये ब्रह्मलिङ्गाभावादनपोदितेन बहुत्वेन जीवस्य प्राप्तत्वात् व्याप्त्यणुत्वश्रुत्योर्विरोधे शङ्किते, "स आत्मेदं सृजति" इत्यादिपूर्ववाक्ये ब्रह्मलिङ्गसद्भावात् "तदयं प्राणोऽधितिष्ठति" इत्यत्रैकवचनेन निर्दिष्टे "आ तेन यातं" इति द्विवचनवदत्रापि "स आत्मा" इत्येकवचननिर्दिष्टे "व्याप्ता ह्यात्मानः" इति बहुवचनं, ततो न विरोध इति इति वक्ष्यत इति न तेनापि गतार्थता ।

प्रकाशः

शरीरान्तर्गताकाशप्राणादिपञ्चजननियामकत्वेन तेषु नानाभावस्य न्यायप्राप्तत्वाद्बहुत्वं सिद्धमिति समाधानमूह्यमित्यर्थः । ननु द्वितीयस्य तृतीयपादे "उत्क्रान्तिगत्यागतीनां" इति नये जीवः किं व्याप्तोऽथाणुरिति संशये "व्याप्ता ह्यात्मानश्चेतना निर्गुणाश्च" इति श्रुतेर्बहुवचनावरुद्धाया ईश्वरविषयत्वायोगेन जीवविषयत्वावश्यम्भावेन श्रुतिबलाद्व्याप्ता इत्याशङ्कातन्निरासयोः "नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात्" इति गुणसूत्रेण कृतत्वात्तेन पौनरुक्त्यमित्यत आह—**नाणुरिति** । **अनपोदितेनेति** । अत एव तत्र टीका "न चेश्वररूपबाहुल्यार्था, बाधकं विना श्रुतेर्बाधायोगात्" इतीति भावः । "अणुर्ह्येष आत्मा यं वा एते सिनीतः पुण्यं चापुण्यं" इत्यणुत्वश्रुतिर्ज्ञेया । ऐतरेयके "अथ देवरथः" इत्युपक्रम्य "तदयं प्राणोऽधितिष्ठति" इत्युक्त्वा "तदुक्तमृषिणा—

चान्द्रिका

सुखदुःखहेतुत्वरूपं गौणं छायाऽऽतपत्वं च प्रतियोगिभेदेन अविरुद्धम्। अत्र च सूत्रे यद्यपि समन्वेतव्यं ऋतपातृत्वं "ऋतं पिबन्तौ" इति साक्षादेव वक्तव्यम्, तथाऽपि गुहाप्रविष्टत्वरूपहेतुमपि वक्तुं ऋतपातृत्वसमानाधिकरणगुहाप्रविष्टत्वोक्तिद्वारा तदुक्तिः।

प्रकाशः

आ तेन यातं मनसो जवीयसा" इति द्विवचनान्तो मन्त्र उदाहृतः। स यथा तद्विषयस्तद्वदित्यर्थः। एवं द्विवचनं न बाधकमित्युक्तं, तत्प्रसङ्गप्राप्तपौनरुक्त्यं च व्युदस्तम्। अधुना प्रागुक्तच्छायात्वमपि न बाधकं, तस्याविद्याश्रयत्वरूपत्वाभावात्, किन्तु यथा छाया प्राणिनां सुखहेतुस्तथा विदुषां सुखहेतुत्वादातपवदज्ञानां दुःखहेतुत्वाच्छायातपावित्युच्येते रूपविशेषावित्याशयेन टीकोक्तमेवाह–सुखेति। "स च्छायेव विदुषां प्रभुः। आतपः पापिनां" इति तद्वाप्योक्तस्मृतेः, परपक्षेऽपि च्छायातपाविति शब्दयोरविद्याविद्यावद्वाचकत्वादिति भावः। तदुक्तं तत्त्वप्रदीपे—"अमरासुराणां छायाऽऽतपरूपाविति योजनायोगादमराणामाह्लादकावसुराणां तापकावित्यर्थः" इति। एतेन "च्छायाऽऽतपत्वंचान्यत्र व्याख्यातम्" इति न्यायविवरणटीका विवृता। अतो बाधकाभावाद्गुहाविष्टत्वादिसाधकभावात् पिबन्तावीश्वररूपविशेषावेवेति स्थितम्। सूत्राक्षरासामाञ्जस्यमाशङ्क्याह—अत्रेति। 'ऋतं पिबन्तौ' इत्येवोक्तौ न लिङ्गोक्तिस्स्यादिति भावः। यद्यपि 'ऋतं पिबन्तौ' इत्युक्तादृतपातृत्वद्वित्वरूपपूर्वपक्षयुक्त्योस्सूचन-

चन्द्रिका

यद्यपि चात्र "तत्तु समन्वयात्" इत्यतोऽनुषक्तस्य तच्छब्दस्य पूर्वत्राऽऽनन्दमयस्तद्ब्रह्मेत्यादिरूपेण अन्वयवत् उत्तरत्राप्यन्तरस्तद्ब्रह्मेत्यादिरूपेण अन्वयवच्च अत्राप्यन्वयस्सिद्धः, तथाऽपि सूत्रे श्रौत द्विवचनस्य गतिं वक्तुं आत्मान्तरात्माख्यरूपद्वयवाचिद्विवचनान्तात्मशब्दप्रयोगः । अत्र च विषयवाक्यक्रमात्सूत्रक्रमः ॥

अन्ये तु—ऋतं पिबन्तौ बुद्धिजीवौ, गुहाप्रविष्टत्वादेस्तत्र सम्भवात्सर्वगते ब्रह्मण्यसम्भवाद्बुद्धेरपातृत्वेऽपिच्छत्रिन्यायेन पिबच्छब्द

प्रकाशः

मस्ति, तथाऽपि पूर्वपक्षयुक्तितोऽपि सिद्धान्तयुक्तिसूचनस्य ज्यायस्त्वादिति भावः । धर्मिनिर्देशे प्रयोजनमुक्त्वा साध्यनिर्देशस्यापि तदाह—**यद्यपीति**। विच्छेदशङ्कानिवृत्त्यर्थमुक्तं—**पूर्वत्रोत्तरत्रापीति**। "द्विवचनस्य गतिं वक्तुं" इत्युपलक्षणम् । 'आदेयमुपादेयं सुखं मात्यनुभवति' इत्युत्तरनयसुधोक्तनिर्वचनेन 'ऋतं पिबन्तौ' इति प्रातिपदिकार्थोक्तिद्वाराऽनशनश्रुतेर्गतिं वक्तुं चेत्यपि बोध्यम् । **अत्रेति**। पूर्वं "ऋतं पिबन्तौ" इति वाक्यं, उत्तरं तु "यस्सेतुः" इति वाक्यमिति तत्क्रमात्क्रमः । यद्यपि श्रुतिरूपसाधकोक्तिपरत्वाद्द्वितीयस्य प्राथम्यमुचितम्, तथाऽपि तस्योत्तरवाक्यगतत्वेन विषयवाक्यगतत्वाभावात्क्रम इति भावः ।

अन्ये त्विति। ऋतं पिबन्तौ बुद्धिजीवौ जीवेश्वरौ वेति संशये, बुद्धिजीवावेव, गुहाविष्टत्वलिङ्गात्, नियतहृदयगुहाविष्टत्वस्य

चन्द्रिका

इति प्राप्ते, ऋताख्यकर्मफलपानलिङ्गेन एकस्य जीवत्वे निश्चिते द्वितीयस्तज्जातीयश्चेतनः परमात्मैव, न त्वचेतना बुद्धिः, 'अस्य गोर्द्वितीयेन भाव्यम्' इत्युक्ते गवान्तरेणैव अश्वादिना सद्वितीयत्वाप्रतीतेः। एवं च प्रथमावगतऋतपानेन पिबतोर्जीवात्मपरमात्मत्वे

चन्द्रिका

परिच्छिन्नयोर्बुद्धिजीवयोरेव युक्तत्वात्, सर्वगते ब्रह्मणि तदयोगात्, "सुकृतस्य लोके" इति सुकृतलोकावस्थानेन कर्मगोचरानतिक्रमस्य जीवस्य भोक्तृतया बुद्धेर्भोगसाधनतया तयोरेवोपपत्तेः। छायात्वरूपतमस्त्वस्य जडतया बुद्धौ, प्रकाशत्वरूपातपत्वस्य जीवे च सम्भवाच्च बुद्धेरपातृत्वेऽपि पातृजीवसाहचर्याच्छत्रिवदुपपत्तेः तावेव पिबन्तावि-ति प्राप्त इत्यर्थः। तदुक्तं भामत्यां—

नियताधारता बुद्धिजीवसंवेशिनी नहि।
क्लेशात्कल्पयितुं युक्ता सर्वगे परमात्मनि॥

इति।

ऋतपानेन जीवात्मा निश्चितोऽस्य द्वितीयता।
ब्रह्मणैव सरूपेण न तु बुद्ध्या विरूपया॥
प्रथमं सद्वितीयत्वे प्रमाणावसिते सति।
गुहाश्रयत्वं चरमं व्याख्येयमविरोधतः॥

इति भामतीं हृदि कृत्वा सिद्धान्तमनुवदति—**ऋताख्येति**।

चन्द्रिका

निश्चिते चरमं गुहाप्रविष्टत्वादिकं कथं चिन्नेयम्। ब्रह्मणोऽपातृत्वेऽपि च्छत्रिन्यायेन पिबच्छब्द इति सिद्धान्त इत्याहुः। अत्र ब्रूमः—

बुद्धिस्थत्वाद्भोक्तृतादेः पिबन्त्स्याच्चेतनः कथम्।
चित्त्वेऽपि द्वित्वपूर्वस्याबाधार्थं सद्वितीयता॥
विरूपयाऽपि बुद्ध्याऽस्तु किञ्च बुद्धेस्सरूपता।
वर्तते सह जीवेन पारतन्त्र्यादिरूपतः॥

त्वन्मते जपाकुसुमगतस्य लौहित्यस्य स्फटिक इव बुद्धिगतस्य कर्तृत्वभोक्तृत्वादेः जीवेऽध्यासात्, कथं पातृत्वलिङ्गेनैकस्यापि चेतनत्वम्, येन तत्साजात्येन द्वितीयोऽपि चेतनः स्यात्। न हि लोके देहे आत्मत्वमध्यस्तमिति "आत्मा द्रष्टव्यः" इत्यादि-

प्रकाशः

कथञ्चिदिति। 'सालिग्रामे हरिः' इतिवदुपलब्धचर्यो देशविशेषोपदेशः। सुकृतलोकवृत्तित्वमपीश्वरे छत्रिन्यायेन नेयम्, छायातपत्वं च जीवस्याविद्याश्रयतया ब्रह्मणस्तदनाश्रयतया नेयमित्यर्थः। पिबतोश्चेतनत्वेऽवगते तदनुरोधात्सजातीयस्य ग्रहणं चरमस्य बाध इत्यादि स्यात्, तदेव न सिद्धमित्याह—**बुद्धिस्थत्वादिति**। टीकारीत्याऽभ्युपेत्याह—**चित्त्वेऽपीति**। स्वमतेऽभावाद्धेतोरसिद्धिमाशङ्क्य पूर्वार्धं व्याचष्टे—**त्वन्मत इति**। "एतत्सर्वं मनः" इत्यादिश्रुतेरिति भावः। नन्वारोपितपातृत्वेनापि जीव एव पिबच्छब्देन बोध्यत इत्यत आह—**न हीति**। मन्मतेऽपि केवलबुद्धित्वमसिद्धं

चन्द्रिका

श्रुतावात्मशब्दो देहिपरः। भोक्तृत्वादेश्चिदचित्संवलनधर्मत्वे अन्योन्यधर्माध्यासोक्तिरयुक्ता स्यात्। एवं च परमते बुद्धेरेव पातृत्वेन प्रकृत्यर्थसम्भवात्, ज्ञानक्रियाशक्तिभेदेन प्रत्ययार्थस्य द्वित्वस्यापि कथञ्चित्सम्भवात्, प्राणसहिता बुद्धिरेव 'पिबन्तौ' इत्युच्यताम्। अथ द्वित्वे स्वारस्यमपेक्षसे, तर्हि आरोपितेन पातृत्वेन युक्तो जीवो बुद्धेर्द्वितीयः स्यात्, न तु तेनापि रहितं ब्रह्म। अथ श्रुतेरारोपितविषयत्वं न सहसे, तर्हि च्छत्रिन्यायेन पातृत्वरहितं सजातीयं जडान्तरमेव बुद्धेर्द्वितीयमस्तु, चेतनस्य परमात्मनस्तु न कथञ्चिदनुप्रवेशः। अस्तु वा जीवस्यापि पातृत्वम्, तथाऽपि 'गोर्द्वितीयेन' इत्यत्र द्वित्वस्य मुख्यस्य लाभात् सजातीयग्रहणम्। इह तु ब्रह्मग्रहणे जीवस्य ब्रह्माभेदात् न तात्त्विकं द्वित्वम्।

प्रकाशः

इत्यत आह—**भोक्तृत्वादेरिति**। **अन्योन्यधर्मेति**। "अन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्य" इति भाष्योक्तिरयुक्ता स्यादित्यर्थः। शक्तिभेदेऽपि न व्यक्तिभेद इति गुहाविष्टत्वमिव द्वित्वं न स्वरसमित्याशङ्क्याह—**अथेति**। 'तेनापि' आरोपितपातृत्वेनापि। **न कथञ्चिदिति**। पातृत्वेन वा सजातीयत्वेन वेत्यर्थः। "चित्त्वेपि" इति पादत्रयं व्याचष्टे—**अस्तु वेति**। कल्पितभेदस्य सत्त्वाद्द्वित्वं स्यादित्यत उक्तं—**न तात्त्विकं द्वित्वमिति**। अत्राप्यतात्त्विकमेव द्वित्वं बो-

चन्द्रिका

तथाच यथा 'चन्द्रस्सद्वितीयः' इति प्रमाणवाक्याद्विजातीयस्याप्यकल्पितभेदस्य नक्षत्रादेरेव धीः, न तु सजातीयस्यापि कल्पितभेदस्य चन्द्रान्तरस्य, तथाऽत्रापि चेतनत्वेन जीवस्य सजातीयत्वेऽपि कल्पितभेदस्य ब्रह्मणो न धीः, किन्तु विजातीयत्वेऽपि धर्मिसमसत्ताकभेदाया बुद्धेरेव। न हि द्वित्ववत् साजात्यं शाब्दम्, येन तदनुरोधेन द्वित्वं बाध्येत। अपि च 'अस्य जरठस्य गोर्द्वितीयेन बलवता भाव्यम्' इत्युक्ते चरमस्यापि शाब्दस्य बलवत्त्वस्याबाधार्थं प्रथमेन जरठत्वेन तदाक्षिप्तदुर्बलत्वेन वा साजा-

प्रकाशः

ध्यतां इत्यत आह—**तथा चेति**। एतेन, "द्विवचनमिति चेत्, तर्हि जीवेश्वराङ्गीकारोऽपि न स्यात्, तयोरैक्याङ्गीकारात्। काल्पनिकोऽस्ति तयोर्भेद इति चेत्, तर्हि ईश्वरस्यैवाद्भुताचिन्त्यैश्वर्यवशाद्विरूपत्वेन द्वित्वमुपपाद्यताम्" इति सुधावाक्ये ईश्वरस्यैवास्तित्वत्यापादने बीजमुक्तं भवति। ननु बुद्धावपि कल्पितभेदवत्त्वमविशिष्टमित्यत आह—**धर्मिसमेति**। ननु प्रथमावगतं साजात्यं मुख्यमुपेत्य चरमावगतं द्वित्वमेव गुहाविष्टत्वमिवाताच्त्विकं गृह्यतामित्यतोऽस्य शाब्दत्वात्साजात्यस्य तदभावादित्याह—**न हीति**। किं त्वाक्षिप्तमित्यर्थः। यदपि प्रथमेन चरमस्य गुहाप्रविष्टत्वस्य बाध इति, तदप्ययुक्तमित्याशयेन, 'द्वित्वपूर्वस्य' इत्यत्र पूर्वपदार्थं विवृण्वन्नाह—**अपि चेति**। 'जरठस्य' वृद्धस्य, प्रथमेन 'श्रुतेन' इति शेषः। जरठस्य

चन्द्रिका

त्यस्येव प्रकृतेऽपि चरमस्यापि शाब्दस्य गुहाप्रविष्टत्वस्य अबाधार्थं प्रथमपातृत्वाक्षिप्तेन चेतनत्वेन साजात्यस्यैव बाधोऽस्तु। न हि "यो वेद निहितं गुहायाम्" इत्यादिश्रुतिसिद्धमपि ब्रह्मणो गुहानिहितत्वं सर्वगतस्य ब्रह्मणोऽर्भकौकस्त्वं न पारमार्थिकमिति वदतस्तव मते तात्त्विकम्। अस्तु वा जीवस्य ब्रह्मणा सद्वितीयत्वेऽपि द्वित्वादेरबाधः, तथाऽपि कर्मफलभोक्तृत्वेन चेतनत्ववत्पारतन्त्र्यस्यापि आक्षेपात् परतन्त्रा बुद्धिः जीवस्य द्वितीया स्यात्, चेतनस्य भोक्तृत्वनियमाभावेऽपि भोक्तुश्चेतनत्वनियमवत्

प्रकाशः

द्वितीयो बलवानजरठ एवोपादीयते, तद्वदिह गुहाप्रविष्टत्वस्य त्वन्मते परिच्छिन्नयोर्बुद्धिजीवयोरेव मुख्यत्वेन सर्वगते ब्रह्मण्यमुख्यत्वेन ब्रह्मग्रहणे तद्बाधस्स्यात्। स च न युक्तः, आक्षिप्तेन शाब्दबाधस्यान्याय्यत्वात्। अतस्तदबाधाय द्वितीया विरूपाऽपि बुद्धिरेव ग्राह्येत्यर्थः। ब्रह्मपक्षे गुहाविष्टत्वममुख्यं तात्त्विकं नेत्येतदुपपादयति—न हीति। "ब्रह्मणोऽर्भकौकस्त्वं न पारमार्थिकं" इति अर्भकौकस्त्वसूत्रगततदीयभाष्यानुवादः। "किञ्च बुद्धेः" इत्यादि पादत्रयं व्याचष्टे—अस्तु वेति। ननु चेतनस्यैव भोक्तृत्वे तेन व्यापकस्य चेतनत्वस्याऽऽक्षेपेऽपि कथं पारतन्त्र्यस्याक्षेप इत्यतोऽस्यापि तद्व्यापकत्वात्समव्याप्तेस्तूभयत्राप्यभावादिति भावेनाह—**चेतनस्येति**। कूटस्थचेतने तदभावादिति भावः।

चन्द्रिका

परतन्त्रस्य भोक्तृत्वनियमाभावेऽपि कर्मफलभोक्तुः पारतन्त्र्यनियमात्। सम्भवति च बुद्धेर्भोगकरणत्वात् 'काष्ठानि पचन्ति' इत्यादाविव कर्तृत्वोपचारः। 'गोर्द्वितीयेन' इत्यत्र तु गोत्वस्य शाब्दत्वात्तेनैव साजात्यं वाच्यमिति नातिप्रसङ्गः। छायातपत्वमपि चेतनाचेतनत्वादिना बुद्धिजीवादौ युक्तम्।

प्रकाशः

कर्मेति। कर्मवशत्वादिति भावः। ननु बुद्धेः पारतन्त्र्येण साजात्येऽपि करणभूतायाः कथं भोक्तृत्वेन 'पिबन्तौ" इति कर्तृकोटिनिवेश इत्यत आह—**सम्भवतीति**। तर्हि गवादावप्येवं सुवचत्वेन सजातीयस्य तत्र धीर्न स्यादित्यत आह—**गोरिति**। ननु च्छायाऽऽतपत्वविशेषणाज्जीवेश्वरावित्युच्यत इत्यत आह—**छायेति**। 'बुद्धिजीवादौ चेतनत्वाचेतनत्वादिना' इति यथायोगमन्वयः। आदिपदेन बुद्धिप्राणयोर्ग्रहणम्। छायातपत्वं च तमस्त्वप्रकाशत्वादिना कथञ्चिदुपेयमिति। एवं "अथ द्वित्वे स्वारस्यं" इत्यादिना ग्रन्थेन "किञ्च पिबतोर्बुद्धिजीवत्वे किं छिन्नं किं वा जीवेश्वरत्वे लब्धं" इति टीकावाक्यस्य, प्रातिपदिकार्थपातृत्वस्य प्रत्ययार्थद्वित्वस्य च बुद्धिजीवपक्षे न च्छेदः, जीवेश्वरत्वे त्वीश्वरे अरोपितपातृत्वस्याप्यभावेन प्रातिपदिकार्थस्य, जीवेश्वरयोरैक्याङ्गीकारेण प्रत्ययार्थद्वित्वस्य च लाभो नास्तीति, तथा बुद्धिजीवत्वे श्रौतं गुहानिविष्टत्वं न च्छिन्नं, जीवेश्वरत्वे तु सर्वगतेश्वरेऽर्भकौकस्त्वरूपं गुहाविष्टत्वं नेति तन्न लब्धम्, साजात्यलाभस्त्वप्रयोजकः, साजात्यस्याश्रौतत्वादिति, तथा

चन्द्रिका

किञ्च पूर्वपक्षे सिद्धान्ते च बुद्धौ ब्रह्मणि च च्छत्रिवल्लक्षणैव, पाता तु जीव एवेति प्रमेये विशेषाभावेन व्यर्था चिन्ता ।

मात्रयाऽपि प्रमेयस्य भेदाभावे हि वादिनोः ।
शब्दमात्राय कलहो न युक्तो मूर्खयोरिव ॥

प्रकाशः

बुद्धिजीवत्वे पारतन्त्र्यादिना साजात्यमपि न च्छिन्नं, चेतनाचेतनत्वादिना छायातपत्वं च न च्छिन्नं, जीवेश्वरत्वे तु तयोरैक्येन न मुख्यं साजात्यादि लब्धमिति च त्रेधा तात्पर्यं निरूप्याधुना "परेणापि जीवे तदभ्युपगमादीश्वरे समन्वयसिद्धिरिति चेन्न, ईश्वरे लिङ्गस्यौपचारिकत्वाभ्युपगमात्" इति तदुत्तरटीकावाक्यानुरोधेन तस्य तात्पर्यान्तरं व्यनक्ति—**किञ्चेत्यादिना** । ननु तेन बुद्धि जीवावित्युक्तं, मया तु जीवेश्वरावित्यतोऽयमेव विशेष इत्यत आह—**मात्रयेति** । ब्रह्मेति शब्दमात्रमेतदित्यर्थः । एतेन त्वन्मते मन्मत इव गुहाविष्टत्वस्याहेतुत्वात् ब्रह्मग्रहणेऽपि तत्प्रातिपदिकार्थाक्षिप्तसाजात्यस्यैव हेतुत्वात् सूत्रे लाघवाय सुबोधाय साजात्यसूचनाय च प्रथमानुल्लङ्घनद्योतनाय च 'पिबन्तौ' इत्येव निर्देशः स्यात् । न च सर्वगतस्य ब्रह्मणो गुहावच्छिन्नत्वायोगात्, गुहागतौ बुद्धिजीवौ न ब्रह्मेति पूर्वपक्षयुक्तिसूचनाय तदुपपादनं, "नियताऽऽधारता बुद्धिजीवसंवेशिनी" इति भामत्युक्तेरिति वाच्यं, "जीवमुख्यप्राणलिङ्गादिति चेत्"

चन्द्रिका

यच्चोक्तं "विशेषणाच्च" इति सूत्रस्य उत्तरवाक्ये "आत्मानं रथिनं विद्धि" इति जीवस्य गन्तृत्वेन,

सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ।

इति परमात्मनश्च गम्यत्वेन विशेषणात् तावेवात्र पिबन्तावित्यर्थः इति, तन्न, जीवस्य रथित्वेन "बुद्धिं तु सारथिं विद्धि" इति बुद्धेश्च सारथित्वेन विशेषणात्तावेव अत्र पिबन्तावित्यपि प्रसङ्गात् । किञ्च 'पिबन्तौ' इत्यस्य लक्षणया ब्रह्मपरत्वेऽपि जीवपरत्वस्यापि सत्त्वात्, इह चाध्याये "ईक्षतेः" इत्यादौ सदादिशब्दानामन्यपरत्वं निरस्य ब्रह्मपरत्वस्यैवोक्तेरस्याध्यायासङ्गतिः ।

प्रकाशः

इत्यादाविव पूर्वपक्षपरत्वद्योतकनिर्देशाभावात् । "सम्भोगप्राप्तिरिति चेत्" इत्यतः चेदित्यनुकर्षस्य क्लिष्टत्वात् । "अर्भकौकस्त्वात्" इति पूर्वनयसूत्रेण गुहावच्छेदकनिबन्धनशङ्कायाः परिहृतत्वाच्चेत्याद्यसूत्राक्षरासामञ्जस्यं स्पष्टमिति भावेन, विशेषणबलाज्जीवेश्वरावत्र प्रतिपाद्यौ वाच्याविति शङ्कानिरासाय द्वितीयसूत्रार्थमप्यनूद्य निराह—**यच्चेति** । "इति व्याख्यानमयुक्तं, समन्वयासङ्गतत्वात्" इति टीकां व्यनक्ति—**किञ्च पिबन्तावित्यस्येति** । ननु जीवपरत्वेऽपि ब्रह्मपरत्वमात्रेण सङ्गतिस्स्यादित्यत आह—**इह चाध्याय इति** । ननु जीवेश्वरभेदस्यासत्यत्वाज्जीवपरत्वद्वारा ब्रह्मण्येव समन्वयः

चन्द्रिका

न चोक्तरीत्याऽस्य साक्षात्सङ्गतिसम्भवे प्रासङ्गिकसङ्गतिर्युक्ता। यथाहुः— "साक्षाद्युक्तं न प्रसज्यते" इति। तदेतदभिप्रेत्योक्तं भाष्ये—"न च जीवे समन्वयोऽभिधीयते" इति। अत्रापि परमतेऽपि जीवब्रह्मणोः भोक्तृत्वाभोक्तृत्वाभ्यां भेदसिद्धिः॥

केचित्तु—"अत्ता" इत्यादिचतुस्सूत्री एकमधिकरणम्,

प्रकाशः

प्रसज्यत इत्यत आह—**न चेति**। अस्मद्रीत्या साक्षादित्यर्थः। यद्वा—देवताधिकरणमिव प्रसङ्गादिदमत्र निवेशितमित्यत आह—**न चेति**। 'प्रसज्यते' प्रसङ्गात्प्राप्यत इत्यर्थः।

केचित्त्विति। अत्रेदमधिकरणशरीरं—

यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः।

मृत्युर्यस्योपसेचनं........................॥

इत्यत्रौदनोपसेचनपदसूचितोऽत्ता जीवः परमात्मा वेति संशयेऽत्तृत्वस्य कर्मफलभोक्तृत्वरूपत्वात्तस्य च जीव एव सम्भवाज्जीव इति प्राप्ते, अत्तृत्वस्य ब्रह्मक्षत्रोपलक्षितचराचरग्रहणेन सर्वसंहर्तृत्वरूपत्वात्तस्य च ब्रह्मण्येव सम्भवात्,

महान्तं विभुमात्मानं मत्वा धीरो न शोचति।

नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन।

इति पूर्वत्र ब्रह्मप्रकरणे श्रुतस्य प्रसादादृते दुरवबोधत्वरूपलिङ्गस्येह "क इत्था वेद" इति श्रवणेन प्रत्यभिज्ञायमानतया ब्रह्मप्र-

चन्द्रिका

एकप्रकरणस्थवाक्यविशेषविषयाणां

प्रकाशः

करणत्वावगमाच्चं परमात्मैवात्ताऽत्रोच्यते । न च वाच्यं उत्तरत्र "ऋतं पिबन्तौ"इति वाक्ये कर्मफलभोक्तृत्वश्रवणेन बुद्धिजीवपरत्वं चावश्यं वाच्यं, ब्रह्मणः कर्मबन्धविधुरत्वात्, । एवञ्च प्रकरणाल्लिङ्गस्य बलवत्त्वेन ऋतपानाख्यलिङ्गेन "महान्तं" इति ब्रह्मप्रकरण विच्छिन्नं, व्यवहितत्वात्, "यस्य ब्रह्म च" इति वाक्यं तु सन्निहितत्वान्न विच्छिन्नमिति प्रागुक्तोऽप्यत्ता न परमात्मेति यतो गुहां प्रविष्टौ जीवात्मपरमात्मानावेव अस्मिन् प्रकरणे "गुहाहितं गह्वरेष्ठं" इति परस्य, "गुहां प्रविश्य तिष्ठन्तं" इति जीवस्य च गुहाविष्टत्वदर्शनात् । अस्मिन् प्रकरणे "मत्वा धीरो न शोचति" "आत्मानं रथिनं विद्धि" इत्यादिनोपास्यत्वोपासकत्वप्राप्यत्वप्राप्तृत्वविशेषणाच्च शेषभूतो जीवो द्वितीयः छत्रिवत्परमात्मैवात्मेति सिद्धान्त इति । तदुक्तं—

अत्ता खल्वोदनादेर्भवभुगिति कठश्रुत्यधीतोऽप्यसौ स्यात्
न स्यान्मृत्यूपसिक्तस्थिरचरनिखिलग्रासतस्तल्लयोक्तेः ।
जीवव्यावर्तनं च प्रकरणविदितं भोक्तृतोक्तिर्द्वयोस्तु
प्रेर्यत्वप्रेरकत्वप्रतिनियतरसाच्छत्रिनीत्याऽथवा स्यात् ॥

इति । तदेतत्परमते विषयवाक्यानानुगुण्यादिनोक्तदूषणगणेन दूषितप्रायं मत्वा, यदत्रैकाधिकरण्यसमर्थनं, तदपि निराचिकीर्षुः, श्रुतप्रकाशे दर्शितैमकाधिकरण्यसमर्थनमनुवदति—एकप्रकरणेति ।

चन्द्रिका

पादान्तराधिकरणान्तराऽव्यवहितानामुपजीव्योपजीवकभावेन परस्परान्वितार्थानां सूत्राणां विषयवाक्यभेदे सत्यपि भिन्नाधिकरणत्वायोगात्। अत्र "अत्ता" इत्यादिसूत्रद्वयविषयभूतं "यस्य ब्रह्म" इत्यादिवाक्यं, "गुहाम्" इत्यादिसूत्रद्वयविषयभूतं "ऋतं पिबन्तौ" इत्यादिवाक्यं च एकप्रकरणस्थं उपजीव्योपजीवकभावेनान्वितार्थं च। तथा हि—"ऋतं" इत्यादिवाक्यं यदि पूर्वपक्षरीत्या बुद्धिजीवविषयं स्यात्, तदा "ऋतं" इत्यादेरब्रह्मविषयतया "महान्तं विभुमात्मानं" इतिप्रस्तुतब्रह्मप्रकरणविच्छेदात्

प्रकाशः

'भिन्नाधिकरणत्वायोगात्' इत्यन्वयः। नन्वदृश्यत्वाधिकरणस्य द्युभ्वाद्यधिकरणस्य चार्थवणिकैकप्रकरणगतवाक्यविशेषविषयस्य भिन्नत्वं दृष्टमित्यत उक्तं पादान्तरेति। तत्रोभाभ्यां व्यवधानात् "यस्मिन् द्यौः" इत्यस्य ब्रह्मपरत्वेऽप्यदृश्यत्वादियुक्तस्याक्षरस्य ब्रह्मप्रकरणेऽपि तच्छेषतया प्रधानाद्युक्त्युपपत्त्या ब्रह्मताऽसिद्धेरुपजीव्योपजीवकभावाभावात्। अत एव "तद्धेतुव्यपदेशाच्च" "मान्त्रवर्णिकमेव च" इत्यादिसूत्राणां पूर्वापरबहुवाक्यविषयत्वेऽप्यव्यवहितत्वात्, परस्परोपजीव्योपजीवकभावेनान्वितार्थपरतया चैकाधिकरण्यम्। अन्यथा तत्रापि भेदः स्यादिति भावः। उपजीव्योपजीवकभावं श्रुतप्रकाशोक्तमेव दर्शयति—तथा हीति। पूर्वपक्षरीत्येति। सा रीतिः प्राङ्मया प्रदर्शिता। विच्छेदादिति।

चन्द्रिका

"ऋतं" इत्येनेन अव्यवहितपूर्वं "यस्य" इत्यादिवाक्यमपि व्यवहितेन "महान्तम्" इत्यादिना एकप्रकरणतां त्यक्त्वा, "ऋतं" इत्यादिना एकप्रकरणतामापन्नं सत् "ऋतं" इत्यादिवत् कर्मफलभोक्तृत्व रूपात्तृत्वप्रतिपादकतया जीवविषयं स्यात् । यदा तु "ऋतम्" इत्यादिकं सिद्धान्तरीत्या जीवब्रह्मविषयं, तदा तस्य ब्रह्मविषयतया ब्रह्म प्रकरणाविच्छेदात् "यस्य" इत्यादिकमपि संहर्तृत्वरूपात्तृत्वप्रतिपादकतया ब्रह्मविषयं स्यादिति पूर्वसूत्रद्वयार्थं प्रत्युत्तरसूत्रद्वयार्थस्य उपजीव्यत्वादित्याहुः । तन्न, अस्मन्मन्ते पूर्वसूत्रद्वयस्य बृहदारण्यकगत·

प्रकाशः

ऋतपानाख्यलिङ्गापेक्षया प्रकरणस्य दुर्बलत्वादिति भावः । ननु "ऋतं पिबन्तौ" इत्येतदब्रह्मविषयं सन्न "महान्तं" इतिप्रकृत ब्रह्मप्रकरणविच्छेदकं, किन्तु "यस्य ब्रह्म च" इत्यनेनैव विच्छेदकरं, "यस्य ब्रह्म च" इत्येतत्तु वाक्यमनेनाब्रह्मविषयेण विच्छिन्नं सत् "महान्तं" इत्यादिब्रह्मपरवाक्यैः "क इत्था वेद" इति लिङ्गकृतप्रत्यभिज्ञावशेनैकवाक्यतामापन्नं सद्ब्रह्मपरमेव स्यात् इत्यत आह—**ऋतमित्यनेनेति** । "महान्तं" इत्यस्य व्यवहितत्वात् "यस्य" इत्यस्याव्यवहितत्वादित्यर्थः । **ऋतमित्यादिनेति** । अव्यवहितेनेत्यर्थः । **सिद्धान्तरीत्येति** । उक्ता रीतिः प्राक् । **उपजीव्यत्वादिति** । उत्तरवाक्यस्याब्रह्मपरत्वे च पूर्वस्यापि तथात्वादित्यर्थः । **बृहदारण्यकगतेति** । तस्यैव सूत्रानुगुणत्वेनोदाहरणतौ·

चन्द्रिका

वाक्यविषयत्वेन, उत्तरद्वयस्य च काठकगतवाक्यविषयत्वेनैकप्रकरणस्थविषयत्वाभावात्। किञ्च "ऋतम्" इत्यादिकं "महान्तम्" इत्यस्य "यस्य" इत्यस्य च मध्ये यदि स्यात्, तदा—

विच्छिन्ना सामिधेनीनां निविद्भिः प्रक्रिया यतः।

न तु काम्यैः पुनः कल्पैः सन्धातुं सा हि शक्यते ॥

इत्युक्तन्यायेन मध्यस्थनिविद्भिस्सामिधेनीप्रकरणस्येव "ऋतं" इत्यनेन ब्रह्माविषयेण ब्रह्मप्रकरणस्य विच्छेद इति शङ्का स्यात्।

प्रकाशः

चित्यात् नास्मन्मतेऽयं दोषः, किन्तु मायिनां मत एव, पादान्त्यप्राणनय–"सर्वत्र" इतिनययोस्तादृशवाक्यविषयत्वेऽपि भिन्नपादस्थत्वादिति भावः। यदप्युपजीव्योपजीवकभावेनैकाधिकरण्यसमर्थनं, तदप्ययुक्तमिति वक्तुं, यत्तावदुक्तं "ऋतं" इत्यादिकं "यस्य" इत्यस्य "महान्तं" इत्यादिब्रह्मप्रकरणाविच्छेदकमिति, तत्तावन्न युक्तं, तस्य तन्मध्यपतितत्वाभावादित्याह—किञ्चेति। इत्युक्तेति। इति वार्तिकोक्तन्यायेनेत्यर्थः। तृतीयस्याद्ये पादे "सन्दिग्धे तु व्यवायाद्वाक्यभेदस्स्यात्" इति दशमेऽधिकरणे "उपव्ययते" इति श्रुतं उपवीतं किं सामिधेन्यङ्गमुत दर्शपूर्णमासाङ्गमिति संशये, पुरस्तादुपरिष्टात्सामिधेनीकीर्तनादवान्तरप्रकरणेन सामिधेन्यङ्गमिति प्राप्ते, "देवेद्धो मन्विद्धः" इत्यादिभिर्निविद्भिर्व्यवधानात् सामिधेनीप्रकरणस्य विच्छेदान्न तदङ्गम्। न च "एकाविंशतिमनुब्रू-

चन्द्रिका

न त्वेतदस्ति, "ऋतं" इत्यादेः "यस्य" इत्यस्मादपि परत्वात्। तथा च "यस्य" इत्यस्य कथं ब्रह्मप्रकरणाद्विच्छेदाशङ्का। न च "नायमात्मा प्रवचनेन लभ्यः" इतिब्रह्मपरपूर्ववाक्योक्तस्य दुरवरोधत्वरूपब्रह्मलिङ्गस्य "यस्य" इति वाक्ये "क इत्था वेद यत्र सः" इति प्रत्यभिज्ञानात् तदेकप्रकरणतेति त्वद्रीत्या "प्रकरणात्" इति सूत्रेणोक्तेऽपि, तत्त्यागेन "यस्य" इत्यस्यानन्तर्यरूपेण क्रमेण "ऋतं" इति वाक्येन एकवाक्यतेति शङ्कितुं शक्यम्, लिङ्गादानन्तर्यरूपक्रमदौर्बल्यस्य त्वन्मते एतच्छास्त्रपूर्वभागे

प्रकाशः

यात् प्रतिष्ठाकामस्य" इत्यादिकाम्यसामिधेनीनां प्रकरणानुवृत्तिः शङ्क्या, तासां काम्यसामिधेनीनां स्वातन्त्र्येण प्रकृतत्वाभावात्, अतो महाप्रकरणेन दर्शपूर्णमासाङ्गमिति सिद्धान्तितम्। तत्र सिद्धान्तवार्तिकमेतत्। 'यतः' यस्मात् 'निविद्भिः' निविन्नामकैः "देवेद्धो मन्विद्धः" इत्यादिमन्त्रैर्विच्छिन्नं सामिधेनीनां अग्निसमिन्धनार्थतया सामिधेनीनामिकानामृचां प्रकरणं, तस्मात् प्रकरणं काम्यैस्सामिधेनीकल्पैर्न पुनस्सन्धातुं संयोजयितुं शक्यमित्यर्थः। ननूक्तमत्र "यस्य" इत्येतत् व्यवहितेन "महान्तं" इत्यनेन विच्छिन्नं सन्निहितेन "ऋतं" इत्यनेनैकवाक्यतामापद्यत इति, तन्न, प्रकरणात्सन्निधेर्दुर्बलत्वादिति भावेन तदाशङ्क्य निराह—**न चेत्यादिना**। **क्रमेणेति**। स्थानरूपप्रमाणेनेत्यर्थः। **लिङ्गादीति**। तृतीयस्य

चन्द्रिका

पूर्वतन्त्र एव सिद्धत्वेन पुनरिह क्रमप्राबल्यशङ्कानुदयात् । सिद्धान्ते "ऋतं पिबन्तौ" इति ब्रह्मप्रकरणे तच्छेषतया जीवोक्तिवत्, "बुद्धिं तु सारथिं विद्धि" इति बुद्ध्युक्तिवच्च, पूर्वपक्षेऽपि "यस्य ब्रह्म च" इत्यादिब्रह्मप्रकरणे तच्छेषतया बुद्धिजीवोक्तिसंभवाच्च ।

प्रकाशः

तृतीये "श्रुतिलिङ्गवाक्यप्रकरणस्थान" इति बलाबलप्रकरणे दशमेऽधिकरणे राजसूये पश्विष्टिसोमयागाः समप्रधानतया श्रुताः । तत्राभिषेचनीयस्य सोमयागस्य सन्निधौ विदेवनादयः के चन पदार्थाः श्रुताः । ते किमभिषेचनीयस्याङ्गमुत सर्वस्य राजसूयस्येति संशये, सन्निधिविशेषादभिषेचनीयमात्राङ्गमिति प्राप्ते, प्रकरणविशेषात्सर्वराजसूयाङ्गमिति सिद्धान्तितम् । तथा च "विंशतिलक्षणमेकं शास्त्रं" इति वदतस्तव मते तत्रैव प्रकरणात्पाठसन्निधिरूपस्य स्थानस्य दौर्बल्यं सिद्धमिति नात्र तत्प्राबल्यशङ्कोपपद्यत इत्यर्थः । एवं "यस्य" इत्यस्य "ऋतं" इत्यनेन नैकवाक्यता युक्तेत्युक्तम् । इदानीमस्त्वेकवाक्यत्वं, एवमपि न ब्रह्मप्रकरणविच्छेदशङ्का युक्तेत्याह— सिद्धान्त इति । तच्छेषतयेति । ब्रह्मणः प्राधान्येन प्रतिपादनं, जीवस्य ब्रह्मणः शेषभूततयेत्यर्थः । द्युभ्वादिनये त्वदुक्तरीत्यैवेति भावः । प्राधान्येनान्यप्रतिपादन एव प्रकरणविच्छेदः । एवं च प्रकरणविच्छेदशङ्काया अयोगेन तत्समाधानार्थं "गुहां" इत्यादिकमयुक्तमित्याशयः । यस्त्वेकप्रकरणस्थवाक्यविशेषविषयत्वादैकाधिकरण्यमिति,

चन्द्रिका

किंच यथाऽदृश्यत्वाद्यधिकरणद्युभ्वाद्यधिकरणयोरेकप्रकरणस्थवाक्यविषयत्वे उपजीव्योपजीवकभावे च सत्यपि भेदः, तथाऽत्र किं न स्यात् । अस्ति हि तत्राप्युपजीव्योपजीवकभावः, "यस्मिन् द्यौः" इत्यादिकस्योत्तरवाक्यस्य परमात्मपरत्वाभावे पूर्वस्य "यत्तदद्रेश्यमग्राह्यम्" इत्याद्यदृश्यत्वादिवाक्यस्य तत्परत्वासिद्धेः । अथ अदृ-

प्रकाशः

तदपि नेत्याह—**किंचेति** । ननु कथं उपजीव्योपजीवकभावः, न हि "यस्मिन् द्यौः पृथिवी" इत्यादिवाक्यस्य परमात्मपरत्वमदृश्यत्वादिगुणकस्याक्षरात्परतः परस्य परमात्मत्वोपपादकं, परप्रकरणेऽपि तच्छेषत्वेन परमात्मप्रधानादिप्रतिपादनोपपत्तेरित्युपजीव्योपजीवकभावाभावस्य श्रुतप्रकाश एवोक्तेरित्यतोऽत्रेव तत्रापि पूर्वपक्षे तद्भावमाह—**यस्मिन्निति** । अत्र यथा "ऋतं" इत्यस्याब्रह्मपरत्वे तत्पूर्वस्य "यस्य" इत्यस्यापि तथात्वं, तद्वत्तत्रापि सम्भवादविशेषात् । नन्वदृश्यत्वादिकं नान्यस्य शङ्कार्हमिति चेन्न, द्युभ्वाद्यायतनत्वं जीवस्य शङ्कमानेनादृश्यत्वादेरपि शङ्कितुं शक्यत्वात् । "सर्वत्र प्रसिद्ध" इत्यत्रैकवाक्यत्वसिद्धये "मनोमयः" इत्यादेरुत्तरवाक्यस्य जीवविषयत्वे "सर्वं खल्विदं ब्रह्म" इत्यादिपूर्ववाक्यमपि जीवविषयमिति त्वयैवोक्तत्वात् । पूर्वस्य परमात्मपरत्वासिद्धिप्रकारस्य तत्रैवास्मदीयपूर्वपक्षे स्पष्टयिष्यमाणत्वाच्चेति भावः । तदुक्तमेवाधिकरणभेदमाशङ्क्य निराह—**अथेति** ।

चन्द्रिका

श्यत्वाद्यधिकरणद्युभ्वाद्यधिकरणयोर्वैश्वानराधिकरणव्यवहितत्वात् भिन्नपादनिवेशाच्च नैकाधिकरणतेति चेत्, न, ऐकाधिकरण्ययोग्ययोर्व्यवधानादेरेव अयुक्तत्वात् । नन्वस्पष्टजीवादिलिङ्गकत्वाददृश्यत्वाद्यधिकरणं द्वितीये, स्पष्टजीवादिलिङ्गकत्वात् द्युभ्वाद्यधिकरणं तृतीये निवेशितमिति चेत्, न, अत्राप्यत्तृत्वस्य द्वितीयस्थत्वात् अस्पष्टजीवलिङ्गत्वेन, ऋतशब्दवाच्यकर्मफलभोक्तृत्वस्य स्पष्टजीवलिङ्गत्वेन भिन्नपादनिवेशापातात् । किञ्च

प्रकाशः

व्यवधानादेरिति। भिन्नपादनिवेशायोग आदिपदार्थः । नन्वेवं सिद्धान्तेऽपि पादान्त्यप्राणनय–"सर्वत्र" इतिनययोर्भिन्नपादनिवेशायोग इति चेन्न, परीत्या परस्यापादनात् । न ह्येतत्परोक्तमुपजीव्यत्वादिकं अधिकरणैक्ये बीजमिति सम्प्रतिपन्नं, किन्त्वप्रयोजकमित्यत्रैव तात्पर्यात् । स्पष्टमेतदग्रे "किञ्च" इत्यादिना । स्पष्टास्पष्टलिङ्गकवाक्यविषयत्वेनैकस्मिन् पादे सङ्गत्यनुपपत्तेरिति श्रुतप्रकाशोक्तमेवाशङ्कते–**नन्विति**। ननु "प्राणस्तथा" इत्यादावपि भेदो न स्यादित्यतो नैकप्रकरणगतवाक्यत्वमधिकरणैक्यप्रयोजकं, यथैकवाक्यविषयत्वेऽपि पूर्वोत्तरभागविषयत्वेन भेदस्तथैहैकप्रकरणेऽपि पूर्वोत्तरवाक्यविशेषविषयत्वेन भेदस्स्यादित्याह–**किञ्चेति** । द्वे अप्यधिकरणे प्राक् पादान्त्यप्राणाधिकरणे प्रपञ्चिते । ननु "विधिर्वा स्यादपूर्वत्वाद्वादमात्रं ह्यनर्थकं" इत्याद्याध्यायस्थद्वितीयपादीयौदुम्बराधिकरणे "औदुम्बरो यूपो भवति"

चन्द्रिका

औदुम्बराधिकरणेऽपि "यस्य पर्णमयी जुहूर्भवति न स पापꣳ श्लोकꣳ शृणोति" इति वाक्यमुदाहरणम्। पर्णमय्यधिकरणेऽपि "औदुम्बरो यूपो भवति ऊर्ग्वा उदुम्बरः ऊर्क् पशवः ऊर्जैवास्मा ऊर्जं पशूनाप्नोति" इति वाक्यमुदाहरणम्। न च पौनरुक्त्यम्, औदुम्बराधिकरणे वाक्यद्वयगतः साधनप्रतिपादकः पूर्वभाग उदाहरणम्, पर्णमय्यधिकरणे तु साध्यप्रतिपादक उत्तरभागः उदाहरणमिति वार्तिक एवोक्तम्। एवं च यथा तयोः पूर्वोत्तरभागविषयत्वे उपजीव्योपजीवकभावे च सत्यपि भेदः, तथाऽत्र किं न स्यात्।

प्रकाशः

इत्यादिवाक्यमुदाहृतम् शाबरभाष्ये। "द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादः" इति चतुर्थपादीयपर्णमय्यधिकरणे "यस्य पर्णमयी जुहूः" इति। तथा चैकवाक्यविषयत्वं नेत्यतः, इदं तत्र तच्चात्रेत्युभयमुभयत्रोदाहरणमिति तन्त्रवार्तिकोक्तमेवाह—**औदुम्बराधिकरणेऽपीति**। न केवलं पर्णमय्यधिकरण इत्यपेरर्थः। एवमग्रेऽपि। **साधनेति**। "औदुम्बरो यूपो भवति" "पर्णमयी जहूर्भवति" इत्यंशः। 'वार्तिके' औदुम्बराधिकरणवार्तिके। "एकस्यैव न्यायस्य क्वचित्कश्चिदंशः परिशोध्यत इति पुनरारम्भः" इत्यादिनेत्यर्थः। अस्तु ततः किमित्यत आह—**एवञ्चेति**। नात्रोपजीव्यत्वाद्यस्ति, साधनपरत्वबोधकविधिप्रत्ययस्येवेह विधेरभावादेव पूर्वभागस्य साधनपरत्वाभावबोधनासम्भवेन तद्बोधनायोत्तरभागस्य

चन्द्रिका

न हि पर्णमय्यधिकरणोक्तेन "न स पापꣳ श्लोकꣳ शृणोति" इत्यादेः कामपदोपबन्धरहितत्वात् न साध्यसमर्पकत्वमित्यनेन विना औदुम्बराधिकरणोक्तस्य "पर्णमयी जुहूर्भवति" इत्यादेः विधिविभक्तिरहितत्वात् न साधनसमर्पकत्वमित्येतत्सिध्यति, साध्यस्य साधनं विनाऽयोगेन अपापश्लोकश्रवणादेः साध्यत्वे पर्णमयीत्वादेः बलात् साधनत्वापातात्। एवं च अस्माकं मतेऽपि "प्राणस्तथा" इत्यस्य, "सर्वत्र" इत्यस्य च एकप्रकरणस्थवाक्यविषयत्वे उपजीव्योपजीवकभावे च सत्यपि भिन्नाधिकरणता सिद्धा। "तद्धेतु-

प्रकाशः

साध्यपरत्वाभावस्यानुपजीव्यत्वादित्यतस्तदुपपादयति—न हीति। पूर्वभागस्य साधनपरत्वं न विधिप्रत्ययबलात्कल्प्यते, तदभावात्, किन्तूत्तरभागस्य साध्यपरत्वमुपजीव्यैव, साध्यस्य साधनापेक्षत्वात्। एवञ्च तस्य "पशुकामः" इत्यादाविव कामपदरहितत्वादिना पर्णमय्यधिकरणन्यायेन साध्यपरत्वाभावसिद्धेः पूर्वभागस्यापि साधनपरत्वाभावः सिध्यतीति सिद्धान्ते उपजीव्योपजीवकभाव इत्यर्थः। **बलादिति**। विधिप्रत्ययाभावेऽपीत्यर्थः। चतुस्सूत्र्या भिन्नाधिकरणत्वसाधनेनान्यदपि फलमाह—**एवञ्चेति**। ननु तर्हि "तद्धेतुव्यपदेशात्" "मान्त्रवर्णिकमेव च गीयते" इत्यादेरपि भिन्नाधिकरणता च स्यादित्युक्तमित्यत आह—**तद्धेत्विति**। अधिका-

चन्द्रिका

व्यपदेशाच्च" इत्यादौ समन्वेतव्यान्तराभावादिनैकाधिकरणतेति दिक् ॥

प्रकाशः

शङ्काप्रापकहेतुविशेषाभावादिरादिपदार्थः । यच्चोक्तं "अत्ता" इति सूत्रद्वये "यस्य ब्रह्म च" इत्यादिवाक्यं विषय इति, तन्न, "सर्वं वा अत्ति" इति मदीयविषयवाक्ये सूत्रे प्रतिज्ञातस्यात्तुः हेतूकृतस्य चराचरग्रहणस्य च साक्षादुपादानेन "यस्य" इति वाक्ये तदभावेनैतस्य सूत्रानानुगुण्यात् । सन्निधिमात्रेण प्रकरणविच्छेदाशङ्कायोगस्योक्तत्वेन "प्रकरणाच्च" इत्युक्तप्रकरणविच्छेदाशङ्कासमाधानाय "गुहां" इत्यादेरनारभ्यत्वाच्च । यदपि सिद्धान्ते गुहाविष्टत्वादिलिङ्गाज्जीवपरावुच्येते इति, तन्न, गुहाविष्टत्वस्य विष्ण्वेकप्रापकतायाः प्राक्समर्थितत्वेन तेन जीवप्राप्तेरयोगात् ।

या प्राणेन संविशत्यदितिर्देवतामयी ।
गुहां प्रविश्य तिष्ठन्ती या भूतेभिर्व्यजायत ॥

इत्यत्र "महान्तं" इति ब्रह्मप्रकरणेन "व्यजायत" इत्यादेर्मत्स्यादिरूपेण स्वात्मजननपरत्वोपपत्त्या प्रकरणविच्छेदकाभावेन च देवतामयत्वयोगेन चास्यापि ब्रह्मपरत्वेन जीवपरत्वायोगाच्च । उक्तरीत्या विष्णोरेव मुख्यभोक्तृत्वेन जीवे तदभावेन च्छत्रिन्यायेन लक्षणोक्त्ययोगाच्चेत्यादि ध्येयमिति भावेनाह—दिगिति । यद्वा—"अनुकृतेः" इत्यधिकरणस्य "शब्दादेव" इत्यधिकरणस्य चैकत्रत्यवाक्यद्वयविषयत्वेऽपि वक्ष्यमाणदिशोपजीव्यत्वादौ सत्यप्यव्यवहितत्वेऽपि

चन्द्रिका

यच्चोक्तम्—"अत्ता" इत्यत्र साधारणाकारं विहाय असाधारणाकारेण गौणार्थो वर्णनीय इति न्यायो व्युत्पादित इति, तन्न, "प्रोद्गातॄणाम्" इत्यत्र षोडशर्त्विक्साधारणाकारं विहाय असाधारणाकारेण भाष्यकारमते उद्गातृप्रस्तोतृप्रतिहर्तृसुब्रह्मण्यानां चतुर्णामेव, वार्तिककारमते अपसुब्रह्मण्यानां त्रयाणामेव लक्षणायास्तृतीये उक्तत्वात्। "मासमग्निहोत्रं जुहोति" इत्यत्राग्निहोत्रशब्दस्य होमत्वादिसाधारणाकारं हित्वा सूर्यदेवताकत्वादिनित्याग्निहोत्रासाधारणाकारेणैव मासाग्निहोत्रे गौणतायाश्च सप्तम उक्तत्वेन पुनरिह तस्यावक्तव्यत्वादिति ॥

प्रकाशः

भिन्नाधिकरणतोद्योति भावेनाह—**दिगिति** ॥

यच्चेति। "अत्ता" इति सूत्रे ब्रह्मक्षत्रोपलक्षितचराचरस्य मृत्यूपसेचनत्वविशेषणेनादनीयत्वलाभात्तत्सूचितस्य कृत्स्नात्तृत्वस्य संहर्तृत्वरूपत्वात्, अत्ता विष्णुरित्युक्ते मृत्यूपसेचनत्वस्य मृत्युवशत्वाभावाभिप्रायेणोपपत्तेर्न तद्विशेषणेन ब्रह्मक्षत्रादेरदनीयत्वसिद्धिरित्याशङ्क्योपसेचनशब्दस्य गौणत्वेऽपि तद्वश्यत्वाभावरूपसाधारणाकारोपचारं विना स्वयमद्यमानत्वेसति अन्यस्यादनहेतुत्वरूपविशेषाकारेणोपचार इति अदनीयत्वसिद्धिरित्युक्त्वा "साधारणाकारं विहाय" इत्यादिना सूत्रस्य तात्पर्यार्थ उक्तः, सोऽप्ययुक्तः, पौनरुक्त्यादित्यर्थः। तार्तीयं प्रोद्गात्रधिकरणं जन्माधिकरणे, साप्तमिकं मासा

प्रकाशः

ग्निहोत्राधिकरणं च पादान्त्यप्राणनये प्रपञ्चितम् । भाष्यकृन्मते प्रोद्गातृशब्दस्य षोडशर्त्विक्साधारणाकारं प्रकरणगतत्वं विहाय च्छन्दोगत्वरूपेणासाधारणाकारेणोद्गात्रादीनां चतुर्णां लक्षणाया उक्तत्वात्, वार्तिकमते तु स्तोत्रकारित्वसदस्सन्निहितत्वादिना ततोऽप्यसाधारणाकारेणापसुब्रह्मण्यानां त्रयाणामेव लक्षणाया उक्तत्वात्, तथैव मासाग्निहोत्रेऽग्निहोत्रशब्दस्य साधारणाकारेण गौणताया उक्तत्वादित्यर्थः । एतेन रामानुजरीतिं प्रायेणानुसरतः कस्य चिन्मतमपि निरस्तं ध्येयम् ।

आत्माऽन्तरात्मेति हरिः एक एव द्विधा स्थितः ।

इत्यादिवचनविरोधेन शिव इतिं सिद्धान्तस्यायुक्तत्वाच्चेति ।

अत्र टीकयां "तद्तपानकर्तृत्वं यदि विष्णोरन्यस्यैव स्यात्तदा न तस्य सर्वात्तृत्वं, यदि चान्यस्यापि सम्भवेत्तदा लक्षणस्यातिव्याप्तिः" इत्युक्तम् । तत्रानुपपत्तयः—पूर्वं सर्वात्तृत्वस्य लक्षणत्वेनाभिमतत्वादेकदेशस्यान्यमात्रगतत्वेऽपि नासम्भवः । न चैकदेशाभावादेव सर्वात्तृत्वमपि नेत्युच्यत इति वाच्यं, सिद्धान्तेऽप्यशुभभोक्तृत्वाभावेन तद्दोषतादवस्थ्यापातादित्येका । पूर्वपक्षे ऋतपातृत्वस्य जीवेश्वरोभयगतत्वोपगमेनान्यस्यैवेत्युक्तमयुक्तमित्यन्या। "यदि च" इत्यत्रापि भगवति पातृत्वस्यैवे पूर्वपक्षेऽनङ्गीकृतत्वेन अन्यस्यापीत्यपिपदास्वारस्यमित्येका । एकदेशस्यान्यमात्रगतत्वेऽपि कृत्स्नात्तृत्वस्या-

चन्द्रिका

टीकाक्षरार्थस्तु—**तद्यदाविष्णोरन्यस्यैव स्यादिति**। पूर्वत्र सम्भवत्सर्वात्तृत्वं लक्षणत्वेनोक्तम्। ब्रह्मणि च अशुभभोक्तृत्वासंभवेऽपि ऋतपातृत्वरूपं शुभभोक्तृत्वं सिद्धान्तरीत्या सम्भवति। तत्र च पिबतोर्जीवेश्वरत्वमुपेत्य जीवे पातृत्वं मुख्यम् ईश्वरे त्वमुख्यमिति स्वीकारेऽसंभवः, उभयोरपि मुख्यमिति स्वीकारे तु जीवस्यापि शुभभोक्तृत्वेन ईश्वरवत्सर्वात्तृत्वस्यापि प्रसङ्गात् अतिव्याप्तिरित्यर्थः। तथा च द्वयोरपि पातृत्वं मुख्यमिति पूर्वपक्षोऽप्यत्राभिप्रेत इति द्रष्टव्यम्। यद्वा—गुहाप्रविष्टत्वादिब्रह्मलिङ्गसहितस्यापि ऋतपातृत्वस्यासम्भवोऽतिव्याप्तिर्वा यदा, तदा तत्सहचरितस्य पूर्वो-

प्रकाशः

तिव्याप्त्यप्रसरादित्यपरा। ता एताः निरसितुमाह—**सम्भवदिति**। "असम्भवः" इत्यन्तेनाऽऽद्ययोर्निरासः। "मुख्यं" इत्युक्त्या द्वितीयायाः, शेषेणाद्याया इति विवेकः। "उभयोरपिमुख्यं" इत्यनेन तृतीयायाः, 'सर्वात्तृत्वस्यापि प्रसङ्गात्संभवत्सर्वात्तृत्वरूपस्य सर्वशुभात्तृत्वस्यापि प्रसङ्गात्' इत्यनेन अन्त्या निरस्तेति ध्येयम्। नन्वत्र च्छत्रिन्यायस्य टीकायामुक्तेः कथमुभयमुख्यत्वोक्तिरित्यत आह—**तथा चेति**। च्छत्रिन्यायोऽसम्भवपक्ष एवेति भावः। पूर्वं सर्वात्तृत्वं सङ्कुचितमुपेत्य असम्भवातिव्याप्ती उपपादिते, अधुनाऽसङ्कुचितमेव तदादाय तदुपपादयति—**यद्वेति**। पिबतोर्जीवेश्वरत्वमुपेत्य ब्रह्मलिङ्गसहचरितमपि पातृत्वं जीवे मुख्यं, ईश्वरे त्वमुख्यमिति स्वीकारे,

चान्द्रिका

क्तात्तृत्वस्यापि असम्भवोऽतिव्याप्तिर्वा स्यादित्यर्थः। **तथा च लक्षण मयुक्तमिति।** यद्यपि सर्वसंहर्तृत्वरूपलक्षणं ब्रह्मण्येवेति पूर्वपक्षिणाऽपि स्वीकृतम्। अत एव टीका "कर्मफलभोगं विनाऽपि संहर्तृत्वमात्रेण तदुपपत्तेः" इति। तथाऽपि सिद्धान्त्यभिप्रेतं संहर्तृत्वविशेषात्मकं भक्षयितृत्वरूपं लक्षणमयुक्तमिति भावः। **"यस्सेतुः" इति पिबतोरेकवचनेन विशेषणात् इत्यादि।** "विशेषणाच्च" इति सूत्रं "यस्सेतुः" इत्यादिभाष्येण एकवचनेन विशेषणात् ब्रह्मशब्देन विशेषणाच्चेति द्विधा व्याख्यातमिति भावः। उपलक्षणं चैतत्, सेतुत्वाक्षरत्वादिना विशेषणात् ब्रह्मणश्च परत्वेन

प्रकाशः

चराचरात्मकसर्वात्तृत्वरूपब्रह्मलिङ्गसहचरितमपि प्रागुक्तं सर्वात्तृत्वं जीव एव मुख्यं, ईश्वरे त्वमुख्यमित्यसम्भव इत्यर्थः। यद्युभयोरपीदं मुख्यं, तदा प्राक्तनमपि सर्वात्तृत्वं द्वयोः स्यात्, ब्रह्मलिङ्गबाधस्योभयत्र तुल्यत्वात्, तथा चातिव्याप्तिरित्यर्थः। ननु टीकायां "तथा च लक्षणमयुक्तं" इति पूर्वपक्षोपसंहारोऽयुक्तः, "कर्मफलभोगं विनाऽपि" इत्यादिपूर्ववाक्ये प्रागुक्तसंहर्तृत्वाङ्गीकारप्रतीतोरित्याशङ्कापूर्वं तद्व्याचष्टे—**लक्षणमयुक्तामितीति।** 'यस्सेतुरिति पिबतोरेकवचनेन विशेषणादेकएव पाता। स च ब्रह्मत्वविशेषणाच्च विष्णुरेव" इति वाक्यस्योद्भाष्यत्वभ्रमं निराह—**यस्सेतुरित्यादिना।** "सेतुत्वाद-

चन्द्रिका

विशेषणादित्यपि व्याख्येयमिति ॥

प्रकाशः

क्षरत्वतः" इति स्वोक्तं टीकाविरुद्धमिति भ्रमं वारयति—**उपलक्षणमिति । व्याख्येयमिति ।**

यस्सेतुरीजानानामक्षरं ब्रह्म यत्परम् ॥

इति भाष्यं सूत्रस्य सेतुत्वादिविशेषणादित्यर्थवर्णनपरतया व्याख्येयमित्यर्थः । शिष्टं स्पष्टमिति भावः ॥

इति गुहाधिकरणम्

—अथ अन्तराधिकरणम्—

आदित्ये विष्णुरित्युक्तम् । "य एष आदित्ये पुरुषः सोऽहमस्मि स एवाहमस्मि" इत्यादावग्नीनामेवादित्यादिस्थत्वमुच्यते । अतोऽक्ष्यादित्ययोरैक्यात् "य एषोऽन्तरक्षिणि

तत्त्वप्रकाशिका

अत्राग्निश्रुतिसाहित्येन अन्यत्रप्रसिद्धस्य चक्षुरन्तस्स्थत्वलिङ्गस्य परब्रह्मणि समन्वयसमर्थनादस्ति शास्त्रादिसङ्गतिः । श्रुत्यादिसङ्गतिं विषयवाक्यं विषयसंशयौ सयुक्तिकं पूर्वपक्षं च दर्शयति— **आदित्य इति** । "यश्चासावादित्ये" इत्यानन्दमयस्यादित्यस्थत्वमुक्तम् । ततश्चार्थादक्षिस्थत्वमप्युक्तम् । तदक्षिस्थत्वं छन्दोगश्रुतौ कस्यचित्प्रीयते "य एषोऽन्तरक्षिणि पुरुषो दृश्यते एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्म" इति । तच्च यद्यन्यस्य स्यात्तदाऽऽदित्यस्थत्वमानन्दमयत्वं चान्यस्यैव प्रसज्येतेत्यवश्यं निर्णेयमेव । तदक्षिस्थत्वं विषयः । विष्णोरग्नेर्वेति सन्देहः । "यश्चासावादित्ये" इत्युक्तिरग्निश्रुतिश्च सन्देहबीजम् । "य एषोन्तरक्षिणि" इति वाक्येऽग्निरेवाक्षिस्थत्वेनोच्यत इति पूर्वः पक्षः, यतो "य एष आदित्ये पुरुषः सोऽहमस्मि स एवाहमस्मि" इत्यग्नेरेवादित्यस्थत्वमुच्यतेऽत एव । न च वाच्यमग्नेरादित्यस्थत्वेऽपि कुतोऽक्षिस्थत्वमिति, "आदित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशत्" इति श्रुतेरक्ष्यादित्ययोः

पुरुषो दृश्यते" इत्यत्राप्यग्निरेवोच्यते। अतः "तद्यथा पुष्करपलाश आपो न श्लिष्यन्ते एवमेवंविदि पापं कर्म न श्लिष्यते" इत्यग्निज्ञानादेव सर्वपापाश्लेषान्मोक्षोपपत्तिरिति।

तत्त्वप्रकाशिका

एकविधत्वादादित्यस्थितत्वेनाग्नेरक्षिस्थत्वसिद्धेः। एतस्मिन् प्रकरणे "अथ हाग्नयः समूदिरे, गार्हपत्योऽनुशशास" इत्यादिबह्वग्निश्रुतिसद्भावाच्च। न च वाच्यमग्नेरादित्यस्थत्वकथनमौपचारिकं किं न स्यात्, "यश्चासावादित्ये" इति श्रुतिविरोधादिति, "सोऽहमस्मि स एवाहमस्मि" इत्यभ्यासात्, अभ्यासस्य च समाख्यातो बलवत्त्वात्। न च विष्णुग्रहणेऽपूर्वतयाऽभ्यासस्यापि बाधः, "स य एतदेवं विद्वानुपास्तेऽपहते पापकृत्यां लोकी भवति सर्वमायुरेति" इत्यर्थवादात्, अर्थवादस्य चापूर्वतायाः प्राबल्यात्। अतोऽक्ष्यादित्यस्थोऽग्निरेवेति स एवानन्दमयोऽपीति भावः। न केवलमग्नेरक्षिस्थत्वसिद्धावानन्दमयत्वप्राप्तिः, यद्विष्णुज्ञानादेव मोक्ष इति मतं, तदपि बाधितं स्यादित्याह—अत इति। यतोऽग्निरक्षिस्थोऽतस्तज्ज्ञानान्मोक्षोऽपि भवेत्। **तद्यथेति**। तज्ज्ञानात्सर्वपापाश्लेषोक्तेः, तज्ज्ञानात्सर्वपापाश्लेषे च मोक्षस्यापि तदन्यथानुपपत्त्यैवोपपत्तेरित्यर्थः। अत्रादित्यस्थत्वलिङ्गस्यापि विष्णौ समन्वयसिद्ध्यर्थं वक्रसङ्गत्याऽधिकरणारम्भ इति ज्ञातव्यम्। 'अग्नीनां' इति बहुवचनमादिपदद्वयं च बह्वग्निश्रुतिसूचनाय प्रयुक्तम्। सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे—

अतो ब्रवीति—

ओम् अन्तर उपपत्तेः ओम् ॥१३॥

चक्षुरन्तस्स्थो विष्णुरेव, "त्रिपादस्यामृतं दिवि" इत्यादिना तस्यैवामृतत्वाद्युपपत्तेः, ब्रह्मशब्दाद्युपपत्तेश्च। "सोऽहस्मि" इत्यादि त्वन्तर्याम्यपेक्षया,

अन्तर्यामिणमीशेशमपेक्ष्याहं त्वमित्यपि ।
सर्वे शब्दाः प्रयुज्यन्ते सति भेदेऽपि वस्तुषु ॥

इति महाकौर्मे ॥ १३ ॥

तत्त्वप्रकाशिका

अत इति। विष्णुरेव चक्षुरन्तरः, "एतदमृतमभयं" इत्यमृतत्वाभयत्वोक्तेः, अमृतत्वादेश्च विष्णावेवोपपत्तेः, "त्रिपादस्यामृतं दिवि" "अभयं तितीर्षतां पारं" इति श्रुतेः। न चाग्निरमृतत्वाद्युपपद्यते, "परि ह्येनं म्रियन्ते विद्युद्वृष्टिश्चन्द्रमा आदित्योऽग्निः" "भीषास्मादग्निश्चेन्द्रश्च" इत्यादिश्रुतेरिति भावः। यदेवं निरवकाशत्वानेकत्वाभ्यां बलवल्लिङ्गबलाच्चक्षुरन्तस्स्थस्य विष्णुत्वनिश्चयः, किमु तदोभयथाऽपि बलवच्छ्रुतितोऽपीति भावेन सूत्रांशं प्रकारान्तरेण व्याचष्टे—**ब्रह्मेति**। नन्वेवं बलवच्छ्रुतिलिङ्गबलाद्विष्णुरेव चेदक्षिस्थस्तदाऽऽदित्यस्थोऽपि स एव स्यात्। तर्हि "सोऽहमस्मि स एवाहमस्मि" इति श्रुतेः का गतिरित्यत आह—**सोऽहमिति**। अन्तर्यामिण्यहमादिशब्दवृत्तिं स्मारयति—**अन्तर्यामिणमिति**। एवं

ओम् स्थानादिव्यपदेशाच्च ओम्॥१४॥

"तद्यदस्मिन् सर्पिर्वोदकं वा सिञ्चति वर्त्मनी एव गच्छति" इत्यादिस्थानशक्तिः, "वामनिर्भामनिः" इत्याद्यात्मशक्तिश्चोच्यते। तस्य ह्येतल्लिङ्गम् "स ईशः सोऽसपत्नः स हरिः स परः परोवरीयान् यदिदंचक्षुषि सर्पिर्वो-

तत्त्वप्रकाशिका

श्रुतेस्सावकाशत्वेन तदनुयायिनोरभ्यासार्थवादयोरपि सुतरां सावकाशत्वम् ॥ १३ ॥

युक्त्यन्तरेण विष्णोश्चक्षुरन्तस्स्थत्वं साधयत्सूत्रमुपन्यस्य व्याचष्टे—**स्थानादीति**। अत्राक्षिस्थपुरुषसम्बन्धादक्ष्णोरसङ्गत्वाख्यशक्तिर्व्यपदिश्यते, "तद्यदस्मिन् सर्पिर्वोदकं वा" इति, "एतं संयद्वाम इत्याचक्षते एतं हि सर्वाणि वामान्यभिसंयन्ति एष उ एव वामनिरेष हि सर्वाणि वामानि नयति एष उ एव भामनिरेष हि सर्वेषु लोकेषु भाति" इति चक्षुरन्तस्स्थस्य संयद्वामत्वादिरूपशक्तिश्चोच्यते। एतदुभयबलाच्चक्षुरन्तस्स्थो विष्णुरेवेत्यर्थः। यस्मादयं पुरुषोऽक्षिणि विद्यते तत्तस्मादस्मिंश्चक्षुषि यदि सर्पिर्वोदकं वा कश्चित्सिञ्चति, तर्हि वर्त्मनी प्रत्येव गच्छति न चक्षुः स्पृशतीत्यर्थः। एतल्लिङ्गद्वयसद्भावेऽपि कुतोऽक्षिस्थस्य विष्णुत्वनिश्चय इत्यत आह—**तस्येति**। 'एतत्' इति स्वसम्बन्धेनाक्ष्णोरसङ्गत्वापादकत्वम्। कुत एतत्तस्य लिङ्गमिति तत्राह—**स इति**। 'यत्' यस्माद्यस्य प्रभावात्। 'इदंचक्षुषि' इति समस्तम् ॥ १४ ॥

दकं वा सिञ्चति वर्त्मनी एव गच्छति स वामनः स भामनः स आनन्दः सोऽच्युतः" इति चतुर्वेदशिखायाम् ॥

यत्स्थानत्वादिदं चक्षुरसङ्गं सर्ववस्तुभिः ।
स वामनः परोऽस्माकं गतिरित्येव चिन्तयेत् ॥

इति वामने ॥१४॥

ओम् सुखविशिष्टाभिधानादेव च ओम् ॥१५॥

"प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म" इति । "विज्ञानमानन्दं ब्रह्म" "आनन्दो ब्रह्मेति व्यजानात्" इत्यादेस्तस्यैव हि तल्लक्षणम् ॥

तत्त्वप्रकाशिका

प्रकरणबलाच्चक्षुरन्तस्स्थत्वं विष्णोः प्रतिपादयत्सूत्रमुपन्यस्य तदुपात्तश्रुतिमेवोदाहरति—**सुखेति** । अत्रोपक्रमे "प्राणो ब्रह्म" इति मुख्यप्राणस्याखिलजीवेभ्यः पूर्णत्वमुक्त्वा "कं ब्रह्म खं ब्रह्म" इति सुखसंविदोरपि पूर्णत्वमुच्यते । तथाचास्य प्रकरणस्योपक्रमे पूर्णसुखाभिधानादेव वैष्णवत्वं सिध्यति, किमुत पूर्णज्ञानाभिधानादपि । ततः प्रकरणबलाच्च चक्षुरन्तस्स्थो विष्णुरेवेति भावः । उपक्रमे पूर्णसुखसंविदभिधानेपि कुतोऽस्य प्रकरणस्य वैष्णवत्वमित्यत आह—**विज्ञानमिति** । पूर्णानन्दसंवित्त्वस्य ब्रह्मलक्षणत्वादुपक्रमे तदभिधाने ब्रह्मैवोपक्रान्तं स्यादिति भावः । श्रौतमपि विज्ञानादिपदं पूर्णज्ञानादिवाचि । ननु सकलचेतनानामपि पूर्णानन्दत्वात्कथमेतद्विष्णुलक्ष-

लक्षणं परमानन्दो विष्णोरेव न संशयः ।
अव्यक्तादितृणान्तास्तु विप्लुडानन्दभागिनः ॥

इति ब्रह्मवैवर्ते । न च मुख्ये सत्यमुख्यं युज्यते ॥ १५ ॥

ओम् श्रुतोपनिषत्कगत्यभिधानाच्च ओम् ॥१६॥

तत्त्वप्रकाशिका

णमित्यत आह—**लक्षणमिति** । अन्येषामापेक्षिकमेव पूर्णसुखत्वं न ब्रह्मवन्निरवधिकमिति भावः । नन्वग्न्यादिसुखस्यापेक्षिकतयाऽपि पूर्णत्वसद्भावात्तेषां किं न स्यादित्यत आह—**न चेति** । 'मुख्ये' निरवधिकपूर्णत्वे, 'सति' सम्भवति, न 'अमुख्यं' आपेक्षिकं पूर्णत्वं युज्यत इत्यर्थः । न चोपक्रमे प्राणस्यापि श्रुतत्वेन प्रकरणित्वम्, श्रुतिलिङ्गादिबाधकसद्भावात् ॥ १५ ॥

नैवमुपक्रमेऽप्यक्षिस्थप्रकरणस्य वैष्णवत्वं युक्तम्, "प्राणो ब्रह्म कं" इति विद्यां "य एष आदित्ये पुरुषः" इत्यादिविद्यां चोक्त्वा अग्निभिः "उपकोसलैषा सोम्य तेऽस्मद्विद्याऽऽत्मविद्या च" इत्युक्तत्वेनाद्यविद्याया विष्णुविषयत्वस्य द्वितीयविद्याया अग्निविषयत्वस्यैव युक्तत्वादक्षिस्थविद्यायाश्चादित्यस्थविद्यैकार्थत्वात् । न चोपक्रमविरोधः, "ह्याम्यग्निं" इत्यादाविवोपपत्तेः । न च "अस्मद्विद्या" इत्यन्तर्यामिविषयतया योज्यम्, तथासति "आत्मविद्या" पृथगुक्तचयोगात् । तस्मादग्निविषयत्वमेव चक्षुरन्तस्स्थविद्याया इत्याशङ्कां परिहरत्सूत्रं पठित्वा तदुपात्तश्रुतिमेवोदाहरति—**श्रुतेति** ।

"स एनान् ब्रह्म गमयति" इति । न ह्यन्यविद्ययाऽन्यगतिर्युक्ता ॥ १६ ॥

तत्त्वप्रकाशिका

नैतद्विद्याया अग्निविषयत्वं युक्तमपि तु विष्णुविषयत्वमेव, "अथ यदु चैवास्मिंच्छव्यं कर्म कुर्वन्ति यदु च नार्चिषमेवाभिसंविशन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणापक्षाद्यान् षडुदङ्ङेति मासांस्तान्मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषो मानवः स एनान् ब्रह्म गमयति" इति श्रुतैतद्विद्यानां ब्रह्मगत्यभिधानादिति भावः । श्रुतपदं मनननिदिध्यासनोपलक्षकम् । 'कगतिः' इति ब्रह्मगतिः, "कं ब्रह्म" इति प्रकृतत्वात् । 'केन' वायुना गतिरिति वा, "को वायुरिति शब्दितः" इत्यभिधानात् । अथवा श्रुतोपनिषदमुपकोसलं प्रत्येतद्विद्याफलत्वेन कगत्यभिधानादिति । न च वाच्यमत्र कगतिकथनमेव श्रूयते न तद्विद्याफलत्वेनेति, "सर्वेषु लोकेषु भाति य एवं वेद" इति फलश्रुतिसामीप्यात्। अन्यथा असङ्गतेश्च । अस्त्वेतद्विद्यायाः ब्रह्मप्राप्तिः फलं, तथाऽपि कुतो नाग्निविषयत्वमित्यत आह—न हीति । यदीयमग्निविद्या, तर्ह्येतद्विद्ययाऽग्निप्राप्तिरेव फलत्वेनोच्येत, न ब्रह्मप्राप्तिः,

देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि ।

इत्यादेरन्यविद्ययाऽन्यगतेरयुक्तत्वात् । अतो ब्रह्मप्राप्तिफलैतद्विद्याया

ओम् अनवस्थितेरसम्भवाच्च नेतरः ओम्॥ १७

जीवस्य जीवान्तरनियामकत्वेऽनवस्थितेः साम्यादसम्भवाच्च न जीवः, नियमप्रमाणाभावात्,

तत्त्वप्रकाशिका

ब्रह्मपरत्वमेवेति भावः।न च "अस्मद्विद्या" इत्युक्तिविरोधः, तस्यान्तर्यामिविषयत्वोपपत्तेः, श्रुतेरपि निरवकाशोपपत्तेः प्राबल्यात् । न च "आत्मविद्या"इति पृथगुक्तिविरोधः, तस्याः सर्वगतात्मविद्यात्वाभिधायकत्वात्, तस्यैव ब्रह्मत्वात् ॥ १६ ॥

एवमुपपत्त्यादियुक्तिभिः विष्णोरक्षिस्थत्वं प्रतिपाद्य विपक्षे बाधकेनापि समर्थयत्सूत्रमुपन्यस्य व्याचष्टे—**अनवस्थितेरिति** । नायं चक्षुरन्तस्स्थोऽग्निर्भवेत्, अस्य तत्तत्प्रेरकत्वेन तत्तच्चक्षुस्स्थितेरभिप्रेतत्वात् । न चाग्नेरन्यप्रेरकत्वं युक्तम्, जीवत्वात्, जीवस्य तस्य जीवान्तरनियामकत्वे तस्यापि जीवान्तरं नियामकमित्यनवस्थानात्, पूर्वपूर्वचेष्टाऽसिद्धावुत्तरोत्तरचेष्टाऽसिद्धिरिति मूलक्षतेः । अभ्युपेत्य चेदमुदितम्, अग्नेरपि प्रेर्येण सह जीवत्वसाम्यात्प्रेरणासम्भवाच्चेत्यर्थः । जीवप्रेरकाग्नेः स्वातन्त्र्याभ्युपगमान्नानवस्थेत्यत आह—**नियमेति** । अग्नेः स्वतन्त्रत्वे जीवान्तरस्यापि तत्स्यात् । अन्यथाऽग्नेरपि तन्न स्यात्, जीवत्वसाम्येऽप्यग्नेरेव स्वातन्त्र्यं च नान्येषामिति नियमे प्रमाणाभावात् । अतोऽग्नेस्स्वातन्त्र्यायोगात्सु-

अनीश्वरापेक्षत्वाच्च ॥

तत्त्वप्रकाशिका

स्यैवानवस्थेति भावः । अस्त्वग्नेरस्वातन्त्र्यम्, तथाऽपि तत्प्रेरकस्येश्वरस्य स्वातन्त्र्यसम्भवान्नानवस्थेत्यत आह—**अनीश्वरेति** । त्वयेश्वरानभ्युपगमान्नैवमनवस्थापरिहार इत्यर्थः । ईश्वराभ्युपगमे स एवाक्षिस्थतया युक्त्यादिप्राप्तः किमपोद्यते । ननु जीवत्वसाम्येऽपि नीचोच्चभाववन्नियम्यनियामकभावसम्भवः किन्न स्यादित्यतो वाऽऽह—**नियमेति** । नियामकविशेषे प्रमाणाभावान्न दृष्टान्तमात्रेण नियम्यनियामकभावसम्भव इति भावः । ननु भवताऽप्यग्न्यादिजीवानां जीवान्तरनियामकत्वाभ्युपगमात्कथं तदसम्भव इत्यतो वाऽऽह—**अनीश्वरेति** । यथा सति राज्ञि मण्डलेशे प्रजानां तच्छक्त्या नियम्यनियामकभावः सम्भवति, न त्वराजके लोके, तथाऽस्मत्पक्षे जीवानामीश्वरशक्त्या जीवान्तरनियामकत्वमुपपद्यते, न परपक्षे, परमेश्वरानङ्गीकारादिति भावः । तस्माद्विष्णुरेवाक्ष्यादित्यस्थो दिव्यदृष्टिगोचरोऽतस्स एवानन्दमयस्तज्ज्ञानादेव मोक्ष इति सिद्धम् ॥१७॥

चन्द्रिका

॥ ओम् अन्तर उपपत्तेः ओम् ॥

अत्र "य एषोऽन्तरक्षिणि पुरुषो दृश्यते एष आत्मेति होवाच एतदमृतमभयमेतद्ब्रह्म" इत्युक्तस्य चक्षुरन्तस्स्थस्याभयस्याग्नित्वात् "अभयं तितीर्षतां पारं" इति पूर्वोक्ताभयोऽप्यग्निर्न

प्रकाशः

॥ ओम् अन्तर उपपत्तेः ओम् ॥ भाष्यदिशाऽऽनन्दमयनयेन सङ्गतिप्रतीतेः पूर्वेण तामाह—**अत्रेति । पूर्वोक्तेति** । "विशेषणाच्च" इतिसूत्रोक्तेत्यर्थः । 'सङ्गतिः' आक्षेपिकी । भाष्यं तु फलपरं वा, येन केनचित्पूर्वेण सङ्गतिर्वाच्या न त्वव्यवहितेनेति निर्बन्ध इत्याशयं वा, आदित्यान्तस्स्थत्वलिङ्गस्यापि समन्वयाशयं वा नेयमिति भावः । नन्वस्याभयस्याग्नित्वे प्राक्तनस्यापि कुतस्तत्त्वं, अभ्यासार्थवादसहिताग्निश्रुतिबाहुल्यरूपविशेषहेतोरत्रेव तत्राभावात् । न हि "इन्द्रस्यात्मा" इत्यत्रेन्द्रस्यान्यत्वे "इन्द्रो राजा जगतः" इत्यत्राप्यन्यत्वम् । प्रत्युत तत्रोक्तलिङ्गैस्तस्य विष्णुधर्मत्वाध्यवसायेनात्रापि तेन विष्णुत्वस्यैव निर्णयोपपत्तेरिति चेन्मैवं, अभयत्वमन्यतो भयशून्यत्वं, तच्च स्वतन्त्रस्यैव, न त्वन्यनियतस्य । तथा चात्राभयत्वमग्नेरावश्यकमिति, स्वतन्त्रवस्तुद्वयायोगात् प्राक्तनमप्यभयत्वं तस्यैवेति तद्बलेनेतरदपि कथञ्चित्तस्मिन्नेयं, एकेनापि निरवकाशेन बहूनां बाधसम्भवात्, गुहाविष्टत्वस्याग्नावप्युपपत्तेः, ब्रह्मत्वस्यात्रेव तत्रापि नेतुं शक्यत्वात्, अमृतत्वं तस्मिन् शा-

चन्द्रिका

तु विष्णुरिति पूर्वपक्षोत्थानादनन्तरसङ्गतिः । अत्र चक्षुरन्तस्स्थोऽग्निः विष्णुर्वेति चिन्ता । तदर्थं अन्तस्स्थे श्रुतममृतत्वादिकं किं गौणं

प्रकाशः

ङ्कमानेनाक्षरत्वादेरपि तत्रैव शङ्कितुं शक्यत्वादस्याभयत्वस्याक्षेपेण तेन विष्णुत्वशङ्कानवकाशादिति तात्पर्यात् । एवं फलपरभाष्यसमर्थनमपि ध्येयम् । विषयसंशयटीकां व्यनक्ति—अत्रेति । छान्दोग्ये चतुर्थाध्याये "उपकोसलो हवै कामलायनः सत्यकामे जाबाले ब्रह्मचर्यमुवास । तस्य ह द्वादशवर्षाण्यग्नीन् परिचचार । स ह स्मान्यानन्तेवासिनस्समावर्तयन् तं ह स्मैव न समावर्तयति । तं जायोवाच तप्तो ब्रह्मचारी कुशलमग्नीन् परिचचारीत् । मा त्वाऽग्नयः परिप्रावोचन् । प्रब्रूह्यस्मा इति । तस्मै हाप्रोच्यैव प्रवासां चक्रे । स ह व्याधिनाऽनशितुं दध्रे । तमाचार्यजायोवाच ब्रह्मचारिन्नशान, किन्नु नाश्नासीति । स होवाच, बहव इमेऽस्मिन्पुरुषे कामा नानात्यया व्याधिभिः प्रतिपूर्णोऽस्मि नाशिष्यामीति । अथ हाग्नयः समूदिरे, तप्तो ब्रह्मचारी कुशलं नः परिचचारीद्धन्तास्मै प्रब्रवामेति । तस्मै होचुः, प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म" इत्याद्युपक्रम्य सम्भूयोपदेशानन्तरं "अथ हैनं गार्हपत्योऽनुशशास, पृथिव्यग्निरन्नमादित्य इति । य एष आदित्ये पुरुषो दृश्यते, सोऽहमस्मि स एवाहमस्मीति । स य एतमेवं विद्वानुपास्तेऽपहते पापकृत्यां, लोकी भवति, सर्वमायुरेति, ज्योग्जीवति, ना स्या-

चन्द्रिका

किं वा मुख्यमिति। तदर्थं "य एष आदित्ये पुरुषः सोऽह-

प्रकाशः

परपुरुषाः क्षीयन्ते, उपवयन्तं भुञ्जामोऽस्मिंश्च लोकेऽमुष्मिंश्च य एतमेवं विद्वानुपास्ते" इत्यादिना गार्हपत्यान्वाहार्यपचनाहवनीयरूपत्रेताग्नीनामादित्यचन्द्रविद्युद्गतस्य स्वात्मतयोपदेशमुक्त्वा "ते होचुरुपकोसलैषा सोम्य तेऽस्मद्विद्या आत्मविद्या चोक्ता" इत्युपसंहृत्याम्नायते, "य एषोन्तरक्षिणि पुरुषो दृश्यते एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मैतस्मिन्न किञ्चन श्लिष्यति, तद्यदस्मिन् सर्पिर्वोदकं वा सिञ्चति वर्त्मनी एव गच्छति, एतं संयद्वाममित्याचक्षते, एतं सर्वाणि वामान्यभिसंयन्ति य एवं वेद एष उ एव वामनिरेष हि सर्वाणि वामानि नयति य एवं वेद एष उ एव भामनिरेष हि सर्वेषु लोकेषु भाति य एवं वेद अथ यदु चैवास्मिच्छव्यं कर्म कुर्वन्ति, यदु च नार्चिषमेवाभिसम्भवन्ति, अर्चिषोऽहरन्ह आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षडुदङ्ङेति मासांस्तान्मासेभ्यस्संवत्सरं संवत्सरादादित्यं आदित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषो मानवस्स एनान् ब्रह्म गमयति" इत्यादि। तत्रत्यः चक्षुरन्तस्स्थो विषय इत्यर्थः। अत्र 'अक्षिस्थः' इति वक्तव्ये 'चक्षुः' इत्युक्तिरादित्याभेदस्फोरणाय, "आदित्यश्चक्षुर्भूत्वा" इत्यादेः। अत्राक्षिपदोक्तं चक्षुः प्राचां मतरीत्या देवतारूपं, टीकारीत्या जडरूपमिति ज्ञेयम्। मुख्यमिति चिन्तानन्तरं किं बाधकमस्त्युत

चन्द्रिका

मस्मि" इति अक्ष्यभिन्नादित्यस्थपुरुषे प्रयुक्तोऽहंशब्दः किमग्निपरः किं वा ब्रह्मपर इति। तदर्थं ब्रह्मपरत्वे "अस्मद्विद्या आत्मविद्या च" इत्युक्तो विद्याभेदो न घटते उत घटत इति।

प्रकाशः

नेति चिन्ता स्पष्टेति नोक्ता। **अक्ष्यभिन्नेति**। वक्ष्यमाणदिशेति भावः। एतच्च हेतुहेतुमद्भावघटनाय। अन्यथाऽऽदित्यस्थपुरुषे प्रयुक्ताहंशब्दस्याग्निपरत्वेऽप्यक्षिस्थस्याग्नित्वानापत्तेः। **विद्येति**। "उपकोसलैषा सोम्यास्मद्विद्याऽऽत्मविद्या च" इत्युक्तविद्याभेद इत्यर्थः। उपलक्षणमेतत्। सावधारणाभ्यासोऽर्थवादश्चेत्यपि बोध्यम्। यदा विद्याभेदो न युक्तः, तदा "कं ब्रह्म" इत्याद्यात्मविद्या, "य एषोऽन्तरादित्ये" इति विद्या त्वस्मद्विद्येति वाच्यत्वादादित्यस्थपुरुषे प्रयुक्ताहंशब्दस्याग्निपरत्वात् बाधकात् तदभिन्नाक्षिस्थे श्रुतामृतत्वादिकं गौणमित्यग्निश्रुत्यादिबलादग्निरेव चक्षुरन्तरस्थ इति पूर्वपक्षे फलम्, यदा तु घटते तदाऽहंशब्दस्य शास्त्रदृष्ट्या ब्रह्मपरत्वसम्भवाद्बाधकाभावेनामृतत्वादिकं मुख्यमेवेति तद्बलाद्विष्णुरिति सिद्धान्ते फलमिति स्पष्टमिति भावः। नन्वत्र वक्ष्यमाणदिशा टीकादिरीत्या चादित्यवाक्येऽग्निप्रयुक्ताहंशब्दसावधारणाभ्यासार्थवादविद्याभेदानां भावेन तद्बलात्तस्याग्निपरत्वं निर्धार्याक्षिवाक्यस्यापि तदनुसारेणाग्निपरत्वमुच्यते पूर्वपक्षे, न त्वक्षिवाक्यस्थप्रापकबलेन, तत्र तदभावात्। तथा चादित्यवाक्यमेवोदाहृत्यादित्यान्तरस्थः किमाग्नि-

प्रकाशः

विष्णुर्वेति चिन्ता, तदर्थं "सोऽहं" इत्यग्निप्रयुक्तोऽहंशब्दोऽग्निपरो विष्णुपरो वेति, तदर्थं तस्य विष्णुपरत्वे "सोऽहमस्मि स एवाहमस्मि" इत्यादिसावधारणाभ्यासार्थवादविद्याभेदोक्तयो न युज्यन्ते युज्यन्ते वेति चिन्तनीयम् । यदि न युज्यन्ते, तदाऽग्नेरेव आदित्यस्थत्वं, अन्यथा तु विष्णोरिति फलिष्यति । आदित्यादिस्थत्वेनोक्तानन्दमयाक्षेपश्च ऋजुर्भवति । आदित्यस्थस्य विष्णुत्वे चार्थादक्षिस्थोऽपि स एवेति सिध्यति । तथा च सूत्रेऽक्षिवाक्योपादानाय तत्रत्यात्मशब्दार्थोक्तिपरशब्दोऽपि व्यर्थ इति 'अन्तः' इत्येव सूत्रं स्यात्, 'अन्तरः' इत्यपि न वक्तव्यमिति लाघवम् । "स्थानादि" इति सूत्रं च न कर्तव्यं स्यादिति चेन्मैवं, बलवद्विष्णुश्रुतिलिङ्गादिबलेनाऽऽदित्यस्थस्य विष्णुत्वे निर्णीते सत्येवाहंशब्दादेः शास्त्रदृष्ट्यादिना विष्णौ घटनाया वर्णनीयत्वात् । विष्णुश्रुत्यादेश्चाक्षिवाक्य एव भावेनादित्यवाक्ये विष्णुपरत्वावधारणस्याक्षिस्थस्य विष्णुत्वनिर्णयाधीनत्वेनाक्षिवाक्यस्यैवोदाहर्तव्यत्वात् । न च "सुखविशिष्ट" इत्युक्तेन "कं ब्रह्म" इति प्रकरणेनादित्यस्थस्य विष्णुत्वनिर्णयोऽस्त्विति शङ्क्यं, तस्याग्निप्रयुक्ताहंश्रुत्यादिना विच्छेदस्य पूर्वपक्षिणा चोद्यमानत्वात् । न च "श्रुतोपनिषत्" इति सूत्रोक्तोपसंहारस्थब्रह्मलिङ्गबलेन प्रकरणाविच्छेदः सुज्ञान इत्यतः "सुखविशिष्टाभिधानादेव च" "श्रुतोपनिषत्कगत्यभिधानाच्च" इत्येव

चन्द्रिका

पूर्वपक्षस्तु—चक्षुरन्तस्स्थोऽग्निरेव, "य एष आदित्ये पुरुषो दृश्यते सोऽहमस्मि" इत्यग्निनाऽऽदित्यस्थस्य स्वात्मतयोपदिष्टत्वात्, चक्षुरादित्यदेवतयोश्च "आदित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशत्" इत्यादिश्रुत्या ऐक्यात्। यद्यपि "अक्षिणी प्राविशत्" इत्यत्र बाधक-

प्रकाशः

पूर्येत इति वाच्यं, तावता बलवद्विष्णुश्रुतिलिङ्गानामनुपदर्शनेन प्रकरणमात्रेणाहंशब्दाभ्यासादेर्बाधायोगाद्यथान्यासमेवानवद्यम्। अत एवामृतत्वादि किं गौणमित्यादिचिन्तोपदर्शिता। यद्यपि अमृतत्वादेर्मुख्यत्वेऽपि न पूर्वपक्षिणः क्षतिः, तादृशस्यापि तेनाग्नौ शङ्क्यमानत्वात्। तथाऽपि वास्तवाभिप्रायेण गौणं मुख्यमिति कोटिप्रदर्शनं, मुख्यसम्भवस्याभिमानमात्रत्वात्। "उपपत्तेः" इत्यादिसिद्धान्तहेतुव्यावर्त्यैरग्निप्रापकश्रुत्यर्थवादाभ्यासैः पूर्वपक्षयन् "य एषोऽन्तरक्षिणि" इति वाक्ये "अग्निरेवेत्यादिबह्वग्निश्रुतिसद्भावाच्च" इत्यन्तटीकां तावद्व्यनक्ति—**पूर्वपक्षस्त्वित्यादिनाऽग्निपरतेत्यन्तेन**। नन्वग्निना आदित्यस्थस्य स्वात्मतयोपदेशेऽपि अक्षिस्थस्याग्नित्वं कुत इत्यतः, चक्षुरादित्यशब्दयोर्भाष्यतत्त्वप्रदीपाद्यनुरोधेन देवतापरत्वमुपेत्य तत्रोपपत्तिं वदंस्तावत्परिहारमाह—**चक्षुरिति**। 'आदित्यः' मण्डलेदेवता चेतनश्चक्षुरभिमानी भूत्वाऽक्षिगोलके प्राविशदित्यर्थः। ननु "अक्षिणी" इत्यत्राक्षिशब्दस्य गोलकपरत्वादत्राप्यक्षिशब्दस्य न देवतापरत्वमित्याशङ्क्य साधयति—**यद्यपीति**। **बाधकेति**।

चन्द्रिका

वशादक्षिशब्दो नादित्यदेवतापरः, किन्तु जडपरः । तथाऽपि "अन्तरक्षिणि" इत्यत्र चक्षुःपर्यायः स देवतापर एव, अभिमान्यधिकरणन्यायेन तस्याक्ष्यभिमानिदेवतायामेव मुख्यत्वात् ।

प्रकाशः

आदित्यदेवतायाः चक्षुर्देवतायां प्रवेशायोगरूपादित्यर्थः । 'चक्षुःपर्यायः' चक्षुरिन्द्रियपर्यायः, न तदधिष्ठानगोलकपर्याय इत्यर्थः । 'सः' अक्षिशब्दः । **अभिमानीति** । द्वितीयस्याद्यपादे "अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्" इति तृतीयेऽधिकरणे "मृदब्रवीत्" इत्यादिवाक्यं प्रमाणं न वेति संशये, मृत्त्वादिहेतुना मृदादेर्जडत्वानुमानात्, अभिमानिचेतनस्यानुपलम्भादिबाधितत्वात्, जडस्य च वक्तृत्वाद्ययोगादप्रमाणमिति प्राप्ते, निरवकाशजडत्वयुक्तिनिर्दोषवेदवाक्यप्रामाण्योभयान्यथानुपपत्त्या

पृथिव्याद्यभिमानिन्यो देवताः प्रथितौजसः ।

इत्यादिवचनेन च देवतातद्विग्रहतदन्तर्धानशक्त्यादिसिद्धेः, अभिमन्यमानगतमृत्त्वादिमृच्छब्दप्रवृत्तिनिमित्तस्याभिमान्यधीनत्वस्याकाशनये,

यतोऽत्यन्तपराधीनं चेतनादप्यचेतनम् ।

इत्युक्तदिशा सिद्धत्वात्, "तदधीनत्वात्" इत्यत्रोक्तन्यायेन स्वातन्त्र्यस्य शब्दवृत्तौ मुख्यनिमित्तत्वेन मृदादिशब्दानां अभिमानिषु मृदादिजडेभ्यो मुख्यत्वात् मृदादिशब्दैर्देवताया एवाभिधानमिति वक्तृत्वाद्युपपत्तेः प्रमाणमेवेत्युक्तम् । तेन न्यायेन मुख्यत्वा-

चन्द्रिका

"यश्चक्षुषि तिष्ठन् यश्चक्षुषोऽन्तरः" इति श्रुत्यन्तरेऽन्तरपुरुषाधिकरणत्वेनोक्तस्य चक्षुषः इह "अन्तरक्षिणि" इति प्रत्यभिज्ञानाच्च। तत्रोक्तस्य चक्षुषः "यं चक्षुर्न वेद" इति वाक्यशेषेण चेतनत्वात्। स्थानादिसूत्रादौ जडस्य स्थानत्वोक्तिस्तु परम्परया स्थानत्वात्। अत एव भाष्ये सन्न्यायरत्नावल्यां च "अक्ष्यादित्ययोरैक्यात्" इत्येवोक्तम्। तत्त्वप्रदीपे च "अक्षीन्द्रियप्रेरकादित्ययोरैक्यात्" इत्येवोक्तम्। "अक्ष्यादित्ययोरेकविधत्वात्" इति टीकाऽपि भाष्याद्यनु-

प्रकाशः

दित्यर्थः। तथा च "मुख्यामुख्ययोर्मुख्ये कार्यसम्प्रत्ययः" इति न्यायेन मुख्यदेवताया एव ग्रहणं, न त्वमुख्यजडस्येति भावः। युक्त्यन्तरं चाह—य इति। चक्षुश्शब्दस्य देवतापरत्वं कुत इत्यत आह—तत्रेति। श्रुत्यन्तर इत्यर्थः। जडस्य वेदनप्रसक्तेरभावेन "न वेद" इति निषेधायोगात्तदन्यथानुपपत्त्या चेतनत्वसिद्धिरिति भावः। व्यक्तमेतदुत्तरनये। ननु "स्थानादिव्यपदेशाच्च" इति सूत्रे "तद्यदस्मिन् सर्पिर्वोदकं वा सिञ्चति वर्त्मनी एव गच्छति" इति श्रुतौ जडस्यैवाक्ष्णोऽसङ्गत्वाख्यशक्तिव्यपदेशादक्षिशब्देन चेतनग्रहणे सर्पिराद्यलेपरूपस्थानशक्तिव्यपदेशो न युक्त इत्यत आह—स्थानेति। असङ्गविष्ण्वाधारदेवताधारत्वाभिप्रायेण सिद्धान्ते तदुक्तिरित्यर्थः। अक्ष्णोर्जडत्वोपगमपरतया प्रतीयमानाऽपि टीका चेतनपरत्वेन नेयेत्याह—अक्षीति। विधाशब्दस्य प्रकारार्थ-

चन्द्रिका

सारेण प्रकारभेदनिषेधमुखेन प्रकार्थैक्यपरा नेया । यद्वा—"अक्षिणी प्राविशत्" इत्यत्रेव "अन्तरक्षिणि" इत्यत्राप्यक्षिशब्दो जडपरः । एवञ्च स्थानादिसूत्रादिस्वारस्यं, "य एष आदित्ये पुरुषो दृश्यते" "य एषोऽन्तरक्षिणि पुरुषो दृश्यते" इति वाक्यद्वयावैयर्थ्यं च । न चैवं अक्ष्यादित्ययोर्भिन्नत्वादादित्यस्थत्वेऽप्यक्षिस्थत्वासिद्धिरिति वाच्यम्, "आदित्यश्चक्षुः" इति श्रुतावादित्यमण्डलस्थचेतनस्य जडाक्षिप्रवेशोक्त्या जडाक्ष्यादित्यमण्डलयोरेकचेतनस्थानत्वेनैकविध-

प्रकाशः

त्वात्, 'एकविधत्वात्' इत्यनेनाक्ष्णोर्यद्देवताधिष्ठानत्वं तद्देवताधिष्ठानत्वमादित्यमण्डलस्यापि, न तु देवतान्तराधिष्ठानत्वमिति प्रकारभेदनिषेधप्रतीतावप्युभयाधारत्वरूपैकप्रकारवान् प्रकारी चेतन एक एवेति नेयेत्यर्थः । इदानीमनेकस्वारस्यानुरोधेन टीकारीत्याऽक्ष्णोर्जडत्वमुपेत्याक्ष्यादित्ययोरैक्यप्रकारमाह—**यद्वेति** । आदिपदेन "सर्पिर्वा" इति श्रुतिर्गृह्यते । **वाक्यद्वयेति** । चेतनपक्षे द्वयोरेकदेवताकत्वादन्यतरवैयर्थ्यमिति भावः । "एकविधत्वात्" इति टीकावाक्यं टीकोक्तव्यावर्त्यशङ्काव्यक्तिपूर्वं व्यनक्ति—**न चेति** । 'एवं' जडत्वे । ननु "य एष आदित्ये" इत्यत्र "आदित्यश्चक्षुर्भूत्वा" इत्यादाविव आदित्यशब्दस्य चेतनपरत्वे मण्डलाभिमानिचेतनस्थस्यैव स्वात्मतयोपदेशात् अक्ष्णश्चैकचेतनस्थानत्वेनैकविधत्वादक्षिचेतनस्थ

चन्द्रिका

त्वात् । "य एष आदित्ये पुरुषो दृश्यते" इत्यत्राप्यादित्यपदेन मण्डलमेवोच्यते । "ऐक्यात्" इति भाष्येऽपि जडाक्ष्यादित्ययोरैक्यायोगात् एकविधत्वमेत्राभिप्रेतमिति टीकार्थः । यद्यप्यंशाधिकरणे "असावादित्यस्त्रिवृत्त्रिवृदिव वै चक्षुः शुक्लं कृष्णं कनीनिका" इति श्रुत्या त्रिवृत्त्वेन अक्ष्यादित्ययोस्साम्यं वक्ष्यते । तथाऽपि न तदिह विवक्ष्यते, तेनादित्यस्थस्याक्षिस्थत्वासिद्धेः । न च वाच्यं अक्ष्यादित्यस्थयोरेकत्वेऽपि "सोऽहमस्मि" इत्यत्रोपदेष्टा नाग्निः किन्तु विष्णुरिति,

प्रकाशः

एवाग्निरिति वाच्यमित्यत आह—**य एष इति** । एवञ्च प्राचीनरीत्या अक्ष्यादित्यदेवतयोरैक्यादादित्यदेवतान्तस्स्थस्य स्वात्मतयोपदेशेऽक्षिदेवतान्तस्स्थोपि स एव, उभयदेवताया एकत्वादित्यर्थः । टीकाकृन्मतेऽक्ष्यादित्ययोर्जडत्वेऽप्येकदेवताधिष्ठानत्वादक्षिस्थस्याग्नित्वे आदित्यस्थस्य स्वात्मतयोपदेशादिति हेतुर्न व्यधिकरण इति सिद्धम् । अथाप्यसिद्धो हेतुः, "सोऽहमस्मि" इति श्रुतावहंशब्दस्याग्निपरत्वे मानाभावेनादित्यस्थस्य स्वात्मतयोपदेशाभावादिति भावेन "न चात्रोपदेष्टा नाग्निरिति युक्तम्" इति न्यायविवरणटीकोक्तव्यावर्त्यशङ्कापूर्वं "एतस्मिन्प्रकरणे अथ हाग्नयः" इत्यादिटीकां व्यनक्ति—**न च वाच्यमित्यादिना** । **विष्णुरिति** । "अहं हि सर्वयज्ञानां भोक्ता च" इत्यादाविव विष्णुप्रयुक्त एवायमहंशब्द इति स एवा-

चन्द्रिका

"अग्नीन् परिचचार अथ हाग्नयः समूदिरे" इत्यादिना बहुकृत्वोऽग्निश्रुतेः। बहुवचनान्ताग्निश्रुतेश्च। "अथ हैनं गार्हपत्योऽनुशशास" "अथ हैनमन्वहार्यपचनोऽनुशशास" "अथ हैनमाहवनीयोऽनुशशास" इति अग्निविशेषत्वेन प्रसिद्धत्रेताग्निरूपबह्वग्नीनां श्रुतेश्च। स्वीकृता च सिद्धान्तिनाऽपि तत्राग्निगार्हपत्यादिशब्दानामग्निपरता।

प्रकाशः

र्थ इत्यर्थः। उपदेष्टुरग्नित्वे त्रिविधाग्निश्रुतीर्मानीकरोति—**अग्नीनिति**। "योऽसावादित्ये पुरुषस्सोऽहमस्मि" इत्यतः पूर्वं "तस्य ह द्वादशवर्षमग्नीन्परिचचार तप्तो ब्रह्मचारी कुशलमग्नीन् परिचचारीत्" "अथ हाग्नयस्समूदिरे" "ते होचुः" इति बहुकृत्वः श्रूयते बहुवचनान्ततया च। बहुवचनान्तस्य प्रसिद्धाग्निपरत्वेन मुख्यबहुत्वार्थतयोपपत्तौ न विष्णुपरत्वं क्लेशेन कल्प्यमिति भावः। अत्राग्निशब्दस्यान्तरधिकरणन्यायेन विष्णुपरता किं न स्यादित्यतः, तत्रेवात्र निरवकाशविष्णुलिङ्गाभावेनाग्न्यर्थतैवेति भावेनाह—**स्वीकृता चेति**। एतेन "बहुश्रुतिभ्यः" इति न्यायविवरणपरा "एतस्मिन् प्रकरणे "अथहाग्नयस्समूदिरे गार्हपत्योऽनुशशास" इत्यादिबह्वग्निश्रुतिसद्भावाच्च" इति टीका बहुकृत्वोऽग्निश्रुतीनां सद्भावात्, बहुवचनान्ताग्निश्रुतीनां सद्भावात्, गार्हपत्यान्वाहार्यपचनादिरूपाणां बहूनामग्नीनां श्रुतिसद्भावाच्चेति त्रेधा व्याख्याता। तेन "बहुश्रुतिभ्यः" इत्येतदपि त्रेधा व्याख्यातं ध्येयम्। एवं "अभ्यासार्थवादसहित-

चन्द्रिका

न च वाच्यमग्नीनामेवोपदेष्टृत्वेऽपि "शास्त्रदृष्ट्या" इति न्यायेन 'अहं' इत्यस्यान्तर्यामिपरतेति ब्रह्मैवाक्षिस्थत्वेनोपास्यमिति, "उपवयन्तं भुञ्जामः" इत्यग्नीनामुपासकपालकत्वादिना स्तुतिरूपार्थवादस्य तेषामुपास्यत्वं विनाऽयोगेन तेषामेवाहंशब्दार्थत्वात् । न ह्यन्य उपासकपालकः अन्यश्चोपास्य इति युक्तम्। "सोऽहमस्मि स एवाहमस्मि" इति सावधारणमभ्यासाच्च । अभ्यासो हि अभ्यस्यमानशब्दस्वरसप्रतिपन्नेऽर्थे तात्पर्यार्थः। अग्निरेव चाग्निप्रयुक्ताहंशब्देन स्वरस·

प्रकाश

बहुश्रुतिभ्यः" इति न्यायविवरणे 'बहुश्रुतिभ्यः' इत्यंशं व्याख्याय, 'अभ्यासार्थवादसहित' इत्यंशं टीकोक्तादपि प्रकारात् प्रकारान्तरेण व्यावर्त्याशङ्कापूर्वं व्याचष्टे—**न च वाच्यमिति।** **उपासकपालकत्वादिनेति।** "उपवयन्तं भुञ्जामोऽस्मिंश्च लोकेऽमुष्मिंश्च य एवं विद्वानुपास्ते" इत्यत्र 'भुञ्जामः' पालयाम इत्यग्नीनां वचनम् । "भुजोऽनवने" इति सूत्रेणावनव्यतिरिक्तेऽभ्यवहार एवात्मनेपदविधानात्, परस्मैपदप्रयोगात् पालकत्वं ज्ञायत इति भावः । अर्थवादस्य चातुर्विध्यादुक्तं—**स्तुतीति।** अभ्यासोऽपि "सोऽहमस्मि" इत्यादिरूप एकः, अग्निप्रयुक्तास्मच्छब्दाभ्यासरूपोऽन्यः,विद्याशब्दाभ्यासश्चेति त्रिविधोऽभिमत इत्याह **—सोऽहमिति।** यद्यपि 'प्रब्रवाम' इत्यत्र नास्मच्छब्दनिर्देशोऽस्ति, तथाऽप्युत्तमपुरुषप्रयोगाद्वयमिति लभ्यते, "अस्मद्युत्तमः" इति वि·

चन्द्रिका

प्रतिपन्नः । किञ्च "कुशलं नः पर्यचारीद्धन्तास्मै प्रब्रवाम उपवयन्तं भुञ्जामः" इत्यादौ सिद्धान्तेऽपि बहुकृत्वोऽस्मच्छब्देनाग्नीनामेव निर्देशात् तेषामेवेहाप्यहंशब्दार्थत्वम् । किञ्च "अस्मद्विद्या आत्मविद्या च" इति विद्याशब्दोऽभ्यस्यत इति विद्याभेदार्थं "कं ब्रह्म" इत्यादिका आत्मविद्या, आदित्यस्थादिविद्या त्वग्निविद्येति स्वीकार्यम् । आदित्यस्थ एव चाक्षिस्थ इति पूर्वमेवोक्तमित्यक्षिस्थोऽग्निरेव । तदेतदभिप्रेत्योक्तं न्यायविवरणे "सोऽहमस्मि स एवाहमस्मीत्याद्यभ्यासार्थवादसहितबहुश्रुतिभ्यः" इति । अत्र चोक्तरीत्या त्रिविधा बहुश्रुतिरग्नीनामुपदेष्टृत्वे हेतुः । अर्थवादाभ्यासौ तु उपदेष्टॄणामग्नीनामेव "सोऽहमस्मि" इत्यत्रास्मच्छब्दार्थत्वे हेतू । आदिशब्देन च "कुशलं नः पर्यचारीत्" इत्याद्यभ्यासावभिप्रेतौ । यद्वा— टीकोक्तरीत्या न्यायविवरणस्थोऽभ्यासः "यश्चासावादित्ये" इत्यादिसमाख्याबाधे हेतुः । "अपहते पापकृत्याम्" इत्यर्थवादस्तु

प्रकाशः

धानादिति भावः । अस्त्वादित्यस्थविद्याऽग्निविद्येति, अक्षिस्थोऽग्निरित्यत्र किमायातमित्यत आह—**आदित्यस्थ एवेति** । उक्तमर्थं न्यायविवरणारूढतया दर्शयति—**अत्र चेति** । स्वयमेकं पक्षमुत्प्रेक्ष्य टीकोक्तपक्षमनुपपत्तिनिरासपूर्वं साधयितुमाह—**यद्वेति** । प्राक्पक्षे साहित्यपदास्वारस्यमिति हृदयम् । तेन श्रुतेरेव प्राधान्यं तद्बाध-

चन्द्रिका

ब्रह्मपक्षेऽपूर्वतेति शङ्कानिरासे हेतुः । अत्र च टीकायां न्यायविवरणस्याद्या योजना स्फुटेति तामुपेक्ष्य, न्यायविवरणोक्तसाहित्यस्वारस्यार्थं 'समाख्यातोऽभ्यासः प्रबलः, अपूर्वत्वादप्यर्थवादः' इति न्यायव्युत्पादनार्थं च द्वितीययोजनैवोक्ता । तत्र चात्रत्यादित्यस्थस्याग्नित्वे सिद्धे, तद्बलेन समाख्याश्रुत्युक्तादित्यस्थस्य पूर्वपक्षिणा विष्णुत्वाक्षेपेऽपि ततः प्राग्विष्णौ समाख्याशङ्का युक्ता, तथा "शास्त्रदृष्ट्या" इत्यत्रोक्तस्य ब्रह्मण्यहंशब्दो मुख्य इत्यस्याच्छादनादग्नेरादित्यस्थत्वस्यौपचारिकत्वोक्तिर्युक्ता ।

प्रकाशः

निरासेन तदुपोद्बलकत्वस्यैव प्रतीतेरिति । व्युत्पादनार्थमिति । प्रदर्शनार्थमित्यर्थः, "समन्वयात्" इत्यत्रैव व्युत्पादितत्वात् । ननु टीकायां न समाख्याविरोधाशङ्का युक्ता, पूर्वपक्षे "यश्चासावादित्ये" इत्यस्याग्निपरत्वेन विष्णुपरत्वाक्षेपादित्यतः तत्समाधत्ते—तत्र चेति । नन्वथाप्यौपचारिकत्वशङ्का न युक्ता, "शास्त्रदृष्ट्या तूपदेशः" इत्यत्राहंशब्दस्य विष्णौ मुख्यताया उक्तत्वादित्यत आह—तथेति । अत एव न्यायविवरणटीकायां "न च "प्राणो वा अहमस्मि" इतिवदन्तर्याम्यपेक्षयेति वाच्यम्, "सोऽहमस्मि" इत्युक्त्वा पुनः "स एवाहमस्मि" इति सावधारणमुक्तत्वादवधारणेन च प्रकारान्तराणां सर्वेषां व्यावर्तितत्वात्" इति ग्रन्थेनोपचारचोद्यादपीदं पृथगाशङ्क्य निरस्तमिति भावः । ननु व्यधिकरणमेतत्, टीकायां

चन्द्रिका

अत्र हि मञ्चानां क्रोशनं औपचारिकं इत्यत्र क्रोशनवत्सु पुरुषेषु मञ्चशब्द इव आदित्यस्थत्ववति विष्णावग्निप्रयुक्तोऽहंशब्दः उपचरित इति प्रतीयते, अन्यथा समाख्योक्त्ययोगात् । तथा अत्यलौकिकब्रह्मग्रहणेऽग्निग्रहणादप्यपूर्वताऽतिशयाद्वा, दिवाऽग्नेः प्रभाया अदर्शनेनादित्यप्रवेशस्यानुमानसिद्धत्वाद्वा, विष्णुग्रहणेऽपूर्वताशङ्का च युक्तेति द्रष्टव्यम् । यद्यपि "अपहते पापकृत्यां" इत्यादिफलं, तथापि स्तुतिरूपार्थवादताऽप्यस्तीति वा, वस्तुतः फलवत्त्वं फलं फलोक्तिस्त्वर्थवाद इति वा, "अपहते पापकृत्यां लोकी भवति" इत्यादेः प्रत्येकं फलोक्तित्वेऽपि समुदायस्यानेकफलत्वेनोपासनास्तुतिरूपार्थवादत्वमिति वाऽभिप्रायः ।

प्रकाशः

अग्नेरादित्यस्थत्वमौपचारिकमिति शङ्कितं, न त्वहं शब्द औपचारिक इति, तत्राहंशब्दस्य विष्णौ मुख्यत्वोक्तेः का सङ्गतिरित्यतस्तस्यैवमेवार्थ इत्याह—**अत्र हीति** । अत एव न्यायविवरणटीकायां "आत्मा मे भद्रसेनः" इतिवत् "सोऽहमस्मि" इत्युपचारः किं न स्यादित्येवोक्तम् । **अन्यथेति** । अग्नेरादित्यस्थत्वस्यौपचारिकत्व इत्यर्थः । ननु यदपि विष्णुग्रहणेऽपूर्वत्वं शङ्कितं, तन्न, अग्निग्रहणेऽप्यपूर्वतालाभात् । न ह्यग्नेरक्षिस्थत्वमक्षादिसिद्धमित्यत आह—**तथेति** । टीकोक्तस्यार्थवादत्वमाक्षिप्याह—**यद्यपीति** । 'अपहते' अपहन्ति । अर्थवादेन कथं ब्रह्मपक्षानिरास

चन्द्रिका

न च "सर्वमायुरेति ज्योक् जीवति" इत्यल्पफलेन स्तुतिर्ब्रह्मपक्षे युक्ता। तस्मादक्षिस्थोऽग्निरेव, अमृतत्वाभयत्वादिकं तु स्वकार्ये ऐश्वर्यमात्रेणाग्नेरिन्द्रत्ववत्, स्वाधमदेवतादिभ्यो मृतिभयादिराहित्येन वा, उक्तार्थवादसहितबहुश्रुतिबलादात्यन्तिकामृतत्वादियोगेन वाऽग्नेरेवेति॥

सिद्धान्तस्तु—

प्रकाशः

इत्यत आह—**न चेति । स्वकार्य इति ।** "ऐन्द्रचा गार्हपत्यमुपतिष्ठते" इति विनियोगवशादिन्द्रप्रकाशकेन "कदाचन स्तरीरसि नेन्द्र" इति मन्त्रेण गार्हपत्याग्नेः हविःश्रपणादिस्वकार्ये ऐश्वर्यमात्रेणेन्द्रपदप्रतिपाद्यत्वं, तद्वदित्यर्थः । उक्तं च वार्तिके—

स्यादग्नेर्गौणमिन्द्रत्वं यज्ञसम्बन्धकारितम् ।
इन्दत्यर्थानुसाराद्वा स्वकार्ये सोऽपि हीश्वरः ॥

इति । "अग्निज्ञानात्सर्वपापाश्लेषान्मोक्षोपपत्तिः" इति भाष्यसूचितं पक्षमाह—**उक्तार्थवादेति ।** प्राचीनपक्षस्तु "आत्मादिशब्दोऽप्यमुख्यार्थोऽङ्गीकार्यः" इति न्यायविवरणटीकोक्तः ॥

अमृतत्वाभयत्वब्रह्मात्मशब्दस्वसम्बन्धनिमित्तकचक्षुरसङ्गत्वापादकत्वपूर्णसुखत्वादिश्रुतिलिङ्गप्रकरणरूपविष्णुप्रापकाणां "उपपत्तेः" इत्यादिसूत्रोक्तानां निरवकाशत्वात्परहेतूनां सावकाशत्वात्परपक्षे बाधकसत्त्वाच्च विष्णुरेवाक्षिस्थ इति भावेन "विष्णुरेव चक्षुरन्तस्स्थः" इत्यादिटीकोक्तप्रमेयं निष्कृष्य दर्शयति—**सिद्धान्तस्त्वित्यादिना ।**

चन्द्रिका

अग्नेः "तमेताः पञ्चदेवताः परिह्येनं म्रियन्ते विद्युद्वृष्टिश्चन्द्रमा आदित्योऽग्निः" "भीषास्मादग्निश्च" इत्यादिश्रुतिभिर्मृतिभयादिमत्त्वेन मुख्यामृतत्वादेर्निरवकाशत्वात्, अमुख्यस्य च मुख्यसम्भवे अयोगात्, भाष्ये च ब्रह्मात्मशब्दयोर्निरवकाशतायाः प्रागेवोक्तत्वात्, स्थानादिव्यपदेशसुखविशिष्टाभिधानादीनां निरवकाशतायास्तत्रैवोक्तत्वात्, जीवपक्षे अनवस्थादेश्च बाधकत्वात् विष्णुरेव

प्रकाशः

'अग्नेर्मृतिभयादिमत्त्वेन' इत्यन्वयः।"म्रियन्ते पञ्चदेवताः" इति ऋग्भाष्योक्तमाह—**तमिति**। 'तं' वायुगं विष्णुं 'परि' इत्यैतरेयब्राह्मणे, 'अस्मात्' अस्य भयेनेति तैत्तिरीये, "भयादस्याग्निस्तपति" इति कठश्रुत्यादिरादिपदार्थः। अत्राभयत्वादेश्चन्द्रिकायां पूर्वपक्षिणाऽऽक्षेपे कृतेऽपि परहेतूनां सावकाशत्वस्याग्रे स्पष्टत्वात् "कम्पनात्" इत्यत्र टीकोक्तदिशाऽमृतत्वादेर्हेतूकरणमविरुद्धमिति ज्ञेयम्। **प्रागेवेति**। "अभ्यासात्" "प्रसिद्धोपदेशात्" इत्यादौ। **स्थानादीति**। "स्थानादिव्यपदेशाच्च" इत्यत्र "तद्यदस्मिन् सर्पिर्वोदकं वा सिञ्चति" इत्यक्षिस्थपुरुषसम्बन्धादक्ष्णोः असङ्गाख्यशक्तिर्व्यपदिश्यते। तथा "एतं संयद्वाम इत्याचक्षते एनं हि सर्वाणि वामानि संयन्ति एष उ एव वामनिः" इत्यादिना संयद्वामत्वादिस्वरूपशक्तिश्चोच्यते। एतदुभयं च "स ईशस्सोऽसपत्नः स हरिः परः परोवरीयान् यदिदंचक्षुषि सर्पिर्वोदकं वा सिञ्चति वर्त्मनी एव गच्छति स वामनस्स भामनः" इत्यादिश्रुत्या,

चन्द्रिका

अक्षिस्थः । तदेतदभिप्रेत्योक्तं न्यायविवरणे—"निरवकाशोपपत्तेरेव प्राबल्यम्" इति । न च बह्वग्निश्रुत्यादिबाधः, अग्नीनामेवोप-

प्रकाशः

यत्स्थानत्वादिदं चक्षुरसङ्गं सर्ववस्तुभिः ।
स वामनः परोऽस्माकं ………………… ॥

इत्यादिस्मृत्या च विष्ण्वेकनिष्ठम् । "सुखविशिष्टाभिधानादेव च" इत्यत्र "कं ब्रह्म खं ब्रह्म" इत्युपक्रमे श्रुतं विशिष्टसुखत्वं पूर्णसुखत्वमुच्यते । तच्च "आनन्दं ब्रह्मणः" "आनन्दो ब्रह्म" इत्यादिना निरवकाशम् । "श्रुतोपनिषत्कगत्यभिधानात्" इत्यत्र श्रुतैतद्विद्यानां "स एनान् ब्रह्म गमयति" इति ब्रह्मगत्यभिधानात्तस्य चाक्षिस्थस्य विष्णुत्वं विना अयोगात्, अन्यविद्यया अन्यगतेरयुक्तत्वात् इति भाष्यादावेवोक्तत्वादित्यर्थः । "अनवस्थितेरसम्भवाच्च नेतरः" इत्यत्र वामनिभामन्यादिशब्दबलेनाग्निर्जीवप्रेरकतया चक्षुस्स्थत्वेऽभिमते सति, तस्य जीवत्वात् प्रेरकान्तरापेक्षायां तत्रापि तथेत्यनवस्थानात्, अग्नेरपि प्रेर्यजीवत्वसाम्येन प्रेरणस्यासम्भवाच्च नाग्निरक्षिस्थ इत्युच्यमानत्वादित्यर्थः । टीकाया मूलमाह—तदेतदिति । उपपत्तेरेव प्राबल्यं, किमुतात्मशब्दसहिताया इत्येवकारार्थः । उपपत्तेर्निरवकाशत्वोक्तिसूचितं परहेतूनां सावकाशत्वं भाष्याद्युक्तं व्यक्तमाह—**न चेत्यादिना** ।

चन्द्रिका

देष्टृत्वात् "कुशलं नः" इत्यादावस्मच्छब्दोऽग्निपरोऽपि "सोऽहं" इत्यत्र बाधकादन्तर्यामिपरः। अभ्यासोऽपि पूर्वापराविरुद्धेऽर्थे तात्पर्यस्य लिङ्गम्। अग्नेरादित्यस्थत्वं च "अमृतं" इत्याद्युत्तरवाक्यैः "कं ब्रह्म" इत्यादिपूर्ववाक्यैश्च विरुद्धम्।

धर्म्यैक्येऽपि भवत्येव विद्याभेदः प्रकारयोः।
भेदमात्रेणापि यथा दहरप्राणविद्ययोः॥

प्रकाशः

अग्निपरोऽपीति। यथोक्तं न्यायविवरणटीकायां—"अग्निः प्रसिद्ध एवास्तु, "सोऽहमस्मि" इत्यादि तु अन्तर्याम्यपेक्षया सावकाशम्" इति। **बाधकादिति**। अमृतत्वादिबाधकादित्यर्थः। श्रुतिगतिमुक्त्वाऽभ्यासगतिमाह—**अभ्यासोऽपीति**। "अवधारणं चान्तर्यामिणो विशेषाभावमात्रप्रतिपादनार्थम्" इति अन्यत्र टीकायामुक्तरीत्याऽवधारणगतिरपि ध्येया। उक्तं च तत्त्वप्रदीपे—"अत्र चोक्तं छन्दोगोपनिषद्भाष्ये भगवतैव "स एवाहमस्मि" इत्यन्तर्यामिणोस्सर्वविशेषाभावज्ञापनार्थम्" इत्यादि। ननु विद्याशब्दाभ्यासस्य का गतिरित्यतः "न चास्मद्विद्येत्युक्तिविरोधः" इत्यादिटीकोक्तं प्रमेयं सङ्गृह्य विवृणोति—**धर्म्यैक्येऽपीति**। "यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म" इति छान्दोग्यस्थदहरविद्या ब्रह्मपरेति दहरनये साधयिष्यते। "प्राणो वा आशाया भूयान्" इति तत्रैव सप्तमगता प्राणविद्या भूमाधिकरणे ब्रह्मपरेति

चन्द्रिका

अस्मद्विद्यात्मविद्ययोश्च ब्रह्मविद्यात्वेऽपि आद्याया अग्न्यन्तर्यामित्वप्रकारकत्वात्, द्वितीयायाश्च सर्वगतत्वप्रकारकत्वात्, ब्रह्मविषयकदहरप्राणवैश्वानरादिविद्यानामिव प्रकारभेदात् पृथगुक्तिरिति ॥

सूत्रक्रमस्तु आद्ये सूत्रे विषयवाक्यस्थश्रुतिलिङ्गोक्तिः। अत्र चा-न्तरुपपदाद्रमतेः "अमन्तात् डः" इति डप्रत्ययान्तेनान्तरशब्दे-नान्तस्स्थित्वारमणमुच्यते, न त्वन्तःस्थितिमात्रं, तथात्वे हि लाघवाय श्रुत्यनुगमाय च "अन्तस्तद्धर्म" इतिवत् 'अन्तः' इत्ये-

प्रकाशः

वक्ष्यते। "अभिविमानमात्मानं वैश्वानरमुपास्ते" इति तत्रैव पञ्चमस्था वैश्वानरविद्या वैश्वानरनये निर्णेष्यत इति ताः ब्रह्मपरा इति भावः। प्रकारेति। दहरहृत्पद्मस्थत्वप्राणस्थत्वविश्वनरा-न्तरत्वादिप्रकारभेदादित्यर्थः। श्रुतीति। "आत्मेति होवाच" इत्यात्मश्रुतिः। "एतद्ब्रह्म" इति ब्रह्मश्रुतिः। अमृतत्वाभयत्वरूपे लिङ्गे। नन्वत्र "अन्तस्तद्धर्मोपदेशात्" इतिवत् "अन्तरुपपत्तेः" इत्येव वाच्यं, न त्वन्तर इत्यत आह—अत्र चेति। यद्वाऽत्र क्रियाभावलिङ्गमुच्यत इत्युक्तमप्ययुक्तं, सूत्रे भावस्यैव प्रतीत्या क्रियाया अप्रतीतेरित्यत आह—अत्र चेति। "रमुक्रीडायां" इत्यस्यान्तश्शब्द उपपदे सति अमन्तत्वात् "अमन्ताड्डः" इति उणादिसूत्रेण डप्रत्यये कृते डित्त्वादभस्यापि टेर्लोपे "उणा-दयो बहुलम्" इत्युपपदान्त्यलोपे दीर्घाभावे च 'अन्तरः' इति भवति।

चन्द्रिका

त्रावक्ष्यत्, नत्वन्तर इति। श्रुतौ चात्मशब्देनादेयं मातीति व्युत्पत्त्या रमणमुच्यते। तदुक्तमनुव्याख्याने—

अन्तस्स्थित्वा रमणकृदन्तरस्समुदाहृतः।
रमणं चात्मशब्देनादेयं मातीति चोच्यते॥

प्रकाशः

'अम्' इति प्रत्याहारः। ननु "अमन्ताड्डः" इत्यत्र वृत्तौ "डकारस्येत्संज्ञा प्राप्ता बहुलवचनान्न भवति, रम्यते रमयते वा रण्डा पुनर्भूः" इत्युक्तम्। तथाऽप्युणादेर्यथाप्रयोगं वर्णनीयत्वेन दण्डमण्डरण्डादिप्रयोगनिर्वाहायेत्संज्ञा नेत्युक्तावपि 'अन्तरः' इत्यादि-निर्वाहायेत्संज्ञा उत्सर्गप्राप्ता भवत्येवेति भावः। यद्वा आद्यस्य तृतीये 'विद्याचुञ्चुः' इत्यादिसिद्धये "षः प्रत्ययस्य" "चुटू" इति योगविभागकरणं "चुटू" इत्यस्यानित्यत्वज्ञापनार्थमिति वृ-त्त्यादावुक्तत्वेन 'रण्डा दण्डः' इत्यादौ अभावेऽपि क्वचिदित्संज्ञा भवत्येव। ननु श्रुत्यनुक्तं कथं सूत्रचत इत्यत आह—**श्रुतौ चेति**। आङ्पूर्वाद्ददातेर्मन्यतेश्च क्विपि सति आदेयमुपादेयं सुखं सुखसाधनं वा माति अनुभवति इति सुधोक्तनिर्वचनेनेत्यर्थः। **इति चेति**। न केवलं सूत्रे, श्रुतौ चेत्यर्थः। नन्वेवं सूत्रे 'अन्तरः' इत्यस्य चक्षुरन्तस्स्थ आत्मेत्यर्थतया आत्मशब्दस्य प्रतिज्ञाभागप्रविष्टत्वात् कथमात्मश्रुतित्वेन हेतूकरणं, मैवं, अन्त-स्स्थत्वमात्रस्यैव साध्यताविवक्षायां आत्मश्रुतेर्हेतुत्वस्याभिमतत्वात्।

चन्द्रिका

इति । द्वितीये तदुत्तरवाक्यस्थलिङ्गोक्तिः । तृतीये प्रकरणोक्तिः ।

प्रकाशः

अत एव भाष्ये "चक्षुरन्तस्स्थो विष्णुरेव" इत्येवोक्त्वा "ब्रह्मशब्दाद्युपपत्तेश्च" इत्युक्तम्, न्यायविवरणटीकायां च "चक्षुरन्तस्स्थो हरिरेव अमृतत्वाभयत्वोपपत्तेरात्मादिशब्दात्" इत्युक्तम्, सूत्रे चामृतत्वाभयत्वरूपनिरवकाशोपपत्तेरेवोक्तिः, अत्र टीकायां "चक्षुरन्तरः" इति सामान्योक्तिः । द्वितीय इति । स्थानादिसूत्रे । तत्र 'स्थानादि' इत्यस्य स्थानशक्तिरात्मशक्तिरित्यर्थः । लिङ्गेति । पुरुषसम्बन्धनिमित्तसर्पिराद्यसङ्गत्वादिलिङ्गेत्यर्थः । यदत्रोक्तं श्रुतप्रकाशे—"अक्ष्णोर्निर्लेपत्वं न अक्षिस्थस्य विष्णुत्वे हेतुः, तत्सम्बन्धेन काचादिलेपस्याप्यभावप्रसङ्गादिति, तन्न, "स ईशः सोऽसपत्नः"

यत्स्थानत्वादिदं चक्षुरसङ्गं सर्ववस्तुभिः ।

इत्यादिप्रागुक्तश्रुतिविरोधात् ।

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।

इत्युक्त्या स्मृतिवशेन श्रुत्यर्थस्य च वाच्यत्वात् । कश्चित्काचादिदोषस्य तदीयदुरदृष्टसहायेनेश्वरेणैव कारितत्वादिति । तृतीय इति । "सुखविशिष्ट" इत्यत्र उपक्रमे "कं ब्रह्म खं ब्रह्म" इति पूर्णसुखत्वरूपब्रह्मलक्षणाभिधानात्प्रकरणस्य वैष्णवत्वावगमादिति तत्रोच्यत इत्यर्थः । ननु श्रुतौ "कं ब्रह्म" इति सुख-

चन्द्रिका

तत्र च "कं ब्रह्म" इति ब्रह्मशब्दोक्तं पूर्णत्वरूपं श्रैष्ठ्यं विशिष्टत्वम् । विग्रहस्तु—सुखेन विशिष्टं इति वा, विशिष्टं च तत् सुखं चेति वा, सुखेषु विशिष्टमिति वा । तत्राऽऽद्ये सुखेन श्रैष्ठ्यं सुखस्य श्रैष्ठ्यं च विना नेति सुखस्यापि तत्सिद्धिः । द्वितीये "कडाराः कर्मधारये" इति विशिष्टशब्दस्य परनिपातः । तृतीये "सप्तमी" इति योगविभागात् समासः । एवकारस्तु, तिष्ठतु तावत् "खं ब्रह्म" इति पूर्णज्ञानाभिधानं, तन्निरपेक्षपूर्णसुखाभिधानादे-

प्रकाशः

स्यैवोक्त्या तत्सम्बन्धाभिधानाभावात् विशिष्टपदमयुक्तमित्यतो न सम्बन्धवाचकं तदित्याह—तत्र चेति । तत्र ब्रह्मपदेन न विष्णुरित्यभिमतं, किन्तु कं सुखं पूर्णमित्येव तस्यार्थ इति भावः। तर्हि 'विशिष्टसुखाभिधानात्" इति विशिष्टपदस्य पूर्वनिपातः स्यात्, "उपसर्जनं पूर्वम्" इति पाणिनिस्मरणात्, अस्य च विशेषणत्वेनोपसर्जनत्वादित्यत आह—**विग्रहस्त्विति** । **सप्तमीति** । "सप्तमी शौण्डैः" इति सूत्रेण शौण्डादिभिरेव सप्तमीतत्पुरुषविधानात् तत्र च विशिष्टपदस्यापाठाद्योगविभागेन सप्तम्यन्तमिष्टविषये समस्यत इत्यभियुक्तोक्तेः समास इत्यर्थः । विष्णोस्सुखरूपत्वात्सुखेष्विति विग्रहप्रदर्शनम् । नन्वत्र सुखाभिधानादित्येव पूर्तौ विशिष्टपदं व्यर्थं, न व्यर्थं, सुखस्यान्यत्रापि सत्त्वेन व्यभिचारापत्त्या तन्निरासकत्वादिति सुधायामेवोक्तेरिति भावः ।

चन्द्रिका

वेति सूचनायेति टीकायामेवोक्तम् । चतुर्थसूत्रे प्रकरणविच्छेदाशङ्काया उपसंहारस्थलिङ्गेनोद्धारः । पञ्चमे परपक्षे बाधकोक्तिरिति ॥

परमतद्वयेऽपीदं "अन्तस्तद्धर्म" इत्यनेन गतार्थम्, तत्राऽऽदित्य-

प्रकाशः

चतुर्थ इति । "श्रुतोपनिषत्" इति सूत्रे । विद्याशब्दाभ्यासो नेति भावः । **लिङ्गेनेति** । "स एनान् ब्रह्म गमयति" इति एतद्विद्याफलत्वेन ब्रह्मगत्यभिधानरूपलिङ्गेनेत्यर्थः ।

परमतद्वयेऽपीति।मायिनामिदमधिकरणशरीरं—"य एषोऽन्तरक्षिणि पुरुषो दृश्यते" इति श्रुतोऽक्षिस्थः किं छायापुरुषः उत ब्रह्मेति संशये, पूर्वं "ऋतं पिबन्तौ" इत्यत्र पातृत्वलिङ्गेन प्रथममवगतचेतनद्वयानुरोधेन पश्चादवगतगुहाप्रवेशादयः कथञ्चित् व्याख्याताः । तद्वदिहापि "य एषोऽन्तरक्षिणि पुरुषो दृश्यते" इति प्रत्यक्षाभिधानात्तस्य च्छायायामेव सम्भवात्परोक्षे ब्रह्मण्यसम्भवाद्दृश्यत्वेन प्रथममवगते छायापुरुषे तदनुरोधेन अमृतत्वाभयत्वादयः स्तुतिरूपेण कथंचिद्व्याख्येयाः । उक्तं च भामत्याम्—

एष दृश्यत इत्येतत्प्रत्यक्षेऽर्थे प्रयुज्यते ।
परोक्षं ब्रह्म न तथा प्रतिबिम्बे तु युज्यते ॥
उपक्रमवशात् पूर्वमितरेषां हि वर्णनम् ।
कृतं न्यायनयेनैव स खल्वत्रानुषज्यते ॥

इति । एवं प्राप्ते ब्रह्मैव, अमृतत्वादेस्तस्मिन्नेवोपपत्तेः, न च दृश्यत्वेन

प्रकाशः

प्रथमावगतच्छायैवात्रोच्यत इति वाच्यम्, 'दृश्यते' इत्येतस्मादपि पूर्वं चेतनवाचिपुरुषपदेन परमात्मन एवावगतत्वात्। 'य एषः' इति सर्वनामशब्दौ सन्निहितपुरुषपदार्थं प्राप्य निराकाङ्क्षौ। 'दृश्यते' इत्येतदपि सन्निहितपुरुषपदार्थं प्राप्य निराकाङ्क्षम्। पुरुषे च तद्विषयकशास्त्रजन्यज्ञानस्यातिस्फुटत्वात् दृश्यत्वोपचारः। तदुक्तं भामत्यां—

अनिष्पन्नाभिधाने द्वे सर्वनामपदे सती।
प्राप्य सन्निहितस्यार्थं भवेतामभिधातृणी॥

इति। यद्यपि भाष्ये—'किं प्रतिबिम्ब उत जीवः अथेन्द्रियस्याधिष्ठातृदेवता उत परमात्मा' इति कोटिचतुष्टयं प्रदर्शितं, तथाऽपि भामत्यां जीवदेवतयोरधिकाशङ्काऽयोगात् 'सम्भवमात्रेण जीवदेवते भाष्ये उपन्यस्ते' इत्युक्त्वा कोटिद्वयमेव प्रदर्शितम्। रामानुजीयानां तु—किमक्ष्याधारः पुरुषः प्रतिबिम्बजीवदेवताविशेषेष्वन्यतम उत परमात्मेति संशये, 'य एषः' इति पदाभ्यां प्रसिद्धत्वेन 'दृश्यते' इत्यभिधानाच्चोपक्रमानुगुण्येनान्यस्य स्तुत्यर्थत्वेन नेयत्वात् प्रतिबिम्बादिष्वन्यतम इति प्राप्ते, निरुपाधिकात्मत्वामृतत्वाभयत्वब्रह्मत्वसंयद्वामत्वादीनां परमात्मन्येवोपपत्तेः, प्रसिद्धत्वेन निर्देशस्य "यश्चक्षुषि तिष्ठन्" इत्यादिश्रुत्यन्तरे प्रसिद्धत्वेनोपपत्तेः, आपरोक्ष्यस्य च तदुपासनानिष्ठयोग्या-

चान्द्रिका

स्थत्ववदक्षिस्थत्वस्याप्युक्तेः। न च तत्रोद्गीथोपासनस्थं अक्षिवाक्यं विषयः, अत्र तूपकोसलविद्यास्थमक्षिवाक्यमित्येतावतैव अगतार्थत्वम्। श्रूयन्ते च तत्रैवात्राप्यन्यत्रासम्भवन्तोऽमृतत्वादयो ब्रह्मधर्माः,

प्रकाशः

पेक्षयोपपत्तेः परमात्मैवाक्षिस्थ इति सिद्धान्त इति। तत्र मतद्वयस्यैकरूप्येणान्तर्नयसुधावाक्यानि विवृण्वन् मिलित्वा दोषमाह—**गतार्थमिति**। ननु तत्र "य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते" इत्यादित्यस्थत्वमुक्तं, इह तु अक्षिस्थत्वमुच्यत इति वा, तत्राद्याध्यायगतोद्गीथोपसनागतवाक्यं विषयः, इह तु चतुर्थाध्यायगतोपकोसलविद्यास्थवाक्यं विषय इति वाक्यभेदेन वा, तत्र "सैवर्क् तत्साम तदुक्थं तद्यजुस्तद्ब्रह्म" इत्यादिसार्वात्म्यादेरिवात्र ब्रह्मलिङ्गाभावेन वा, 'य एषः' इति प्रसिद्धत्वेन 'दृश्यते' इत्यपरोक्षत्वेनात्र निर्देशेन तद्वाक्यवैलक्षण्येन विशेषशङ्कासत्त्वेन वा पौनरुक्त्यनिरासः सेत्स्यतीत्यतः, आद्यं निराचष्टे—**तत्रेति**। "इत्यधिदैवतं" इत्युक्त्वाऽनन्तरं "अथाध्यात्मं" इत्युपक्रम्य "य एषोऽन्तरक्षिणि पुरुषो दृश्यते सैव ऋक् तत्साम" इत्यादिश्रवणात्। उदाहृतं चैतत् त्वयाऽपि तत्रेति भावः। द्वितीयं निराह—**न चेति**। **एतावतैवेति**। तथात्वे वाक्यानन्त्येन प्रतिवाक्यमधिकरणारम्भे शास्त्रापर्यवसानं स्यादिति भावः। तृतीयं निराह—**श्रूयन्ते चेति**।

चन्द्रिका

ब्रह्मशब्दश्चात्राधिकः । न चात्र "य एषोऽन्तरक्षिणि पुरुषो दृश्यते" इति प्रसिद्धवदभिधानात् दृश्यत्वोक्तेश्चाधिकाशङ्का, तत्रापि "य एषोऽन्तरक्षिणि पुरुषो दृश्यते" इति श्रुतेः। अत्रोक्तं भामत्यां—तत्राक्षिस्थो जीवविशेष इति पूर्वः पक्षः, अत्र तु च्छायेति। भाष्ये तु सम्भवमात्रेण जीवाद्युक्तिः। तथा च जीवविशेषस्यापि

प्रकाशः

ब्रह्मशब्दश्चेति । यद्यपि तत्रापि "तद्यजुस्तद्ब्रह्म" इत्यस्ति ब्रह्मशब्दः, तथाऽपि ब्रह्मणः शब्दो ब्रह्मशब्द इत्यात्मशब्दश्चात्राधिक इत्यर्थ इत्याहुः। अन्ये तु लेखकदोषमूलोऽयं, "आत्मशब्दश्चात्राधिकः" इत्येव पाठ इत्याहुः। अत एवान्तर्नयसुधायां—"सन्ति च तत्राप्यमृतत्वादयो ब्रह्मधर्माः" इत्येवोक्तम्। अपरे तु—"ब्रह्मशब्दश्च" इति यथाश्रुत एव पाठः। अयमर्थः "कं ब्रह्म खं ब्रह्म" इत्युपक्रमे द्विर्ब्रह्मशब्दः, "एतदमृतमभयमेतद्ब्रह्म" इति मध्ये, "स एनान् ब्रह्म गमयति" इत्यन्ते च ब्रह्मशब्दश्रवणात् ब्रह्मशब्दश्चात्राधिको बहुल इत्यर्थ इत्याहुः। चतुर्थं प्रत्याह—**न चात्रेति**। एवं मतद्वयसाधारण्येन पौनरुक्त्यमुपपाद्य यद्भामत्यां गतार्थत्वमाशङ्क्य समाहितं, तदनूद्य निराह—**अत्रोक्तमिति**। **छायेति**। प्रतिबिम्ब इत्यर्थः। कथं तर्हि भाष्ये जीवदेवते अप्युपन्यस्ते इत्यत उक्तम्—**भाष्य इति**। तदीयभाष्ये। किमतो यद्येवमित्यतः ततो विशेषशङ्कामाह—**तथा चेति**।

चन्द्रिका

ब्रह्मवत् परोक्षत्वात् दृश्यत्वादिकमयुक्तं, छायायां तु युक्तमित्य धिकाशङ्केति । तन्न, दृश्यत्वानुपपत्त्या जीवपक्षत्यागे छायायां विषयवाक्यस्थपुरुषत्वामृतत्वादेः, पूर्ववाक्योक्तस्य तज्ज्ञानेन पापालेपस्य च, उत्तरवाक्योक्तस्य संयद्वामत्वादेश्च सर्वथाऽप्ययुक्तचा छायापक्षस्य सुतरां त्याज्यत्वात् । छायायां स्तुत्यर्थममृतत्वाद्युक्तिश्चेत्, जीवेऽपि तदर्थमेव दृश्यत्वाद्युक्तिरस्तु । तस्मान्न परमते पूर्वपक्षो-

प्रकाशः

पूर्ववाक्येति । "अहं तु ते तद्वक्ष्यामि तद्यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यत इति । ब्रवीतु मे भगवानिति तस्मै स होवाच य एषोऽन्तरक्षिणि पुरुषो दृश्यते" इति श्रवणादक्षिस्थज्ञानेन पापालेपस्य पूर्ववाक्योक्तस्यायुक्त्येत्यर्थः । "एष उ एव वामनिरेष हि सर्वाणि वामानि नयति" इत्यत्र त्वदुक्तरीत्या पुण्यफलोत्पत्तिकारणत्वादिरूपसंयद्वामत्वादेरित्यर्थः । ननूक्तममृतत्वादिकं स्तुत्यैव कथञ्चिन्नेयमिति, तत्राह—**छायायामिति** । **जीवेऽपीति** । अविद्यमानकथनस्योभयत्र तुल्यत्वात् । तथा च न ततो विशेषाशङ्केति भावः । ननु भवन्मतेऽपि "ब्रह्मेन्द्रमग्निं जगतः प्रतिष्ठां" इत्यग्निश्रुत्याऽग्नेः "अन्तः प्रविष्टं कर्तारं" इत्यादौ अन्तस्स्थत्वमिति प्राप्ते, विष्णोरेवेति तत्रैवोक्तत्वादिह पुनरग्नेः अन्तस्स्थत्वशङ्कायोगात्पौनरु-

चन्द्रिका

त्थानम् । अस्माकं मते तु "अन्तस्तद्धर्म" इत्यत्रेन्द्रादिश्रुत्येन्द्रादेरन्तस्स्थत्वमिति प्राप्ते, नेति सिद्धान्तः, अत्र त्वग्नेश्चक्षुरन्तस्स्थत्वमभ्यासार्थवादसहितब्रह्मश्रुतिभ्य इति प्राप्ते, नेति सिद्धान्त इति भेदः । परसिद्धान्तोऽप्ययुक्तः । यतः—

कार्यब्रह्मपरत्वं चेदमृतत्वाद्यसम्भवः ।
अकार्यपरता चेत्स्यादर्चिरादेरसम्भवः ॥

न हि कार्यब्रह्मणश्चतुर्मुखस्यामृतत्वाभयत्वापरिच्छिन्नसुखत्वादिर्हेतुर्युक्तः, न वा तत्साध्यं चक्षुरन्तस्स्थत्वं युक्तं, तस्य "यश्चक्षुषि तिष्ठन्" इत्यादिभिरकार्यब्रह्मभूतान्तर्यामिधर्मत्वात् । अकार्यब्रह्मपरत्वे तु श्रुतौ "तेऽर्चिषमभिसम्भवन्ति" इति, सूत्रे च "श्रुतोपनिषत्क" इति अर्चिराद्युक्तिर्न स्यात्, त्वन्मते तस्य का-

प्रकाशः

र्यत्वमित्यत आह—**अस्माकमिति** । तत्रान्तस्स्थत्वसामान्यमिह चक्षुरन्तस्स्थत्वं, तत्रेन्द्रादीनामनेकेषां इह त्वग्नेरेव, तत्र श्रुतिमात्रेण इह त्वभ्यासादिभिरिति महान् भेद इत्यर्थः । **परसिद्धान्तोऽपीति** । स प्राङ्मया विवृतः । 'यतः' इत्यस्य श्लोकेनाऽन्वयः । किमत्र कार्यं ब्रह्मोच्यतेऽथाकार्यं ब्रह्मेति सिद्धान्त्यत इति विकल्पौ हृदि कृत्वा क्रमेण निराह—**कार्येति** । पूर्वार्धं व्यनक्ति—**न हीति** । तस्य संसारित्वेन मृतिभयादेरवर्जनीयत्वादिति भावः । न वेत्येतदुपपादयति—**तस्येति** । उत्तरार्धं व्यनक्ति—**अकार्येति** । तदीया-

चन्द्रिका

र्गब्रह्ममार्गत्वात् । यच्चोक्तं परममहतो ब्रह्मणोऽत्यल्पं चक्षुरधिष्ठानं नेति शङ्कानिरासार्थं स्थानादिसूत्रमिति, तन्न, "अर्भकौकस्त्वात्" इत्यनेनास्याः परिहृतत्वात् । यच्च तृतीयसूत्रे–सुखविशिष्टत्वं सुख सम्बद्धत्वम् । तथा च "कं ब्रह्म" इति सुखविशिष्टस्य ब्रह्मणः प्रक्रान्तत्वादक्षिवाक्येऽपि ब्रह्मैवोच्यत इत्यर्थ इत्युक्तम्, तन्न,

प्रकाशः

र्थानुरोधेन कप्रत्ययान्ततया सूत्रप्रतीकग्रहणम् । सूत्रार्थस्त्वग्रे व्यक्तः । एवमधिकरणशरीरं निरस्य सूत्रार्थान् निराचिकीर्षुराद्ये मन्मत इव क्रियालिङ्गपरत्वाभावेन "अन्तस्तद्धर्म" इतिवत् "अन्तरुपपत्तेः" इत्येव निर्देशः स्यादिति प्रतिज्ञादूषणं "सूत्रक्रमस्तु" इत्यत्रोक्तदिशा व्यक्तं, "कार्यब्रह्म" इत्यादिना "उपपत्तेः" इति हेत्वंशो दूषित इति मत्वा वा, अग्रे तत्र दोषोत्प्रेक्षामतिदिदिक्षुर्वा, द्वितीयसूत्रार्थमनूद्य निराह—यच्चेति । शङ्कानिरासायेदं सूत्रं, न त्वस्माकमिवाक्षिस्थस्य ब्रह्मत्वे हेत्वन्तरपरं, "यः पृथिव्यां तिष्ठन्" इति प्रक्रम्य "यश्चक्षुषि तिष्ठन्" इति यदन्तर्यामिस्थानं निर्दिष्टं, तस्यैवोपासनार्थं "य एषोऽन्तरक्षिणि" इति व्यपदेशात् । आदिपदेन "तस्योदिति नाम" "हिरण्यश्मश्रुः" इत्याद्युक्तनामरूपादेरपि उपासनार्थं व्यपदेशादिति गृह्यते । 'अस्याः' अल्पस्थानत्वशङ्कायाः । उपलक्षणमेतत्, नामरूपादेर्जीवेऽपि सम्भवेन ब्रह्मत्वे तस्य हेतूकरणायोगाच्चशब्दायोगाच्चेत्यपि ध्येयम् ।

चान्द्रिका

सुखसम्बन्धस्य जीवेऽपि सत्त्वेन वाक्यशेषोक्तं सुखनिष्ठमपरिच्छिन्नत्वरूपश्रैष्ठ्यमेव सूत्रस्थविशिष्टशब्दार्थ इति वक्तव्यत्वात् । त्वन्मते ब्रह्मणः सुखमात्रत्वेन तत्सम्बन्धाभावाच्च । विशिष्टस्यापि न वाक्यशेषोक्तापरिच्छिन्नसुखसम्बन्धः । यत्तु 'श्रुतोपनिषत्कस्य' श्रुतरहस्यस्य ब्रह्मविदः श्रुत्यन्तरे प्रसिद्धा या अर्चिरादिमार्गरूपा गतिः, तस्या इहाभिधानादिति चतुर्थसूत्रव्याख्यानं, तन्न, त्वन्मते अर्चिरादेरुपासकगतित्वेन ब्रह्मविद्गतित्वाभावात् । किञ्च "कगत्यभिधानात्" इति सूत्रे "स एनान् ब्रह्म गमयति" इति

प्रकाशः

वाक्यशेषोक्तमिति । तन्मते "यद्वाव कं तदेव खं यदेव खं तदेव कं" इति वाक्यशेषे "कं ब्रह्म" इत्युक्तशब्दस्य लौकिकसुखपरत्वनिरासायापरिच्छिन्नवाचिना खशब्देन विशेषणात्सुखस्यापरिच्छिन्नत्वं लभ्यत इत्यङ्गीकारादेवमुक्तम् । ननु शुद्धस्य तदभावेऽपि विशिष्टस्य ब्रह्मणः सुखसम्बन्धो नायुक्त इत्यत आह— **विशिष्टस्येति** । **श्रुत्यन्तर इति** । "अथोत्तरेण तपसा ब्रह्मचर्येण श्रद्धया विद्ययाऽऽत्मानमन्विष्याऽऽदित्यमभिजयन्ते एतद्वै प्राणानामायतनं एतदमृतमभयमेतत्परायणमेतस्मान्न पुनरावर्तन्ते" इति वाजसनेयप्रसिद्धेत्यर्थः । **इहेति** । "यदु चैवास्मिन् शव्यं कर्म कुर्वन्ति यदु च नार्चिषमेवाभिसम्भवन्ति" इत्यादिनेत्यर्थः । प्रमेयानुपपत्तिमुक्त्वा सूत्रास्वारस्यमाह—**किञ्चेति** । **इति सूत्र इति** । सूत्रव्यक्तीकरण

चन्द्रिका

श्रुत्युक्तगतेः प्राप्तेः "कं ब्रह्म" इति श्रुतौ कशब्दनिर्दिष्ट-ब्रह्मविषयत्वोक्तौ श्रुत्यनुसरणसिद्धिः, ब्रह्मप्राप्तिसाधनविद्यायाः साक्षाद्ब्रह्मविषयत्वसिद्धिश्च, विद्यातत्साध्यप्राप्त्योरेकविषयत्वनियमात्, न तु मार्गस्यार्चिरादित्वमात्रोक्तौ। व्यर्थश्च "शेषाद्विभाषा" इति वैभाषिकः कप्रत्ययः। सूत्रस्थगतिशब्दश्च न मार्गे स्वरसः। यच्च च्छायायाः सदा चक्षुष्यवस्थित्यभावात्, जीवस्य च कृत्स्न-शरीरेन्द्रियसम्बन्धिनश्चक्षुष्येवावस्थित्यभावात्, अमृतत्वादीनां छाया-दावसम्भवाच्च नेतर इति पञ्चमसूत्रव्याख्यानम्, तन्न, अनवस्थि-तिशब्दस्य प्रसिद्धार्थत्यागात्। सदाशब्दादेरध्याहार्यत्वाच्च।

प्रकाशः

इत्यर्थः। कथं साक्षाद्ब्रह्मविषयत्वमित्यत आह—**विद्येति**। न ह्य-न्यविद्ययाऽन्यप्राप्तिर्युक्तेति भावः। **न त्विति**। तत्सिद्धिरिति सम्ब-न्धः। वक्तव्यं चैवमेव, अन्यथा 'श्रुतोपनिषद्गत्यभिधानात्' इत्येतावता पूर्णत्वेन कशब्दवैयर्थ्यात्। न च बहुव्रीहिसमासान्तानु पादाने अपशब्दता स्यादिति वाच्यं, तस्य विकल्पितत्वेन क-प्रत्ययं विनाऽपि वक्तुं शक्यत्वादित्याह—**व्यर्थश्चेति**। **न स्वरस इति**। तस्य भावार्थकक्तिन्नन्तस्य प्राप्त्यर्थत्वेन मार्गे तद्धेतुत्वादिना कथञ्चिद्वक्तव्यत्वादिति भावः। **प्रसिद्धार्थेति**। अपर्यवसितानेकव्य-क्तिकल्पनारूपानवस्थाने प्रसिद्धत्वादित्यर्थः। **सदेति**। सदाशब्दस्य 'चक्षुष्येव' इत्यस्य 'अमृतत्वादीनां' इत्यस्य चाध्याहारादित्यर्थः।

चन्द्रिका

कृत्स्नसम्बन्धेऽपि जीवस्य ब्रह्मण इवोपासनार्थं चक्षुस्स्थानोक्तिसम्भवाच्च । "उपपत्तेः" इत्यनेनैवान्यत्रामृतत्वाद्यसम्भवस्यार्थादुक्तत्वेन "असम्भवात्" इत्यस्य वैयर्थ्याच्च । एवं सूत्रान्तरेऽप्यनुपपत्तिरूह्या ॥

अत्र केषाञ्चिन्मतं परमतान्न विशिष्टमिति तद्दूषणेनैव दूषितम् ।

प्रकाशः

आद्यसूत्रस्थोपपत्तेरित्यंशेन "असम्भवात्" इत्यंशस्य पौनरुक्त्यमाह—**उपपत्तेरिति** । एवमुक्तमार्थिकपौनरुक्त्यमधिकरणान्तरस्थसूत्रेष्वप्यनुसन्धेयमित्याह—**एवमिति** । "अतद्धर्माभिलापात्" "अतच्छब्दात्" इत्यादौ सूत्रान्तर इति भावः । यद्वा—स्थानादिसूत्रचतुष्टयेऽनुपपत्तिमुक्त्वा आद्यसूत्रेऽप्यनुपपत्तिरूह्येत्याह—**एवमिति** । सा च विवृता प्रागस्माभिः ॥

तद्दूषणेनैवेति । एतेन सुधादौ पृथग्रामानुजमतादूषणे बीजं सूचितम् । तथाहि—पौनरुक्त्यं तन्मतेऽप्युपपादितमेव । पूर्वपक्षानुदयश्च पूर्वस्माद्विशेषहेत्वभावेन स्पष्टः । आद्यसूत्रे 'अन्तः' इत्येव निर्देशप्रसङ्गादन्तरशब्दास्वारस्यम् । यच्चोक्तं "स्थानादिव्यपदेशाच्च" इत्यस्य 'स्थानं' स्थितिः, आदिपदेन नियमनादिकमुच्यते, चक्षुषि स्थितिनियमनादीनां परमात्मन एव "यश्चक्षुषि तिष्ठन्" इत्यादौ व्यपदेशाच्चेत्यर्थ इति, तन्न, अस्मद्रीत्या स्ववाक्यगतहेतूक्तिपरत्वसम्भवे श्रुत्यन्तरप्रदर्शनपरत्वायोगात् । स्थानशब्दस्याधिष्ठानपरत्वप्रसिद्ध्या प्रसिद्धार्थत्यागाऽऽपाताच्च । प्रतिपत्त्यर्थमात्र[1]योर्लाघ-

[1] 'प्रतिपत्त्येकमात्र' इति पुस्तकान्तरपाठः ।

प्रकाशः

वेन 'स्थित्यादि' इति निर्देशापाताच्च । यदपि "कं ब्रह्म" इति प्रकृतस्य सुखत्वविशिष्टस्य सुखविशिष्टस्य वा ब्रह्मणो "य एषोऽन्तरक्षिणि" इत्यादिनोपासनास्थानविधानार्थं संयद्वाम त्वादिगुणविधानार्थं चाभिधानाच्चेति तृतीयार्थ इति, तन्न, भावप्रधानताकल्पनापातात् । "कं ब्रह्म" इति सुखमात्राभिधानेन सुखसम्बन्ध्यभिधानाभावेन विशिष्टपदायोगाच्च । सुखसम्बन्धमात्रस्य व्यभिचारित्वेन त्वद्रीत्या "यद्वाव कं तदेव खं" इति वाक्यशेषोक्तापरिच्छिन्नत्वरूपश्रैष्ठ्यस्यैव विशिष्टशब्दार्थत्वेन वक्तव्यत्वाच्च । "कं ब्रह्म खं ब्रह्म" इत्युक्तयोः कखयोर्भेदशङ्कया "कं च खं च तु न विजानामि" इति प्रश्ने कखशब्दोक्तयोः आनन्दज्ञानयोर्न भेद इति भावेन "यदेव कं तदेव खं" इति वाक्यशेषस्य प्रवृत्तत्वेन तेनापरिच्छिन्नत्वालाभाद्ब्रह्मशब्देनैव सुखेऽपरिच्छिन्नत्वरूपवैशिष्ट्यस्यैवौचित्याच्च । यदपि, श्रुतोपनिषत्कस्याधिगतपरमपुरुषयाथात्म्यस्यानुसन्धेयतया या प्रतिपाद्यमाना अर्चिरादिका गतिः, तामपुनरावृत्तिलक्षणपरमपुरुषप्राप्तिकरीमुपकोसलायाक्षिपुरुषं श्रुतवते "तेऽर्चिषमभिसम्भवन्ति" इत्यारभ्य "इमं मानवमावर्तं नावर्तन्ते" इत्यभिधानाच्चेति चतुर्थार्थ इति, तन्न, श्रुत्यननुगमात्, कशब्दवैयर्थ्यात्, गतिशब्दास्वारस्याच्च । यच्च प्रतिबिम्बादीनां नियमेन चक्षुष्यनवस्थितेरमृतत्वादीनां निरुपाधिकानां तेष्वसम्भवान्न च्छायादिरितरोऽक्षिस्थ इति आद्यद्वितयिसूत्रोक्तहे-

चन्द्रिका

कैश्चिदत्र "अत एव च स ब्रह्म" इति सूत्रं ईक्षत्यधिकरणे "प्रतिज्ञाविरोधात्" इतिसूत्रवत् प्रक्षिप्तमिति तदुपेक्ष्यम् । अत्रापि "अनवस्थितेरसम्भवाच्च नेतरः" इति जीवनिषेधात् भेदधीः ॥

प्रकाशः

त्वोरितरत्र व्यतिरेककथनार्थमन्तिममिति, तन्न, प्रत्यधिकरणं सिद्धान्तहेतूनां पूर्वपक्ष्यभिमतेऽर्थे व्यतिरेककथनाय सूत्रान्तरस्यावश्यकतापत्तेः । अर्थाद्व्यतिरेकसिद्धाविहापि परमात्मन्युपपत्तिस्थितिकथनाभ्यां अन्यत्रासम्भवानवस्थित्योर्लाभेनाद्यद्वितीयाभ्यां पौनरुक्त्याच्च । आद्यद्वितीयसूत्रोक्तव्यतिरेकोक्तिपरत्वे 'असम्भवादनवस्थितेश्च' इति विन्यासापत्तेश्च । अनवस्थितिशब्दस्य प्रसिद्धार्थत्यागाच्च । सदाशब्दादेरध्याहार्यत्वाच्चेति दूषितमित्यर्थः । ननु "कं ब्रह्म खं ब्रह्म" इति निरतिशयानन्दं ब्रह्मेत्यभिहितमिति कथं ज्ञायते, यतो "नाम ब्रह्म" इत्यादाविव "कं ब्रह्म खं ब्रह्म" इति प्रसिद्धसुखाकाशयोरेव ब्रह्मदृष्टिर्विधीयते इत्याशङ्कायां, पूर्ववाक्यस्य ब्रह्मपरत्वोपपादकं "अत एव च स ब्रह्म" इति चतुर्थसूत्रमित्युक्तं रामानुजभाष्ये । तत्कुतो न व्याक्रियते नापि दूष्यत इत्यत आह—**कैश्चिदिति** । **ईक्षतीति** । एतेन तत्रापि "प्रतिज्ञाविरोधात्" इति पञ्चमसूत्रं प्रक्षिप्तमेवेत्युक्तं भवति । पूर्ववाक्यस्य ब्रह्मपरत्वोपपादनं च भाष्याद्युक्तदिशा बोध्यमिति भावः । अद्वैतमते प्रतिकूलमिदमित्याह—**अत्रापीति** । मिथ्याभेदपरत्वं च निरसिष्यत इति भावः ॥

प्रकाशः

यत्कश्चिदाह—"अनवस्थितेः" इत्यतः प्राक्तनमेकमधिकरणम् । "अनवस्थितेः" इति त्वधिकरणान्तरम् । आद्यस्याक्षिवाक्यं विषयः । अन्त्यस्य तु—

अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च समाश्रितः ।
ईशः सर्वस्य जगतः.................... ॥

इत्यादीति । तत्राद्ये अक्षिस्थः छायापुरुषजीवान्यतरोऽथ शिव इति संशये जीवादिरिति प्राप्ते, शिव इति सिद्धान्त इति, तन्न, अन्तर्नयेन पौनरुक्त्यात्, तत्राक्षिस्थत्वस्याप्युक्तेः । वाक्यभेदमात्रेणाधिकरणभेदायोगात् । अमृतत्वाभयत्वसंयद्वामत्ववामनित्वभामनित्वादीनां लिङ्गानां, पुष्करपलाशवाक्योक्तपापाश्लेषरूपस्य, अर्चिरादिवाक्योक्तब्रह्मप्राप्तिरूपफलस्य, "कं ब्रह्म" इति प्रकरणस्य च ब्रह्मत्वसाधकस्य च सत्त्वेन ततोऽप्याधिक्येन संशयस्यैवानुदयात् । यदत्रोक्तं शिवार्कमणिदीपिकायां—अक्ष्याधारत्वस्य स्वमहिमप्रतिष्ठे शिवे मुख्यत्वायोगात्, रूपविशेषावच्छेदेनौपचारिकत्वकल्पने बाधकाभावात्, आत्मब्रह्मश्रुत्योः संयद्वामत्वादिगुणश्रवणस्य च इतिशब्दशिरस्कत्वेन "मनो ब्रह्मेति" इत्यादिवदतस्मिंस्तद्रूपप्रत्ययपरत्वावगमात्, तत्सहचारेणामृतत्वादिश्रवणस्यापि तन्मात्रपरत्वावगमात्, अमृतत्वादेर्मुक्तौ सत्त्वेन भाविभावाभिप्रायेणोपपत्तेश्चेत्यादिप्रकारेण

प्रकाशः

ब्रह्मप्रापकाणां अन्यथासिद्धेः, जीवे चाक्षिस्थत्वस्य मुख्यस्य सम्भवात् जीव एवाक्षिस्थ इति विशेषशङ्केति, तत्तुच्छं, एकेन लिङ्गेन श्रुतिलिङ्गादीनां बहूनामन्यथानयनायोगात् । स्वमहिमप्रतिष्ठस्याप्यादित्याद्यन्तस्स्थत्वस्यार्भकौकस्त्वस्य च प्रागेवोक्तत्वात् । "हृदि ह्येष आत्मा" इत्यादिना जीवस्य सदाहृदिस्थत्वाद्रूपादिग्रहणकाले चक्षुस्संयोगाङ्गीकारेऽपि नित्यं तत्रावस्थानाभावेन "य एषोऽन्तरक्षिणि" इति नित्यवच्छ्रवणविरोधात् । एककालावच्छेदेनौपचारिकत्वावश्यम्भावाच्च । यदपि "य एषः" इति प्रसिद्धत्वेन निर्देशादक्षिस्थत्वस्य शिवे प्रसिद्ध्यभावात् जीवादिरिति, तदपि न, जीवेऽप्यप्रसिद्धेः । अन्तरधिकरणविषयवाक्य एवाक्षिस्थत्वस्य प्रसिद्धेश्च । यत्तु सर्वपापोद्गतत्वेन आदित्यान्तर्वर्त्येव ब्रह्म नाक्ष्यन्तर्वर्तीत्यधिकाशङ्केति, तदसारं, "यन्नाम तन्नाम" इत्यादिनाऽऽदित्याक्ष्यन्तस्स्थयोरेकधर्मकत्वस्य तत्र श्रुतावेवोक्तेः, सर्वपापोद्गतत्वस्याक्षिस्थेऽपि सिद्धेरिति दिक् ॥ किञ्च "स हरिः स परः परोवरीयान् यदिदं चक्षुषि सर्पिर्वा उदकं वा सिञ्चति वर्त्मनी एव गच्छति स वामनः स भामनः" इत्यादिसमाख्याश्रुत्या,

यत्स्थानत्वादिदं चक्षुरसङ्गं सर्ववस्तुभिः ।
स वामनः.................................. ॥

इत्यादिस्मृत्या शिवपरत्वसिद्धान्तस्य विरोधः ।

प्रकाशः

ज्ञानानन्दात्मकं पूर्णं परं ब्रह्म स्वयं हरिः ।
नैजानन्दबलोद्रेकः कमित्युक्तो मनीषिभिः ॥

इत्यादिस्मृत्याऽस्य प्रकरणस्यापि वैष्णवत्वबोधिन्या विरोधश्च इति । सूत्रे 'अन्तरः' इति निर्देशायोगः । 'उपपत्तेः' इति हेतुरप्ययुक्तः, "रुद्रस्य शिर उत्पिपेष" "स्तुहि श्रुतं गर्तसदं युवानं" इत्यादिना मृतिपारतन्त्र्यादेरप्युक्तत्वेनामृतत्वादेः रुद्रेऽनुपपत्तेः । "तमेतास्सप्ताक्षितय उपतिष्ठन्ते या अक्षन्लोहिन्यो राजयस्ताभिरेनं रुद्रोऽन्वायत्तः" इत्यादौ रुद्रस्याक्षिस्थोपासकत्वोक्तेश्चेति । एवं सूत्रान्तरेऽप्यनुपपत्तेरूहः कार्यः । यदपि "अनवस्थितेः" इत्यधिकरणान्तरमिति, तन्न, बाधकोक्त्याऽपेक्षितपरपक्षनिरासपरत्वेन पूर्वशेषत्वसम्भवेऽन्यथात्वायोगात् । "ईशस्सर्वस्य जगतः" इति ब्रह्मलिङ्गसत्त्वेन तेन प्राणाग्निहोत्रप्रकरणसाधनसम्भवेन अङ्गुष्ठमात्रत्वस्य च "हृद्यपेक्षया" इत्यत्र वक्ष्यमाणत्वेन संशयायोगात् । "विदेहि रुद्रो रुद्रियं महित्वं" इति पराधीनपदप्राप्त्युक्त्या सर्वजगदीशत्वायोगाच्च । 'अङ्गुष्ठमात्रस्तल्लिङ्गात्' इति निर्देष्टव्ये परमतप्रतिक्षेपरूपतया प्रधानसूत्रनिर्देशायोगाच्चेत्यादि ध्येयम् ॥

"यतः "य एष आदित्ये पुरुषः सोऽहमस्मि स एवाहमस्मि" इति अग्नेरेवाऽऽदित्यस्थत्वमुच्यते अत एव" इति

चान्द्रिका

टीकाक्षरार्थस्तु—**अग्नेरेवादित्यस्थत्वमुच्यतेऽत एवेति**। अग्नेरादित्यस्थत्वस्योच्यमानत्वादेवेत्यर्थः। अनेन, "अतोऽक्ष्यादित्ययोरैक्यात्" इति भाष्यस्थोऽतश्शब्दः सन्निहितेन 'ऐक्यात्' इत्यनेन नान्वेति, प्रकृतस्य 'अतः' इत्यनेन परामृष्टस्यादित्यस्थत्वस्यैक्ये हेतुत्वायोगात्, किन्तु व्यवहितेन "अत्राप्यग्निरेवोच्यते" इत्यनेन अन्वेतीत्युक्तं भवति। **वक्रसङ्गत्याऽधिकरणारम्भ इति**। यद्यपि विष्णुज्ञानान्मोक्ष इत्युक्तं, तदयुक्तं, "तद्यथा" इत्यत्र अक्षिस्थस्याग्नेर्ज्ञानान्मोक्षश्रवणादिति ऋजुसङ्गत्यैवाधिकरणमारभ्य अग्नेरेवाक्षिस्थत्वमिति पूर्वपक्षे आदित्यस्थत्वं हेतूकर्तुं शक्यम्। पूर्वपक्षे

प्रकाशः

टीकावाक्यस्य पर्यवसितमर्थं वदन् यदेतच्छब्दाभ्यां वक्रवाक्यरचने भाष्ययोजनं फलमाह—**अग्नेरिति**। "—"य एष आदित्ये पुरुषः" इत्यादावग्नीनामेवादित्यस्थत्वमुच्यते। अतोऽक्ष्यादित्ययोरैक्यात् "य एषोऽन्तरक्षिणि पुरुषो दृश्यते" इत्यत्राप्यग्निरेवोच्यते" इति भाष्यस्येत्यर्थः। "अत्राऽऽदित्यस्थत्वलिङ्गस्यापि विष्णौ समन्वयसिद्ध्यर्थं वक्रसङ्गत्याऽधिकरणारम्भः" इत्यत्र कानाम ऋजुसङ्गतिः, का च वक्रा, कथञ्च ऋजुसङ्गतौ तत्समन्वयस्यासिद्धिः, वक्रायान्तु तत्सिद्धिरिति न ज्ञायतेऽतो द्वेधाभिप्रायमाह—**वक्रेति**। **उक्तमिति**। "तन्निष्ठस्य मोक्षोपदेशात्" "नेतरोऽनुपपत्तेः" इत्यादाविति भावः। "तद्यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं

चन्द्रिका

तस्य हेतूकरणं च वक्रसङ्गत्याऽधिकरणारम्भेऽपि समम् । तथाऽपि यथा सिद्धान्ते आदित्यदेवताया आदित्यमण्डलस्थत्वेऽपि अमृतत्वादिहेतुभिरिदमक्षिस्थत्वं ब्रह्मण एव, तथा पूर्वपक्षेऽग्नेरादित्यमण्डलस्थत्वेऽप्यक्षिस्थत्वं ब्रह्मण एवेत्यादित्यस्थत्वस्य विष्णौ समन्वयो न सिध्येत् । आदित्यस्थो विष्णुः, ततश्चार्थादक्षिस्थोऽपि स एवेत्यानन्दमयाधिकरणोक्तमादित्यदेवतास्थत्वादिकमयुक्तं, अग्नेरेवाक्ष्यादित्यदेवतास्थत्वादिति वक्रसङ्गत्याऽधिकरणारम्भे तु, पूर्वोक्तस्य विष्णोरादित्यदेवतास्थत्वस्येह पूर्वपक्षे आक्षेपात्तन्निरासस्य च विष्णोरेवाऽऽदित्यस्थत्वमिति सिद्धान्ताभिप्रायं विना असिद्धेः तत्समन्वयः सिध्यतीति भावः । यद्वा—आदित्यस्थत्वस्य पूर्वपक्षे हेतु-

प्रकाशः

कर्म न श्लिष्यते" इति तज्ज्ञानात्सर्वपापाश्लेषे मोक्षस्यापि तदतदन्यथानुपपत्त्या सिद्धेर्मोक्षश्रवणादित्युक्तम् । **आदित्यमण्डलस्थत्वेऽपीति** । तस्य सिद्धान्तेऽनुमतत्वादिति भावः । वक्रसङ्गतिप्रकारं वदन् तत्र समन्वयासिद्धिप्रकारमाह—**आदित्यस्थ इति** । "—"यश्चासावादित्ये" इत्यानन्दमयस्यादित्यस्थत्वमुक्तं, ततश्चार्थादक्षिस्थत्वमप्युक्तं" इत्यादिटीकावाक्यस्यार्थानुवादोऽयमिति । यदानन्दमयाधिकरणोक्तमादित्यदेवतास्थत्वमार्थिकमाक्षिस्थत्वं च, तदयुक्तमित्यर्थः । **अक्ष्यादित्यदेवतास्थत्वादितीति** । अत्रायं क्रमः—अग्नेरेवाक्षिदेवतास्थत्वम्, कुत एतत्, "योऽसावादित्ये पुरुषः सोऽहमस्मि"

चन्द्रिका

मात्रत्वेनोक्तौ पूर्वपक्षहेतुरपि सिद्धान्तिना समन्वेतव्य इति नियमाभावान्न तत्समन्वयसिद्धिः। उक्तादित्यस्थत्वाक्षेपमुखेन तु पूर्वपक्षे, सिद्धान्ते तत्समन्वयोऽपि कर्तव्य इति "य एष आदित्ये पुरुषो दृश्यते" इति वाक्यमपि ब्रह्मणि समन्वितं भवतीति भावः।

प्रकाशः

इति अक्ष्यभिन्नादित्यदेवतास्थत्वादित्येवं वक्रसङ्गत्येत्यर्थः। एतच्च प्राचीनटीकारीत्या अक्ष्यादित्यशब्दयोः देवतापरत्वमुपेत्य सङ्गत्युपपादनमिति ध्येयम्। ननु पूर्वत्र "यश्चासावादित्ये" इत्यादित्यस्थत्वं नाम विष्णोरादित्यदेवतास्थत्वम्। यदाहुस्तैत्तिरीयभाष्ये—

स विष्णुस्सर्वजीवेषु नृषु देवेषु च स्थितः।

एक एव .... ॥

इत्यादि। उक्तं च प्राक् "भेदव्यपदेशाच्च" इत्यत्र टीकायां—"स यश्चायमित्यानन्दमयस्यापकृष्टोत्कृष्टजीवेषु पुरुषादित्यपदोपलक्षितेषु स्थितिकथनात्" इति। तथा च तत्रार्थादापाद्यमानमक्षिस्थत्वमप्यक्षिदेवतास्थत्वमेवेतीहाक्ष्यादिशब्दस्य देवतापरत्वपक्षे सङ्गत्युपपादनसम्भवेऽपि, टीकाकृत्पक्षेऽक्ष्यादिशब्दस्य जडपरत्वेनान्यस्याक्षिस्थत्वे प्राचीनमप्यग्नेरेवेति कथमाक्षेप इति चेदत्राहुः—वामनिभामनिशब्दोक्तसर्वस्त्रीपुंसप्रेरकत्वेनाग्नेस्तदक्षिस्थत्वे स एव पूर्वत्राप्युक्तादित्यमण्डलस्थ आपन्न इति तेनैवोपपत्तौ तत्रस्थतया किमीश्वरेणेत्याक्षेप इति। "—'अग्नीनां' इति बहुवचनमादिपदद्वयं च बहु-

चान्द्रिका

अग्नीनामिति बहुवचनमिति । भाष्ये बहुवचनादिकम्, "अथ हैनं गार्हपत्योऽनुशशास य एष आदित्ये पुरुषो दृश्यते सोऽहमस्मि" "अथ हैनमन्वाहार्यपचनोऽनुशशास य एष चन्द्रमसि पुरुषो दृश्यते सोऽहमस्मि" "अथ हैनमाहवनीयोऽनुशशास य एष विद्युति पुरुषो दृश्यते सोऽहमस्मि" इति श्रवणात्, गार्हपत्यादीनां त्रयाणां क्रमेणादित्यादित्रितयस्थत्वम्, तथा च प्रसिद्धगार्हपत्यस्यैवाक्षिस्थत्वमिति प्रदर्शनार्थं, न तु त्रयाणामक्षिस्थत्वप्रदर्शनार्थमित्यर्थः । **ह्वयाम्यग्निमित्यादाविवेति ।** यथा "ह्वयाम्यग्निं प्रथमं स्वस्तये" इत्यत्राग्नेरुपक्रमेऽपि "सवितारमूतये" "हिरण्ययेन सविता रथेन" इत्यादिसवितृश्रुतिलिङ्गादिना तत्प्रकरणं सावित्रम्, अत एवोक्तमनुक्रमणिकायां—"ह्वयाम्येकादश सावित्रम्" इति, तथाऽत्रापि ब्रह्मण उपक्रमेऽपि "अस्मद्विद्या" इत्यग्नेरुक्तत्वात् अग्नीनामेवेदं प्रकरणमित्यर्थः । **तत्तत्प्रेरकत्वेनेति ।** श्रुतौ वामनिभामनिशब्दाभ्यां स्त्रीपुरुषरूपसर्वप्रेरकताया उक्तत्वादिति भावः ।

प्रकाशः

ग्निश्रुतिसूचनाय प्रयुक्तम्" इति वाक्यस्य तात्पर्यमाह—**अग्नीनामिति ।** सुखविशिष्टसूत्रे "न चोपक्रमविरोधः, "ह्वयाम्यग्निं" इत्यादाविवोपपत्तेः" इत्युक्तम् । तद्दुर्गमत्वात् व्यनक्ति—**यथेति ।** "अनवस्थितेः" इति सूत्रटीकायां "तत्तत्प्रेरकत्वेन तत्तच्चक्षुस्स्थितेरभिप्रेतत्वात्" इत्युक्तम् । श्रुतौ प्रेरकत्वबोधकपदाश्रवणात्कथमेतदित्यत आह—**श्रुताविति ।**

चन्द्रिका

उक्तं हि तत्त्वप्रदीपे—"वामं सौन्दर्यं भामं तेजः तत्प्रधानत्वात् स्त्रीपुरुषा वामभामशब्दशब्दिताः, तन्नेता वामनिर्भामनिः" इति। **दिव्यदृष्टिगोचर इति**। ततश्च श्रुतौ "य एषोऽन्तरक्षिणि पुरुषो दृश्यते" इति दृश्यत्वाद्युक्तिर्युक्तेति भावः॥

प्रकाशः

उपसंहारे "विष्णुरेवाक्ष्यादित्यस्थो दिव्यदृष्टिगोचरः" इत्युक्तम्। तस्य प्रयोजनमाह—**ततश्चेति**। शिष्टमुपन्यासमुखेन स्पष्टीकृतमिति भावः॥

इति अन्तराधिकरणम्॥

—अथ अन्तर्याम्यधिकरणम्—

"यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः" इत्यादिना अन्तर्याम्युच्यते। तत्र च "एतदमृतं" इत्युक्तममृतत्वमुच्यते । स च "यस्य पृथिवी शरीरं" इत्यादिना सर्वात्मकत्वात् प्रकृतिस्तत्तज्जीवो वा युक्तः,

तत्त्वप्रकाशिका

अत्र पृथिव्यादिशरीरत्वलिङ्गसाहित्येनान्यत्रप्रसिद्धान्तर्यामित्वलिङ्गस्य विष्णौ समन्वयप्रतिपादनादस्ति शास्त्रादिसङ्गतिः । विषयवाक्योदाहरणपूर्वकं विषयं दर्शयति—य इति । श्रुत्यादिसङ्गतिं दर्शयति—तत्रेति । "एतदमृतमभयम्" इत्यक्षिस्थपुरुषस्यामृतत्वमुक्तम् । तत्काण्वमाध्यन्दिनश्रुत्योरन्तर्यामिणः कस्य चिच्छ्रूयते "एष त आत्मान्तर्याम्यमृतः" इति । स चान्तर्यामी यदि विष्णोरितरः स्यात्तदाऽमृतत्वं चान्यनिष्ठं नाक्षिस्थस्य विष्णुत्वसाधकं स्यादित्यवश्यनिर्णेतव्य एव । तदन्तर्यामित्वमत्र विषयः । किं विष्णोरन्यस्य वेति सन्देहः । अमृतत्वं पृथिव्यादिशरीरत्वं च सन्देहबीजमिति भावः । सयुक्तिकं पूर्वपक्षयति—स चेति । सोऽन्तर्यामी प्रकृतिर्भवेत्, "यस्य पृथिवी शरीरं यस्यापः शरीरं" इत्यादिनाऽन्तर्यामिणः पृथिव्यादिशरीरत्वस्य श्रवणात्, तस्य च प्रकृतावुपपत्तेः ।

न हि विष्णोः पृथिव्यादिशरीरत्वमङ्गीक्रियते इति। अत आह—

॥ ओम् अन्तर्याम्यधिदैवादिषु तद्धर्म-व्यपदेशात् ओम् ॥

"यं पृथिवी न वेद यः पृथिव्या अन्तरः" इत्या-

तत्त्वप्रकाशिका

शरीरशब्दस्य स्वरूपेऽपि प्रयोगात्, प्रकृतेश्च पृथिव्यादिसर्वात्मकत्वात्। न च "यः पृथिव्यां तिष्ठन्" इत्यादेरनुपपत्तिः, "व्याप्तं कार्येषु कारणम्" इत्यादिना कारणस्य कार्यस्थत्वोक्तेः। "पृथिवी यमयति" इत्येतदप्युपचारेण नेतव्यम्। पृथिव्यादिजीवस्यैव तदन्तर्यामित्वम्, पृथिव्यादिशरीरत्वादेस्तस्मिन्नतिसुघटत्वादिति भावः। ननु यथा प्रकृत्यादिलिङ्गेन तेषामन्तर्यामित्वं, तथाऽमृतत्वलिङ्गेन विष्णोः किं न स्यादित्यत आह—**न हीति**। विद्यमानेऽपि विष्णुलिङ्गे न तस्यान्तर्यामित्वम्, पृथिव्यादिशरीरत्वस्य कयाऽपि विधयाऽवकाशाभावात्, तस्य पृथिव्यादिभिन्नत्वचिच्छरीरत्वोरङ्गीकारेण पृथिव्यादिशरीरत्वानङ्गीकारात्, अमृतत्वस्य च कथञ्चित्प्रकृत्यादावपि सावकाशत्वात्, सावकाशस्य च निरवकाशेन बाधोपपत्तेः। अतोऽन्तर्यामी न विष्णुरपि तु प्रकृत्यादय एवेति नामृतत्वमक्षिस्थस्य विष्णुत्वसाधकमिति भावः। सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे—**अत इति**। अन्तर्यामी विष्णु-

दिना अधिदैवादिषु तद्धर्मव्यपदेशात् विष्णुरेवान्तर्यामी । स हि "न ते विष्णो जायमानो न जातः" "स योऽतोऽश्रुतोऽगतोऽमतोऽनतोऽदृष्टोऽविज्ञातोऽनादिष्टः सर्वेषां भूताना मन्तरपुरुषः" इत्यादिनाऽविदितोऽन्तरश्च ॥ १८ ॥

॥ ओम् न च स्मार्तमतद्धर्माभिलापात् ओम् ॥

त्रिगुणत्वादिप्रधानधर्मानुक्तेर्न स्मृत्युक्तं प्रधानमन्तर्यामी ॥ १९

तत्त्वप्रकाशिका

रेव, अन्तर्यामिणः पृथिव्याद्यविदितत्वतदन्तरत्वाख्यधर्मव्यपदेशात्, अविदितत्वादेश्च विष्णुधर्मत्वात् । न च वाच्यम् पृथिव्यादीनां जडत्वेन तदज्ञेयत्वं सर्वस्यापि सम्भवतीति, पृथिव्यादीनामधिदैवत्वेन जडत्वाभावादिति भावः । चक्षुरादीनां जडत्वेऽप्यत्रोक्तस्यैव तत्र कथनान्न विरोधः । अविदितत्वादेः कुतो विष्णुधर्मत्वमित्यत आह—स हीति । न च पृथिव्यादिजीवाविदितत्वं प्रकृतेः पृथिव्यादिजीवस्य वोपपद्यते ॥ १८ ॥

एवं निरवकाशलिङ्गेन विष्णोरन्तर्यामित्वं समर्थ्य, यदुक्तं प्रकृतेरन्तर्यामित्वमिति, तदपाकुर्वत्सूत्रमुपन्यस्य व्याचष्टे—**न चेति** । स्मार्ते कापिलस्मृतौ पृथिव्याद्यात्मकतयोक्तं प्रधानं नान्तर्यामि, अविदितत्वाद्यनन्यथासिद्धविष्णुधर्मवत् त्रिगुणत्वोपादानत्वादिप्रधानधर्मोक्त्यभावादित्यर्थः । चशब्दो विष्णुरेवान्तर्यामी न तु प्रधानमिति तु शब्दार्थः ॥ १९ ॥

॥ ओम् शारीरश्चोभयेऽपि हि भेदेनैन-मधीयते ओम् ॥

"य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः"। "यो विज्ञाने तिष्ठन् विज्ञानादन्तरो यं विज्ञानं न वेद यस्य विज्ञानं शरीरं" इत्युभयेऽपि हि शाखिनो भेदेनैनं जीवमधीयते ।

शीर्यते नित्यमेवास्माद्विष्णोस्तु जगदीदृशम् ।

तत्त्वप्रकाशिका

यज्जीवोऽन्तर्यामीत्युक्तं, तदपि संसारित्वाद्यतद्धर्माभिलापादिना निरस्तमपि विशेषयुक्त्या पराकुर्वत्सूत्रमुपन्यस्य व्याचष्टे—शारीरश्चेति । चशब्दान्नञः समाकर्षः । "आत्मनोऽन्तरः" इति माध्यन्दिनाः "विज्ञानादन्तरः" इति काण्वाश्च जीवमन्तर्यामिणस्सकाशाद्भेदेनाधीयते 'हि' यस्मादतो न शारीरश्चान्तर्यामीत्यर्थः । आत्मनस्सकाशात् 'अन्तरः' विविक्तः । विज्ञानपदेन शारीरः कुत इति चेत्, उदाहृतश्रुतिसमाख्यानादेव । ननु विष्णावसम्भाव्यमानपृथिव्यादिशरीरत्वस्य प्रधानादिधर्मस्यात्रोक्तेः कथं विष्णोरन्तर्यामित्वं, कथं च प्रधानादिधर्मानभिलाप इत्यत आह—शीर्यत इति । यद्यपि विष्णौ नोक्तप्रकारद्ध-

रमते च परो ह्यस्मिन् शरीरं तस्य तज्जगत् ॥

इति वचनान्न शरीरत्वविरोधः ॥ २० ॥

तत्त्वप्रकाशिका

येन पृथिव्यादिशरीरत्वोपपत्तिस्तथाऽपि योगवृत्त्या तस्मिन् पृथिव्यादिशरीरत्वव्यपदेशोपपत्तेः, न तद्विरोधो विष्ण्वन्तर्यामित्वस्य, नाप्यतद्धर्माभिलापोक्तेर्विरोध इति भावः । यद्यपि योगाद्रूढेः प्राबल्यम् , तथाऽपि निरवकाशाविदितत्वादिलिङ्गबलेन योगाङ्गीकारो युज्यते । अतोऽन्तर्यामी विष्णुरेवेति स एवामृतोऽक्षिस्थश्चेति सिद्धम् ॥ २० ॥

चान्द्रिका

॥ ओम् अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ओम् ॥

अत्र चक्षुरन्तस्स्थस्य ब्रह्मत्वे हेतूक्तामृतत्वाक्षेपेण पूर्वपक्षोत्थानादनन्तरसङ्गतिरिति भाष्य एवोक्तम् ।

प्रकाशः

॥ ओम् अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ओम् ॥

"तत्र च "एतदमृतं" इत्युक्तममृतत्वमुच्यते" इत्यादिभाष्यटीकयोः पूर्वश्रुतिसङ्गतेरेव प्रतीत्या पूर्वाधिकरणसङ्गत्यप्रतीतेः "श्रुत्यादिसङ्गतिं दर्शयति" इति टीका न युक्तेत्यत आह—हेतूक्तेति । "उपपत्तेः" इत्यनेनेत्यर्थः । 'सङ्गतिः' आक्षेपिकीत्यर्थः । **उक्तमिति** । श्रुतिसङ्गत्यविनाभूतत्वादुक्तप्रायमित्यर्थः । पूर्वाक्षेपसमर्थनं पूर्ववत् ध्येयम् । एतेनेहामृतत्वस्यैवाक्षेपात् तेन प्राग्वदन्तर्यामी च विष्णुरिति शङ्कानवकाशः सूचितः । अत्र पूर्वपक्षेऽन्तरत्वमप्यन्यस्यैवेति वक्ष्यमाणत्वात् "सर्वेषां भूतानां अन्तरपुरुषः" इति "विवक्षितगुणोपपत्तेः" इत्यत्र विष्णुलिङ्गतया निर्णीतेनान्तरत्वेन विष्णुः किं न स्यादित्यपि शङ्का प्रत्युक्ता । अमृतत्वाक्षेपस्तु सन्निधानाद्भाष्यादावत्रापि दर्शितः । यद्यप्यत्र "यश्चक्षुषि तिष्ठन्" इति चक्षुस्स्थस्यात्रोक्तपूर्वपक्षन्यायेनान्यत्वात् प्रागक्षिस्थोऽपि स एवेत्याक्षेप ऋजुः । यद्यत्रान्तर्यामी विष्णोरन्यस्तर्हि "अन्तर्याम्यमृतः" इत्युक्तामृतत्वमपि तस्यैवेति प्रागमृतत्वयुक्तोऽक्षिस्थोऽपि स एवेत्याक्षेपो वक्रः ।

चन्द्रिका

अत्रान्तर्यामी किं प्रकृत्यादिः किं वा विष्णुरिति चिन्ता। तदर्थं "यस्य पृथिवी शरीरं" इत्यादिनोक्तं पृथिव्यादेरन्तर्यामिणं प्रति शरीरत्वं किं ब्रह्म प्रति न युक्तं उत युक्तमिति। तदर्थं शरीरत्वं किं रूढ मुत यौगिकमिति। तदर्थं किं रूढौ बाधकं नास्ति उत अस्तीति। तदर्थं "यं पृथिवी न वेद" इत्यादिनाऽन्तर्यामिण्युक्तं पृथिव्याद्यविदितत्वं किं प्रकृत्यादौ युक्तं उत नेति। तदर्थं "यं पृथिवी" इत्यादौ पृथिव्यादिशब्दः किमचेतनपरः किं वा तदभिमानिचेतनपर

प्रकाशः

प्राचीनः सौत्रप्रतिज्ञांशस्य, अयं च हेत्वंशस्येति स एव वाच्य इति भाति। तथाऽपि सर्वानुगुण्याय वा, अमृतत्वमुखेन चक्षुरादिस्थस्यापि विष्णुत्वशङ्का मा भूदिति वा तदाक्षेप उक्तः। अत्र सुधोक्तः अक्ष्यन्तरवस्थानविशिष्टरमणकर्तृत्वरूपान्तरत्वाक्षेपस्तु प्रागेव "सर्वत्र" इति नये विवृत इति भावः। एतेन स्थाननिर्देशोपपादनाय पृथिव्यादिस्थाननिर्देशो दृष्टान्तितः, तस्याक्षेपात् सङ्गतिरिति कल्पतरूक्तं निरस्तम्। स्थानसूत्र एवमर्थस्य निरासात्। प्रधानहेत्वाक्षेपसम्भवे त्वद्रीत्या शङ्कानिरासकसूत्राक्षेपायोगात्। तदेतदाह—ब्रह्मत्वे हेतूकृतेति। एतेनैव चक्षुषि स्थित्यादेः परमात्मन एव "यश्चक्षुषि तिष्ठन्" इति निर्देशादित्युक्तस्य समर्थनार्थमेतदिति केषाञ्चित्सङ्गत्युक्तिरपि अपास्तेति। एवं सङ्गतिटीकां विवृत्य विषयसंशयटीकां व्यनक्ति—अत्रेति। बृहदारण्यके तृतीये

चन्द्रिका

इति। अचेतनपरत्वे हि अचेतनाविदितत्वं प्रकृत्यादेरपि सम्भवति, अन्यथा तु न सम्भवतीति ॥

प्रकाशः

"यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः" इत्येवंरूपेणाबग्न्यन्तरिक्षवाय्वादित्यदिक्चन्द्रतारकाकाशतमस्तेजस्स्वधिदैवतं, "यस्सर्वेषु भूतेषु" इत्यधिभूतं, प्राणवाक्चक्षुश्श्रोत्रमनस्त्वग्विज्ञानरेतस्स्वध्यात्मं श्रुतोऽन्तर्यामी विषय इत्यर्थः। टीकायामधिदैवादिसर्वप्रकरणश्रुतान्तर्यामिमात्रविषयताद्योतनायान्तर्यामित्वं विषय इत्युक्तावपि, सूत्रभाष्यानुरोधेन 'अन्तर्यामी' इत्युक्तम्। आदिपदेन तत्तदभिमानिजीवाः। अस्पष्टांशे फलफलिभावमाह—अचेतनेति। यदा वक्ष्यमाणदिशा अचेतनपरत्वं, तदा जडाविदितत्वस्य प्रकृत्यादेरुपपत्तेः, रूढौ बाधकाभावात् तादृक्शरीरत्वं विष्णोर्न युक्तमिति प्रकृत्यादिरेवेति पूर्वपक्षे फलम्। जीवादन्तर्यामिभेदोक्तिर्नेति पूर्वपक्षिणो भावः। यदा तु चेतनपरत्वं, तदा तेन साकल्येनाविदितत्वस्य प्रकृत्यादावयोगात् बाधकेन रूढित्यागाच्छीर्यमाणत्वयोगेन विष्णावपि तच्छरीरकत्वसम्भवात् विष्णुरेवेति सिद्धान्ते फलमित्यर्थः। यद्यपि विष्णुरिति चिन्तानन्तरं, तदर्थममृतत्वादिकं गौणं उत मुख्यमिति, तदर्थं बाधकमस्त्युत नेति, तदर्थं शरीरत्वं विष्णोर्न युक्तमुत युक्तमिति, तदर्थं तत्किं रूढं यौगिकं

चान्द्रिका

पूर्वपक्षस्तु—"एष त आत्माऽन्तर्यामी" इत्युक्तोऽन्तर्यामी प्रकृतिः, अन्तर्यामिणि श्रुतस्य पृथिव्याद्यात्मकत्वरूपस्य पृथिव्यादिशरीरत्वस्य पृथिव्याद्युपादाने प्रकृतौ सम्भवात्, शरीरशब्दस्य 'इदं पूर्वपक्षशरीरं' इत्यादौ स्वरूपेऽपि प्रयोगात्। यद्यपि "यस्य दिशः शरीरं, यस्यात्मा शरीरं" इत्युक्तं दिगादिशरीरत्वं प्रकृतौ न

प्रकाशः

वेत्येवं यथासूत्रविन्यासं चिन्तोपदर्शनीया, आद्ये सूत्रे साधकलिङ्गस्य, द्वितीयादौ परलिङ्गसावकाशतायाश्चोक्तेः। तथाऽपि सिद्धान्ते शरीरपदस्य यौगिकत्वोक्तेर्निर्बीजतानिरासायाधिदैवपदस्वारस्याय च तदभिप्रेतैवेयं चिन्ता दर्शिता। अत एव पूर्वपक्षटीकायां शरीरत्वस्याघटनैव पूर्वं विष्णावुक्ता, सिद्धान्तटीकायां च "यद्यपि योगाद्रूढेः प्राधान्यं। तथाऽपि निरवकाशाविदितत्वादिलिङ्गबलेन योगाङ्गीकारो युज्यते" इत्युक्तमिति भावः।

"सोऽन्तर्यामी प्रकृतिर्भवेत्" इत्यादिटीकां विवृण्वन् "पृथिव्यादिशरीरत्वं निरवकाशम्" इति न्यायविवरणोक्तशरीरित्वरूपनिरवकाशलिङ्गेन पूर्वपक्षद्वयं वक्तुं "न च स्मार्तं" इति सूत्रसूचितं प्रकृतिपूर्वपक्षं तावदाह—**एष त इति**। एतेन 'सः' इति टीकास्थतच्छब्दार्थो विवृतः। "यस्य पृथिवी" इत्यादि "सर्वात्मकत्वात्" इत्यन्तटीकार्थं निष्कृष्याह—**अन्तर्यामिणीति**। तत्रानुपपत्तिमाशङ्क्य निराह—**यद्यपीति**।

चान्द्रिका

मुख्यं, पृथिव्यादेः प्राकृतत्वेऽपि दिगादेरप्राकृतत्वात् । तथाऽपि गौणं तदस्तु । ब्रह्मणस्तु पृथिव्यादिशरीरत्वमपि न मुख्यम्। न च नित्ये दिगादिके ब्रह्म प्रति शीर्यमाणत्वादिरूपं यौगिकमपि शरीरत्वमस्ति ।

प्रकाशः

गौणमिति । दिगाद्यभिमानिदेहस्य प्राकृतत्वात् दिगादिरपि तथोच्यत इति भावः। **ब्रह्मणस्त्विति**। प्रकृतौ किञ्चिदेवामुख्यं, ब्रह्मणि तु सर्वमपीति न तद्वद् इत्यर्थः । ननु ब्रह्मणि योगाङ्गीकारे मुख्यं युज्यत इत्यत आह—**न चेति** । 'नित्ये' इति हेतुगर्भम् । ननु ब्रह्मपक्षे यथा दिगादिशरीरत्वमयुक्तं, प्रकृतिपक्षेऽपि तथा न युक्तं, पृथिव्यादिशरीरत्वं चोभयत्रापि युक्तमिति चेन्न, योगाद्रूढे रथकाराधिकरणन्यायेन बलवत्त्वादिति भावः । इयता ग्रन्थेन आद्यादिचिन्तात्रयस्थपूर्वपक्षकोटयो हेतुहेतुमद्भावापन्नतया विवृताः । इदानीं 'बाधकं नास्ति' इत्यादिकोटीर्विवरीतुकामः किमत्र बाधकं "यः पृथिव्यां तिष्ठन्" "यआत्मनि तिष्ठन्" इत्युक्तपृथिव्याद्याधारत्वं वा, "यमयति" इत्युक्तपृथिव्यादिनियामकत्वं वा, "आत्मानं यमयति" इत्युक्तचेतननियामकत्वं वा, आत्माविदितत्वं वा, "अदृष्टो द्रष्टाऽश्रुतः श्रोता अमतो मन्ता अविज्ञातो विज्ञाता" इत्युक्तद्रष्टृत्वादिकं वेति विकल्पान् हृदि कृत्वा, "न च "पृथिव्यां तिष्ठन्" इत्यादेर-

चन्द्रिका

"यः पृथिव्यां तिष्ठन्" इत्यादिकं तु "व्याप्तं कार्येषु कारणम्" इत्युक्तेः, पटे तन्तव इति प्रतीतेश्च कारणस्यापि कार्यस्थत्वाद्युक्तम् । कार्यकारणयोश्च भिन्नाभिन्नत्वादभेदेन तदात्मकत्वं, भेदेन तत्स्थत्वं चाविरुद्धम् । "पृथिवीं यमयति" इत्यादिनोक्तं च तन्नियम्यत्वं गौणं, कार्यस्य कारणाधीनत्वात् । "आत्मानं यमयति" इत्येतदपि आत्मप्रवृत्तेः शरीरादिद्वारा प्रकृत्यधीनत्वात् । "यमात्मा न वेद" इत्येतदपि "अप्रतर्क्यमविज्ञेयं" इत्यादिना प्रकृतेर्दुर्ज्ञानत्वात् । "द्रष्टा श्रोता" इत्यादिनोक्तं च द्रष्टृत्वादिकं प्राकृतानामिन्द्रियाणां दर्शनादिसाधनत्वेन करणे कर्तृत्वोपचाराद्वाऽभिमानिद्वारा वा प्रकृतौ युक्तम् ।

प्रकाशः

नुपपत्तिः" इत्यादिटीकां त्रिवृण्वन् क्रमेण निराह—**य इति । इत्युक्तेरिति ।**

कारणेषु स्थितं कार्यं व्याप्तं कार्येषु कारणम् ।

इति पञ्चमे गीतातात्पर्योक्तेरित्यर्थः । प्रत्यक्षं चाह—**पट इति ।** एतेन टीका उपलक्षणमिति सूचितम् । टीकोक्तेर्विरोधं ह्यद्याशङ्क्य स्वयं समाधत्ते—**कार्येति** । गौणतां व्यनक्ति—**कार्यस्येति** । "आत्मानं" इति माध्यन्दिनपाठः । "विज्ञानं" इत्येव काण्वपाठः । 'यं' इति पृथिव्याद्यविदितत्वं त्वग्रे सावकाशयिष्यत इति भावः । 'इत्यादिना' गीतावाक्येनेत्यर्थः ।

चन्द्रिका

अत्र यदुक्तं उभाभ्यां जीवमात्रमन्तर्यामीत्येव पूर्वः पक्षः। न तु प्रकृतिः, तस्याः द्रष्टृत्वाद्यसम्भवादिति, तन्न, त्वन्मते "तदैक्षत" इति श्रुतस्येक्षणस्य प्रकृतौ गौणत्वेनेक्षत्यधिकरणपूर्वपक्षवत्, द्रष्टृत्वादेर्दर्शनरूपे ब्रह्मणि आरोपितत्वेन वा, मायाविशिष्टनिष्ठत्वेन वा अत्यत्रसिद्धान्तवच्च, पृथिवीशरीरत्वादिप्रकृतिलिङ्गेन प्रधानेऽपि द्रष्टृत्वादेर्गौणत्वेनारोपितत्वेन वा, चेतनविशिष्टनिष्ठत्वेन वा पूर्वपक्षस्य सम्भवात्। अन्यथा "न च स्मार्तं" इति सूत्रे प्रकृते·

प्रकाशः

अत्र यदुक्तमिति। स्पष्टयिष्यते चैतदग्रे। **गौणत्वेनेति**। "गौणश्चेत्" इति सूत्रे द्वाभ्यामपि गौणत्वेनोक्तत्वादिति भावः। **प्रधानेऽपि द्रष्टृत्वादेर्गौणत्वेनेति**। नन्वक्षराधिकरणटीकायां "द्रष्टृत्वादिश्रवणाज्जडप्रकृतेर्न सन्देहनिविष्टत्वं" इति वक्ष्यत इति तद्विरुध्यत इति चेन्न, तत्र द्रष्टृत्वादेः प्रथमतरश्रवणादिह चरमश्रुतद्रष्टृत्वादेः प्रथमावगतपृथिव्यादिशरीरस्थत्वपृथिवीस्थत्वादिना लिङ्गेन कथञ्चिन्नेयत्वादिति तात्पर्यात्। अत एव तत्र वक्ष्यति टीकाकारः "उत्तराधिकरणे त्वीक्षणस्य प्रथमाप्रतीतेरस्त्यवकाशः" इतीति भावः। किमर्थमेवमित्यतः विपक्षे सूत्रविरोधमाह—**अन्यथेति**। यदत्रोक्तं श्रुतप्रकाशे तदग्रे निरासिष्यते। एवं पृथिव्यादिशरीरत्वं नाम तदात्मकत्वमित्युपेत्य एकः पूर्वपक्षः टीकाविवरणेन विवृतः। इदानीं तद्देहत्वमर्थमुपेत्य "शारीरश्च" इति

चन्द्रिका

र्निषेधो न स्यात् । पृथिव्याद्यभिमानिनां जीवानां वैतदन्तर्यामित्वं, तान्प्रति पृथिव्यादेः स्थूलशरीरत्वात् । अत्र भामत्यां "यस्सर्वान् लोकानन्तरो यमयति" इति श्रुतस्य सर्वनियन्तृत्वस्याभिमानिजीवेषु प्रत्येकमसम्भवात् नैवं पूर्वपक्ष इत्युक्तम् । तन्न, स्वाङ्गीकृतजीवमात्रपक्षेऽपि तदसम्भवात् । 'यः' इत्याद्येकवचनस्य समुदायपरत्वं त्वभिमानिपक्षेऽपि समम् । प्रत्युत जीवमात्रपक्ष एव

प्रकाशः

सूत्रसूचितं द्वितीयं पक्षं विवृण्वन्नाह—**पृथिव्यादीति** । भाष्यसूत्रानुरोधेन टीकायामेकवचनोक्तावपि तज्जात्यभिप्रायमिति भावेन बहुवचनोक्तिः । अन्यथा भामतीमतरीत्या टीकायामपि जीवसामान्यमेवाभिमतमिति मन्दस्य शङ्का स्यात् । जीवसामान्यपक्षश्चाग्रेतनदोषदुष्टः । अत एव टीकायामुत्तरत्र "प्रकृत्यादिलिङ्गेन तेषामन्तर्यामित्वं" इति "अतोऽन्तर्यामी न विष्णुः, अपि तु प्रकृत्यादयः" इति च बहुवचनोक्तिः । अन्यथा 'तस्य' इति 'प्रकृत्यादिः' इत्येव च निर्देशः स्यादिति भावः । अत्र परोक्तं बाधकमाशङ्क्याह—**अत्रेति** । **नैवमिति** । किन्तु जीवसामान्यमित्यर्थः । **तदिति** । सर्वलोकनियन्तृत्वस्य प्रत्येकं जीवे असम्भवादित्यर्थः । न प्रत्येकं जीवानां तन्नियन्तृत्वं, किन्तु मिलितानां, "यस्सर्वान् लोकान्" इत्येकवचनं समुदायाशयमित्यत आह—**य इति** । अभिमानिनामप्युक्तरीत्या तत्तल्लोकनियामकत्वेन मिलित्वा सर्वलोकनियन्तृत्वोपपत्तेरित्यर्थः । **प्रत्युतेति** । प्राण-

चन्द्रिका

युक्तः, "यस्य पृथिवी शरीरं" इत्यादिनोक्तस्य पृथिव्याद्येकैक-शरीरत्वस्य, "यस्य प्राणः शरीरं" इत्यादिनोक्तस्य प्राणवाक्चक्षुश्श्रोत्रादिशरीरत्वस्य चायोगात्। तस्मादभिमानिनामेवान्तर्यामित्वं न तु विष्णोः, तस्य पृथिव्याद्यात्मकत्वतद्देहत्वयोरयोगात्। न च तेन शीर्यमाणत्वादिना पृथिव्यादेस्तच्छरीरत्वं, योगाद्रूढेर्बलीयस्त्वात्। "यं पृथिवी न वेद" इत्युक्तं पृथिव्यादिनाऽविदितत्वं च तस्य जडत्वादभिमानिन्यपि युक्तम्। "यं आत्मा न वेद" इति चेतनस्य पृथगुक्तेः पृथिव्यादिशब्दो नाभिमानिचेत-

प्रकाशः

चक्षुरादीन्द्रियपृथिव्यादिभूतसङ्घातशरीरकत्वात् जीवस्य पृथिव्यादिमात्रशरीरकत्वमयुक्तं, अभिमानिनां तु तत्तन्मात्रनियामकत्वेन तत्तन्मात्रस्थूलशरीरकत्वं युक्तमिति भावः। "विद्यमानेऽपि विष्णुलिङ्गे न तस्यान्तर्यामित्वम्" इत्यादिटीकार्थमाह—**न तु विष्णोरित्यादिना**। "पृथिव्यादिशरीरकत्वस्य कयाऽपि विधया अवकाशाभावात्" इति टीकायाम् विधाशब्दस्य "पृथवीभिन्नचिच्छरीरत्वोररीकारेण" इति वाक्यानुरोधिन तदात्मकत्वतद्देहत्वरूपप्रकारद्वयमर्थं विवृत्य योगवृत्त्याऽपीत्यपेरर्थमभिप्रेत्य योगवृत्त्या विष्णौ घटनमाशङ्क्य निराह—**न च तेनेति**। **बलीयस्त्वादिति**। तस्य जन्मादिनयपूर्वपक्ष एव व्युत्पादितत्वादिति भावः। रूढित्यागे बाधकमाशङ्क्याह—**यमिति**। 'तस्य' पृथिव्यादेः। जडत्वे युक्तिमाह—**यमिति**।

चन्द्रिका

नपरः । "यः पृथिव्या अन्तरः" इत्युक्तमन्तरत्वं यदि भिन्नत्वं, यदि वाऽन्तस्स्थत्वं, द्वयमपि पृथिव्यादिशरीरकेऽभिमानिन्यपि युक्तम् । "य आत्मनि तिष्ठन् आत्मानं यमयति" इत्येतदपि तत्त्वाभिमानिनां अस्मदाद्यात्मनियामकत्वात् युक्तम् । "यमात्मा न वेद" इति तु अभिमानिजीवानां दुर्ज्ञानत्वात् युक्तम् । यद्वा— "यः पृथिव्यां" इत्यादाविव "य आत्मनि" इत्यत्रापि आ-

प्रकाशः

माध्यन्दिनपाठानुरोधेन 'आत्मा' इत्युक्तम् । "यं विज्ञानं न वेद" इति काण्वपाठस्यैवोक्तौ विज्ञानशब्दस्य आत्मशब्दस्येव जीवे प्रसिद्ध्यभावेन चेतनाज्ञेयत्वं न स्पष्टं भायादिति भावः । नन्वथापि- "अन्तरपुरुषः" इत्यत्र निर्णीतान्तरत्वं वा, "आत्मानि तिष्ठन्" इत्यादिनोक्तं चेतननिष्ठत्वं वा, चेतननियमनं वा, आत्मशब्दितचेतनाविदितत्वं वा रूढौ बाधकमस्तीत्यतः क्रमेण निराह—**य इत्यादिना** । पूर्वमात्मशब्दस्य जीवसामान्यपरत्वं, तद्वाक्यस्य 'यः' इत्यादियच्छब्दस्य पृथिव्यादितत्त्वाभिमानिजीवसमुदायपरत्वमुपेत्य तल्लिङ्गं सावकाशमित्युक्तम् । इदानीमात्मशब्दः सकलचेतनपर एव, 'यः' इत्यादियच्छब्दस्तु सकलात्माभिमानिचेतनपरः, पूर्वत्र पृथिव्यादिशब्दैस्तदभिमानिजीवस्यैव ग्रहणेनात्रापि तत्प्रायपाठेन तथैव ग्राह्यत्वात् । आत्माज्ञेयत्वादि च आत्माभिमानिनो जीवस्य दुर्ज्ञेयत्वादिना युक्तमिति भावेनाह—**यद्वेति** । एवञ्चान्तर्यामिणोऽन्यत्वादमृत-

चान्द्रिका

त्मगभिमानिजीव एवात्मान्तर्यामित्वेनोच्यत इति ॥

सिद्धान्तस्तु—

पृथिव्यादेर्जडत्वे स्यादप्रसक्तनिराक्रिया ।
चित्त्वे तु तेन कात्स्न्र्येनावेद्यत्वं नेश्वरं विना ॥

"यं पृथिवी न वेद" इत्यादौ पृथिव्यादेर्जडत्वे 'यं' इत्यस्य वैयर्थ्यं, "यमात्मा न वेद" इत्यस्यानुपपत्तिश्च। अप्रसक्तप्रतिषेधापा-

प्रकाशः

त्वस्यापि तस्यैव वाच्यत्वात् प्रागुक्तहेतुना नाक्षिस्थो विष्णुरिति भावः॥

अधिदैवाधिभूताध्यात्मप्रकरणेषु पृथिव्याद्यविदितत्वतदन्तरत्वरूपनिरवकाशलिङ्गसत्त्वेन तद्बलेन पृथिव्यादिशरीरत्वस्य कथं चिन्नेयत्वात् अन्तर्यामी विष्णुरिति भावेन "अन्तर्यामी विष्णुरेव" इत्यादिटीकां विवृण्वन्नविदितत्वस्य निरवकाशत्वं तावदाह—**पृथिव्यादेरिति**। यदुक्तं पृथिव्यादेर्जडत्वेन तदवेद्यत्वं प्रकृत्यादौ युक्तमिति, तत्र बाधकत्रयं वदन् पूर्वार्धं व्यनक्ति—**यमिति**। जडे ज्ञानमात्रस्यैवाभावेन 'न वेद' इत्येव वाच्यं, न तु 'यं' इति विषयविशेषोपादानमित्यर्थः। **यमात्मेति**। पृथिव्यादौ ज्ञानमात्रनिषेधे "यमात्मा" इत्यादावपि तथात्वापत्त्या चेतनस्य ज्ञानसामान्यनिषेधायोग इत्यर्थः। श्लोके 'अप्रसक्त' इत्युक्तिरुपलक्षणमिति भावः। **अप्रसक्तेति**। जडे ज्ञानप्रसक्तेरेवाभावादिति भावः।

चन्द्रिका

तश्च। "नान्तरिक्षे न दिवि" इत्यन्तरिक्षादावप्रसक्तचयननिषेधस्तु "हिरण्यं निधाय चेतव्यम्" इति विधिस्तुत्यर्थः। प्रकृते तु न तथा। तस्मात्पृथिव्यादिः तदभिमानिचेतन एव। तेन च साकल्येनावेद्यत्वं भाष्योक्तश्रुत्यादिभिर्हरेरेव।

प्रकाशः

ननु "पृथिव्यामग्निश्चेतव्यो नान्तरिक्षे न दिवि हिरण्यं निधाय चेतव्यम्" इत्यत्रेष्टकावेदिकारूपाग्निचयनस्य "नान्तरिक्षे" इत्यत्राप्रसक्तविषयत्वेऽपि यथा नित्यानुवादत्वं तद्वत्स्यादित्यत आह—नेति। आद्यस्य द्वितीयपादे अर्थवादनये "अभागिप्रतिषेधात्" इति गुणसूत्रे "नान्तरिक्षे" इत्यादेरप्रसक्तनिषेधेनाप्रामाण्यमाशङ्क्य "अन्त्ययोर्यथोक्तम्" इति सिद्धान्तगुणसूत्रेण हिरण्यस्तुत्यर्थमितरानिन्दा क्रियते। 'असति प्रसङ्गे निषेधो नित्यानुवादः' इत्युक्तमभियुक्तैः। इह तु न तथा, विधेयान्तराभावादिति भावः। 'एव' इत्यनेनाऽभिमानिनयन्यायेन पृथिव्यादिशब्दानां अभिमानिन्येव मुख्यत्वान्मुख्यसम्भवे नामुख्यं ग्राह्यमिति सूचितम्। एतेन "पृथिव्यादीनामधिदैवत्वेन जडत्वाभावात्" इति टीका विवृता। "यमात्मा न वेद" इति पृथगुक्तिस्तु आत्माभिमानिपरत्वाद्युक्तेति भावः। ततश्च किमित्यतः उत्तरार्धं व्यनक्ति—तेन चेति। चेतनेनेत्यर्थः। लेशेन विदितत्वस्य सर्वत्र सम्भवेन तन्निषेधायोगात्, तदन्यथानुपपत्त्यैव साकल्येनाविदितत्वं लभ्यते। तच्च "न ते

चन्द्रिका

अन्तरत्वं च

बाह्यापेक्षां विना यस्तु रमते सोऽन्तरः स्मृतः ।
अतिप्रियत्वाच्च हरेरन्तरत्वमुदाहृतम् ॥

इति स्मृत्युक्तं, स्वतो नित्यतृप्तात् "प्रेयः पुत्रात्" इत्यादिश्रुत्या परमप्रेयोरूपाच्च ब्रह्मणोऽन्यत्र न युक्तम् । किञ्च श्रुत्यन्तरे "दिव्यो देव एको नारायणः" इत्युपक्रम्य "यस्य पृथिवी शरीरं यः पृथिवीमन्तरे सञ्चरन् यं पृथिवी न वेद" इत्याद्युक्त्वा "एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः" इत्युपसंहारान्नारायण एवान्तर्यामी ॥

प्रकाशः

विष्णो जायमानः" इत्यादिभिः हरेरेवेत्यर्थः । "यः पृथिवीमन्तरो यमयति" इति श्रुतान्तरत्वमपि निरवकाशमित्याह—**अन्तरत्वं चेति** । 'अन्यत्र न युक्तं' इत्यन्वयः । 'स्मृत्युक्तं' बृहदारण्यकभाष्योक्तस्मृत्युक्तमित्यर्थः । पूर्वार्धतात्पर्य—**स्वतोनित्यतृप्तादिति** । उत्तरार्धतात्पर्य—**प्रेय इत्यादि** । **श्रुत्येति** । वाजसनेयश्रुत्येत्यर्थः । सूत्रभाष्याद्युक्तमुपलक्षणं मत्वा स्वयं समाख्यामप्याह—**किञ्चेति** । 'श्रुत्यन्तरे' सुबालोपनिषदि । "तदाहुः किन्तदासीन्नैवेह किञ्चनाग्र आसीत् अमूलमनाधारा इमाः प्रजाः प्रजायन्ते दिव्यो देव एको नारायणश्चक्षुश्च द्रष्टव्यं च नारायणः श्रोत्रं च श्रोतव्यं च नारायणः" इत्याद्युपक्रम्य, "अन्तश्शरीरे

चन्द्रिका

पृथिव्यादेः शरीरत्वं यौगिकं गौणमेव वा ।
रूढस्यानुपपन्नत्वात् अग्नेरिन्द्रत्ववत् भवेत् ॥

यथा "इन्द्रो न तस्थौ" इतीन्द्रशब्दः गार्हपत्येऽपि स्वोचि-

प्रकाशः

निहितो गुहायामज एको नित्यो यस्य पृथिवी शरीरं यः पृथिवीमन्तरे सञ्चरन् यं पृथिवी न वेद यस्यापः शरीरं योऽपोऽन्तरे सञ्चरन् यमापो न विदुः" इत्यादिना पृथिव्यब्वाय्वाकाशमनोहङ्कारबुद्धिचित्ताव्यक्ता-क्षरमृत्युस्थत्वादिकमुक्त्वाऽन्ते "एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः" इत्युक्तत्वादित्यर्थः । अस्य प्रसिद्धत्वात् भाष्या-दावनुक्तिः । यद्वा—"अधिदैवादिषु" इति सामान्योक्त्या श्रुत्य-न्तरस्थाधिदैवादिप्रकरणस्यापि सूत्रादौ सङ्ग्रहसूचनादत्र तदुक्तिः । यद्वा—'तद्धर्मश्च व्यपदेशश्च' इति समाहारद्वन्द्वेन "सम्भूति-द्युव्याप्ति" इतिवदयं सूत्रभाष्यटीकासु "तद्धर्मव्यपदेशात्" इति निर्देश इति मत्वा, व्यपदेशशब्दार्थतया समाख्योक्तिरिति सूत्रा-देरर्थान्तरमपि ध्येयम् । यद्यपि पृथिव्यादिशरीरत्वं परसाधकं स्व बाधकं, तस्य "अतद्धर्माभिलापात्" इति द्वितीयसूत्रांशलब्धं सावकाशत्वं, "योगवृत्त्या तस्मिन् पृथिव्यादिशरीरत्वव्यपदेशोपपत्तेः" इति भाष्यटीकोक्तं अन्यत्रोक्तसावकाशत्वप्रकारं च सङ्गृह्याह—**पृथि-व्यादेरिति** । ननु रूढिर्बलवतीत्यत उक्तं—**रूढस्येति** । उक्तबाध-केभ्य इति भावः । दृष्टान्तांशं व्यनक्ति—**यथेति** । "कदाचन

चान्द्रिका

तैश्वर्यस्य सद्भावाद्योगेन वा, इन्द्रवद्यज्ञसाधनत्वात् गौण्या वा वृत्त्या वर्तते । उक्तं हि—

स्यादग्नेर्गौणमिन्द्रत्वं यज्ञसम्बन्धकारितम् ।
इन्दत्यर्थानुसाराद्वा स्वकार्ये सोऽपि हीश्वरः ॥

इति । तथा शरीरशब्दोऽपि पृथिव्यादिषु योगेन वा शरीरवत्तन्नियम्यत्वेन गौण्या वा वृत्त्या वर्तताम् । चेतनानामपि देहद्वारा

प्रकाशः

स्तरीरसि नेन्द्र" इति पुरोनुवाक्या, "निवेशनः" इति याज्या, "इन्द्रो न तस्थौ" इत्युपरिष्टाल्लक्ष्मश्रवणात् । तत्र "ऐन्द्र्या गार्हपत्यमुपतिष्ठते" इति श्रौतविनियोगेन मन्त्रस्य गार्हपत्यशेषतया तत्प्रकाशकत्वान्मन्त्रस्थेन्द्रशब्दस्येदिधात्वर्थस्वोचितैश्वर्ययोगेन वा यज्ञसाधनत्वगुणमूलया गौण्या वृत्त्या वेत्यर्थः । **उक्तं हीति** । तृतीये वार्त्तिककृतेत्यर्थः । पूर्वार्धं व्यनक्ति—**तथेति** ।

शीर्यते नित्यमेवास्माद्विष्णोस्तु जगदीदृशम् ।
रमते च परो ह्यस्मिन् शरीरं तस्य तज्जगत् ॥

इति **उक्तयोगेने**त्यर्थः । ननु यौगिकमपि शरीरत्वं पृथिव्यादेरपि चित्त्वेनायुक्तं, "यस्यात्मा शरीरं" इत्याद्ययोगश्च, चेतननित्यतायाः "यावदात्मभावित्वाच्च न दोषः" इत्यादौ सेत्स्यमानत्वादित्यत आह—**चेतनानामपीति** । तादृशदेहसम्बन्धश्च "ज्ञोऽत एव" "युक्तेश्च" इत्यत्र सेत्स्यतीति भावः । एतेन दिशामप्यवा-

चान्द्रिका

शीर्णताऽस्त्येव । शरीरत्वस्य गौणत्वं च बृहदारण्यकभाष्ये उक्तम् । तेन पुराणादिषु प्रपञ्चे ब्रह्मकायत्वाद्युक्तिरपि समर्थिता । एवञ्च "य आत्मनि तिष्ठन्" इत्यादिकं च क्लेशेन न नेयमिति । एतदेवाभिप्रेत्योक्तं न्यायविवरणे—"पृथिव्यादिशरीरत्वं च न निरवकाशं, यौगिकशरीरत्वोपपत्तेर्विष्णोरपि" इति ।

प्रकाशः

न्तराभिमानिदेहद्वारा शीर्णताऽस्त्येवेति तत्रापि नायुक्तमिति ध्येयम् । गौणत्वं भाष्यटीकयोर्नोक्तमित्यत आह—**शरीरत्वस्येति** ।

पृथिव्याद्या देवतास्तु देहवद्यद्वशत्वतः ।
शरीरमिति चोच्यन्ते यस्य विष्णोर्महात्मनः ॥

इति स्मृत्या शरीरस्य यथा जीववशत्वं, तथा पृथिव्याद्यभिमानिजीवानामीश्वरवशत्वात्तच्छरीरत्वमिति गौणत्वमुक्तमित्यर्थः । तथा च भाष्यद्वयानुसाराद्वयमप्यस्माभिरुक्तमिति भावः । गौणत्वोक्तेः फलमाह—**तेनेति** । गौणत्वकथनेनेत्यर्थः । **पुराणादिष्विति** ।

स विश्वकायः पुरुहूत ईशः सत्यं परं ज्योतिरजः पुराणः ।

इत्यादिभागवतादिष्वित्यर्थः । **कायत्वादीति** । देहत्वविग्रहत्वाद्युक्तिरादिपदार्थः । **क्लेशेनेति** । तच्छररिस्य प्राकृतत्वभेदाभेदादिना । **यौगिकेति** । गौणशरीरत्वेत्यपि ग्राह्यम् । अविदितत्वादिनिरवकाशबाधकबलेन प्रथमप्राप्ताया अपि रूढेः परित्यागोपपत्तेरिति भावः ।

चन्द्रिका

सूत्रक्रमस्तु—आद्ये स्वपक्षसाधकोक्तिः, द्वितीये प्रधानजीवपक्षयोः साधकाभावोक्तिः, तृतीयसूत्रस्थस्य 'शारीरश्च' इत्यस्यात्रापि सम्बन्धात्, तृतीये जीवपक्षे बाधकोक्तिरिति।

प्रकाशः

आद्य इति। "अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात्" इत्यत्र भाष्यादावविदितत्वान्तरत्वयोरुक्तेरिति भावः। 'द्वितीये' "न च स्मार्तमतद्धर्माभिलापात्" इत्यत्र भाष्ये त्रिगुणत्वोपादानत्वादिप्रधानधर्मोक्त्यभावात्कापिलस्मृतौ पृथिव्याद्यात्मकतयोक्तप्रधानं नान्तर्यामीत्युक्त्या संसारित्वादितद्धर्माभिलापाभावात् जीवोऽपि नेति लब्धत्वात् 'प्रधानजीव' इत्युक्तम्। जीवपदाभावात् कथमेतदित्यत आह—**तृतीयेति।** एतेन जीवपक्षे साधकं नेत्यनुक्त्वा कथं बाधकोक्त्यवसर इति प्रत्युक्तम्। एतेन "यज्जीवोऽन्तर्यामीत्युक्तम्, तदपि संसारित्वाद्यतद्धर्माभिलापादिना निरस्तमपि विशेषयुक्त्या पराकुर्वत्सूत्रं" इति टीकोक्तं सूत्रारूढं दर्शितम्। 'अतद्धर्माभिलापात्' इत्यत्र समासनिर्वाहस्तु "नानुमानमतच्छब्दात्" इत्यत्र करिष्यत इति भावः। **तृतीय इति।** "शारीरश्चोभयेऽपि हि भेदेनैनमधीयते" इत्यत्र "आत्मनोऽन्तरः" इति माध्यन्दिनाः "विज्ञानादन्तरः" इति काण्वाश्च जीवं विज्ञानादन्तर्यामिणो भेदेनाधीयत इति शारीरो नान्तर्यामीति भेदाध्ययनरूपबाधकोक्तिरित्यर्थः। यद्यपि चकारात् "यस्तेजसि तिष्ठन्" इत्यादिना श्रीभूदुर्गारूपायाश्चि-

चान्द्रिका

अत्र यद्यपि

आत्मा विज्ञानमिति च सर्वजीवाभिमानवान् ।

ब्रह्मैवोक्तः.................................. ॥

इति बृहदारण्यकभाष्ये आत्मादिशब्दश्चतुर्मुखपर इत्युक्तम् । तथाऽपि पूर्वपक्षे "य आत्मनि" इत्यादावात्मादिशब्दस्याऽऽत्माभिमानिपरत्वे "यः पृथिव्यां" इत्यादौ पृथिव्यादिशब्दस्यापि तदभिमानिपरत्वापातेन "यः पृथिव्यां" इत्यादेरेव भेदाध्ययनत्वप्रसङ्गात्, पूर्ववादिना पृथिव्यादिशब्दानां जडपरता, आत्मविज्ञानशब्दयोस्तु शारीरपरता वाच्येत्यभिप्रेत्य तं प्रति "य आत्मनि"

प्रकाशः

त्प्रकृतेरपि भेदेनाधीतत्वात् न चित्प्रकृतिरन्तर्यामीत्यभिप्राय इति तत्त्वप्रदीपरीत्या चित्प्रकृतिपक्षेऽपि बाधकोक्तिपरत्वं भाति, तथाऽपि टीकारीत्यैवमुक्तिः । एतद्भाष्यस्य भाष्यान्तरविरोधं वा, अन्यत्रोक्तार्थे जीवान्तर्यामिभेदाध्ययनासिद्धिं वा, अर्थद्वयोक्तेर्वैयर्थ्यं वा हृदि कृत्वा तदनूद्य निराह—अत्र **यद्यपीति** । **पृथिव्यादिशब्दस्यापीति** । अन्यथा प्रायपाठविरोधादिति भावः । अभिमानिपरत्वे को दोष इत्यत आह—**य इति** । पृथिव्यादिशब्दानामभिमानिचेतनपरत्वे 'यः' इत्यनेन तदन्यस्य ग्रहणात् "एष त आत्माऽन्तर्यामी" इति पृथिव्याद्यभिमानिचेतनभिन्नस्यान्तर्यामितापत्त्याऽभिमानिजीव एवान्तर्यामीति पक्षो न स्यादिति जडपरता वाच्ये-

चन्द्रिका

इत्यादेः शारीरभेदे प्रमाणत्वोक्तिः। यद्वा—जीवाभिमानिनश्चतुर्मुखादपि तन्नियामकत्वादिना भिन्नस्यान्तर्यामिणः किमु वक्तव्यं तद्भिमन्यमानजीवेभ्यो भिन्नत्वमित्यभिप्रेत्य तदुक्तिः। यद्वा—"यः पृथिव्यां" इत्यादौ तत्तदभिमानिन एव तत्तदन्तर्यामित्वमिति वदता पूर्ववादिना "य आत्मनि" इत्यत्रापि जीवात्माभिमानिन एव तदन्तर्यामित्वं वाच्यम्। तच्चायुक्तं, "आत्मा विज्ञानं" इति स्मृत्या, अभिमानिप्रायपाठेन, अभिमान्यधिकरणन्यायेन च जीवाभिमानिन एव आत्मशब्दार्थत्वात्, अन्तर्यामिणश्च "य आत्मनि"

प्रकाशः

त्यर्थः। भाष्ये आत्मादिशब्दस्य सर्वजीवार्थत्वोक्तेः कृत्यमुक्त्वा, अन्यत्र चतुर्मुखपरत्वोक्तेः फलमाह—यद्वेति। 'तदुक्तिः' चतुर्मुखपरत्वोक्तिः। तथा चात्मविज्ञानशब्दयोः चतुर्मुखपरत्वमेव, न शारीरार्थकत्वम्। अत्र भाष्ये शारीरार्थकत्वस्य प्रदर्शनं तु कैमुत्यलब्धस्य, न तु शब्दार्थत्वेन प्राप्तस्येत्यर्थः। ननु पृथिव्याद्यभिमानिजीवानामन्तर्यामित्वे शङ्किते तेषामेवान्तर्यामिणा भेदस्य आदौ वाच्यत्वेनावश्यवाच्यस्य साक्षादवचनं, अनुपयुक्तं चतुर्मुखस्य तत्कथनं तु साक्षादित्ययुक्तमित्यतश्चतुर्मुखपरत्वमेवावश्यं वाच्यमिति भावेन तदुक्तिं साधयति—यद्वेति। स्मृत्येति। प्रागुक्तयेत्यर्थः। अभिमानीति। पृथिव्याद्यभिमानिप्रायपाठेनेत्यर्थः। अभिमान्यधिकरणेति। तत्र अभिमन्यमानशब्दानां अभिमानिनि मुख्यत्वोक्तेरिति भावः। ननु एवं

चन्द्रिका

इत्यादिना ततो भिन्नत्वेनाधीतत्वादित्यभिप्रेत्य तदुक्तिः । "यः पृथिव्यां तिष्ठन्" इत्यादिकं पृथिव्याद्यभिमानिभ्यो भेदेनाध्ययनं तु न्यायतौल्येनोक्तप्रायत्वान्न पृथगुक्तम् । श्रुतौ "यः पृथिव्यां तिष्ठन्" इत्यादिः प्राथम्येऽपि भाष्ये "य आत्मनि तिष्ठन्, यो विज्ञाने तिष्ठन्" इति वाक्ययोरुपादानं तु तयोरैकार्थ्यं, तत्र चेतनपरत्वस्योभयवादिसम्मतत्वं च दर्शयितुम् । यद्यप्यन्तरशब्दस्य बृहदारण्यकभाष्ये बाह्यापेक्षां विना रमणादिरर्थ इत्युक्तम्, अत्रापि च भाष्येऽन्तरत्वं आद्यसूत्रस्थतद्धर्मशब्दस्यार्थ इत्युक्तम् । भेदेनाध्ययनं तु "य आत्मनि तिष्ठन् यस्यात्मा शरीरं य आत्मानं यमयत्येष त आत्मा" इत्यादिभेदकाध्ययनात् सिध्यति ।

प्रकाशः

पृथिव्यादिशब्दानामप्यभिमानिपरत्वात्तत्राप्यभिमानिनोऽन्तर्यामिणो भेदोक्तिसम्भवेन भाष्ये "य आत्मनि" इत्यादि विशिष्य प्रदर्शनमयुक्तमित्यत आह—**यः पृथिव्यामिति** । प्रथमातिक्रमे हेतुमाह—**श्रुताविति** । टीकायां "आत्मनस्सकाशादन्तरो विविक्तः" इत्युक्तं, तदाचार्यसूक्तिविरुद्धमित्याशङ्क्य समाधत्ते—**यद्यपीति** ।

बाह्यापेक्षां विना यस्तु रमते सोऽन्तरः स्मृतः ।
अतिप्रियत्वाच्च हरेरन्तरत्वमुदाहृतम् ॥

इत्यनेनेत्यर्थः । भेदोक्त्यर्थमर्थान्तरमेतत्किं नेति भ्रमं निराह—**भेदेनेति** । **भेदकेति** । सप्तमीषष्ठ्यादिरूपभिन्नविभक्तिनिर्देशरूपेत्यर्थः ।

चन्द्रिका

न च "एष त आत्मा" इत्यत्राऽऽत्मशब्दः स्वरूपार्थः, 'ते' इति षष्ठ्या औपचारिकत्वापातात्। शरीरशब्दसन्निधानेनात्मशब्दस्य शरीरप्रातिसम्बन्धिपरत्वाच्च। अत एव भाष्ये "य आत्मनि" इत्याद्यप्युदाहृतम्। तथाऽपि टीकायां साक्षादेव भेदाध्ययनसिद्ध्यर्थं "य आत्मनोऽन्तरः" इत्यत्रत्यान्तरशब्दस्य विविक्तत्वमर्थः। बृहदारण्यकभाष्यं तु "य आत्मानमन्तरः" इत्यत्रत्यान्तरशब्दविषयम्। अत एव श्रुतौ न पुनरुक्तिः, "य आत्मनोऽन्तरः, यो विज्ञानादन्तरः, योऽद्भ्योऽन्तरः" इत्यादौ पञ्चम्युपपत्तिश्च। "—"यं पृथिवी न वेद यः पृथिव्या अन्तरः" इत्यादिना" इत्याद्यसूत्रीयभाष्ये तु प्रतीकमुखेन "पृथिवीमन्तरः" इति वाक्यमुपात्तमित्यभिप्रेत्य "अन्तरो विविक्तः" इत्युक्तम्॥

प्रकाशः

भेदकत्वं साधयति—**न चेति**। 'टीकयां' इत्यस्य 'इत्युक्तं' इत्यन्वयः *। **पञ्चमीति**। "आपादाने पञ्चमी" इति प्रकरणे "अन्याराादितरर्तेदिक्छब्दाञ्चूत्तरपदाजाहियुक्ते" इति 'अन्य' इत्यर्थग्रहणेन पञ्चमीविधानात्, बाह्यानपेक्षरमणार्थत्वे 'पृथिव्याः' इत्यस्य वैयर्थ्यं च स्यादिति भावः। तर्हि भाष्ये"—"यं पृथिवी न वेद यः पृथिव्या अन्तरः" इत्यादिनाऽधिदैवादिषु तद्धर्मव्यपदेशात्" इत्युक्तिः कथमित्यत आह—**यमिति**। अविदितत्वस्योक्त्यर्थं 'यं' इत्यादेरवश्यवाच्यत्वात्तन्मुखेन "यः पृथिवीमन्तरः" इत्येवाभिप्रेत-

* 'इत्यनेनान्वयः' इति च पाठान्तरम्.

चन्द्रिका

अन्ये तु–शरीरादिराहित्यात् ब्रह्मणो न नियन्तृत्वं पटवदिति प्राप्ते, शरीरादिराहित्यमसिद्धं, चैत्रकर्मनिर्मितस्य चैत्रशरीरत्ववत् ब्रह्मविषयकाविद्याकल्पितस्य जगतस्तच्छरीरत्वादिति सिद्धान्तः ।

प्रकाशः

मित्यर्थः । अत एव टीकायां वाक्यशेषमनुपादायाद्यसूत्रे 'पृथिव्याद्यविदितत्वान्तरत्वाख्यधर्मव्यपदेशात्' इति सामान्येनोक्तमिति भावः ॥

अन्ये त्विति। अत्रान्तर्यामी किं प्रधानमुत पृथिव्याद्यभिमानिदेवता, किं प्राप्ताणिमाद्यैश्वर्यः कश्चिद्योगी जीवः, अथ परमात्मेत्यादि भाष्ये प्रदर्शितम् । भामत्यां तु अचेतनस्य प्रधानस्य द्रष्टृत्वश्रोतृत्वविज्ञातृत्वादीनां, "एष त आत्मा" इत्युक्तात्मत्वस्य चायोगात्, पृथिव्याद्यभिमानिनो देवस्य प्रतिनियतनियमनात् "यः सर्वान् लोकानन्तरो यमयति यस्सर्वाणि भूतान्यन्तरो यमयति" इत्युक्तसर्वलोकभूतनियमनायोगात्, योगिजीवस्य च "जगद्व्यापारवर्जं" इति वक्ष्यमाणन्यायेन ज्ञानिनो नियमनादिव्यापाराभावात् न प्रधानाभिमानिदेवयोगिजीवानामत्र सन्देहविषयता । किन्तु जीवमात्रं वा परमात्मा वेति सन्देहे जीवमात्रमेव, लोके चेतनस्य शरीरिणः स्वशरीरेन्द्रियादौ शरीरेण पास्यादौ नियमनादिकार्योपलम्भात् । जीवस्य च शरीरेन्द्रियादिमत्त्वाद्द्रष्टृत्वादिसम्भवाच्च । अदृष्टादिद्वारा सर्वलोकादिनियन्तृत्वोपपत्तेश्च । 'यः' इत्येकवचनस्य च जात्यभिप्रायत्वात् । न च जीवस्याप्यन्यो नियन्ताऽऽवश्यक इति वाच्यं, तस्याप्यन्यः तस्या-

चन्द्रिका

तदुक्तं भामत्यां—

देहेन्द्रियादिनियमे नास्य देहेन्द्रियान्तरम् ।
तत्कर्मोपार्जितं तच्चेत्तदविद्यार्जितं जगत् ॥

प्रकाशः

प्यन्य इत्यनवस्थापत्तेः। उक्तं च—

स्वकर्मोपार्जितं देहं तेनान्यच्च नियच्छति ।
तस्मादिरशरीरस्तु नात्मान्तर्यामितां भजेत् ॥

इति। एवं प्राप्ते सर्वस्य विकारजातस्य तदविद्याशक्तिपरिणामत्वात्तस्य च चैत्रकर्मनिर्मितस्य चैत्रशरीरादित्ववत् ब्रह्मणः शरीरेन्द्रियादिस्थानत्वात् यथायथं पृथिव्यादिकार्यकारणैस्तानेवपृथिव्यादिदेवान् शक्नोति नियन्तुमिति अधिदैवादिषु उक्तोऽन्तर्यामी ब्रह्मैव, आत्मत्वामृतत्वादिधर्माणां व्यपदेशात्। न चानवस्था, "नान्योऽतोऽस्ति द्रष्टा" इत्यादिश्रुत्या नियन्तृब्रह्मणो नियम्यजीवात् भेदानभ्युपगमात्। अविद्याकल्पितजीवपरमात्मभेदाश्रयास्तु ज्ञातृज्ञेयभेदश्रुतय इति सिद्धान्त इत्यर्थः। **देहेन्द्रियादीति**। किमिदमशरीरत्वं, यतो नियन्तृत्वाभाव उच्यते। नियम्यातिरिक्तदेहराहित्यं वा, देहसम्बन्धाभावो वा। नाद्यः, अस्य जीवस्य स्वदेहादिनियमने कार्ये न देहान्तरमस्तीति व्यभिचार इत्यर्थः। द्वितीयं शङ्कते—**तत्कर्मेति**। जीवे स्वकर्मार्जितदेहसम्बन्धोऽस्तीति चेत्, परस्यापि देहासम्बन्धोऽसिद्ध इत्याह—**तदविद्येति**।

चन्द्रिका

इतीत्याहुः । तन्न, तदविद्याकल्पितस्य तच्छरीरत्वे ब्रह्मवत् स्वतश्शरीरशून्यशुक्तिस्थाण्वाद्यज्ञानकल्पितस्य रूप्यदेहादेः शुक्तिस्थाण्वादिशरीरत्वापातात् । ब्रह्मणः स्वाविद्याकल्पितेनास्मदादिसंसारेण संसारित्वापाताच्च । जगदार्जनात् प्रागशरीरस्यैव स्रष्टृत्ववत् नियन्तृत्वस्याप्युपपत्तेश्च । न चाशरीरस्यानियन्तृत्वे शङ्किते गौणशरीरोपपादनं युक्तम् । किञ्च शुद्धं न नियन्तृ, अशुद्धं त्वविद्याकल्पितत्वान्नाविद्याविषयः ।

प्रकाशः

तद्विषयत्वादविद्यायाः तदविद्यात्वम् । पूर्वपक्षभागस्य प्रागेव अस्मदीयपूर्वपक्षेषु दूषितत्वात्, अतिप्रसङ्गापादनेन सिद्धान्तांशं निराह—**तन्नेति**। **रूप्यदेहादेरिति**। यथाक्रममन्वयः। नन्वगत्या स्रष्टृत्वाङ्गीकारेऽपि न नियमनं तथा वाच्यमित्यत आह—**न चेति**। अस्तु वा तदज्ञानकल्पितं तच्छरीर मिति, तथाऽपि किं शुद्धस्येदं शरीरमुत विशिष्टस्येति विकल्प्य क्रमेण निराह—**किञ्चेति**। शुद्धस्य नियन्तृत्वमेव नास्ति, निर्विकारत्वात्तस्य शरीराद्युपपादनक्लेशो व्यर्थः। विशिष्टं तु नियामकं भवति, तस्याविद्याविषयत्वाभावान्न तदीयत्वमविद्याया इति न तदविद्यार्जितं जगदिति न तच्छरीरत्वम्। उक्तं च—

आश्रयत्वविषयत्वभागिनी निर्विशेषचितिरेव केवला ।
पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नापि गोचरः ॥

चन्द्रिका

यच्चोक्तं—देहादिनियन्तुरपि जीवस्य भिन्ननियन्तृनियम्यत्वे तन्नियन्तुरीश्वरस्यापि भिन्ननियन्तृनियम्यत्वेनानवस्थापातात् नियन्तृ ब्रह्म नियम्यजीवाभिन्नमिति, तन्न, अभेदे सुतरां नियन्तृत्वायोगात्। श्रुतिसूत्रयोर्भेदोक्त्ययोगाच्च। काल्पनिकभेदेन नियन्तृत्वादिकं युक्तमिति चेत्, तर्हि यथा देहादिनियन्तुर्जीवस्य व्यावहारिकभेदवानीशो नियन्ता, तथेशस्यापि व्यावहारिकभेदवानन्यो नियन्ता स्यादिति व्यावहारिकनियन्तृपरम्परया अनवस्था स्यात्। अथ "न वैशेष्यात्" इत्युक्तन्यायेन ईशस्य स्वातन्त्र्यादिविशेषान्न नियन्त्रन्तरं, तर्ह्यनवस्थापरिहारो नाभेदेन, किन्तु स्वातन्त्र्येणेति सत्यभेद एवास्तु। किञ्चानवस्थातो बिभ्यता शरीरजीवयोरैक्यं स्वीकार्यम्। प्रमाणविरोधश्च जीवपरयोरैक्येऽपि "भेदेनैनमधीयते" इति सूत्र एवोक्तः।

प्रकाशः

इति। अनवस्थाशङ्कापरिहारौ च भाष्योक्तावनूद्य निराह—**यच्चेति**। प्रतिबन्दीमापादयन् अनवस्थापरिहारं प्रकारान्तरेण तेनैव वाचयति—**तर्हीति**। 'उक्तन्यायेन' "सर्वत्र" इत्यधिकरणसूत्रेणोक्तन्यायेनेत्यर्थः। **किञ्चेति**। कियन्तं दूरं गत्वा अभेदाश्रयणेन किमित्यर्थः। ननु देहभेदे तस्य नाशे अस्यापि नाशेन स्वर्गाद्युद्देशेन धर्माधर्मादिविधायकप्रमाणविरोधोऽनुभवविरोधश्चेत्यत आह—**प्रमाणविरोधश्चेति**। अनवस्थानिरासाय नियन्तुर्नियम्याभेदे अङ्गीक्रियमाणे कार्यस्याप्यभिन्नकारणजन्यत्वं स्यादन्यथोक्तदोषादिति जडाभेदोऽ-

चन्द्रिका

किञ्चैवं सति स्वकार्यं प्रति कारणस्यापि पृथिव्यादिकस्य ब्रह्मकार्यत्वे ब्रह्मणोऽप्यन्यकार्यत्वमित्यनवस्थापरिहाराय पृथिवीब्रह्मणोरभेदः स्यात् । प्रमाणविरोधस्तु जीवपरयोरैक्येऽपि सम इत्युक्तम् । यच्चोक्तं—एकस्मिन् शरीरे प्रत्यग्द्वयं नेति, तन्न, मां प्रति दृष्टान्ताभावात् । ग्रहाद्याविष्टशरीरेऽहमर्थरूपप्रत्यग्द्वयदर्शनाच्च । "हन्तास्माच्छरीरादुत्क्रामाम तद्यस्मिन् उत्क्रान्ते" "हन्तेदं पुनश्शरीरं प्रविशाम तद्यस्मिन् नः प्रपन्ने" इत्यादावेकैकस्मिन् शरीरे चक्षुराद्यभिमान्यनेकाहमर्थश्रवणाच्च ।

प्रकाशः

प्युपेयः स्यादित्याह—**किञ्चैवं सतीति** । ननु "यः पृथिव्यां तिष्ठन्" इत्यादिभेदोक्तिर्विरुध्यत इत्यत आह—**प्रमाणेति** । उपलक्षणमिदम्, पृथिव्यादेः स्वव्यतिरिक्तज्ञानप्रकाश्यत्वे ज्ञानस्यापि स्वव्यतिरिक्तज्ञानापेक्षत्वेनानवस्थाप्रसङ्गात्, तन्निरासाय ज्ञानजडयोरभेदः स्यात् । ज्ञानस्य स्वप्रकाशत्वे नियन्तुः स्वातन्त्र्यस्तु । एवं पृथिव्यादेस्स्वव्यतिरिक्तेन धारणे तत्रापि तथेत्यनवस्थेत्यपि ध्येयम् । ननु नानवस्थानिरासाय नियन्त्रभेदः, अपि तु प्रत्यक्चैतन्यद्वयायोगात् उभयोरभेद इत्येतदनूद्य निराह—**यच्चेति । मां प्रतीति** । जीवेशभेदवादे प्रतिशरीरं तयोः सत्त्वादिति भावः । **अनेकाहमर्थेति** । बहुवचनप्रयोगादिति भावः । ननु तत्र प्रत्यक्त्वमेव सत्यं, भेदो मिथ्येति चेत्, भेदस्सत्यः प्रत्यक्त्वं मिथ्येति किं न स्यात् ।

चन्द्रिका

बाधकाभावाच्च। अन्तर्याम्युक्त्यनन्तरं "नान्योऽतोऽस्ति द्रष्टा" इति द्रष्ट्रन्तरनिषेधो बाधक इति त्वन्यत्र निरस्तम्। अत्र यदुक्तं विवरणे—"यो विज्ञाने तिष्ठन्" इत्यादौ ब्रह्मणो जीवावच्छेदेषु नियन्तृत्वेनावस्थानं श्रूयते। तच्च यद्यप्यवच्छेदपक्षे न युक्तं, घटावच्छिन्नाकाशप्रदेशे बाह्याकाशस्यादर्शनेन द्विगुणीकृत्य वृत्त्यनुपपत्तेः, जीवप्रदेशे ब्रह्मणोऽवस्थानायोगात्। तथाऽपि प्रतिबिम्बपक्षे युक्तं,

प्रकाशः

प्रत्यक्षे बाधकं नेति चेत्, तुल्यं भेदेऽपीत्याह—**बाधकेति**। अतः-शब्दपरामर्शं दर्शयितुं, 'अन्तर्याम्युक्त्यनन्तरं' इत्युक्तम्। 'अन्यत्र' न्यायामृते द्वितीयपरिच्छेदे "अहं ब्रह्मास्मि" इत्यादिश्रुत्यर्थवर्णनप्रस्तावे। तत्र 'अतः' इत्यनेन प्रस्तुतसर्वनियन्तारं परामृश्य अन्यो द्रष्टा नास्तीत्युक्ते 'अस्मिन् ग्रामे अयमेव सर्वनियामको नान्यः पुरुषोऽस्ति' इत्यादावन्यशब्दस्य प्रस्तुतसदृशपरतया व्युत्पन्नत्वेन, इहापि सर्वनियामकद्रष्ट्रन्तरनिषेधात्, भेदनिषेधाभावादिति निरस्तमित्यर्थः। "नेह नाना" इत्यादिकमप्यन्यत्र प्रथमपरिच्छेदे निरस्तमिति भावः। विवरणे अवच्छेदपक्षे अन्तर्याम्यवस्थानं न युक्तं, प्रतिबिम्बपक्ष एव युक्तमित्युक्तं, तदयुक्तं, पक्षद्वयेऽप्ययोगादिति दूषयितुमनुवदति—**अत्रेति**। **अवच्छेदेति**। अविद्यावच्छिन्नो जीवस्तत्र प्रतिबिम्बितो वा जीव इति मतद्वयम्। अत्राद्य इत्यर्थः। कुत इत्यत आह—**घटेति**।

चन्द्रिका

जलगतस्वाभाविकाकाशे सत्येव प्रतिबिम्बाकाशदर्शनेन द्विगुणीकृत्य वृत्त्युपपत्तेरिति, तत्र ब्रूमः—

घटाकाशे यथा बाह्याकाशं नैवोपलभ्यते ।
तथैव प्रतिबिम्बेऽपि बिम्बाकाशं न दृश्यते ॥

यथा घटस्यान्तः आकाशमात्रेऽवच्छिन्नाकाशे च सत्यपि बाह्याकाशं नास्ति, तथा जलस्यान्तराकाशमात्रे प्रतिबिम्बाकाशे च सत्यपि बिम्बाकाशं नास्त्येव । ननु तथाऽपि जलस्यान्तरुक्तमाकाशद्वयं जलावच्छिन्नाकाशं चेति तत्त्रयमस्ति, घटस्यान्तस्तूक्ताकाशद्वयमेवेति वैषम्यमिति चेन्न, यस्याकाशादेर्जलेनावच्छेदः तत्र प्रतिबिम्बनं च तत्र त्रितयसद्भावेऽपि, यस्य प्रतिबिम्बनमात्रं दर्पणादौ मुखादेः, तत्र त्रितयाभावेन प्रतिबिम्बपक्षपातायोगात् ।

प्रकाशः

युक्ततामाह—**जलेति** । अवच्छेदपक्षे यथा युक्तता, तथा प्रतिबिम्बपक्षेऽपीति परोक्तं दृष्टान्तीकृत्याह—**घटेति** । श्लोकं व्याचष्टे—**यथेति** । **नास्त्येवेति** । तथा च बिम्बरूपत्वादन्तर्यामिणः तत्र नावस्थानमिति भावः । प्रतिबिम्बपक्षे अवच्छेदवैलक्षण्यमाशङ्कते—**नन्विति** । **उक्तमिति** । बिम्बप्रतिबिम्बत्वरहितमाकाशमात्रं प्रतिबिम्बाकाशं चेति द्वयमित्यर्थः । **द्वयमेवेति** । आकाशमात्रमवच्छिन्नं चेति द्वयं, न तु प्रतिबिम्बाकाशमित्यर्थः । तस्यास्वच्छतया प्रतिबिम्बनानुपाधित्वादिति भावः । **त्रितयाभावेनेति** । तथा च ब्रह्मणोऽविद्यायां

चन्द्रिका

ननु तर्हि ब्रह्मणोऽविद्ययाऽवच्छेदस्तत्र प्रतिबिम्बनं चेति द्वयमप्यस्त्विति चेन्न, यत्र द्वयं, तत्र यद्यपि जलान्तर्जलावच्छिन्नाकाशे सत्येव पुनराकाशमात्रं प्रतिबिम्बाकाशं चास्ति, तथाऽपि जलान्तर्बाह्याकाशस्य बिम्बाकाशस्य चाभावेन तत्स्थानीयस्य ब्रह्मणो जीवप्रदेशे नियन्तृत्वेनावस्थानायोगात्। आकाशमात्रस्थानीयस्य चिन्मात्रस्य त्वन्मते अनियन्तृत्वात्। तस्मादवच्छेदप्रतिबिम्बनयोर्विकल्पे समुच्चये वा ब्रह्मणोऽन्तर्यामित्वायोगः।

प्रकाशः

प्रतिबिम्बितमात्रत्वेन, तत्र चिन्मात्रस्य प्रतिबिम्बितस्य च घटादावाकाशद्वयस्येव, दर्पणादौ मुखमात्रप्रतिबिम्बमुखरूपद्वयस्येव भावेऽपि, त्रितयाभावेनावच्छेदपक्षत्यागेन प्रतिबिम्बपक्षस्वीकारायोगादित्यर्थः। ननु सत्यं, यत्रैकस्यावच्छेदः प्रतिबिम्बनं च, तत्र सामान्यं प्रतिबिम्बितमवच्छिन्नं चेति त्रितयमन्यत्र द्वयमिति। तथाऽपि प्रकृते तथाऽस्त्विति शङ्कते—नन्विति। किमेतावता एकस्मिन्नेव देहे अवच्छिन्नं प्रतिबिम्बितं चिन्मात्रं चेति ब्रह्मत्रयसिद्धावपि तत्रावच्छिन्नं वा प्रतिबिम्बितं वा नान्तर्यामि, तस्य नियम्यरूपजीवत्वात्। अथ तत्रत्यं चिन्मात्रं वा, सार्वज्ञ्याद्युपेतं बिम्बभूतं ब्रह्म वा तथेति वाच्यमिति भावेन, अन्त्ये दोषमाह—**यत्रेति**। 'द्वयं' अवच्छिन्नं प्रतिबिम्बितं चेत्यर्थः। आद्ये दोषमाह—**आकाशमात्रेति**। **विकल्प इति**। घटादावाकाशस्येवावच्छेदमात्रं न प्रतिबिम्बनं,

चन्द्रिका

किञ्चावच्छेदोपाधौ घटादौ अवच्छिन्नाकाशव्यतिरेकेणाकाशव्यक्त्यन्तरं, प्रतिबिम्बनोपाधौ दर्पणादौ च प्रतिबिम्बव्यतिरेकेण मुख्यव्यक्त्यन्तरं नास्तीत्यन्यत्रोक्तम् । यच्चोक्तमुभाभ्यां—आद्यसूत्रे अधिदैवादिषु योऽन्तर्यामी स परमात्मेत्यन्वय इति, तन्न, तथात्वे 'अधिदैवादिषु' इत्यस्य वैयर्थ्यात् ।

प्रकाशः

दर्पणादौ मुखस्येव ब्रह्मणोऽविद्यायां प्रतिबिम्बनमात्रं न त्ववच्छेद इति विकल्पपक्षे, जलादिविकस्याकाशस्येव ब्रह्मण एकस्मिन् देहे अविद्ययाऽवच्छेदः प्रतिबिम्बनं चेति समुच्चयपक्षे चेत्यर्थः । पक्षद्वयेऽप्यन्तर्यामिभूतस्य तत्राभावादिति भावः । नन्ववच्छेदपक्षे प्रतिबिम्बनपक्षे च यच्चिन्मात्रमाकाशस्थानीयं तदेवागत्या नियन्तृ स्यादिति कश्चिद्ब्रूयात्तं प्रत्याह—किञ्चेति । 'अन्यत्र' न्यायामृते । एवमधिकरणप्रमेयं परमते निरस्य, मायिमते रामानुजमते च सूत्राक्षरार्थानुपपत्तिमाह—यच्चेति । केषाञ्चिदधिकरणशरीरं परमतादनतिभिन्नत्वान्न पृथग्दूषितम् । तथा हि—प्रधानस्य वाक्यशेषोक्तद्रष्टृत्वाद्ययोगेन शङ्कितुमयोग्यत्वात्, अयमन्तर्यामी ऐश्वर्ययोगविशेषनिमित्तप्रकृष्टादृष्टवान् जीवविशेषः परमात्मा वेति सन्देहे, वाक्यशेषे "द्रष्टा श्रोता मन्ता" इति करणजन्यदर्शनश्रवणमननादिरूपज्ञानवत्त्वश्रवणात् तस्य च जीव एव सम्भवात् द्रष्टृत्वादेः करणजन्यज्ञानपरत्वमनङ्गीकृत्य रूपादिसाक्षात्कारमात्रपरत्वेऽ-

प्रकाश

ङ्गीक्रियमाणे रूपादिसाक्षात्कारस्य जीवपरयोः स्साधारण्येन अस्मिन् प्रकरणे "नान्योऽतोऽस्ति द्रष्टा" इति द्रष्ट्रन्तरनिषेधायोगात् करणायत्तज्ञानपरत्वात्, जीवस्यैतादृशद्रष्टृत्वेन निषेधायोगात्तद्बलेन "आत्मनि तिष्ठन् आत्मनोऽन्तरो यमात्मा न वेद" इत्यात्मस्थित्यन्तरत्वाविदितत्वनियन्तृत्वादेः कथञ्चिन्नेयत्वात् जीवविशेष एवान्तर्यामीति प्राप्ते, "यः पृथिव्यां तिष्ठन्" इत्यादिषु पृथिव्यादिसर्वभूतान्तःप्रवेशसर्वनियमनसर्वशरीरकत्वादितद्धर्मोपदेशात् परमात्मैव। "द्रष्टा" इत्यादिवाक्यशेषस्तु रूपादिसाक्षात्कारमात्रपरो न करणायत्तज्ञानपरः। स च "पश्यत्यचक्षुः स शृणोत्यकर्णः" इत्यादिना परस्यैव। "नान्योऽतोऽस्ति" इति द्रष्ट्रन्तरनिषेधस्तु स्वातन्त्र्येण द्रष्ट्रन्तरनिषेधपर इति सिद्धान्त इति। अत्र प्रधानपूर्वपक्षस्य प्रागेव समर्थनेन तत्त्यागोऽयुक्तः। अन्यथा "न च स्मार्तं" इति प्रधानप्रत्याख्यानायोगः। यदत्रोक्तं श्रुतप्रकाशे—"न च स्मार्तं" इति दृष्टान्ततयैवोपन्यस्तो न प्राधान्येन, अत एव "न च स्मार्तमतद्धर्माभिलापाच्छारीरश्च" इत्येवमन्तमेकं सूत्रमिति, तन्न, दृष्टान्तत्वद्योतकाभावात्। अन्यथा "नानुमानमतच्छब्दात्" "प्राणभृच्च" इत्यादावपि तथात्वापत्तिः। दृष्टान्तोपादानस्य वैयर्थ्याच्च। 'न च शारीरः स्मार्तवत्' इत्यादिविन्यासापाताच्च। प्रधानशङ्कानुदयादेवं कल्पनमिति

चान्द्रिका

विषयवाक्यसूचनस्यान्तर्यामिपदेनैव सिद्धेः। अन्यथा "अन्तस्तद्धर्म" इत्यादावादित्यादिष्वन्तरिति साध्यं निर्दिश्येत। तस्मादधिदैवादिप्रकरणेषु तद्धर्मव्यपदेशादिति यथाश्रुत एवान्वयः। वरं हि वैयर्थ्यादपि लक्षणा। एवं हि न केवलं तद्धर्मव्यपदेशमात्रं, किन्तु तस्याभ्यासोऽप्यस्तीति सूचितम्। यच्च द्वितीयसूत्रे तद्धर्माभिलापो नाम प्रधानधर्मविरुद्धधर्माभिलाप इत्युक्तं, तन्न,

प्रकाशः

चेन्न, तच्छङ्कोदयस्य मूल एवोक्तत्वात्। 'शारीरश्च' इति चशब्दास्वारस्याच्च। अस्यापि जीवमात्रनिरासपरत्वे योगविभागायोगेन "अतद्धर्माभिलापाच्छारीरश्चोभयेऽपि हि भेदेनैनमधीयते" इत्येकवाक्यतयैव विन्यासः स्यादिति। नन्वधिदैवादिचिह्नितेषु वाक्येष्विति विषयसूचनार्थं तदित्युक्तमित्यत आह—**विषयेति**। ननु भवन्मतेऽप्यधिदैवादिप्रकरणेष्विति प्रकरणलक्षकत्वाल्लक्षणादोष इत्यत आह— **वरं हीति**। अत एव "एकादश वै पशोरवादानानि तानि द्विरवद्यति" इति वाक्यवैयर्थ्यपरिहाराय "यद्यपि चतुरवत्ती यजमानः पञ्चावत्तैव वपा कार्या" इत्यत्र वपाशब्दे पाशुकहविर्मात्रलक्षणेति स्वीकृतं मीमांसकैरिति भावः। अत्र सूत्रे एवमपि न वैयर्थ्यानिस्तार इत्यत आह—**एवं हीति**। अत्र 'अधिदैवाधिलोकादिषु' इति पाठः कैश्चित्काल्पित एव न वास्तव इति ध्येयम्। इत्युक्तमिति। उभाभ्यामिति वर्तते।

चन्द्रिका

आद्यसूत्रस्थेन "तद्धर्मव्यपदेशात्" इत्येनेन पुनरुक्तेः। ब्रह्मधर्मो हि प्रधानधर्मविरुद्ध एव। तस्मात्त्रिगुणत्वादिधर्माभिलापाभावादित्येवार्थः। किञ्च—"भेदव्यपदेशात्" "भेदव्यपदेशाच्चान्यः" "सम्भोगप्राप्तिरिति चेन्न वैशेष्यात्" इत्यादिकमतीतं, "शारीरश्चोभयेऽपि हि भेदेनैनमधीयते" इति वर्तमानं, "विशेषणभेदव्यपदेशाभ्यां च नेतरौ" "भेदव्यपदेशात्" इत्यादि चाऽऽगामि भेदप्रतिपादकं,

अद्वैतिभिर्व्याक्रियते कथमद्वैतदूषकम्।
सूत्रजातं स्वसिद्धान्ततया लज्जां विनैव तु॥
यदि मिथ्यार्थवादीनि सूत्राणीत्येव कीर्तनम्।
सूत्रव्याख्या, तर्हि वेदबोध्यमिथ्यात्वबोधकः॥

प्रकाशः

तस्मादिति। अत्र समासोपपत्तिस्तु "अतच्छब्दात्" इत्यत्र वक्ष्यत इति भावः। तृतीयसूत्रं मायिमते अनुपपन्नमिति वदन् प्रसङ्गादतीतानागतभेदसूत्राणि सर्वाण्यप्ययुक्तानीत्याह—**किञ्चेति**। 'भेदप्रतिपादकं' इत्यस्य 'सूत्रजातं' इति श्लोकगतेनान्वयः। 'इत्यादि च' इत्यपि तेनैवान्वेति। का कथंतेत्यत उक्तं—**अद्वैतदूषकमिति**। मिथ्याभेदपरत्वेन अद्वैताविरोधित्वात् का लज्जाप्रसक्तिरित्यत आह—**यदीति**। ननु यथाऽर्थवादानां मिथ्यार्थावलम्बनेन प्राशस्त्ये तात्पर्यात् प्रामाण्यं, तद्वत् सूत्रादीनि सर्वाणि मिथ्यार्थवादीन्यपि तात्त्विकशुद्धचैतन्यतात्पर्यविषयोपेतानि भविष्यन्ति, नैवं बौद्धमत इत्यत आह—

चन्द्रिका

बौद्धागमोऽपि वेदस्य व्याख्यारूपः प्रसज्यते ।
बौद्धोऽपि ब्रह्मसूत्राणि व्याख्यायान्ते भवानिव ॥
मिथ्यैषोऽर्थः किन्तु तत्त्वं शून्यमेवेति कीर्तयेत् ।
असद्वेत्यादिवचनं तस्य स्यात्तत्त्ववेदकम् ॥
अपौरुषेयभावेन प्रयुक्ता च प्रमाणता ।
व्यावहारिकमात्रेण नार्थेन परितुष्यति ॥
असकृच्छ्रुतिभिः सूत्रैर्भेदे यत्नेन साधिते ।
मिथ्यार्थतां कथं ब्रूयात् सूत्राणां भाष्यकृत्स्वयम् ॥
सौगता वेदबाह्या हि वेदाप्रामाण्यवादिनः ।
अवैदिका इति ज्ञात्वा वैदिकैः परिवर्जिताः ॥

प्रकाशः

बौद्धोऽपीति। ननु न तस्य तथा वचने तत्त्वावेदकवचनं मानमस्ति, मम तु अस्ति "सदेव" इत्यादिकमित्यत आह—**असद्वेत्यादीति**। ननु तेन असदर्थकत्वमागमादेरुच्यते, मया तु व्यावहारिकसदर्थकत्वमित्यत आह—**अपौरुषेयेति**। अयुक्तं च मिथ्यार्थकथनमित्याह—**असकृदिति**। तन्मतदूषणस्य फलमाह—**सौगता इति**। 'प्रविश्य' विचार्य। ननु "अस्मायामेधास्रजो विनिः" इति मायावीति भाव्यं, सत्यं, "व्रीह्यादिभ्यश्च" इति इनिप्रत्यये मायीति साधु। **स्पष्ट इति**। उपन्यासमुखेन विवृत इत्यर्थः। एतेन अत्रान्तर्यामी नारायणश्चतुर्मुखो वेति पूर्वपक्षं कृत्वा, अधिदैवादिषु श्रु-

चन्द्रिका

वेदान् प्रविश्य वेदानामप्रामाण्यं प्रसाधयन् ।
मायी तु यत्नतस्त्याज्यो वैदिकैर्हितशत्रुवत् ॥

टीकाक्षरार्थस्तु स्पष्टः ॥

प्रकाशः

यमाणोऽन्तर्यामी शिव एव, सर्वान्तरत्वरूपधर्मस्याथर्वशिरसि "ते देवा रुद्रमपृच्छन्" इति प्रस्तुतरुद्रनिष्ठतया "सोऽन्तरादन्तरं प्राविशत्" इति श्रवणादिति केनचित्प्रलपितं प्रत्युक्तं, सूत्रोपात्तप्रधानपक्षत्यागायोगात् । "दिव्यो देव एको नारायणः" इति मूलोक्तसमाख्याविरोधेन, तत्रतत्र भाष्योदाहृतानेकवचनविरोधेन च शिवान्तर्यामित्वस्य बाधितत्वाच्च । "सोऽन्तरादन्तरं प्राविशत्" इति अथर्वशिरोवाक्येऽपि न शिवस्यान्तर्यामित्वमुच्यते, किन्तु 'सः' इति प्राक् प्रकृतरुद्रान्तर्यामिणं नारायणमेव परामृश्य "अन्तरादन्तरंप्राविशद्दिशश्चैवान्तरा" इति नारायणस्यैवान्तर्यामित्वमुच्यते । "विश प्रवेशने" इतिधातुनिष्पन्नविष्णुशब्दार्थस्य "सर्वा दिशो विष्टोऽस्मि" इत्यैतरेयभाष्योक्तदिशा 'प्राविशत्' इत्यनेन ज्ञापनाच्च । अन्यथा—

अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ।

इत्यादिविरोधापत्तेः । विस्तरस्तु गुरुपादकृतपरतत्त्वप्रकाशिकायां द्रष्टव्यः । सूत्रास्वारस्यं च रामानुजमत इव ज्ञेयम् ॥

इति अन्तर्याम्यधिकरणम्.

— अथ अदृश्यत्वाधिकरणम् —

अदृश्यत्वादिगुणा विष्णोरुक्ताः। तत्र "यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मम् तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः" इत्युक्त्वा,

यथोर्णनाभिस्सृजते गृह्णते च यथा पृथिव्यामोषधयस्सम्भवन्ति।
यथा सतः पुरुषात्केशलोमानि तथाऽक्षरात्सम्भवतीह विश्वम् ॥

तत्त्वप्रकाशिका

अत्राक्षरशब्दसाहित्येनान्यत्रप्रसिद्धादृश्यत्वादिलिङ्गानां ब्रह्मणि समन्वयप्रतिपादनादस्ति शास्त्रादिसङ्गतिः। श्रुत्यादिसङ्गतिं विषयवाक्योदाहरणेन विषयसंशयौ सयुक्तिकं पूर्वपक्षं च सूचयति—अदृश्यत्वादीति। "अदृश्येऽनात्म्ये" इत्यानन्दमयस्यादृश्यत्वादिगुणा उक्ताः। ते चाथर्वणे कस्य चिदक्षरस्योच्यन्ते, "अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुश्श्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः। यथोर्णनाभिस्सृजते गृह्णते च यथा पृथिव्यामोषधयस्सम्भवन्ति। यथा सतः पुरुषात्केशलोमानि तथाऽक्षरात्सम्भवतीह विश्वम्" इति। तेषां च विष्णवन्यानिष्ठत्वे प्रागुक्तानन्दमयत्वं चान्यस्यैव स्यादित्यवश्यं निर्णेतव्यता। तददृश्यत्वादिलिङ्गजातमत्र विषयः। विष्णोरन्यस्य

इत्युक्त्वा तस्माच्च "अक्षरात्परतः परः" इति परः प्रतीयते। अतो ब्रवीति—

ओम् अदृश्यत्वादिगुणको धर्मोक्तेः ओम्॥२१॥

पृथिव्यादिदृष्टान्तमुक्त्वा, "अक्षरात्सम्भवतीह विश्वम्" इत्यतः परं तत्परतः पराभिधानात्, "कूटस्थोऽक्षर उच्यते" इति स्मृतेश्च प्रकृतेः प्राप्तिः।

तत्त्वप्रकाशिका

वेति संदेहः। आनन्दमये श्रुतत्वमक्षरशब्दश्च सन्देहबीजम्। न विष्णोरदृश्यत्वादीति तावत्पूर्वः पक्षः, अदृश्यत्वादिगुणके "अक्षरात्सम्भवतीह विश्वम्" इत्यक्षरशब्दश्रवणात्, तस्य च विष्णौ निरवकाशत्वात्, यतोऽस्मादप्यक्षरादुत्तरवाक्ये परः प्रतीयते,

दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः।
अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः॥

इति। न हि विष्णोरपि परोऽस्तीत्यतो न विष्णुरदृश्यत्वादिगुणक इति नानन्दमयोऽपीति भावः। सिद्धान्तयत्सूत्रं तावदवतारयति—**अत इति।** अदृश्यत्वादिकं न विष्णोश्चेत्तर्हि वाक्यस्य निर्विषयतयाऽप्रामाण्यं स्यादित्यतः पूर्वपक्षं विशदयति—**पृथिव्यादीति।** अदृश्यत्वादिकं जडप्रकृतेः भवेत्, अस्याः पृथिव्यादिदृष्टान्तेनोपादानतया जगत्कारणत्वोक्तेः। न चायं कारणत्वमात्रे दृष्टान्त इति वाच्यम्, इत्यतो वाक्यादनन्तरं "अक्षरात्परतः परः" इति

ब्रह्मशब्दात्तत्परतः पराभिधानादेव च हिरण्यगर्भस्य । "तमेवं विद्वानमृत इह भवति"

तत्कर्म हरितोषं यत्सा विद्या तन्मतिर्यया ।

तत्त्वप्रकाशिका

तस्मात्परतः पराभिधानात् । चेतनप्रकृतेर्वाऽदृश्यत्वादिकम्, तस्यामक्षरशब्दस्य स्मृतिसिद्धत्वात् । न चासौ शब्दः परमात्मन्यपि सम्भवतीति वाच्यम्, तत्परतः पराभिधानात् । तच्च तस्यां 'अक्षरात्परतः परः' इति सामानाधिकरण्येनोपपन्नम् । विकारित्वेन जगत्कारणत्ववचनं तस्या विकाराभिमानित्वाद्युज्यते । हिरण्यगर्भस्य वाऽदृश्यत्वादिकं, "स ब्रह्मविद्यां" इत्यादिब्रह्मशब्दात् । न च ब्रह्मशब्दो विष्णौ मुख्य इति तद्ग्रहणम्, तत्परतः पराभिधानात् । रुद्रस्य वैतददृश्यत्वादिलिङ्गजातम्, "कर्तारमीशं" इतीशाशब्दश्रवणात् । नचेशशब्दो विष्णावपि सम्भवतीति तद्ग्रहः, तत्परतः पराभिधानादेवेति भावः । एवं प्राप्तं पूर्वपक्षं प्रतिक्षेप्तुं सूत्रं व्याचष्टे—**तमेवमिति** । अदृश्यत्वादिगुणको विष्णुरेव, "अथ परा यया तदक्षरमधिगम्यते" इत्यदृश्यत्वादिगुणकस्य परविद्याविषयत्वोक्तेः, परविद्याविषयत्वस्य च श्रुतिस्मृतिभिर्विष्णुधर्मत्वेनावगतत्वादित्यर्थः । "तमेवं" इति श्रुतौ मोक्षसाधनविद्याविषयत्वोक्त्या विष्णोः परविद्याविषयत्वमुक्तं भवति, मोक्षसाधनविद्यायाः परविद्यात्वात् । "तत्कर्म" इति स्मृतौ च सैव परविद्या, यया हरेर्ज्ञानं भवतीति तस्य परविद्याविषयत्वमुच्यते ।

"अथ द्वे वाव विद्ये वेदितव्ये परा चैवापरा च तत्र ये वेदा यान्यङ्गानि यान्युपाङ्गानि यानि प्रत्यङ्गानि साऽपरा। अथ परा यया स हरिर्वेदितव्यो योऽसावदृश्यो निर्गुणः परः परमात्मा" इत्यादिना तद्धर्मत्वेनावगतपरविद्याविषयत्वोक्तेर्विष्णुरेवादृश्यत्वादिगुणकः ॥ २१ ॥

ओम् विशेषणभेदव्यपदेशाभ्यां च नेतरौ ओम् ॥

यस्सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः।

इति विशेषणान्न प्रकृतिः।

तत्त्वप्रकाशिका

"द्वे विद्ये" इत्यत्र च यदा वेदादि अन्यविषयतया योज्येत, तदा तस्यापरविद्यात्वं, यदा पुनरेतैस्स हरिर्वेद्यो भवति, तदा परविद्यात्वमिति हरेः परविद्याविषयत्वमुच्येत। तदुक्तं—

ऋगाद्या अपरा विद्या यदा विष्णोर्न वाचकाः।
ता एव परमा विद्या यदा विष्णोस्तु वाचकाः॥

इति। यदुक्तं प्रकृतिविरञ्चयोरदृश्यत्वादिगुणकत्वमिति, तदर्थान्निराकृतमपि विशेषयुक्त्या पराकुर्वत्सूत्रं पठित्वा व्याचष्टे—**विशेषणेति**। "तपसा चीयते ब्रह्म" इत्यत्राज्ञानप्रतीतौ तन्निरासाय "यस्य ज्ञानमयं तपः" इत्युक्तार्थे हेतुतयाऽदृश्यत्वादिगुणकस्य सार्वज्ञ्यविशेषणोक्तेः नाचेतनप्रकृतेरदृश्यत्वादिगुणकत्वम्।

तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते ॥

इति भेदव्यपदेशान्न विरिञ्चः ।

अपरं त्वक्षरं या सा प्रकृतिर्जडरूपिका ।
श्रीः परा प्रकृतिः प्रोक्ता चेतना विष्णुसंश्रया ॥
तामक्षरं परं प्राहुः परतः परमक्षरम् ।
हरिमेवाखिलगुणमक्षरत्रयमीरितम् ॥

इति स्कान्दे त्र्यक्षराभिधानात् "अक्षरात्परतः" इत्यपि विशेषणमेव ।

तत्त्वप्रकाशिका

तस्मादक्षरादेतद्ब्रह्म चतुर्मुखाख्यं जायत इति विरिञ्चस्य तज्जन्यतया तस्माद्भेदव्यपदेशात् नासावप्यदृश्यत्वादिगुणक इत्यर्थः । ज्ञानवेदनयोः सामान्यविशेषतयाऽर्थान्तरत्वम् । "विद्लृ लाभे विदोत्पत्तौ" इत्यतो वा । न विष्णोरदृश्यत्वादिगुणकत्वम्, परतः पराभिधानेनाक्षरशब्दस्य विष्णौ निरवकाशत्वादित्यतः सूत्रखण्डस्यार्थान्तरमाह— **अपरमिति** । भवेदक्षरश्रुतेः विष्णाववकाशाभावो यदि "अक्षरात्परतः परः" इत्यत्र प्रकृताक्षरमवधीकृत्य कस्य चित्परत्वमुच्येत । नैतदस्ति । किन्तु प्रकृताक्षरस्यैवाक्षरात्परतःपरत्वविशेषणमुच्यते । न चाक्षरस्याक्षरात्परतः परत्वं विरुद्धमिति वाच्यम्, त्र्यक्षराभिधानादक्षरान्तरादस्याक्षरस्य परत्वोपपत्तेरिति भावः । ईशशब्दाददृश्यत्वादि-

"जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः" इति भेदव्यपदेशादीशपदप्राप्तोऽपि न रुद्रः ॥ २२ ॥

ओम् रूपोपन्यासाच्च ओम् ॥ २३ ॥

यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् । इति ।

"एको नारायण आसीन्न ब्रह्मा न च शङ्करः" "स मुनिर्भूत्वा

तत्त्वप्रकाशिका

गुणको रुद्र इत्यस्योत्तरतयाऽपि सूत्रशेषं व्याचष्टे—जुष्टमिति । अस्याक्षरस्य "अन्यमीशं" इति प्रसिद्धेशाद्रुद्राद्भेदव्यपदेशान्न रुद्रोऽदृश्यत्वादिगुणक इत्यर्थः । यदपि पृथिव्यादिदृष्टान्तेन जगत्कारणत्ववचनं तत्कारणत्वमात्रतात्पर्यम् । ब्रह्माक्षरेशशब्दास्तु विष्णावेव मुख्याः, बाधकाभावस्योक्तत्वात् ॥ २२ ॥

युक्त्यन्तरेण विष्णोरेवादृश्यत्वादिगुणकत्वं साधयत्सूत्रमुपन्यस्य तदुपात्तश्रुतिमेवोदाहरति—रूपेति । द्रष्टा जीवो यदा रुक्मवर्णं हिरण्यगर्भकारणं जगत्कर्तारं पश्यति तदाऽसौ विद्वाननिष्टं पुण्यं पापं च विहाय निर्लेपः पूर्णानन्दत्वादिसाम्यं प्राप्नोतीत्यदृश्यत्वादिगुणकस्य रुक्मरूपोपन्यासाच्चासौ विष्णुरेवेत्यर्थः । ननु ब्रह्मादीनामपि रूपसद्भावात्कुतो रूपोपन्यासेनास्य विष्णुत्वनिश्चय इत्यत आह—एक इति ।

समचिन्तयत् तत एते व्यजायन्त। विश्वो हिरण्यगर्भोऽग्निर्यमो वरुणरुद्रेन्द्रा इति। तस्य हैतस्य परमस्य नारायणस्य चत्वारि रूपाणि शुक्लं रक्तं रौक्मं कृष्णमिति। स एतान्येतेभ्योऽभ्यचीक्लृपत् विमिश्राणि व्यमिश्रयत् अत एतादृगेतद्रूपम्" इति तस्यैव हि रूपाण्यभिधीयन्ते ॥ २३ ॥

तत्त्वप्रकाशिका

'विश्वः' वायुः विमिश्राण्येतेभ्योऽभ्यचीक्लृपत्, व्यमिश्रयदितिमानुपादौ विशेषेण मिश्रीचकारेत्यर्थः। स एतानि व्यमिश्रयत्। विमिश्राणि चैतभ्योऽभ्यचीक्लृपदिति वा। "तस्य हैतस्य" इत्यादेरेवात्रोपयुक्तत्वेऽपि "एतान्येतेभ्यः" "इत्यस्यार्थप्रतीत्यर्थमन्यांशोदाहरणम्। तस्माद्विष्णोरेवादृश्यत्वादिगुणकत्वमिति स एवानन्दमय इति सिद्धम् ॥ २३ ॥

चन्द्रिका

॥ ओम् अदृश्यत्वादिगुणको धर्मोक्तेः ओम् ॥

अत्रान्तर्यामिणो ब्रह्मत्वे हेतूकृतस्य "यं पृथिवी न वेद" इत्युक्तस्यादृ-

प्रकाशः

ओम् अदृश्यत्वादिगुणको धर्मोक्तेः ओम् ॥ भाष्ये "अदृश्यत्वादिगुणा विष्णोरुक्ताः" इति सामान्येनोक्तेः, तत्त्वप्रदीपे च "–"अदृश्येऽनात्म्ये" "सहैव सन्तं न विजानन्ति देवाः" "स योऽतोऽश्रुतः" इत्यादिना अदृश्यत्वादिगुणाः विष्णोरुक्ताः" इत्यादिपदप्रयोगात् टीकायां "अदृश्येऽनात्म्ये" इति विशिष्योक्तावपि तुल्यन्यायतया प्राप्तां "पूर्ववददृश्यत्वादिबलेन रूढिं परित्यज्य योगवृत्त्याऽक्षरशब्दो विष्णौ सम्भवति" इति न्यायविवरणटीकोक्त्या च लब्धां पूर्वसङ्गतिमाह—अत्रेति। ननु अदृश्यत्वं सामान्यं, पृथिव्यविदितत्वं विशेषः, तेन कथं तदाक्षेप इति, मैवं, सर्वादृश्यत्ववति तदेकदेशपृथिव्यविदितत्वस्यापि "मुखनासिकावचनोऽनुनासिकः" इत्यत्र महाभाष्योक्तेन प्रासादवासिन्यायेन सत्त्वाद्वा, पृथिव्याद्यधिदैवादिसर्वाविदितत्वस्य अदृश्यत्वरूपत्वाद्वा, "सहैव सन्तं न विजानन्ति देवाः" इत्यत्रैव कैमुत्यलब्धत्वाद्वा, उभयत्रापि अपरिच्छिन्नवैभवस्य विवक्षितत्वाद्वा तदाक्षेपात् ॥ यदत्रोभाभ्यामुक्तं—प्राक् प्रधानस्य द्रष्टृत्वाद्ययोगेन निरासेऽपीह तथा बाधकाभावाददृश्यत्वादिकं प्रधानस्य स्यादिति शङ्कोदयात्सङ्गतिरिति, तन्न, साक्षात्सौत्रहेत्वाक्षेपसम्भवेनेदृशस्यानादरणीयत्वादिति

चन्द्रिका

श्यत्वस्याक्षेपेण पूर्वपक्षोत्थानादनन्तरसङ्गतिः ।

प्रकाशः

भावेनोक्तं—ब्रह्मत्वे हेतूकृतस्येपि । एतेनैव प्राक् हेतूकृतेन अदृश्यत्वरूपब्रह्मधर्मेण ब्रह्म किं नाक्षरशब्देनोच्यते इत्याशङ्काया अप्यनवकाशः । "अदृश्येऽनात्म्ये" इत्यादिटीकादि तु फलपरमिति भावः । ननु पूर्वं तद्धर्माभिलापाभावेन प्रधाननिरासेऽपि नेह तथा, पृथिव्यादिदृष्टान्तपूर्वं विश्वोपादानत्वरूपतद्धर्माभिलापादिति वा, पूर्वत्र अविदितत्वरूपादृश्यत्वादिबाधकेन शरीरशब्दे रूढित्यागवदत्र अक्षरशब्दे नादृश्यत्वादिलिङ्गेन रूढित्यागः, "अक्षरात्परतः परः" इत्युत्कर्षावधित्वश्रवणादिति वा पूर्ववैषम्येणापि सङ्गतिरस्तीति चेत्, सत्यं, प्रधानेहेत्वाक्षेपसम्भवे तस्यैव वाच्यत्वात्, सिद्धान्तशङ्काबीजनिरासार्थत्वाच्च पूर्वहेत्वाक्षेप एवोक्तः । विषयसंशयटीकां व्यनक्ति—अत्रेति । टीकायामेव अपेक्षितसमग्रविषयवाक्यं व्यक्तम् । यद्यपि गुणजातमेवात्र विषयः, लिङ्गपादत्वात्, टीकायां तथैवोक्तेश्च । तथाऽप्यक्षरस्य विशेष्यत्वात्तस्य चोपादानत्वात् न ब्रह्मेति पूर्वपक्षयुक्तिं सूचयितुं तथोक्तम् । अत एव टीकायां अक्षरशब्दसाहित्येन अन्यत्र प्रसिद्धिरदृश्यत्वादिलिङ्गानामुक्ता । नन्वेवमक्षरनामैव समन्वीयताम् । पादसङ्गतिस्तु उत्तराधिकरण इव अनेकलिङ्गसमन्वयार्थत्वात् फलतो भविष्यति । उपादानत्वादक्षरं न ब्रह्मेति पूर्वपक्षश्च ऋजुः । उपादानत्वादक्षरस्यान्यत्वेन तद्विशेषणत्वात् गुण-

चन्द्रिका

अत्रादृश्यत्वादिगुणकमक्षरं किं प्रकृत्यादि किं वा विष्णुरिति चिन्ता। तदर्थं ब्रह्मणोऽक्षरत्वे "अक्षरात्परतः परः" इति वाक्यशेषोक्तं अक्षरस्य परत्वावधित्वं न सम्भवति उत सम्भवतीति । तदर्थं परत्वावधिभूतमक्षरमदृश्यत्वादिगुणकाक्षरादनन्यत् उतान्यदिति ।

प्रकाशः

जातमप्यन्यस्येति पूर्वपक्षस्तु वक्र इति चेन्न, अक्षरशब्दसमन्वयस्याप्यक्षराधिकरणे सेत्स्यमानत्वात् । न च तेनैवेदं गतार्थं, परत्वावधित्वादिना बाधकेन तस्येहापवादेन पूर्वपक्षकरणात् । अन्यत्रासमन्वितगुणजातसमन्वयस्यैवेह कार्यत्वात् । अस्मिन् पादे अन्यसाहित्येनैव अन्यत्रप्रसिद्धेराश्रितत्वात्, गुणसमन्वये च पूर्वसङ्गतेः साक्षाल्लाभाच्च गुणजातमेवात्र चिन्तितम् । प्रकृत्यादीति । चिदचित्प्रकृतिविरिञ्चरुद्रा इत्यर्थः । यद्यप्यत्र टीकायां "अक्षरात्सम्भवतीह विश्वम्" इति कारणवाक्यस्थाक्षरब्रह्मशब्दानां विष्णावनवकाशमाशङ्क्य परत्वावधित्वश्रवणेनोज्जीवनात्, तदनुरोधेन विष्णुरिति चिन्तानन्तरं कारणवाक्यस्थाक्षरब्रह्मेशशब्दाः किं प्रकृत्यादिपरा अथ विष्णुपरा इति चिन्ता प्रदर्शनीया । तथाऽपि तुल्यन्यायतया सा चिन्ता स्पष्टेति वा, वाक्यशेषस्थाक्षरस्य परत्वावधित्वेन निकृष्टत्वे तदनन्यप्राचीनाक्षरस्यापि न ब्रह्मत्वमिति हेतुहेतुमद्भावस्येव प्राचीनकारणवाक्यस्थब्रह्मेशशब्दयोः न ब्रह्मपरत्वमित्यत्र स्पष्टं हेतुहेतुमद्भावाप्रतीतेरक्षरस्यापि अब्रह्मत्वात्तद्युक्तकारणवाक्यस्य तत्समाना-

चन्द्रिका

अनन्यत्वे परत्वावधित्वस्य ब्रह्मण्ययोगात् न तस्याक्षरत्वं युक्तं, अन्यत्वे तु युक्तम् ॥

पूर्वपक्षस्तु—जडप्रकृतेरेवादृश्यत्वादि,

प्रकाशः

धिकरणब्रह्मेशशब्दयोरपि न ब्रह्मपरत्वमिति अक्षरस्य अब्रह्मत्व-द्वारैव कारणवाक्यादेरब्रह्मपरत्वोक्त्यवश्यम्भावाद्वा, सङ्गतिभाष्यन्याय-विवरणतट्टीकानुरोधाद्वा अक्षरमुखैव चिन्तोपदर्शिता । फलफलि-भावमस्फुटत्वादाह—**अनन्यत्व इति** । यदि वक्ष्यमाणादिशा प्रकृत-हानाप्रकृतकल्पनादोषापत्त्या "अक्षरात्परतः" इत्युक्ताक्षरस्य "अक्षरात्सम्भवतीह विश्वम्" इति पूर्वोक्तस्य चाक्षरस्यैकत्वं, तदा अदृ-श्यत्वादिगुणकस्य विश्वकारणत्वेनोक्तस्यैव परत्वावधित्वात् तस्य च सर्वोत्तमे विष्णावयोगात्, यथायथं प्रकृत्यादीति पूर्वपक्षे फलम्, यदा तु "अक्षरत्रयमीरितम्" इति वक्ष्यमाणरीत्या अन्यत्वं, तदा "अक्षरात्परतः" इत्युक्ताक्षरस्यापरत्वात् परत्वावधित्वस्य ब्रह्मण्य-भावात्, परविद्याविषयत्वेन विष्णुरेवेति सिद्धान्ते फलमित्यर्थः। उपादानत्वाक्षरब्रह्मेशशब्दान् क्रमेण प्रधानश्रीब्रह्मरुद्रप्रापकान् टीकोक्तान् व्यञ्जयन् चतुर्विधपूर्वपक्षटीकां व्यनक्ति—**जडप्रकृतेरेवे-त्यादिना** । ननु अत्र निर्धारित एक एवादृश्यत्वादिगुणक इति पूर्वपक्षः, उत अनिर्धारितो यः कश्चिदिति, सर्वेऽपीति वा । नाद्यः, अनेकप्रापकसत्त्वेन निर्धारणायोगात् । न द्वितीयः, संशयादविशेषा-

चन्द्रिका

अदृश्यत्वादिगुणकेऽक्षरे पृथिव्यादिदृष्टान्तपूर्वकं "तथाऽक्षरात्सम्भवतीह विश्वम्" इति विश्वोपादानत्वोक्तेः ।

प्रकाशः

पत्तेः । न तृतीयः, वाक्यभेदापातादिति चेन्न, अक्षरब्रह्मेशशब्दानां अन्यप्रापकाणां अविनाशित्वेन "मम योनिर्महद्ब्रह्म" इत्यादिवचनेन कार्यस्य कारणाधीनतयेशितृत्वेन प्रधान एवोपपत्तेरित्यादिरूपेण पक्षचतुष्टयेऽप्यवधारणसम्भवेन आद्यस्य युक्तत्वादिति भावेन—प्रकृतेरेवेत्युक्तम् । "चित्प्रकृतेर्वा" इत्यादिवाशब्दात् द्वितीयतृतीयावपि युक्ताविति सूचितम् । द्वितीये विष्ण्वन्यत्वेन अवधारणसम्भवात् न सन्देहादविशेषः । अत एव टीकायां "विष्णोरन्यस्य" इति संशयोक्तिः, "न विष्णोरदृश्यत्वादीति तावत्पूर्वपक्षः" इत्युक्तिः, "न विष्णुरदृश्यत्वादिगुणकः" इत्युपसंहारश्च । तृतीये वाक्यभेदस्य न्यायप्राप्तत्वादिति । यद्वा—"न विष्णोरदृश्यत्वादि" इति टीकोक्तव्यवच्छेद्याभिप्रायं जडप्रकृतेरेवेत्यवधारणं, न तु कोश्यन्तरव्यच्छेदाशयम् । तेन "न विष्णोरदृश्यत्वादि" इति टीकोक्तस्य "अदृश्यत्वादिकं जडप्रकृतेर्भवेत्" इति टीकोक्तस्य च सङ्ग्रहः कृतो भवति । तेन विष्णोर्न चेन्निर्विषयतया वाक्यमिदममानं स्यादिति शङ्का च निरस्ता भवति । "अस्य पृथिव्यादिदृष्टान्तेनोपादानतया जगत्कारणत्वोक्तेः" इति टीकां व्यनक्ति—अदृश्यत्वेति । 'दृष्टान्ते' इत्येतदुपादानत्वसिध्द्यर्थमुक्तम् । ऊर्णनाभेरादित्वेऽपि

चान्द्रिका

न च कारणत्वमात्रेऽयं दृष्टान्तः, तस्य "सम्भवतीह विश्वम्" इत्यनेनैव सिद्ध्या दृष्टान्तवैयर्थ्यात् । अबाधेऽन्तरङ्गस्योपादानत्वस्य त्यागायोगाच्च । चित्प्रकृतेर्वाऽदृश्यत्वादिकं, तत्राक्षरशब्दस्य "कूटस्थोऽक्षरउच्यते" इत्यादिस्मृतिसिद्धत्वात् । न चाक्षराधिकरण न्यायेन ब्रह्मणि स सावकाश इति वाच्यं, विश्वोपादानत्वस्य तत्र

प्रकाशः

'पृथिव्यादि' इत्युक्तेर्गतिर्वक्ष्यते । उपादानत्वमेव शङ्कापूर्वं व्यनक्ति—**न चेति** । 'तस्य' कारणत्वमात्रस्य । **अन्तरङ्गस्येति** । कार्यानुस्यूतत्वादुपादानस्येति भावः । एतेन टीकायामेवमाशङ्क्य, तथाऽक्षरब्रह्मेशशब्दानां च विष्णाववकाशमाशङ्क्य सर्वत्र परतः पराभिधानेनैवोज्जीवनं यत्कृतं तदुपलक्षणमिति सूचितम् । तथा च वक्ष्यति "इति निकृष्टत्वेन श्रुतत्वाच्च" इति । "चेतनप्रकृतेर्वा" इत्यादिटीकां व्यनक्ति—**चित्प्रकृतेर्वेति** । **अक्षराधिकरणन्यायेनेति** । "अक्षरमम्बरान्तधृतेः" इत्यत्र "एतस्मिन् खल्वक्षरे गागर्याकाश ओतश्च प्रोतश्च" इति श्रुतमक्षरं किं चित्प्रकृतिरथ विष्णुरिति संशये, "ये त्वक्षरमनिर्देश्यमव्यक्तं" इत्यादौ श्रीतत्त्वे अक्षरशब्दप्रयोगात, क्षराक्षरातीते विष्णौ तदयोगात् श्रीतत्त्वमेवेति प्राप्ते, चतुर्विधनाशरहिते विष्णावेव अक्षरशब्दप्रवृत्तिनिमित्तस्य पौष्कल्यात्, "तस्मादक्षरं तस्मादक्षरमित्याचक्षते एतमेव सन्तं" इति श्रुत्यादौ तस्य प्रयोगाच्च विष्णुरेव अक्षरशब्द-

चन्द्रिका

असम्भवात् चित्प्रकृतौ तु विश्वोपादानाभिमानित्वेन तत्सम्भवात् । चतुर्मुखो वाऽदृश्यत्वादिगुणकः, "स ब्रह्मविद्यां" इति ब्रह्मशब्दात् । न च विष्णौ स मुख्य इति वाच्यं, पूर्वत्र "ब्रह्मा देवानां प्रथमः सम्बभूव" इति, उत्तरत्र च

तस्मादेतद् ब्रह्म नाम रूपमन्नं च जायते ।

इति जायमानत्वलिङ्गेन चतुर्मुखपरेण ब्रह्मशब्देन सन्दष्टस्य "स ब्रह्मविद्यां" इति ब्रह्मशब्दस्य अन्यपरत्वायोगात् ।

प्रकाशः

मुख्यार्थ इति तृतीयपादे वक्ष्यमाणन्यायेनेत्यर्थः । निर्विकारे श्रीतत्त्वेऽपि कथमुपादानत्वमित्यतः "तस्या विकाराभिमनित्वाद्युज्यते" इति टीकोक्तमेव व्यक्तमाह—**चित्प्रकृतौ त्विति** । "हिरण्यगर्भस्य वा" इत्यादिटीकां व्यनक्ति—**चतुर्मुखो वेति । स ब्रह्मेति ।**

ब्रह्मा देवानां प्रथमस्सम्बभूव विश्वस्य कर्ता भुवनस्य गोप्ता ।

स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह ॥

इति वाक्ये ब्रह्मशब्दादित्यर्थः । तस्य चतुर्मुखपरत्व एवैतद्विद्यायास्तत्परत्वमित्यतस्तत्साधयति—**न चेत्यादिना । पूर्वत्रेति ।** अत एव तत्त्वप्रदीपे "ब्रह्मा देवानां" इति पूर्ववाक्यमप्युदाहृतमिति भावः । **जायमानत्वेति ।** 'सम्बभूव जायते' इति च पदाभ्यामुक्तेनेत्यर्थः । उपादानत्वं च तदभिमानित्वेनेति भावः । एव-

चन्द्रिका

रुद्रो वाऽदृश्यत्वादिगुणकः, "कर्तारमीशं" इति ईशशब्दात् । न च "शब्दादेव प्रमितः" इति वक्ष्यमाणन्यायेन स विष्णुपर

प्रकाशः

मग्रेऽपि । "रुद्रस्य" इत्यादिटीकां व्यनक्ति—**रुद्रो वेति**। **ईशशब्दादिति** । प्रकृतादृश्यत्वादिगुणकाक्षर एव "यदा पश्यःपश्यते रुक्मवर्णं कर्तारमीशं" इत्युत्तरवाक्ये श्रुतत्वादित्यर्थः। **शब्दादेवेति**। अत्रैव तृतीयपादे "ईशानो भूतभव्यस्य" इति श्रुत ईशानो वायुरुत विष्णुरिति सन्देहे, "ऊर्ध्वं प्राणमुन्नयति" इति प्राणव्यवस्थापकत्वस्य, "मध्ये वामनमासीनं" इति मध्यमत्वस्य, "विश्वे देवा उपासते" इति विश्वदेवोपास्यत्वस्यच श्रवणात्तेषां च "एवमेवैष प्राण इतरान्प्राणान्पृथक्पृथगेव सन्निधत्ते" "यो ऽयं मध्यमः प्राणः" "कु विन्दङ्ग" इतिश्रुतिभिर्वायुधर्मत्वाद्वायुरिति प्राप्ते, लिङ्गसहस्रादपि श्रुतेर्बलवत्त्वात् निरवकाशवामनश्रुत्या ईशानपदप्रवृत्तिनिमित्तस्य प्रेरकत्वादेर्विष्णावेव पौष्कल्यादीशानो विष्णुरेवेति वक्ष्यते, ईशशब्दस्य चेशानशब्दपर्यायत्वादिति भवः । यद्यपि "सर्वत्र" इति नये, "अत्ता" इति नये च आदित्यादितिश्रुत्योरिवान्तर्नयन्यायेनेशशब्दस्यापि सावकाशत्वशङ्का सुशका । तथाऽपि तदधिकरणविषयवाक्ये ईशशब्दस्य तत्पर्यायस्य वा श्रवणाभावाद्वा, तत्रैव अत्र वाक्ये निरवकाशविष्णुलिङ्गाभावेन तन्नचायाविषयत्वाद्वा, तत्र तात्पर्यमात्रमेवाधिदैवगतशब्दानामुक्तं, न तु शक्ति-

चन्द्रिका

इति वाच्यं, रुद्रे प्रसिद्धसर्वज्ञशब्दात् । न चासौ यौगिकत्वेन प्रकृताक्षरस्य विशेषणं, न तु रुद्राख्यविशेष्यपर इति वाच्यं, रूढेर्बलवत्त्वात् । "सर्ववित्" इत्यनेन पुनरुक्तेश्च । तस्मादुक्तबाधकात् "अक्षरात्परतः परः" इति निकृष्टत्वेन श्रुतत्वाच्चाक्षरं न

प्रकाशः

रपीति भावेन वा, "शब्दादेव" इत्यत्रेशशब्दपर्यायस्येशानशब्दस्य साक्षादेव समन्वयोक्तेर्वा—"शब्दादेव प्रमितः" इति वक्ष्यमाणन्यायेनेत्युक्तम् । **प्रसिद्धेति** ।

> यस्सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः ।
> तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते ॥

इति श्रुतसर्वज्ञशब्दात्, तस्य च

> कृशानुरेतास्सर्वज्ञो धूर्जटिर्नीललोहितः ।

इत्यमरोक्त्या रुद्रे प्रसिद्धत्वादित्यर्थः । यौगिकत्वे दोषमाह—**सर्वविदिति** । प्रातिस्विकबाधकोक्त्या अन्यप्रापकाणां निवकाशत्वमुक्त्वा टीकाद्युक्तेन साधारणबाधकान्तरेणापि तदाह—**अक्षरादिति** । यद्यपि टीकायां कारणत्वस्य अक्षरब्रह्मेशशब्दानां च सावकाशत्वमाशङ्क्य, "अक्षरात्परतः परः" इतिश्रुतनिकृष्टत्वेनैव तेषां निरवकाशत्वमुक्तं, न तु दृष्टान्तोक्तविश्वोपादानत्वादिना । तथाऽपि सति बाधके त्यागायोगात् "–"अक्षरात्परतः परः" इति श्रुतेरपि" इति न्यायविवरणगतापिशब्दस्य बाधकान्तरसमुच्चयार्थत्वमुपेत्य

चन्द्रिका

ब्रह्म । न च "तथाऽक्षरात्" इत्यादावेवाक्षरशब्दो ब्रह्मपरः, "अक्षरात्परतः परः" इत्यत्र तु प्रकृतिपर इति वाच्यं, प्रकृतहानाप्रकृतस्वीकारापातात् । पूर्वपक्षे त्विदं निकृष्टत्वं चित्प्रकृतिपक्षे 'अक्षरात्परतः' इति पञ्चम्योस्सामानाधिकरण्येन, पक्षान्तरे तु वैयधिकरण्येन युक्तम् । न चाब्रह्मपक्षे परविद्याविषयत्वं

प्रकाशः

प्रातिस्विकबाधकोक्त्या च निरवकाशत्वमुक्तमिति ज्ञेयम् । अन्त्यचिन्तास्थानन्यचकोटिं साधयितुं निकृष्टत्वेन श्रुतत्वं शङ्कापूर्वं साधयति—न चेति । विष्णोरिव पूर्वपक्षकोटीनामपि निकृष्टत्वेन श्रुतत्वमयुक्तं, श्रीतत्त्वोपक्षया विष्णोरर्वागन्यस्य अभावात्, तत्र सामानाधिकरण्येनान्वये चतुर्मुखादावयोगादित्यतः, "तस्यां सामानाधिकरण्येनोपपन्नं" इति टीकोपलक्षणमिति भावेन "तस्मात्परस्याः प्रकृतेः परस्य हरेरभिधानादेव" इति तत्त्वप्रदीपोक्तं हृदि कृत्वा सर्वत्र तदुपपत्तिमाह—**पूर्वपक्ष इति। पक्षान्तरे त्विति** । 'अक्षरात्' चतुर्मुखात् 'परतः' श्रीतत्त्वात्पर इति चतुर्मुखपक्षे, रुद्रपक्षे तु 'अक्षरात्' रुद्रात् 'परतः' चतुर्मुखात् पर इति पुम्मात्रविवक्षया ध्येयमिति भावः । ननु यथा सिद्धान्ते निकृष्टत्वश्रवणं बाधकं तथा पूर्वपक्षेऽपि परविद्याविषयत्वं बाधकमित्याशङ्क्य, "यदा वेदादि अन्याविषयतया योज्यते, तदा तस्यापरविद्यात्वं" इत्यादिसिद्धान्तटीकाव्यावर्त्यं च परापरविद्ययोः भिन्नार्थत्वमुपेत्याह—**न चेति** । ऋगादिविषयत्वोपपा-

चन्द्रिका

बाधकं, "परा चैवापरा च तत्रापरा ऋग्वेदो यजुर्वेदः" इत्यपरविद्यात्वेनोक्तऋगादिविषये शास्त्रयोनौ ब्रह्मण्येव तत्प्रतियोगिभूतपरविद्याविषयत्वासम्भवात्। "अथ परा यया तदक्षरमधिगम्यते" इति श्रुत्या प्रकृतेरेव तत्सम्भवाच्च ॥

प्रकाशः

दनाय 'शास्त्रयोनौ' इत्युक्तम्, शास्त्रयोनिसूत्रे तथोक्तत्वादिति भावः। प्रतियोगीति। विरोधीत्यर्थः। प्रकृतेरिति। प्रकृत्यादेरेवेत्यर्थः। ननु "अक्षरात्परतः परः" इति वाक्योक्तपरवस्तु किञ्चिदुपेत्य अत्र प्रकृत्यादिरिति पूर्वपक्षकरणे,

चित्त्वे तु तेन कार्त्स्न्येनावेद्यत्वं नेश्वरं विना।

इति प्रागुक्तदिशा अपरिच्छिन्नवैभवत्वपर्यवसन्नं मुख्यमदृश्यत्वं निकृष्टत्वेनाभ्युपेते प्रकृत्यादौ पूर्वपक्षिणा शङ्कितुमशक्यमिति कथमेतादृशस्य आनन्दमयादावुक्तस्य विष्णुधर्मस्य पूर्वपक्षे आक्षेपः स्यात्। न चात्र श्रुतनिकृष्टत्वस्य परत्वस्य च अक्षरत्वेनाभिमते प्रकृत्यादावेव कथञ्चिदुपपन्नताऽभिप्रेतेति ईश्वरपरत्वमेव नोपेयते पूर्वपक्षिणेति वाच्यं, तथात्वे पूर्वत्र निर्णीतादृश्यत्वरूपविष्णुलिङ्गेन अक्षरस्य विष्णुत्वमेवोपेत्य परापरत्वोपपत्तिरुच्यताम्। न च "अक्षरात्" इत्यादिना श्रुतोपादानत्वादिना विष्णुनिरासेन प्रकृत्यादिरुच्यत इति वाच्यं, टीकायां परत्वावधित्वबाधकबलेन पूर्वपक्षप्रापकाणां निरवकाशत्वोक्तेरिति चेन्मैवं, अदृश्यत्वं चक्षुरगोचरत्वमित्युपेत्य "अदृश्येऽ-

चन्द्रिका

सिद्धान्तस्तु—परविद्याविषयत्वं तावद्भाष्योक्तश्रुत्यादिभिर्विष्णोरेव।

प्रकाशः

नात्म्ये" इत्युक्तादृश्यत्वस्यापि प्रकृत्यादावाशङ्कनात्। पूर्वाक्षेपचन्द्रिका त्वर्थान्तराभिप्राया। न चैवमपि ब्रह्मरुद्रयोर्जीवत्वेन "अचक्षुश्श्रोत्रं तदपाणिपादं" इत्युक्तजीवधर्मभूतचक्षुरादिराहित्यं कथं घटतां, येन "अदृश्येऽनात्म्ये" इत्यनात्म्यपदोक्तस्य जीवगुणराहित्यस्य टीकोक्त आक्षेप उपपद्येतेति वाच्यं, तयोर्जीवत्वमेव नेतीति वा, जीवोत्तमत्वेनेतरजीववैलक्षण्येन वा तदुपपत्तिरित्याशयादिति॥

"धर्मोक्तेः" इति सूत्रोपात्तनिरवकाशपरविद्याविषयत्वरूपभगवल्लिङ्गादिनाऽन्यप्रापकाणां सावकाशत्वात्, "अक्षरात्परतः" इत्युक्ताक्षरस्यान्यत्वेन बाधकाभावाच्च विष्णुरेवादृश्यत्वादिगुणकं अक्षरमिति भावेन, लिङ्गनिरवकाशत्वं तावत् "परविद्याविषयत्वस्य श्रुतिस्मृतिभिर्विष्णुधर्मत्वेनावगतत्वात्" इति टीकोक्तं व्यनक्ति—**परविद्येति**। "अथ परा यया तदक्षरमधिगम्यते" इत्युक्तमित्यर्थः। मोक्षसाधनविद्याया एव परविद्यात्वात्, तद्विषयत्वस्य च "तमेवं विद्वानमृत इह भवति"

तत्कर्म हरितोषं यत्सा विद्या तन्मतिर्यया।

"द्वे विद्ये वेदितव्ये परा चैवापरा च। तत्र ये वेदा यान्यङ्गानि यानि प्रत्यङ्गानि सा परा। अथ परा यया स हरिर्वेदितव्यो योऽसावदृश्यो निर्गुणः परः परमात्मा" इत्यादिभिर्विष्णो-

चन्द्रिका

युक्तं च ऋगादिविद्यस्यापि विष्णोः परविद्याविषयत्वं, यतः,

प्रवृत्तं च निवृत्तं च यथैकं कर्म कथ्यते ।

उपाधिभेदाद्विद्याऽपि तथैवैका पराऽपरा ॥

यथैकमेव कर्म निष्कामज्ञानपूर्वकत्वोपाधिना निवृत्तं, सकामत्वाद्युपाधिना च प्रवृत्तम्,

निष्कामं ज्ञानपूर्वं च निवृत्तमिति चोच्यते ।

इत्यादिस्मृतेः, यथा चैकमेवान्नमुपाधिभेदात् पथ्यमपथ्यं च, तथा ऋगादिरूपैकैव विद्या सन्न्यायैः प्रमितब्रह्मविषयकशक्तितात्पर्योपा-

प्रकाशः

रेव सिद्धमित्यर्थः । ननूक्तमपरविद्याविषयस्य परविद्याविषयत्वमयुक्तमित्यतो "—"द्वे विद्ये वेदितव्ये" इत्यत्र च" इत्यादिटीकां विवृण्वन्नाह—**युक्तं चेति** । कुत इत्यतः, ऋगादेरेव परविद्यात्वादिति भावेनाह—**यत इति** । श्लोकेनान्वयः । 'अतः' इति योज्यम् । पूर्वार्धं व्यनक्ति—**यथेति** ।

निष्कामं ज्ञानपूर्वं तु निवृत्तमिति चोच्यते ।

निवृत्तं सेवमानस्तु ब्रह्माभ्येति सनातनम् ॥

इति व्यासस्मृतेरित्यर्थः । स्वर्गादिफलकामनां विनेत्यर्थः । 'कर्म' इत्युपलक्षणं श्लोक इति भावेनाह—**यथा चेति** । उत्तरार्धं स्पष्टयति—**तथेति** । **सन्न्यायैरिति** । बलाबलवत्त्वादिना सम्यगवधृतोपक्रमादिभिरित्यर्थः । **प्रमितेति** । नित्यसापेक्षत्वात्समासः ।

चन्द्रिका

धिना परा, मोक्षसाधनप्रमाहेतुत्वात्, अन्यथा त्वपरा, तदहेतुत्वात्। तदुक्तम्—

ऋगाद्या अपरा विद्या यदा विष्णोर्न वाचकाः।
ता एव परमा विद्या यदा विष्णोस्तु वाचकाः॥

इति। यत्त्वन्यैरुक्तं परशब्द ऋगादिविशेषरूपोपनिषत्परः, तत्सन्निधानाच्चापरशब्दो गोबलीवर्दन्यायेनोपनिषदितरऋगादिपर इति, तन्न, "सर्वे वेदा यत्पदमामनन्ति" "वेदैश्च सर्वैरहमेव वेद्यः" इत्यादिश्रुतिस्मृतिभिर्ब्रह्मणः सर्ववेदवेद्यत्वात्। उपनिषत्स्वपि ज्ञेयशुद्धब्रह्मविषयाणां उपासनादिवाक्यानां बहूनां, मन्त्रेष्वपि ज्योतिरधिरणोक्तन्यायेन ब्रह्मपरभागस्य च दर्शनाच्च। 'रूपं द्विविधं नीलमनीलं च' इति वत्, "द्वे विद्ये परा चैवापरा च" इत्यत्र परापरशब्दयोर्विरुद्धार्थत्वप्रतीतेश्च। न हि नीलपदमनीलविशेषपरं भवति।

प्रकाशः

तदुक्तमिति। आथर्वणभाष्ये। स्वमते परापरविद्यात्वमुपाधिभेदेनैकत्रैव टीकाद्युक्तं व्युत्पाद्य, प्रसङ्गात् परभाष्याद्युक्तिमनूद्य निराह—**यत्त्विति**। ननु ऋगादीनां कर्मबोधकत्वात् कथं ब्रह्मपरतेति चेत्, किमेकदेशस्यान्यपरत्वं उत कृत्स्नस्य। आद्य आह—**उपनिषत्स्वपीति**। द्वितीय आह—**मन्त्रेष्वपीति**। "ज्योतिश्चरणाभिधनात्" इत्यत्र स्वप्रदर्शितन्यायेनेत्यर्थः। परापरशब्दयोर्विशेषसामान्यभावेन अर्थवर्णनमयुक्तमित्याह—**रूपमिति**। 'द्वे विद्ये वेदितव्ये' ब्रह्म-

चन्द्रिका

यत्तु कैश्चिदुक्तं—परोक्षज्ञानमपरविद्या, भक्तिरूपमपरोक्षज्ञानं तु परविद्येति, तन्न, श्रुतौ ऋगादीनामपरविद्यात्वेनोक्तत्वात्, "यया तदक्षरमधिगम्यते" इति,

येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् ।

इति च ज्ञानकरणस्यैव परविद्यात्वेनोक्तत्वाच्चेह विद्याशब्दस्य ज्ञानार्थत्वायोगात् । न च 'अधिगम्यते' इत्यस्य प्राप्यत इत्यर्थः, अधिपूर्वस्य गमेर्ज्ञाने प्रसिद्धेः । यद्यपि "व्रजयजोर्भावे क्यप्" इत्यनेन सूत्रेण भावे क्यप्प्रत्ययो विहितः । तथाऽपि "संज्ञायां समजनिषदनिपतमनविद" इति सूत्रे वृत्तौ

प्रकाशः

विषये परोक्षापरोक्षरूपे द्वे ज्ञाने उपादेये इत्यर्थ इति रामानुजभाष्योक्तमनूद्य प्रत्याह—यत्त्विति । विद्याशब्दस्य ज्ञानार्थत्वसम्भवेऽपि इह तद्ग्रहणमयुक्तमित्याह—ययेति । 'यया' विद्यया 'अधिगम्यते' प्राप्यत इत्यर्थसम्भवान्न ज्ञानकरणमिह विद्याशब्दार्थ इत्यत आह—नचेति । ननु "व्रजयजोर्भावे क्यप्" इति पूर्वसूत्रादनुवृत्तस्य भावार्थकस्यैव क्यपः "संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः" इति सूत्रे विहितत्वात्,

तत्प्राप्तिहेतुर्ज्ञानं च कर्म चोक्तं महामुने ।
आगमोत्थं विवेकाच्च द्विधा ज्ञानं तथोच्यते ॥

इति पराशरवचने प्रयोगाच्च ज्ञानमेव विद्याशब्दार्थ इत्याशङ्क्याह—यद्यपीति ।

चन्द्रिका

'भाव इति न स्वर्यते' इत्युक्तत्वात्, समजन्ति तस्यामिति समज्या, निषीदन्ति तस्यामिति निषद्येति समज्यादिशब्दानां भावार्थत्वाभावस्योक्तत्वाच्च क्यबन्तोऽपि विद्याशब्दो वेदनकरणेऽपि मुख्य एव।

प्रकाशः

भाव इतीति । "व्रजयजोर्भावे" इत्यव्यवहितं भावपदं न स्वर्यते, व्यवहितं त्वनुवर्त्यत इति भावः । तथाच—'भावे अकर्तरि च कारके संज्ञायां' इत्येतत् "कृत्यल्युटो बहुलं" इति सूत्रपर्यन्तमनुवर्तते । एवं चेह 'भावे' इत्यनुवर्तमाने "व्रजयजोर्भावे" इति पुनर्भावग्रहणं 'अकर्तरि च कारके' इत्यस्य व्यावर्तनेन भाव एव यथा स्यादित्येवमर्थम् । अस्य च भावपदस्य 'संज्ञायां' इत्यत्र अनुवृत्तौ हि विद्याशब्दो ज्ञान एव मुख्यः स्यात् । तत्तु 'न स्वर्यते' स्वरितत्वेन नोच्चार्यते नानुवर्त्यत इत्युक्तत्वात् "संज्ञायां समजनिषद" इति सूत्रे क्यबेवानुवर्तते । न तु 'अकर्तरि च कारके' इत्येतद्व्यावर्तकं 'भावे' इत्येतत् पदं, स्वरितत्वाभावेन "स्वरितेनाधिकारः" इत्युक्तस्वरितनिबन्धनाधिकारशब्दितानुवृत्तेरयोगात् । उत्तरत्र "कृत्यल्युटः' इति सूत्रपर्यन्तं सामान्यतोऽनुवर्तमाने भावे कर्तृव्यतिरिक्तकारके च क्यपो विधानात्, वेदनरूपभाव इव वेदनकरणेऽपि मुख्य एवेत्यर्थः । उक्तं च प्रक्रियाप्रसादेऽपि "अनन्तरभावग्रहणं न स्वर्यते । तेन भावादावर्थे" इति । अत एवोक्तं सुधायां जिज्ञा-

चन्द्रिका

आगमोत्थं विवेकाच्च द्विधा ज्ञानं तथोच्यते ॥

इति पराशरवचनं तु आगमोत्थत्वविवेकोत्थत्वाभ्यां ज्ञानस्य द्वैविध्यमाह, न तत्रत्यपरापरशब्दयोः परोक्षापरोक्षज्ञानार्थताम् । ऊर्णनाभ्यादिरपि निमित्तमेवेत्यन्यत्रोक्तम् । "स ब्रह्मविद्यां" इत्यत्र च ब्रह्मशब्दो न चतुर्मुखपरः, "सर्वविद्याप्रतिष्ठां येनाक्षरं पुरुषं वेद सत्यम्" इति परविद्याविषयत्वादिब्रह्मलिङ्गात् । यच्चोक्तं स-

प्रकाशः

सानये—"यथार्थज्ञानतत्साधनयोर्विद्याशब्दस्य योगरूढिभ्यां प्रवृत्तत्वात्" इति । पराशरवचनस्य गतिमाह—**आगमोत्थमिति** । **परोक्षेति** । यथायोगमन्वयः । एवं परविद्याविषयत्वमन्यत्र अनवकाशतया समर्थ्य प्रसङ्गात्परोक्तं च व्युदस्येदानीं पूर्वपक्षप्रापकाणां क्रमेण सावकाशत्वमाह—**ऊर्णनाभ्यादिरिति** । 'अन्यत्र' प्रकृत्यधिकरणानुव्याख्यानादौ । तथा च तद्बलात् "अक्षरात्सम्भवति" इत्यत्र पञ्चम्या नोपादानत्वमर्थः, किं तु निमित्तत्वमेवेत्यर्थः । एतेनोपादानत्वरूपबाधकाभावेन अक्षरशब्दोऽक्षराधिकरणन्यायेन सावकाश इति न चित्प्रकृतिरिति पक्षोऽपि युज्यत इति सिद्धत्वान्नोक्तम् । चतुर्मुखप्रापकं सावकाशयति—**स इति** । आदिपदेन सार्वज्ञ्यादिलिङ्गं गृह्यते । यदपि रुद्रप्रापकेशशब्दोपोद्बलकं सर्वज्ञपदमिति, तत्राह—**यच्चेति** । "यस्सर्वज्ञः" इत्यस्योत्तरार्धे

तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते ।

चन्द्रिका

र्वज्ञपदं रुद्राख्यविशेष्यपरमिति, तन्न, तस्य चतुर्मुखजन्यतया तज्जनकत्वायोगात् । किन्तु प्रकृतस्याक्षरस्य सर्वज्ञत्वविशेषणपरम् । अत एव सूत्रे विशेषणपदम् । 'सर्ववित्' इत्यनेन पौनरुक्त्यं च टीकायामेव त्रेधा परिहृतम् ।

प्रकाशः

इति चतुर्मुखजनकत्वश्रवणात्, तस्य च रुद्रे अनुपपत्तेरित्याह— **तस्येति** ।

ब्रह्मणः प्रथमे कल्पे शिवः प्रथमजस्स्मृतः ।

इत्याद्याथर्वणभाष्योक्तस्मृतेरिति भावः । **प्रकृतस्येति** । विश्वहेतुतया प्रकृतस्येत्यर्थः । **सूत्र इति** । "विशेषणभेदव्यपदेशाभ्यां च नेतरौ" इति सूत्रे सार्वज्ञ्यविशेषणादित्युक्तमित्यर्थः । ननु यौगिकत्वे 'सर्ववित्' इत्यनेन पुरुनक्ततोक्तेत्यत आह—**सर्वविदिति** । **त्रेधेति** । सामान्यविशेषतया वा, सर्वं विन्दति लभत इति वा, सर्वमुत्पादयतीत्युत्पत्त्यर्थकत्वेन वा विदिधातुर्नेय इत्युक्तमित्यर्थः । अत्ररामानुजभाष्यादौ "विशेषणभेद" इति हेतुद्वयस्य प्रत्येकं प्रधानादिमात्रनिरासकत्वमुपेत्यैकैकस्य प्रधानादिमात्रनिरासकत्ववर्णनं दूषितम् । भाष्ये तु 'विशेषणात्' इत्यस्य प्रधानमात्रव्यावर्तकत्वं, भेदव्यपदेशस्य ब्रह्मरुद्रमात्रनिषेधकत्वमुक्तम् । तत्र परोक्तदूषणालग्नतां वक्तुं अक्षरस्य सर्वज्ञत्वविशेषणे किं लब्धमित्यतः प्रवृत्तं "—

यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः ।

चन्द्रिका

यद्यपि सर्वज्ञत्वविशेषणं चित्प्रकृतिचतुर्मुखरुद्राणां अक्षरत्वनिषेधेऽपि हेतूकर्तुं शक्यं, विष्णोरन्यस्य मुख्यसार्वज्ञ्याभावात् । तथाऽपि चित्प्रकृत्यादीनामक्षरत्वे विश्वकर्तृत्वेन सर्वज्ञत्वस्यापि शक्यशङ्कत्वात्, श्रुतेरमुख्यसार्वज्ञ्यविषयत्वसम्भवाच्च जडप्रकृतिमात्रनिषेधे भाष्ये हेतूकृतम् । यद्यपि च भेदव्यपदेशः चित्प्रकृतिनिषेधेऽपि हेतूकर्तुं शक्यः, "अक्षरात्परतः परः" इति चित्प्रकृतितोऽपि भेदव्यपदेशात् । तथाऽपि नाक्षरस्याक्षरात्परतः परत्वं, विरोधादिति शङ्कोदयादक्षरभेदोक्तिं विना चित्प्रकृतितो भेदव्यपदेशो न सिद्ध्यतीति चतुर्मुखरुद्रमात्रनिषेधे भाष्ये हेतूकृतः । यद्यपि चात्र सौत्र

प्रकाशः

इति विशेषणान्न प्रकृतिः" इति भाष्यमाक्षिप्य समाधत्ते–**यद्यपीति** । प्रकृतिपदस्य टीकायां जडपरत्वेन वर्णनस्यापि तात्पर्यमुक्तं भवति । सूत्रखण्डव्याख्यानपरं "—

तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते ।

इति भेदव्यपदेशान्न विरिञ्चः । "जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः" इति भेदव्यपदेशादीशपदप्राप्तोऽपि न रुद्रः" इति भाष्यमाक्षिप्य समाधत्ते—**यद्यपि चेति** । भेदव्यपदेशकवाक्यमाह—**अक्षरादिति** । ननु विशेषणभेदव्यपदेशाभ्यां यदि जडप्रकृतिब्रह्मरुद्राणां निरासस्तर्हि "नेतरे" इति बहुवचनान्तनिर्देशः स्यादित्याशङ्क्य समाधानमाह—**यद्यपि चेति** ।

चन्द्रिका

इतरशब्दो जडप्रकृतिचतुर्मुखरुद्रपरः, तथाऽपि चतुर्मुखरुद्रयोश्चेतनत्वेनैकीकृतत्वात् द्विवचनं युक्तम्। "अक्षरत्रयमीरितम्" इति भाष्योक्तस्मृत्या चाक्षरव्यक्तीनां भेदव्यपदेशात्,

पाण्डवस्यार्जुनस्येव कार्तवीर्यार्जुनादिव ।
ब्रह्माक्षरस्य परता स्यादब्रह्माक्षराद्ध्रुवम् ॥

तदुक्तं न्यायविवरणे—"अक्षरात्परतः परस्याप्यक्षरान्तरत्ववचनात्" इति ।

प्रकाश.

एवं पृथिव्यादिदृष्टान्तोक्त्यादीनि पूर्वपक्षोपोद्बलकानि सिद्धान्तबाधकानि निरस्येदानीं, यत् "अक्षरात्परतः" इति निकृष्टत्वेन श्रुतत्वरूपं बाधकान्तरं, तदपि नेत्याह—अक्षरेति । एतेन "भेदव्यपदेश" इति सूत्रखण्डस्य, अक्षरव्यक्तीनां

अपरं त्वक्षरं या सा प्रकृतिर्जडरूपिका ।
श्रीः परा प्रकृतिः प्रोक्ता चेतना विष्णुसंश्रया ॥
तामक्षरं परं प्राहुः परतः परमक्षरम् ।
हरिमेवाखिलगुणमक्षरत्रयमीरितम् ॥

इति स्मृत्या भेदव्यपदेशादित्यप्यर्थ उक्तो भवति । पञ्चम्यन्तस्य श्लोकेनान्वयः । उभयोरर्जुनशब्दवाच्यत्वेऽपि परापरभाव इवेहापि स इत्यर्थः । ननूक्तमत्र प्रकृतहानाप्रकृतस्वीकारौ स्यातामिति, तत्र "परविद्याविषयत्वबलेन प्रकृतपरित्यागाप्रकृतग्रहणयोरुपपत्तेः"

चन्द्रिका

प्रकृताप्रकृतत्यागस्वीकारौ बाधके सति ।
दोषाय नैवैतस्यैव रेवतीष्विति वाक्यवत् ॥

यथा "एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेत" इत्यत्र यजेः प्रकृतवाचिन्येतच्छब्दे सत्यपि

प्रकाशः

इति न्यायविरणटीकोक्तमाह—प्रकृतेति । दृष्टान्तभागविवरणपूर्वं श्लोकं व्याचष्टे—यथेति । द्वितीयस्य द्वितीये पादे "समेषु कर्म युक्तं स्यात्" इति द्वादशेऽधिकरणे "त्रिवृदग्निष्टुदग्निष्टोमस्तस्य वायव्यास्वेकविंशमग्निष्टोमसाम कृत्वा ब्रह्मवर्चसकामो यजेत" इत्यग्निष्टुत्संज्ञकं यागं विधाय पुनः श्रुतं "एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेत" इति वाक्यमुदाहृत्य किं पूर्वस्मिन् यागे पशुफलाय रेवत्याधारं वारवन्तीयं गुणो विधीयते अथ कर्मान्तरमिति विशये, विशिष्टयागान्तरविधौ गौरवात्, प्रकृतहानादिदोषात्, एतच्छब्दाच्च पूर्वत्रैव फलाय गुणविधिः । न च यागस्य वारवन्तीयाख्यसामाश्रयत्वायोगः, अङ्गावतारन्यायेन यागाङ्गस्तोत्रद्वारा तदुपपत्तेः । नचाग्निष्टोमस्य स्तोत्रान्वयः फलान्वयश्च विधेय इति वाक्यभेदः, क्रत्वर्थवारवन्तीयस्याप्यग्निष्टोमस्तोत्रान्वयसिद्धेः तस्याविधेयत्वादिति प्राप्ते, आश्रयाश्रयिभावस्य क्रियाकारकरूपत्वात् यागस्य साम्नश्च क्रियाकारकभावायोगेनाश्रयाश्रयिभावानुपपत्तेः, अङ्गावतारन्यायस्याङ्गाङ्गिभाववि-

चन्द्रिका

प्रकृताग्निष्टुदाख्ययागत्यागः अप्रकृतयागान्तरस्वीकारश्च दोषाय नैव भवतः, प्रकृतपरत्वे वाक्यभेदात्, तथा "अक्षरात्परतः" इत्यस्य प्रकृतादृश्यत्वादिगुणकाक्षरपरतायाः बाधितत्वात्त्यागः, अप्रकृतप्रकृत्याख्याक्षरस्वीकारश्च। अत्र सूत्रक्रमस्तत्तद्विषयवाक्यक्रमादिति ॥

प्रकाशः

पयत्वात्, क्रत्वर्थत्वेन * वारवन्तीयस्याप्यग्निष्टोमसम्बन्धदर्शनेन प्रकृते तदसिद्धेः, शब्दगम्येऽर्थे सामान्यतो दृष्टस्यानवतारात्,* एतच्छब्दस्य च प्रस्तूयमानपरत्वात् विशिष्टं कर्मान्तरमिति सिद्धान्तितम्। अत्र यथा वाक्यभेदबलेन एतच्छब्दश्रवणेऽपि प्रकृतत्यागाप्रकृतस्वीकारौ न दोषाय, तथाऽत्रापीत्यर्थः। अत्रेति। आद्यसूत्रे "यत्तदद्रेश्यं" इत्युपक्रमगतं वाक्यं विषयः। तत्र "अदृश्यत्वादिगुणकः" इति पुल्लिङ्गनिर्देशस्तु "अक्षरात्परतः परः" इति पुल्लिङ्गपरशब्दार्थापेक्षया। अत एव भाष्ये "परतः परः प्रतीयते" इत्युक्तम्। एवं निर्देशोऽपि अक्षरात्परतः परस्य "अक्षरात्संभवति" इति अदृश्यत्वादिगुणकाक्षरस्य च एकत्वस्फोरणाय, 'अदृश्यत्वादिगुणकं' इत्युक्तौ "अक्षरात्संभवति" इत्युक्तं अक्षरं विष्णुः, परतः परस्त्वन्य इति शङ्का स्यात्, सा मा भूदित्येतदर्थम्। "विशेषण" इति द्वितीये सूत्रे तु "तपसा चीयते ब्रह्म" इति तदुत्तरवाक्यं विषयः। "रूपोपन्यासाच्च" इत्यत्र तु तदुत्तरं "यदा पश्यः पश्यते रुक्मवर्णं" इति वाक्यं विषय इति तत्क्रमात्क्रम इत्यर्थः।

* 'वारवन्तीयस्याचोदितत्वेनान्यतोऽप्राप्तस्तोत्रसंबन्धस्य फलसंबन्धस्य च विधौवाक्यभेदप्रसङ्गात्'. * इति पुस्तकान्तरपाठः.

चन्द्रिका

अन्ये तु—अचेतनं विश्वमचेतनस्य प्रधानस्यैव विकारः, न तु चेतनस्य ब्रह्मणः, वैरूप्यात् । तस्मात् "तथाऽक्षरात्सम्भवतीह विश्वम्" इत्यत्र प्रधानमेव हेतुतयोच्यत इति प्राप्ते, विश्वं न ब्रह्मविकारः, किन्तु तद्विवर्तः सर्प इव रज्ज्वाः, अधिष्ठाना-

प्रकाशः

अन्ये त्विति। अदृश्यत्वादिगुणको भूतयोनिः किं प्रधानमुत जीवोऽथ परमात्मेति सन्देहे, नूपुरादेर्हेमपरिणामस्य हेमसरूपत्वस्य दर्शनात्, रज्जुविवर्तस्य भुजङ्गादेरज्जुसारूप्यदर्शनात्, जगतो जडस्य चेतनब्रह्मसारूप्यायोगेन ब्रह्मपरिणामविवर्तत्वायोगात् "अक्षरात्सम्भवतीह विश्वम्" इत्यचेतनं प्रधानमेव जगदुपादानतयोच्यते । 'भूतयोनिः' इति योनिशब्दो यदि निमित्तमात्रवाची, तदा जीव एवादृष्टद्वारा विश्वहेतुतयोच्यते । उक्तं च—

परिणामो विवर्तो वा सरूपस्योपलक्ष्यते ।
चिदात्मना तु सारूप्यं जडानां नोपपद्यते ॥
जडं प्रधानमेवातो जगद्योनिः प्रतीयताम् ।
योनिशब्दो निमित्तं चेत्कुतो जीवनिराक्रिया ॥

इति । एवं प्राप्ते, अक्षरं भूतयोनिं प्रक्रम्य वाक्यशेषे "यः सर्वज्ञस्सर्ववित्" इत्यादिना सर्वज्ञस्य विश्वहेतुत्वावगमात् न जडं प्रधानमदृश्यत्वादिगुणकमक्षरम् । न च "अक्षरात्परतः परः" इत्ययुक्तं, तत्राक्षरशब्देन मायाशक्त्यपरपर्यायस्याव्याकृतस्य अश्नुते

चन्द्रिका

ध्यस्यमानयोश्च न सारूप्यनियमः । तदुक्तं भामत्यां—

विवर्तस्तु प्रपञ्चोऽयं ब्रह्मणोऽपरिणामिनः ।
अनादिवासनोद्भूतो न सारूप्यमपेक्षते ॥

इति । तस्माद्दृश्यत्वादिगुणकं शुद्धं ज्ञेयं ब्रह्मैवेति सिद्धान्त इत्याहुः । तन्न, निर्विशेषपरत्वेऽस्य पादासङ्गतेः । त्वन्मते ब्रह्मविवर्ततायाः आरम्भणाधिकरणादिषु सिद्धत्वेन विकाराश्रयणे-

प्रकाश

स्वकार्यमिति व्युत्पत्त्या अक्षरपदेनाभिधानात्, ब्रह्मैव "अक्षरात्स-म्भवतीह विश्वम्" इत्यत्रोच्यते । तदुक्तं भामत्यां—

अक्षरं सर्वविद्विश्वयोनिर्नाचेतनं भवेत् ।
अक्षरात्परत इति श्रुतिस्त्वव्याकृते मता ।
अश्नुते यत्स्वकार्याणि ततोऽव्याकृतमक्षरम् ॥

इति । यत्तु सारूप्याभावान्न चिदात्मनः परिणामः प्रपञ्च इति, सत्यं, विश्वं न ब्रह्मविकारः, येन सारूप्यापेक्षा, विवर्तस्तु स्यात्, विसदृशेऽपि शङ्खे पीतिमारोपदर्शनात् सारूप्यनियमाभावादिति सि-द्धान्त इत्याहुरित्यर्थः । **अनादिवासनेति** । हेतुमति विभ्रमे सादृश्याभावादनुयोगो युज्यते, अनाद्यविद्यातद्वासनाप्रवाहपतितस्तु नानुयोगमर्हतीत्यर्थः । ज्ञेयं ब्रह्मैव, न तु प्रधानं जीवात्मा वा, उपास्यत्वेनेत्यर्थः । **पादेति** । तृतीये पाद एव निवेशापत्ते-रिति भावः । **आरम्भणेति** । "तदनन्यत्वमारम्भणशब्दादिभ्यः"

चन्द्रिका

नेह पूर्वपक्षानुदयाच्च । विवर्तपरत्वे श्रुतौ रज्जुसर्पादिदृष्टान्तस्यैव वक्तव्यतयोर्णनाभ्यादिदृष्टान्तोक्त्ययोगाच्च । श्रुतेर्विवर्तपरत्वे अप्रामाण्यापातस्यान्यत्रोक्तत्वाच्च । "यद्भूतयोनिं" इति योनिपदाद्ययोगाच्च । न हि रज्जुस्सर्पस्य योनिरुच्यते, न वा सर्पः ततस्सम्भवतीति । किञ्च त्वद्रीत्या "धर्मोक्तेः" इति सौत्रपदोपात्तैः "यस्सर्वज्ञः" इत्यादिवाक्यशेषोक्तैः सार्वज्ञ्यादिकैः, तथा "सूर्यद्वारेण

प्रकाशः

इत्यत्र "कारणाद्ब्रह्मणः परमार्थतोऽनन्यत्वं व्यतिरेकेणाभावः कार्यस्यावगम्यते" इत्यादिना त्वद्भाष्यादौ विवर्तत्वस्य वर्णितत्वादिति भावः । आदिपदेन प्रकृत्यधिकरणादि ग्राह्यम् । उपलक्षणमेतत्, "न विलक्षणत्वात्" इत्यधिकरणे जगतोऽचेतनत्वादिना ब्रह्मविलक्षणत्वेन न ब्रह्मोपादानकत्वमिति प्राप्ते, वैलक्षण्येऽपि गोमयवृश्चिकादेः कार्यकारणभावोपलम्भात् तदुपादानकत्वं युक्तमिति सिद्धान्तितत्वेन परिणामत्यागेन विवर्तत्वाङ्गीकारायोगात्, एतच्छङ्कायाः तत्र सूत्र एव त्वन्मते निरासेनेहापि तथा पूर्वपक्षकरणायोगाच्चेत्यपि ध्येयम् । श्रुत्यनानुगुण्यं चाह—विवर्तेति । 'अन्यत्र' न्यायामृतादौ । योनिपदादीति । "संभवतीह विश्वम्" इति सम्भवशब्दः, "अन्नं च जायते" इत्यादिशब्द आदिपदार्थः । तेषां कारणत्वप्रत्यायकत्वादिति भावः । आदिसूत्रार्थं सिद्धान्ताननुगुणतया दूषयति—किंचेति । एवं हि सूत्रार्थः—अदृश्यत्वादिगुणको भूतयोनिः

चन्द्रिका

ते विरजाः प्रयान्ति" इति सूर्यद्वारेण गम्यत्वादिकैश्च धर्मैः विशिष्टं कथं विश्वविवर्त्ताधिष्ठानं मुमुक्षुज्ञेयं शुद्धं ब्रह्म स्यात्। यच्चोक्तं द्वितीयसूत्रे "दिव्यो ह्यमूर्तः" इति दिव्यत्वादिविशेषणं जीवाद्भेदकमिति, तन्न, वस्तुतो निर्विशेषे अदृश्ये आरोपितविशेषणस्य तत्साध्यभेदस्य चाविरोधेऽपि मुमुक्षोर्भेदभ्रमनिरासायाभेदस्यैव वक्तव्यत्वेन भेदभेदकयोरुक्त्ययोगात्। विशिष्टरूपजीवाभेदभ्रमनिरासाय तदुक्तिरिति चेन्न,

प्रकाशः

परमात्मैव, "यस्सर्वज्ञः सर्ववित्" इत्यादिना सार्वज्ञ्यादिधर्मोक्तेरिति। तथा चैवंविधं ब्रह्म कथमधिष्ठानमित्यर्थः। ननु एते धर्मा अतात्विकाः, अतो न दोषइति चेत्, तर्हि तैः प्रधानादि निरासायोगात् सिद्धान्तानुत्थितिरिति भावः। **यच्चोक्तमिति**।

दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः।
अप्राणो ह्यमनाश्शुभ्रः .... ॥

इत्यदृश्यत्वादिगुणकभूतयोनेः शारीराद्विलक्षणत्वेन दिव्यत्वामूर्तत्वादिना विशेषणान्न जीवः। तथा प्रकृतस्य भूतयोनेः "अक्षरात्परतःपरः" इत्यक्षरात्परतः प्रधानात्पञ्चमीनिर्दिष्टात्पर इति प्रथमान्तत्वेन भेदव्यपदेशान्न प्रधानं भूतयोनिरित्यर्थ इत्युक्तमित्यर्थः। तत्र एतदधिकरणबोध्ये निर्विशेषे भूतयोनिशब्दार्थे ब्रह्मणि तत्त्वतो दिव्यत्वादिविशेषणस्य भेदस्य च अभावेन ताभ्यां जीवप्रधानव्यावृत्त्ययोगात्। अरोपितयोस्तयोस्तत्र सम्भवोऽस्तीति चेत्तत्राह—**वस्तुतइति**।

चन्द्रिका

एकभ्रमनिरासाय भेदभेदकविषयभ्रमद्वयोत्पादनायोगात् । शुद्ध-बोधनेन भ्रमद्वयनिरासे च विशिष्टाभेदभ्रमस्यापि "अदृश्यत्वादि-गुणकः" इति प्रतिज्ञयैव लक्षणया शुद्धबोधिन्या निरासेन द्वितीयादिसूत्रवैयर्थ्यम् । यच्चोक्तं—तृतीयसूत्रे "पुरुष एवेदं विश्वं" इति सार्वात्म्यं रूपशब्दार्थ इति, तन्न, अस्मदुक्तरुक्मवर्ण इव सार्वात्म्ये रूपशब्दाप्रयोगात् ।

प्रकाशः

"विशेषण" इत्यादिकं लक्षणया शुद्धं बोधयतीति भेदभेदकोभय-भ्रमोऽपि निवर्तयिष्यत इत्यत आह—शुद्धबोधनेनेति । उपलक्षण-मेतत्, त्वन्मते मन्मत इव विशेषहेतोरनुपन्यासेन दिव्यपुरुष-त्वादिविशेषणेन प्रधानेऽप्ययुक्तेन द्वयोरपि निराससम्भवात् "स कारणं कारणाधिपाधिपः" इतिवदक्षरात्परतो जीवादित्यपि वक्तुं शक्यत्वेन भेदव्यपदेशेनापि द्वयोर्निरासम्भवेन प्रत्येकमेकैकनिरा-सायोगात् । विशेषणभेदाभ्यां क्रमेण जीवप्रधाननिरासे सूत्रे 'नेतरे' इत्येव स्त्रीलिङ्गेन नपुंकलिङ्गेन वा निर्देष्टव्यत्वेन 'नेतरौ' इत्यस्य अस्वारस्यं च । मन्मते तु द्वाभ्यां हेतुभ्यां क्रमेण प्रधानचेतन-योर्निरास इति 'नेतरौ' इति पुंल्लिङ्गस्य स्वारस्यमित्यपि ध्येयम् । 'रूपशब्दाप्रयोगात्' इत्युपलक्षणं, त्वन्मते पूर्वसूत्रयोरन्यतराविवक्षितै-कविज्ञाननिबन्धनसर्वविज्ञानानन्तर्गततत्वात्सर्वात्मभावस्येत्यपि ध्येयम् ।

चन्द्रिका

अत्रापि परपक्षे "अदृश्यत्वादिगुणकः" इति गुणोक्तेः, "विशेषणभेदव्यपदेशाभ्यां" इति जीवादिभ्यो भेदोक्तेश्च निर्गुणत्वाद्वैतप्रतिकूलता स्फुटैव ।

केचित्तु—अदृश्यत्वादिगुणकत्वं प्रधानस्य, अक्षरात्परतः परत्वं तु जीवस्येति प्राप्ते, द्वयमपि परमात्मन इति सिद्धान्त इत्याहुः । तन्न,

दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः ।
अप्राणो ह्यमनाश्शुभ्रो अक्षरात्परतः परः ॥

इति अमूर्तत्वव्याप्तत्वाप्राणत्वादिविशिष्टत्वेन श्रुतेऽक्षरात्परतः परे

प्रकाशः

इदमधिकरणं परैर्नारभ्यमेवेत्याह—अत्रापीति ।

केचित्त्विति। अत्र "अथ परा" इत्यादिवाक्ये प्रधानपुरुषौ प्रतिपाद्येते उत परमात्मेति संशये, "यत्तदद्रेश्यं" इत्यादिना पृथिव्याद्यचेतनगतदृश्यत्वादीनां निषेधात्, तज्जातीयमचेतनं प्रधानमेवादृश्यत्वादिगुणकं भूतयोन्यक्षरं, "अक्षरात्परतः परः" इति तु तस्याधिष्ठाता पुरुष एवेति तावेवात्र प्रतिपाद्याविति प्राप्ते, प्रधानपुरुषयोरसम्भावितस्य सार्वज्ञ्यादिधर्मस्योक्तेः, फलाभिसन्धिरहितकर्माराध्यत्वपरापराविद्याविषयत्वादिना विशेष्यमाणत्वात्, अक्षरात् अव्याकृतात् भूतसूक्ष्मात्परतः समष्टिपुरुषात् पर इति भेद व्यपदेशात्, "अग्निर्मूर्धा" इत्यादिना जगद्रूपोपन्यासाच्च न प्रधानजीवावत्रोच्येते, किन्तु परमात्मैवेत्याहुरित्यर्थः । तदुक्तं—

चन्द्रिका

जीवत्वशङ्कानुदयादिति ॥

प्रकाशः

दृश्यत्वादेर्निषेधो विकृतिमति भवत्यक्षरे सन्निकर्षा-
त्पश्चान्युक्ताक्षरं यत्तदवधिकपरः पञ्चविंशोऽस्तु मा भूत् ।
सर्वज्ञत्वादिदृष्टेः प्रथमसमुदितं त्वक्षरं ब्रह्म शुद्धं
पश्चादुक्तं तु जीवादिकमवधितया भेदतस्तत्परोक्तेः ॥

इति । **जीवत्वशङ्केति** । उपलक्षणमेतत्, मन्मतरीत्या निरवकाशोपादानत्वादिना पूर्वपक्षसंभवे सावकाशदृश्यत्वादिनिषेधेनेह नियमेन अचेतनोपस्थित्ययोगात्, "अवर्णमचक्षुःश्रोत्रं" इत्यादिना चेतनधर्मब्राह्मणत्वादिवर्णचक्षुरादिकरणनिषेधेनेह भूतयोनिश्चेतन इत्यपि वक्तुं शक्यत्वेन तेन प्रधानमात्रपूर्वपक्षायोगात् । द्वितीयसूत्रे अक्षरव्यक्तीनां भेदव्यपदेशासिद्धेः तेन प्रकृतिनिरासस्य क्लिष्टत्वादित्यपि ज्ञेयम् ॥

यत्तु कश्चिदाह—अदृश्यत्वादिगुणकं प्रधानं जीवो वा शिवो वेति विशये, महदादिपरिणामिनो भूतयोनित्वसम्भवात् प्रधानमक्षरं, "प्रधानममृताक्षरं" इति श्वेताश्वतरश्रुतौ अमृतशब्दे जीवेऽक्षरपदप्रयोगात् जीवो वेति प्राप्ते, सार्वज्ञ्यादितद्धर्मोक्तेः शिव एवेति, तन्न, "नारायणाद्ब्रह्मा जायते" "नारायणाद्रुद्रो जायते" "रुद्रस्य शिर उत्पिपेष"

न यस्येन्द्रो वरुणो न मित्रो व्रतमर्यमा न मिनन्ति रुद्रः ।

चन्द्रिका

टीकाक्षरार्थस्तु—**पृथिव्यादिदृष्टान्तेनेति** । श्रुतौ ऊर्णनाभिदृष्टान्तस्य प्राथम्येऽपि तत्र 'सृजते' इत्यनेन कर्तृत्वप्रतीतेः 'पृथिव्यादि'

प्रकाशः

इत्यादिना जननमरणाज्ञानादिमति रुद्रे मुख्यसार्वज्ञ्यायोगात् ।

तत्कर्म हरितोषं यत्सा विद्या तन्मतिर्यया ।

"अथ परा यया स हरिर्वेदितव्यो योऽसावदृश्यो निर्गुणः परः परमात्मा" "ऋगाद्या अपराः विद्याः" इत्यादिवचनासिद्धपराविद्याविषयत्वरूपविष्णुलिङ्गविरोधेन, शिव इति सिद्धान्तस्यानुदयात् । "अन्यं" इति प्रसिद्धेशशब्दिताद्रुद्रादस्य भूतयोन्यक्षरस्य भेदोक्तेश्च ।

तामक्षरं परं प्राहुः परतः परमक्षरम् ।
हरिमेव .... ॥

इत्यादिस्मृतिविरोधाच्च । आथर्वणभाष्योदाहृतानेकवचनजातविरोधाच्चेत्यादि ध्येयम् ।

"यथोर्णनाभिस्सृजते गृह्णते च" इति श्रवणात् 'ऊर्णनाभ्यादिदृष्टान्तेन' इति वाच्ये "पृथिवी" इत्याद्युक्तिः टीकायां न युक्तेत्याशङ्क्याह—**श्रुताविति** । "ऊर्णनाभिपृथिव्यादिदृष्टान्तेन अक्षरस्य जगदुपादानत्वमुक्त्वा" इति तत्त्वप्रदीपवाक्यं तु अतद्गुणसंविज्ञानाश्रयेण वा, ऊर्णनाभिदेहस्योपादानत्वाभिप्रायेण वा कथञ्चिन्नेयमिति भावः । "तच्च तस्यां अक्षरात्परत इति सामानाधिकरण्येनोपपन्नम्" इति वाक्यं सामानाधिकरण्ये हेतूक्त्या व्यनक्ति—

चन्द्रिका

ञ्यादि' इत्युक्तम् । **सामानाधिकरण्येनेति** । चित्प्रकृतेरुत्तमादुत्तमस्याभावेन 'अक्षरात्परतः' इति पञ्चम्योर्वैयधिकरण्यायोगादिति भावः । **उक्तार्थे हेतुतयेति** । "तपसा चीयते" इत्यत्रालोचनार्थेन तपश्शब्देनाज्ञानप्रतीतौ तन्निरासाय "यस्य ज्ञानमयं तपः" इत्यनेनोक्ते पूर्णज्ञानत्वे हेतुतया सार्वज्ञ्योक्तेरित्यर्थः । **सूत्रखण्डस्यार्थान्तरमाहेति** । सूत्रे विशेषणशब्दस्य न केवलं सर्वज्ञत्वविशेषणादित्येवार्थः, किन्तु अक्षरात्परतः परत्वविशेषणादित्यप्यर्थः । एवं भेदशब्दस्य हिरण्यगर्भाद्रुद्राद्वा भेदमात्रं नार्थः, किन्त्वक्षरव्यक्तीनां भेदोऽपि । तथा चाक्षराणां भेदव्यपदेशादक्षरात्परतःपरत्वमक्षरस्यैव विशेषणमित्यपि सूत्रयोजनेति भाष्यार्थ इत्यर्थः । 'इत्युक्त्वा प्रतीयते' इति भाष्ये क्रिययोस्समानकर्तृकत्वाभावेऽपि क्त्वाप्रत्ययः

यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यते ।

इतिवद्द्रष्टव्यः ॥

प्रकाशः

चित्प्रकृतेरिति । द्वितीयसूत्रे "—"तपसा चीयते ब्रह्म" इत्यत्र अज्ञानप्रतीतौ तन्निरासाय "यस्य ज्ञानमयं तपः" इत्युक्तार्थे हेतुतया अदृश्यत्वादिगुणकस्य सार्वज्ञ्यविशेषणोक्तेः" इति वाक्यं व्यनक्ति—**तपसेति** । तपसा सम्बध्यते, ब्रह्म कर्तृ, अतपादिति फलितोऽर्थः । अर्थान्तरं विशदयति—**सूत्रेति** । पूर्वपक्षभाष्ये अनुपपत्तिं समाधत्ते—**इत्युक्त्वेति** । तत्र यथा 'वर्तमानः' इत्यध्याहारस्तथाऽत्रापि, 'इत्युक्त्वा' 'श्रुते वाक्ये' इति वा "इत्यभिधानात् परतः परः प्रतीयते" इति वा अध्याहारेण योज्यमिति भावः ॥

॥ इति अदृश्यत्वाधिकरणम् ॥

— अथ वैश्वानराधिकरणम् —

अदृश्यत्वादिगुणेषु सर्वगतत्वं "यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते" इति वैश्वानरस्योक्तमिति,

तत्त्वप्रकाशिका

अत्र लोकतोऽन्यत्रप्रसिद्धवैश्वानरनाम्नः पाचकत्वाद्यनेकलिङ्गसमन्वयसिद्धये ब्रह्मणि समन्वयप्रतिपादनादस्ति शास्त्रादिसङ्गतिः। श्रुत्यादिसङ्गतिं विषयवाक्योदाहरणपूर्वकं विषयादिकं च सूचयति— **अदृश्यत्वादीति**। गताधिकरणेऽदृश्यत्वादिगुणा विष्णोरुक्ताः। तेषु सर्वगतत्वं चोक्तं "नित्यं विभुं सर्वगतम्" इति। तददृश्यत्वादिगुणेषूक्तं सर्वगतत्वं च च्छन्दोगश्रुतावभिविमानपदेन वैश्वानरस्योक्तम्, अभितो विगतं मानं मर्यादा यस्येति,

मानं ज्ञानं लयश्चैव मर्यादा चापि कथ्यते।

इत्यभिधानात्। तस्य च वैश्वानरस्य विष्णोरितरत्वे सर्वगतत्वमप्यन्यस्य प्रसज्येतेत्यवश्यनिर्णेयत्वम्। स वैश्वानरो विषयः। किं विष्णुरन्यो वेति संशयः। सर्वगतत्वमन्यत्र प्रसिद्धिश्च सन्देहबीजम्। नायं वैश्वानरो विष्णुः, किंत्वग्निर्देवता तेजोभूतं वा स्यादिति पूर्वःपक्षः, वैश्वानरश्रुतेः। न च वाच्यम् सर्वगतत्वलिङ्गाद्वैश्वानरो विष्णुरिति, लिङ्गस्य श्रुतितो दुर्बलत्वात्। न च लिङ्गस्य निरवकाशत्वेन प्राबल्याच्छ्रुतिबाधकत्वमिति मन्तव्यम्, श्रुतेरपि प्रसिद्धितो निरवकाशत्वात्। श्रुतेर्विष्णुविषयत्वेऽग्न्यादिविषयतया लोक-

अत आह—

ओम् वैश्वानरः साधारणशब्दविशेषात् ओम् ॥२४

अग्नाविष्णोःसाधारणस्य वैश्वानरशब्दस्य विष्णावेव प्रसिद्धात्मशब्देन विशेषणाद्वैश्वानरो विष्णुरेव ॥ २४ ॥

ओम् स्मर्यमाणमनुमानं स्यादिति ओम् ॥ २५॥

तत्त्वप्रकाशिका

प्रसिद्धिबाधात् । वैदिकाविद्याभेदव्यवहारविरोधाच्च । न हि वैश्वानरश्रुतेरग्न्यादिविषयत्वाभावे व्यवहारस्य गत्यन्तरमस्ति । अतः प्रासिद्धिलिङ्गयोरुभयोरापि निरवकाशत्वेन वैश्वानरश्रुतेरग्नाविष्णोस्साधारण्यमेव स्यान्नतु लिङ्गेन विष्णुपरतानिश्चयः । अतो न वैश्वानरो विष्णुरिति न सर्वगतत्वं तस्येति भावः। सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे—अत इति । अयं वैश्वानरो विष्णुरेव, "आत्मानं वैश्वानरं" इत्यात्मशब्दात्। न चोक्तरीत्या साधारणवैश्वानरश्रुतिसद्भावादनिर्णय इति वाच्यम्, साधारणस्यापि वैश्वानरशब्दस्य

आत्मशब्दः परे विष्णौ नान्यत्र क्वचिदिष्यते ।

इत्यादौ विष्णावेव प्रसिद्धत्वेनान्यत्रानवकाशात्मशब्दसमानाधिकरण्येन विष्णुपरत्वस्य सम्भवात्, प्रसिद्ध्यादेरन्यथाऽपि सिद्ध्या सावकाशत्वस्य वक्ष्यमाणत्वादिति भावः ॥ २४ ॥

नन्वात्मशब्दस्यामुख्यवृत्तिमभ्युपेत्य अग्न्यादीनामेव वैश्वानरत्वं किं न स्यादित्याशङ्कां परिहर्तुं हेत्वन्तरेण वैश्वानरस्य विष्णुत्वं निश्चाययत्सूत्रमुपन्यस्य व्याचष्टे—स्मर्यमाणमिति । "अहं

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।

इति स्मर्यमाणमत्रापि स एवोच्यते इत्यस्यानुमापकम्, समाख्यानात् । इतिशब्दः समाख्याप्रदर्शकः ॥ २५ ॥

ओम् शब्दादिभ्योऽन्तः प्रतिष्ठानान्नेति चेन्न तथा दृष्ट्युपदेशादसम्भवात्पुरुषविधमपि चैनमधीयते ओम् ॥ २६ ॥

तत्त्वप्रकाशिका

वैश्वानरो भूत्वा" इति स्मृत्युक्तं विष्णोर्वैश्वानरत्वमत्र वैश्वानरविद्यायामपि स गीतोक्तो भगवानेव वैश्वानरपदेनोच्यत इत्यस्यार्थस्यानुमापकं भवति । स्मृतौ विष्णोर्वैश्वानरत्वोक्तेर्वैश्वानरविद्यायामप्यसावुच्यत इति भावः । स्मृत्युक्तवैश्वानरस्य विष्णुत्वेऽप्यत्रोक्तस्य कुतो विष्णुत्वमित्यत आह—**समाख्यानादिति** । समाख्यानयुक्तिर्न सूत्रितेत्यतआह–**इतीति** । अनेन 'इति स्मर्यमाणं' इत्यन्वयः सूचितो भवति ॥ २५ ॥

वैश्वानरस्य विष्णुत्वमाक्षिप्य समादधत्सूत्रमुपन्यस्याऽऽक्षेपांशं तावद्व्याचष्टे—**शब्दादिभ्यइति** । यदुक्तम्, आत्मशब्दविशेषणात्समाख्यानाच्च वैश्वानरस्य विष्णुत्वनिश्चय इति, तदयुक्तम्, यथा खलु वैश्वानरस्य विष्णुत्वनिश्चायकात्मशब्दादि विद्यते, तथाऽग्नित्वनिश्चायकस्यापि विद्यमानत्वात् । तथा हि—वैश्वानरशब्दस्यात्मशब्दसमा-

"अयमग्निर्वैश्वानरः" "वैश्वानरमृत आजातमग्निं" इत्यादि-शब्दः "वैश्वानरे तद्धुतं भवति हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीयः" इत्याद्यग्निलिङ्गमादिशब्दोक्तम्, "येनेदमन्नं पच्यते तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयं" इत्यादिना पाचक-

तत्त्वप्रकाशिका

नाधिकृतत्ववदग्निशब्दसमाधिकृतत्वं च श्रूयते "अयमग्निः" इति बृहदारण्यके, "वैश्वानरं" इत्यस्यामृचि च । तथाऽग्निलिङ्गं च वैश्वानरे होमाधिकरणत्वं गार्हपत्याद्यङ्गत्वं च श्रूयते "वैश्वानरे तद्धुतं" इत्यादौ । तथा वैश्वानरे पाचकत्वाख्यमग्निकर्म च श्रूयते "अयमग्निर्वैश्वानरो योऽयमन्तः पुरुषे येनेदमन्नं पच्यते यदिदमद्यते" इति बृहदारण्यके, "तद्यद्भक्तं" इति च्छान्दोग्ये च । तस्माद्वैश्वा-नरस्य विष्णुत्वज्ञापकवत् अग्नित्वज्ञापकस्यापि सत्त्वान्न विष्णुरेवायमिति निश्चयो युज्यत इत्यर्थः । अत्र सर्ववैश्वानरविद्यानां विचार्यत्वात्त-त्तद्वाक्योद्धारो युक्त एव, समाख्यारूपेण वा । "मूर्धानं दिवः" इति मन्त्रार्थः—दिवः कारणभूतमूर्धानं पृथिव्याः कारणभूतपादं जनानां सम्यग्ज्ञानायाभिव्यक्तम् सर्वज्ञमखण्डेशशमत्यन्नं जनानां पातारं वैश्वानरमग्निं देवाः स्वास्यतयाऽकुर्वन्निति । गतिसाधनत्वा-दरतिः पादः । "ऋताय जातं" इति समाख्यानात्सप्तमी तादर्थ्ये । "अन्नं थं" इति हि श्रुतिः । "अग्निर्देवानां मुखं" इति च । "वैश्वानरे तद्धुतं भवति" इति वाक्यार्थः—"एवं विद्य-

त्वेनान्तः प्रतिष्ठानं च प्रतीयते । तस्मान्न विष्णुरिति चेत्, न, "अथ हेममात्मानमणोरणीयांसं परतः परं विश्वं हरिमुपासीत" इति "सर्वनामा सर्वकर्मा सर्वलिङ्गः सर्वगुणः सर्वकामः सर्वधर्मः सर्वरूप इति स य एतमेवमात्मानं विश्वं हरिमारादरमुपास्ते तस्य सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेषु देवेषु

तत्त्वप्रकाशिका

यद्यपि चण्डालायोच्छिष्टं प्रयच्छेदात्मनि हैवास्य तद्वैश्वानरे हुतं स्यात्" इति वाक्यादवगन्तव्यः । भक्तमन्नम् । परिहारसूत्रांशं व्याचष्टे—**नेति** । उभयत्र श्रुत्यादिसाम्याद्वैश्वानरस्य विष्णुत्वनिश्चयायोग इति न युक्तम्, उभयत्र श्रुत्यादिसाम्येऽपि सावकाशत्वनिरवकाशत्वबलान्निश्चयोपपत्तेः । तत्र यदग्निनाम लिङ्गं कर्म च वैश्वानरे श्रूयते, तद्विष्णौ सावकाशं, "अथ हेममात्मानं" इत्यग्न्यादिनामलिङ्गकर्मवत्त्वेन विष्णोरुपासनोपदेशात् । न चात्मशब्दादेरन्यत्रास्त्यवकाशः । अतो निरवकाशेन सावकाशबाधोपपत्तेर्युज्यते वैश्वानरस्य विष्णुत्वनिश्चय इति भावः । न च वाच्यम्, उपानार्थमुक्तत्वादेव "योषितमग्निं ध्यायीत" इत्यादाविवासत्त्वम्,

नाविद्यमानं ब्रुवते वेदा ध्यातुं न वैदिकाः ।

इत्यादिवचनात् । वाक्यान्तरस्याविरोधेन योऽर्थस्स्थाप्यते, तदर्थत्वाच्च । 'विश्वं' पूर्णम् । 'आरात्' समीपे स्वहृदये । प्रथमेतिशब्दो विधिसमाप्तौ । द्वितीयस्य 'इत्युपासीत' इत्यन्वयः ।

सर्वेषु वेदेषु कामचारो भवति" इति तत्तन्नामलिङ्गादिना तस्यैव दृष्ट्युपदेशान्महोपनिषदि ।

अनात्तत्वादनात्मान ऊनत्वाद्गुणराशितः ।

अब्रह्माणः परे सर्वे ब्रह्माऽऽत्मा विष्णुरेव हि ॥

इत्यादिना "को न आत्मा किं ब्रह्म" इत्यारम्भाच्च अन्येषामसम्भवात् विष्णुरेव वैश्वानरः । "चन्द्रमा मनसो जातः, चक्षोस्सूर्यो अजायत" इत्यादिना यः पुरुषाख्यो विष्णुरभिहितः, तद्विधमेवात्र "मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मा"

तत्त्वप्रकाशिका

प्रकरणबलाच्च वैश्वानरस्य विष्णुत्वनिश्चयो भवतीत्याह—**अनात्तत्वादिति** । "को न आत्मा किं ब्रह्म" इति विचारपूर्वकं वैश्वानरविद्याया आरभ्याधीतत्वेन विष्णुप्रकरणत्वाच्च वैश्वानरो विष्णुरेवेति निश्चयो भवति, "अनात्तत्वात्" इति वचनेन विष्णोरन्येषामात्मत्वाद्यसम्भवादित्यर्थः । श्रुतिसमाख्यया च वैश्वानरस्य विष्णुत्वमुपपादयति—**चन्द्रमा इति** । यः पुरुषाख्यो विष्णुः पुरुषसूक्ते "शीर्ष्णो द्यौस्समवर्तत । चक्षोस्सूर्यो अजायत । प्राणाद्वायुरजायत पद्भ्यां भूमिः" इत्यादिना वाक्येन द्युम्वादिजनकशीर्षादिमानभिहितः तद्विधमेवात्र वैश्वानरं चाधीयते च्छन्दोगाः "मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा पृथिव्येव पादौ" इत्यादिना वाक्येन । अतः पुरुषसूक्तसमाख्ययाऽपि विष्णुरेव वैश्वानर इत्यर्थः । ननु

इत्यादिना एनं वैश्वानरमधीयते। चशब्देन सकलवेदतन्त्रपुराणादिषु विष्णुपरत्वं पुरुषसूक्तस्य दर्शयति। तथा च ब्राह्मे—

यथैव पौरुषं सूक्तं नित्यं विष्णुपरायणम्।
तथैव मे मनो नित्यं भूयाद्विष्णुपरायणम्॥

इति। चतुर्वेदशिखायां च—

सहस्रशीर्षा पुरुषस्सहस्राक्षः सहस्रपात्।

इति एष ह्येवाचिन्त्यः परः परमो हरिरादिरनादिरनन्तोऽनन्तशीर्षोऽनन्ताक्षोऽनन्तबाहुरनन्तगुणोऽनन्तरूपः" इति। बृहत्संहितायां च—

यथा हि पौरुषं सूक्तं विष्णोरेवाभिधायकम्।
न तथा सर्ववेदाश्च वेदाङ्गानि च नारद॥

तत्त्वप्रकाशिका

पुरुषसूक्तस्य विष्णुपरत्वे भवेत्तत्समाख्यैतद्विद्याया विष्णुपरत्वं, तदेव कुत इत्यत आह—चशब्देनेति। विष्णुपरत्वं पुरुषसूक्तस्य प्रसिद्धमिति सूचयतीत्यर्थः। अपिपदेनैवोभयसमुच्चयसिद्धेर्नान्यत्रोपक्षीणश्चशब्दः। किं तद्वेदादीत्यतस्तदुदाहरति—तथा चेति। श्रुतेः प्रथमप्रतिज्ञानेऽपि तस्याः पुरुषसूक्तमुपन्यस्य विष्णुपरतया व्याख्यात्रचाः साक्षात्प्रतिज्ञातार्थासाधकत्वान्न प्रथममुदाहणम्। प्रतिज्ञात्वाधिक्यक्रमाभिप्राया। 'परः' विलक्षणः। आदिपदेन

इत्यादि ।

यस्माद्यज्जायते चाङ्गाल्लोकवेदादिकं हरेः ।
तन्नामवाच्यमङ्गं तद्यथा ब्रह्मादिकं मुखम् ॥

इति नारदीयवचनान्नाभेदोक्तिविरोधः ॥ २६ ॥

ओम् अत एव न देवता भूतं च ओम् ॥ २७ ॥

अग्निवैश्वानरादिशब्दः तेजसि भूते अग्निदेवतायां च प्रसिद्धोऽप्यतः पूर्वोक्तहेतुत एवात्र न सा तच्चाभिधीयते ॥ २७ ॥

तत्त्वप्रकाशिका

सर्वतः पौरुषे सूक्ते गुणा विष्णोरुदीरिताः ।

इति ब्रह्मतर्कादिग्रहणम् । ननु पुरुषसूक्ते द्युभ्वादिजनकशीर्षादिमत्त्वं पुरुषस्योच्यते, वैश्वानरविद्यायां पुनर्वैश्वानरस्य तदभेदः । अतो विरुद्धार्थत्वान्नेयं समाख्येत्यत आह—**यस्मादिति** । वैश्वानराङ्गानां मूर्धाद्यभेदोक्तावपि न पुरुषसूक्तवैश्वानरविद्ययोर्विरोधः, अभेदोक्तेरपि तज्जन्यजनकभावविवक्षावत्त्वादिति भावः ॥ २६ ॥

ननु वैश्वानरशब्दस्य देवताभूतयोः प्रसिद्धत्वात् अत्राप्यसौ तत्परः किं न स्यादित्यशङ्कां परिहरत्सूत्रमुपन्यस्य व्याचष्टे—**अत एवेति** । यद्यपि वैश्वानरशब्दोऽन्यत्रप्रसिद्धः, तथाऽपि नात्र तेनान्यदभिधीयते, आत्मशब्दादिहेतोरेव, तस्य चान्यत्र निरवकाशत्वादिति भावः । अत्राग्न्यादिग्रहणं विद्यान्तरोपलक्षणार्थम् ॥ २७ ॥

नन्वग्न्यादिशब्दानामग्न्यादिवाचित्वाभावे ब्रह्मैकवाचित्वे च प्रसिद्धिविरोधः स्यात्, तस्याःकारणान्तराभावात् । अतः प्रसिद्धयन्यथा-

ओम् साक्षादप्यविरोधं जैमिनिः ओम् ॥ २८ ॥

नाग्न्यादयश्शब्दा अग्न्यादिवाचकाः। तथाऽपि साक्षादेवानन्ययोगेन ब्रह्मवाचकैः शब्दैः व्यवहारार्थं अनभिज्ञानाच्च अन्यत्र व्यवहरन्तीत्यभ्युपगमेऽविरोधं जैमिनिर्वक्ति।

व्यासचित्तस्थिताकाशादवच्छिन्नानि कानि चित्।
अन्ये व्यवहरन्त्येतान्यूरीकृत्य गृहादिवत् ॥

इति स्कान्दवचनान्न मतानां परस्परविरोधः ॥ २८ ॥

तत्त्वप्रकाशिका

नुपपत्त्याऽन्येषां वाच्यत्वमित्याशङ्कां परिहरत्सूत्रमुपन्यस्य व्याचष्टे—**साक्षादिति**। यद्यप्यग्न्यादिशब्दा नाग्न्यादिवाचकाः, किंतु ब्रह्मवाचका एव, तथाऽपि न प्रसिद्धिविरोधः, अनन्ययोगेन ब्रह्मवाचकैरापि तैर्ज्ञानिनो हानादिसिद्ध्यर्थमन्यत्राग्न्यादौ व्यवहरन्ति, तदन्ये तु ज्ञानाभावादेवेत्यभ्युपगमात्। एवमभ्युपगमे च प्रसिद्धेरन्यथोपपत्तिसिद्धेर्न तद्विरोध इति जैमिनिराचार्यो वक्तीत्यर्थः। ननु जैमिन्यादिमतानां भगवन्मताविरोधित्वे जैमिन्यादिग्रहणवैयर्थ्याद्विरोधित्वे च कथं विरुद्धराद्धान्तेन परिहार इत्यत आह—**व्यासेति**। जैमिन्यादिमतानां न व्यासमतविरोधः। तथाऽपि तन्मतैकदेशोररीकाराभिप्रायेण जैमिन्यादिग्रहणोपपत्तिरिति भावः। 'चित्तस्थिताकाशात्' इति चित्तस्थितज्ञानाख्याकाशात्। बहुवचनं वक्ष्यमाणमतविवक्षया ॥ २८॥

ननु लौकिकप्रसिद्धेरज्ञानादिमूलत्वेनान्यथोपपत्तावपि वैदिकाग्न्यादि

ओम् अभिव्यक्तेरित्याश्मरथ्यः ओम् ॥ २९ ॥

तत्रतत्र प्रसिद्धावप्यग्नयादिषु ब्रह्मणोऽभिव्यक्तेरग्नयादिसूक्तनियम इत्याश्मरथ्यः ॥ २९ ॥

ओम् अनुस्मृतेर्बादरिः ओम् ॥ ३० ॥

तत्रतत्रोक्तस्य विष्णोरग्नयादिष्वनुस्मर्यमाणत्वात्तन्नियम इति बादरिः ॥ ३० ॥

तत्त्वप्रकाशिका

सूक्तविद्यादिप्रसिद्ध्यन्यथानुपपत्त्या अग्नयादीनां वाच्यत्वं स्यात्, तत्राज्ञानादिमूलत्वकल्पनायोगेनान्यथोपपत्त्यभावात् । नापि व्यवहारार्थत्वेनान्यथोपपत्तिरनादित्वादित्याशङ्कां परिहरत्सूत्रं पठित्वा व्याचष्टे— **अभिव्यक्तेरिति** । न वैदिकाग्नयादिसूक्तादिप्रसिद्ध्यन्यथानुपपत्त्याऽन्येषां सूक्तादिप्रतिपाद्यत्वं, तत्रतत्र सूक्तादौ परब्रह्मण एव प्रतिपाद्यत्वेऽग्नयादीनामप्रतिपाद्यत्वेऽग्नयादिसूक्तादिभिर्ब्रह्मोपास्तावग्नयादिष्वेव स्वेच्छया ब्रह्मणोऽभिव्यक्तिनियमात्तदभिप्रायेण प्रसिद्धेरुपपत्तेरित्याश्मरथ्याचार्यो वक्तीत्यर्थः ॥ २९ ॥

प्रकारान्तरेण सूक्तादिनियमस्यान्यथोपपत्तिं वदत्सूत्रमुपन्यस्य व्याचष्टे—**अनुस्मृतेरिति** । विष्णोरेवाग्नयादिविद्याप्रतिपाद्यत्वेऽपि तस्य तत्तत्सूक्ताद्युपासकैरग्नयादिष्वेव प्रतिपत्तव्यत्वाभिप्रायेणाग्नयादिसूक्तादिनियमोपपत्तेर्न तदन्यथानुपपत्त्याऽन्येषां वाच्यत्वं वाच्यमिति बादरिराचार्यो वक्तीत्यर्थः ॥ ३० ॥

ओम् सम्पत्तेरिति जैमिनिस्तथाहि दर्शयति ओम्॥

साक्षादप्यविरोधं वदन् जैमिनिः सूक्तादिनियममग्न्यादिसम्प्राप्त्या मन्यते "तं यथायथोपासते तदेव भवति" इति दर्शयति ॥ ३१ ॥

तत्त्वप्रकाशिका.

रीत्यन्तरेण सूक्तादिनियमस्यान्यथोपपत्तिं कथयत्सूत्रमुपन्यस्य व्याचष्टे—**सम्पत्तेरिति** । अग्न्यादिसूक्तादिषु परब्रह्मण एव प्रतिपाद्यत्वेऽग्न्यादिसूक्तादिभिरग्न्यादौ भगवदुपास्तावग्न्यादिप्राप्त्यभिप्रायेण सूक्तादिनियमोपपत्तेर्न तदन्यथानुपपत्त्याऽन्येषां वाच्यत्वं मन्तव्यमिति जैमिनिराचार्यो मन्यत इत्यर्थः । जैमिनिमतं किमर्थं पुनरुच्यते इति मन्दाशङ्कानिवृत्त्यर्थं लौकिकव्यवहारे साक्षाद्ब्रह्मवाचकत्वेऽपि शब्दानामविरोधं वदन् जैमिनिः सूक्तादिव्यवहारस्याग्न्यादिप्राप्त्याऽन्यथोपपत्तिं वर्णयतीत्युक्तम् । नन्वग्न्यादिषु भगवदुपास्तावग्न्यादिप्राप्तिर्भवतीत्येतत्कुत इत्यतः, सूत्रसूचितां श्रुतिमुदाहरति—**तमिति** । तदेव 'भवति' प्राप्नुवन्ति । अत्र व्यवहारस्योपचरितत्वाङ्गीकारे प्रागुक्तैवानुपपत्तिः ॥ ३१ ॥

यदुक्तमग्न्यादिसूक्तादिभिर्ब्रह्मोपासकस्याग्न्यादिप्राप्तिरिति, तच्छ्रुत्युक्तमपि न युक्तम्, "मद्भक्ता यान्ति मामपि" इत्यादेरन्योपासकस्यान्यप्राप्तेरयोगात् । "श्रुतोपनिषत्कगत्यभिधानाच्च" इत्यादौ तदन-

न ह्यन्योपासकोऽन्यं प्राप्नुत इति युज्यत इत्यत आह—

ओम् आमनन्ति चैनमस्मिन् ओम् ॥ ३२ ॥

'एनं' विष्णुं, 'अस्मिन्' अग्न्यादौ, आमनन्ति, "योऽग्नौ तिष्ठन् य एष एतस्मिन् अग्नौ तेजोमयोऽमृतमयः पुरुषः" इत्यादिना ॥ ३२ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते ब्रह्मसूत्रभाष्ये प्रथमाध्यायस्य द्वितीयः पादः ॥

तत्त्वप्रकाशिका

भ्युपगपाच्चेति भविनाशङ्क्य तत्परिहारतया सूत्रमवतार्य व्याचष्टे– न हीति । न विष्णूपासकस्याग्न्यादिप्राप्त्युक्तिरयुक्ता, अग्न्यादिप्राप्तिपदेन तदन्तर्गतभगवत्प्राप्तेर्विवक्षितत्वात्, यतोऽग्न्यादावपि विष्णुमामनन्ति श्रुतय इति भावः । चशब्दः शङ्काव्यावर्तकः । अतोऽयं वैश्वानरो विष्णुरेवेति तस्यैव सर्वगतत्वमिति सिद्धम् ॥ ३२ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य ब्रह्मसूत्रभाष्यस्य टीकायां तत्त्वप्रकाशिकायां जयतीर्थमुनिविरचितायां प्रथमाध्यायस्य द्वितीयः पादः

— श्री मध्वान्तर्गत श्रीवेदव्यासार्पणमस्तु —

चन्द्रिका

ओम् वैश्वानरः साधारणशब्दविशेषात् ओम् ॥

अत्र यद्यपि वैश्वानरनाम्नः सूत्र एवाग्नाविष्णोः साधारण्यस्योक्ततयोभयत्रप्रसिद्धता, तथाऽप्यन्यत्रप्रसिद्धपाचकत्वादिबहुलिङ्गसमन्वयस्याप्यत्रोक्तिर्बह्वनुग्रहस्य च न्याय्यत्वात् प्रथमातिक्रमे कारणाभावाच्च पादसङ्गतिरित्येके । इतरे तु—अन्यत्रप्रसिद्धलिङ्गांशेन द्वितीयपादसम्बन्धात्, उभयत्रप्रसिद्धनामांशेन च तृतीयपादसम्बन्धादुभयानुग्रहाय पादद्वयमध्येऽस्य निवेश इत्याहुः । तन्न, "अ-

प्रकाशः

ओम् वैश्वानरः साधारणशब्दविशेषात ओम् ॥ अत्र टीकायां "लोकतोऽन्यत्रप्रसिद्धवैश्वानरनाम्नः पाचकत्वाद्यनेकलिङ्गसमन्वयासिद्धये" इत्यादिना अस्य नयस्य अत्र पादे अन्तर्भाव उक्तः । स च सुधायां—"अस्याधिकरणस्य नात्रान्तर्भावः सम्भवति, नामात्मकशब्दसमन्वयार्थत्वात् । नापि पूर्वत्र, लिङ्गसमन्वयस्याप्यत्र सिद्धत्वात् । न चोभयबहिर्भावः, अन्यत्रप्रसिद्धशब्दविषयत्वात् । न चावक्तव्यता, समन्वयासिद्धिप्रसङ्गात् । तत्कथमित्यतः "लिङ्गाधिका" इत्यत्र अन्तर्भावः समर्थितः । यद्वा—पादद्वयार्थत्वेन एकत्र प्रवेशानुपपत्तेः पादद्वयशेषोऽयम्" इत्यादिना ग्रन्थेन विवृतः । तत्र "लोकतोऽन्यत्र प्रसिद्ध" इत्यंशस्य सूत्रविरोधाशङ्कां समाधातुमाह—**अत्र यद्यपीति** । उत्तानदृशां समाधिद्वयमनूद्य निराह—**तथापीति** । नाम्न उभत्रप्रसिद्धत्वेऽपीत्यर्थः । **प्रथमेति** । नामांशेन तृतीये, लिङ्गांशेन

चन्द्रिका

न्यत्रप्रसिद्धवैश्वानरनाम्नः" इति टीकाविरोधात्। सूत्रोपात्तवैश्वानरशब्दस्यैवान्यत्रप्रसिद्धिसम्भवे उक्तकल्पनाद्वयायोगाच्च। तस्मादित्थं पादसङ्गतिः—वैश्वानरशब्दस्य श्रुत्यन्तरेऽग्नौ प्रयोगाद्वा, विषयवाक्येऽग्निशब्दसामानाधिकरण्याद्वाऽन्यत्रप्रसिद्धता नाभिप्रेता, येन "स्थूलभुग्वैश्वानरः प्रथमः पादः" इति श्रुत्यन्तरे विष्णावपि प्रयोगाद्वा, "आत्मानं वैश्वानरं" इति विषयवाक्ये "गौणश्चेन्नात्मशब्दात्" इत्यत्र विष्णुसाधारणतयोक्तात्मशब्दसामानाधिकरण्याद्वोभयत्रप्रसिद्धता स्यात्। किन्तु लोकतः। अत एव टीकायां "लोकतोऽन्यत्रप्रसिद्ध" इत्युक्तम्। सूत्रोक्तं साधारण्यं

प्रकाशः

लिङ्गपादे अन्तर्भावप्राप्तौ प्रथमस्य लिङ्गपादान्तर्भावस्य अतिक्रमे कारणाभावाच्चेत्यर्थः। 'सम्भवे' इत्युक्तसम्भवप्रकारमाह–**तस्मादिति**। 'सङ्गतिः' अन्तर्भावरूपा। यदि "आकाशोऽर्थान्तर" इत्यदाविव "वैश्वानरमृत आजातमग्निं" इत्यन्यत्र प्रयोगेण वा, सर्वगतत्वादेरादित्यादिशब्दसामानाधिकरण्येन वा, श्रुत्यन्तरसामानाधिकरण्येन वा अन्यत्रप्रसिद्धता स्यात्, तदा "स्थूलभुग्वैश्वानरः" इत्यादौ प्रयोगादितौल्यस्य विष्णावपि सत्त्वेन "श्रुत्यन्तरादिभिः तुल्या" इयुक्तलक्षणसत्त्वेनोभयत्रप्रसिद्धता स्यात्। न चैवं, किन्तु लोकप्रयोगात्। स च विष्णौ नेति नोभयत्रप्रसिद्धतेत्यर्थः। सौत्रोक्तेष्टीकारीत्या गतिमाह—**सूत्रोक्तमिति**। "अतः प्रसिद्धिलिङ्गयोरुभ-

चन्द्रिका

तु अन्यत्र प्रसिद्धेर्विष्णुलिङ्गानां च निरवकाशत्वेन तुल्यबलतया, न तु वैश्वानरशब्दस्योभयत्र प्रसिद्ध्येत्यन्यत्रप्रसिद्ध्यविघातेनैव टीकायां दर्शितम् । अत्रानुव्याख्याने "श्रुतिर्लिङ्गाधिका परा" इति वैश्वानरशब्दस्य नामत्वोक्तेर्लोकेऽग्नौ रूढत्वाच्च टीकायां नामतोक्ता । "विश्वजीवान्तरत्वाद्यैर्लिङ्गैः" इति सङ्क्षेपभाष्यकारीया

प्रकाशः

योरपि निरवकाशत्वेन वैश्वानरश्रुतेरग्नाविष्ण्वोस्साधारण्यमेव स्यात्" इति टीकायामित्यर्थः । या तु न्यायविवरणटीकायां रूढ्याऽन्तराधिकरणन्यायेन च विष्णौ तदितरत्र श्रुतेः साधारण्योक्तिः, सा अभ्युपेत्यवादेन नेया । याऽपि तत्त्वप्रदीपे "पूर्वत्रान्यत्र प्रसिद्धिमात्र-प्रतिषेधात् ज्वलनजनार्दनयोः साधारणस्य वैश्वानरशब्दस्य विष्णावेव प्रवृत्तिप्रदर्शनेन उभयत्र प्रसिद्धोभयविधपदकदम्बकसमन्वयावसरसूचनमाचरति—अग्नाविष्ण्वोरित्यादिना" इत्युक्तिः, साऽपि टीकानुसारात्, यद्यप्येवं साधारण्यं, तथाऽपि लोकतोऽन्यत्रप्रसिद्धत्वादत्र निवेश इत्याद्यभिप्रायेण योज्येति भावः । टीकायां वैश्वानरशब्दस्य नामत्वोक्तेर्मूलं वदन् अणुभाष्यविरोधशङ्कां च निराह—अत्रेति । लोकेऽग्नौ रूढत्वाच्चेति । "बहुभीरूढनामभिः" इत्यनुभाष्योक्तेः, "श्रुतेरपि प्रसिद्धितो निरवकाशत्वात्" इति टीकोक्तेः, "श्रुतेर्देवताभूतविशेषयोरूढत्वात्" इति न्यायविवरणटीकोक्तेः, "वैश्वानरशब्दस्य अविद्वद्रूढ्या अग्निविषयस्यापि" इति सन्न्याय-

चन्द्रिका

लिङ्गत्वोक्तिस्तु सिद्धान्ते ब्रह्मणि यौगिकत्वाभिप्राया । अनन्तरसङ्गतिस्तु, गताधिकरणोक्तसर्वगतत्वाक्षेपेण पूर्वपक्षोत्थानादिति भाष्य एवोक्ता । अत्र वैश्वानरः किमग्न्यादिः किं वा ब्रह्मेति चिन्ता ।

प्रकाशः

रत्नावल्युक्तेश्चेति भावः । एतेन नामत्वे फलतः, लिङ्गत्वे साक्षादेवैतत्पादान्तर्भावोऽस्य सूचितः । एवं "लोकतोऽन्यत्र" इत्यादि टीकां व्याख्याय "श्रुत्यादिसङ्गतिं" इत्यादिटीकां व्यनक्ति—**अनन्तरेति** । पूर्वाधिकरणतद्विषयवाक्याभ्यां एतदधिकरणैतद्विषयवाक्ययोरित्यर्थः । आक्षेपप्रकारश्चाग्रे स्पष्टः । न च तद्भाष्यं प्रयोजनमात्रपरं, उभयपरत्वे बाधकाभावादिति भावः । एतेन—

> सार्वात्म्यरूपोपन्यासादक्षरं ब्रह्म वर्णितम् ।
> जाठरादावनैकान्त्यशङ्का तस्य निरस्यते ॥

इति कल्पतरूक्तसङ्गतिर्निरस्ता वेदितव्या । वैश्वानरनामसान्निहितोन्मानत्वमुखेन पूर्वत्र प्रधानसूत्रप्रतिज्ञोपात्तसर्वगतत्वाक्षेपसम्भवेऽपि ईदृशस्यायुक्तत्वात् । सार्वात्म्यरूपशब्दाप्रयोगेण तद्रीत्या सार्वात्म्यस्य "रूपोपन्यासात्" इति सूत्रार्थतया वर्णनायोगस्योक्तत्वाच्चेति । विषयसंशयटीकां व्यनक्ति—**अत्रेति** । छान्दोग्ये पञ्चमेऽध्याये वैश्वानरविद्यायां प्राचीनशालसत्ययज्ञेन्द्रद्युम्नजनबुडिलोद्दालकाः समेत्य मीमांसां चक्रुः "को न आत्मा किं ब्रह्मेति । ते मीमांसमाना निश्चयमलभमानाः केकयं राजानमुपसद्योचुः, आत्मानमेव वैश्वा-

प्रकाशः

नरं संप्रत्यध्येषि तमेव नो ब्रूहि" इत्युपक्रम्य श्रूयते "यस्त्वे-तमेवं प्रादेशमात्रमभिविमानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाः, चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मा सन्दोहो बहुलो वस्तिरेव रयिः पृथ्व्येव पादावुर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीयः" इत्यादि । तथा वाजसनेये सप्तमे "अयमग्निर्वैश्वानरो योऽयमन्तः पुरुषे येनेदमन्नं पच्यते यदिदमद्यते" इत्यादि । तथा वैश्वानरसूक्ते—

मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आजातमग्निम् ।
कविं सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः ॥

इत्यादि । तत्र सर्वत्र श्रुतो वैश्वानरो विषय इत्यर्थः । अत एव टीकायां 'स वैश्वानरः' इति तच्छब्देन सङ्गत्यर्थं पूर्वप्रकृतच्छान्दोग्यस्थवैश्वानरप्रतीतावपि तदुपलक्षणमिति भावेन "वैश्वानरः" इति सामान्योक्तिः । 'वैश्वानरः' इत्युपलक्षणं, प्राक् पादद्वयेन समन्विता अशेषविद्यागताः अशेषसूक्तस्था अग्न्यादिनानाशब्दा अपि उदाहरणमिति ध्येयम्, प्राचीनसर्वनयोक्ताक्षेपसमाधानार्थत्वादस्याधिकरणस्य । अत एवाग्रे "अग्निवैश्वानरादिशब्दानां" इत्युक्तिः, "वैश्वानरादयश्शब्दा अपि तद्वाचिनः" इत्यनुव्याख्याने सुधायां—"–'वैश्वानरादयः' इत्यादिशब्दप्रयोगाद्वैश्वानरशब्दस्योपलक्षणत्वमिति

चन्द्रिका

तदर्थं अग्निवैश्वानरादिशब्दानां ब्रह्मणि मुख्यत्वेऽग्न्यादिशब्दानां प्रसिद्धाग्न्यादौ लौकिकव्यवहारः, तत्तत्सूक्तानां तत्तद्विद्यानां च ब्रह्मपरत्वे वैदिकसूक्तव्यवस्था, विद्याव्यवस्था च न युक्ता उत युक्तेति ।

प्रकाशः

दर्शयति" इत्युक्तम् । आत्मशब्दादिसाधकोपेतत्वेन प्राधान्यात्सूत्रादौ तस्यैवोक्तिः । अग्नीति । देवतेत्यर्थः । आदिपदेन भूताग्निः । एतेन टीकायां "अन्यो वा" इत्युक्तान्यशब्दार्थो विवृतः । अत्र 'ब्रह्म' इति चिन्तानन्तरं, वैश्वानरश्रुतेरन्यत्रप्रसिद्ध्यनुसारेण समाख्याप्रकरणलिङ्गानि विष्णुप्रापकाण्यग्नौ नेयानि उत तदनुसारेण प्रसिद्धिर्नेयेति चिन्ता, तदर्थं समाख्याद्यनुरोधेन प्रसिद्धेर्नयने बाधकमस्त्युत नेति चिन्ता टीकायां पूर्वोत्तरप्रापकयोस्तौल्योक्तेस्तामनुसृत्य नोक्ता । स्वरीत्या तु वक्तव्यैव । रीतिद्वयसाधारण्येन तु श्रुत्यादिकं ब्रह्मणि नेतुं न शक्यं उत शक्यमिति चिन्ता ध्येया । एतदुपयुक्तां प्रसिद्धेर्निरवकाशत्वरूपां चिन्तामाह—तदर्थमिति । मुख्यत्वइति । सिद्धान्तिना लक्षणादेरनङ्गीकारादेवमुक्तम् । यदि वक्ष्यमाणादिशा न युक्ता, तदा निरवकाशलोकप्रसिद्ध्यादिवशादग्न्यादिरेव वैश्वानरादिशब्दार्थः । यदा तु "साक्षादप्यविरोधं" "अभिव्यक्तेः" इत्यादिवक्ष्यमाणदिशा युक्ता, तदा बाधकाभावात्समाख्यादिवशाद्ब्रह्मैवेति सिद्धान्ते फलफलिभावोऽग्रे पूर्वपक्षादिविवरणरीत्या स्पष्ट इति भावः ।

चन्द्रिका

पूर्वपक्षस्तु—"आत्मानं वैश्वानरमुपास्ते" "अयमग्निर्वैश्वानरः" इत्यादौ श्रुतो वैश्वानरोऽग्निर्देवता वा भूतं वा, वैश्वानरश्रुतेस्तत्र प्रसिद्धेः।

प्रकाशः

अत्र टीकायां "श्रुतेरपि प्रसिद्धितो निरवकाशत्वात्" इत्यादिना श्रुतेर्निरवकाशत्वमात्रप्रयुक्तप्राबल्योक्तिप्रतीतावपि "लिङ्गस्य श्रुतितो दुर्बलत्वात् "इति पूर्ववाक्येन श्रुतित्वप्रयुक्तप्राबल्यमपि अभिमतम्। एवञ्च वैश्वानरश्रुतेः श्रुतित्वनिरवकाशत्वरूपोभयप्रयुक्तप्राबल्यात्पाचकत्वादिलिङ्गस्य निरवकाशत्वनिमित्तप्राबल्यात्, एवं प्रबलश्रुतिलिङ्गबलेन समाख्याप्रकरणलिङ्गरूपविष्णुप्रापकाणां बाधादग्निरेव वैश्वानरः। टीकायां पूर्वोत्तरपक्षप्रापकयोर्द्वयोरपि निरवकाशत्वेन तौल्योक्तिस्त्वभ्युपेत्यवादेनेति भावेन "नायं वैश्वानरो विष्णुः किन्तु" इत्यादिटीकां विवृण्वन् पूर्वपक्षयति—**पूर्वपक्षस्त्विति**। टीकायां 'अयं' इत्युक्त्या प्राक् प्रकृतच्छान्दोग्यस्थस्य परामर्श उपलक्षणमिति भावेन च्छान्दोग्यबृहदारण्यकस्थयोर्वाक्यविशेषयोरुक्तिः "आत्मानं" इति "अयमग्निः" इति च। आदिपदेन "वैश्वानरमृत आजातमग्निं" इत्यस्यामृचीति गृह्यते। "अत एव न देवता भूतं च" इतिसूत्रव्यावर्त्यमाह—**अग्निर्देवतेति**। **भूतमिति**। तेजोरूपं जडमित्यर्थः। "न च वाच्यं सर्वगतत्वाल्लिङ्गात् वैश्वानरो विष्णुः" इति टीकोपलक्षणं

चन्द्रिका

न च "अहं वैश्वानरः" इति स्मृतिसमाख्यानात्पुरुषसूक्तसमाख्यानात् "को न आत्मा किं ब्रह्म" इति प्रकरणात् "सर्वे पाप्मानः प्रदूयन्ते" इति स्वज्ञानेन सर्वपाप्मप्रदाहसर्वगत्वादिलिङ्गाच्च वैश्वानरो ब्रह्मेति वाच्यं, समाख्याप्रकरणलिङ्गानां श्रुतितो दुर्बलत्वात् ।

प्रकाशः

सूत्रोक्तसाधकमात्रस्येति भावेन तां व्याचष्टे—न चेति । "स्मर्यमाणं" इति सूत्रोपात्तात् "अहं वैश्वानरो भूत्वा" इति स्मृतिसमाख्यानात्, "पुरुषविधमपि" इति सूत्रांशोक्तात् "शीर्ष्णो द्यौः समवर्तत" इति पुरुषसूक्तसमाख्यानात्, "असम्भवात्" इति सूत्रखण्डोक्तात् "को न आत्मा" इति ब्रह्मप्रकरणादित्यर्थः। "असम्भवात्पुरुषविधमपि" इत्यंशोक्तप्रकरणश्रुतिसमाख्याभ्यां उपलक्षणत्वेन उपात्तलिङ्गान्यप्याह—सर्वे इति । अभिविमानपदेन अभितो विगतं मानं मर्यादा यस्येति टीकोक्तव्युत्पत्त्योक्तं सर्वगतत्वम् । एतेन "अन्तरधिकरणन्यायेन विष्णावपि श्रुतेर्वृत्तिरस्तीति चेत्" इति न्यायविवरणटीकोक्तन्यायो विष्णुप्रापकसत्त्वरूपो विवृतः । "लिङ्गस्य श्रुतितो दुर्बलत्वात्" इत्यपि टीकावाक्यमुपलक्षणत्वेन वा, कैमुत्यलभ्यत्वाभिप्रायेण वा व्याचष्टे—समाख्येति । श्रुतित इति । वैश्वानरश्रुतित इत्यर्थः । सर्वापेक्षया श्रुतिप्राबल्यस्य "शब्दादेव प्रमितः" इत्यत्र सेत्स्यमानत्वादिति भावः। अन्तर्नये तु निरवकाशलिङ्गेन श्रुतिबाधः, नात्र तथेति भावः । यद्यपि सिद्धान्ते समाख्यादिकमिव "अभिविमानमात्मानं" इत्यात्मश्रुतिरप्यस्ति । तथाऽपि

चन्द्रिका

बहुत्वप्रयुक्तप्राबल्यादपि स्वभावप्राबल्यस्य बलवत्त्वाच्च । उक्तं हि—

द्विविधं बलवत्त्वं च बहुत्वाच्च स्वभावतः ।
तयोस्स्वभावो बलवान् उपजीव्यादिकश्च सः ॥

प्रकाशः

तदाच्छादनेन वा, वक्ष्यमाणदिशा निरवकाशया परप्राबल्यन्यायेन प्रबलया चरमवैश्वानरश्रुत्या पूर्वस्य आत्मशब्दस्य कथञ्चिन्नेयत्वादिति वा, तस्याप्यग्रचादिशब्दवद्विष्णौ मुख्यत्वं नेति वाऽभिप्रायेण तदनुक्तिः । तथाच वक्ष्यति "आत्मश्रुतेश्च न ब्रह्मणि मुख्यता" इति । "नच लिङ्गस्य निरवकाशत्वेन प्राबल्यात् श्रुतिबाधकत्वं" इति शङ्कोत्तरे अप्युपलक्षणमिति भावेन स्वयं समाख्यादीनां बहुत्वात् प्राबल्यमिति शङ्कान्तरं हृदि कृत्वा समाधिमाह—**बहुत्वेति । उक्तं हीति ।** विष्णुतत्त्वनिर्णयोदाहृतब्रह्मतर्कवाक्य इत्यर्थः । 'सः' स्वभावः उपजीव्यत्वनिरवकाशत्वश्रुतित्वरूप इत्यर्थः । यद्यपि पूर्वपक्षेऽपि वैश्वानरश्रुतिरिव "अयमग्निः" इत्याद्यग्निश्रुतिः, "वैश्वानरे तद्धुतं भवति हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीयः" इति "येनेदमन्नं पच्यते" इत्यादिना श्रुतानि होमाधिकरणत्वगार्हपत्याद्यङ्कत्वपाचकत्वादिलिङ्गानि च सन्तीति प्रापकबाहुल्यमस्ति । तथाऽपि टीकायां "श्रुतितः" इत्युक्तचनुरोधेन तन्मात्रेणैव बहुत्वकृतप्राबल्यस्य बाध उक्तः । एवं श्रुतेः श्रुतित्वप्रयुक्तप्राबल्यमुपपाद्य इदानीं निरवकाशत्वेनापि प्राबल्यं

चन्द्रिका

इति । न चान्तराद्यधिकरणन्यायेन वैश्वानराग्न्यादिश्रुतिः ब्रह्मणि मुख्येति सावकाशा, लिङ्गं तु निरवकाशमिति वाच्यं, तथात्वे श्रुतेरन्यत्र प्रसिद्ध्ययोगात् ।

प्रकाशः

वक्तुं "अन्तरधिकरणन्यायेन विष्णावपि श्रुतेः वृत्तिरस्तीति चेत्" इति न्यायविवरणटीकोक्तमत्रापि ग्राह्यमिति भावेन "न च लिङ्गस्य" इत्यादिटीकां व्याचष्टे—**नचेत्यादिना । अन्तरादीति ।** "अन्तस्तद्धर्म" इत्यत्राधिदैवगताशेषनाम्नां निरवकाशलिङ्गेन विष्णौ मुख्यत्वोक्तेः, "चेतोर्पणनिगदात्" इत्यत्र अशेषनाम्नां विष्णावुपासनार्थत्वोक्तेः, "ज्योतिश्चरण" इत्यत्राशेषसूक्तस्थाग्निज्योतिरादिशब्दानां विष्णौ मुख्यत्वोक्तेरिति भावः । केचित्तु—"अन्तर उपपत्तेः" इत्यत्राग्निप्रयुक्ताहंशब्दस्य विष्णौ मुख्यत्वोक्तेस्तन्न्यायेनेत्यर्थ इत्याहुः । तच्चिन्त्यं, "शास्त्रदृष्ट्या" इत्यत्रैव मुख्यत्वसिद्ध्या अत्र भाष्यादौ तस्यैव स्मारणात् । तावताऽग्निशब्दस्य विष्णौ मुख्यत्वासिद्धेश्चेति । "अन्तरधिकरणन्यायेन" इति क्वचित्पाठः । **तथात्व इति ।** लिङ्गनिरवकाशत्वेन श्रुतेर्ब्रह्मणि मुख्यत्व इत्यर्थः । तथा च निरवकाशया श्रुत्या लिङ्गमेवाग्नौ सावकाशयितव्यमिति भावः । यद्यपि प्राक् समाख्यादिकमपि प्रकृतम् । तथाऽपि टीकायां "लिङ्गस्य निरवकाशत्वेन" इति लिङ्गमात्रोक्तेस्तदनुरोधेन वा, लिङ्गनिरवकाशत्वेन निरवकाशश्रुतिबाधो नेति

चन्द्रिका

न च "जगद्वाचित्वात्" इति वक्ष्यमाणन्यायेन लौकिकैरन्यत्रैव शब्दव्यवहारात् प्रसिद्ध्युपपत्तिरिति वाच्यं, ब्रह्मणि मुख्यत्वे अन्यत्र

प्रकाशः

सिद्धौ तादृशसमाख्यानादिना नेति कैमुत्यसिद्धत्वाद्वा, पूर्वत्र "अन्तस्तद्धर्मोपदेशात्" "आकाशस्तल्लिङ्गात्" "अत एव प्राणः" इत्यादौ सर्वत्र लिङ्गनिरवकाशत्वमाश्रित्य श्रुतेर्ब्रह्मणि मुख्यत्वोक्तेस्तत्सर्वाक्षेपाय तत्साधारण्योक्त्यर्थत्वाद्वा लिङ्गमात्रोक्तिः। तथा च वक्ष्यति— "अतीतसर्वाधिकरणाक्षेपः" इति। टीकायां लिङ्गमात्रोक्ताविदमेव बीजमित्याहुः। "नहि वैश्वानरश्रुतेरग्न्यादिविषयत्वाभावे व्यवहारस्य गत्यन्तरमस्ति" इति टीकां विवरीतुं सम्भावितगत्यन्तरमाशङ्क्य निराह—**न चेति**। चतुर्थपादे "समाकर्षात्" इत्यधिकरणे शब्दानां विष्णावेव मुख्यत्वेनान्यत्र अमुख्यत्वापत्त्या माणवकादावग्न्यादिशब्दप्रसिद्ध्यदर्शनेनान्यत्रप्रसिद्ध्ययोगात्, विष्णावेव प्रसिद्ध्यापत्तेश्चेति शङ्कायां लोकस्य जगत्येव शब्दव्यवहारेण तत्रैव तच्छ्रोतॄणां व्युत्पत्तेर्विष्णौ तथा बहुलव्यवहाराभावेन व्युत्पत्त्यभावाच्च जगति प्रसिद्धेः 'अग्निर्माणवकः' इति व्यवहारादनवगताग्निशब्दमुख्यार्थस्य माणवके अग्निशब्दव्युत्पत्त्या तस्य तत्रैव प्रसिद्धिवदनवगतभगवद्रूपमुख्यार्थस्य भगवदज्ञानमूलत्वेन अन्यथोपपत्तेरिति "जगद्वाचित्वात्" इति गुणसूत्रोक्तन्यायेनेत्यर्थः। "साक्षादप्यविरोधं" इति सूत्रव्यावर्त्यमाह—**ब्रह्मणीति**। एतेनात्र

चन्द्रिका

प्रसिद्धिव्यवहारस्यैवायोगात् । यदि च "शरीररूपकविन्यस्तगृहीतेः" इति वक्ष्यमाणन्यायेन मुख्यार्थभूतब्रह्मसम्बन्धादन्यत्र प्रयोगः, तर्हि गङ्गादिशब्दानां तीरादाविव अन्यत्र लक्षणादिः स्यात् ।

प्रकाशः

नयेऽन्यत्र व्यवहारे "साक्षात्" इति सूत्रेणोक्ते सति, तस्य गत्युक्तिस्तत्र युज्यते । स एवायमयुक्त इत्याक्षिप्यत इति तेन गतार्थत्वमपि नेति दर्शितम् । तथा चानुवक्ष्यति "समाकर्षात्" इत्यत्र टीकायां "सर्वशब्दानां परमात्मैकवाचित्वे अन्यत्र व्यवहाराभावात्" इति । "साक्षात्" इति सूत्रव्यावर्त्यं अन्यत्र व्यवहारायोगमाशङ्कते—**यदि चेति** । "आनुमानिकमप्येकेषामिति चेन्न शरीररूपक" इति नये अव्यक्तादिशब्दवाच्यं विष्णुरन्यद्वेति संशये, अव्यक्तादिशब्दानां प्रधानादावेव प्रसिद्धेः, परमात्मैकवाचित्वे प्रधानादौ तद्व्यवहाराभावापातात्, अवाचकत्वेऽप्यनभिज्ञानादिना व्यवहारे च अव्यवस्थापातात् अन्यदिति प्राप्ते, परमात्मतन्त्रत्वेन शरीरसमे प्रधानादौ तत्तच्छब्दवाच्यस्य परमात्मनो विन्यस्ततया तत्सम्बन्धेन तत्रापि शब्दप्रवृत्त्युपपत्तेः, प्रधानादितत्तद्वस्तुविशिष्टस्यैव विष्णोरव्यक्तादिशब्दवाच्यत्वस्वीकारेण तत्तच्छब्दमुख्यार्थेश्वरसम्बन्धस्य तत्रतत्र व्यवस्थिततया अन्यत्र व्यवहाराव्यवस्थानापत्तेः, विष्णुरेवाव्यक्तादिशब्दमुख्यार्थ इति चतुर्थपादे वक्ष्यमाणन्यायेनेत्यर्थः । "तथा सति लोके लक्षणेतरवृत्त्यभावापत्तेः" इतिसमाकर्षनयस्थटीकावाक्यं हृदि कृत्वाऽऽह—**तर्हीति** । गौणी

चन्द्रिका

तथा च ब्रह्मणि मुख्यानामिन्द्रादिशब्दानां अग्न्यादौ, अग्न्यादिशब्दानां चेन्द्रादौ प्रयोगस्स्यात् ।

प्रकाशः

वृत्तिरादिपदार्थः । टीकोपलक्षणमिति सूचितम् । मुख्यार्थसम्बन्धनिमित्तेन शब्दप्रयोगस्य तादृशत्वादिति भावः । अस्तु को दोष इत्यत आह—**तथा चेति** । यद्यपि लोके शब्दव्यवहाराव्यवस्थानिवर्तकं "शरीररूपकविन्यस्तगृहीतेः" इत्येतदेव, न ततोऽन्यदस्ति । अत एव टीकायां "अवाचकैर्व्यवहारेऽव्यवस्थापातात्" इति समाकर्षनये, "अवाचकत्वाविशेषेण घटादिशब्दानां पटादौ व्यवहारप्रसङ्गात्" इत्यव्यक्तनये च अव्यवस्था "शरीररूपक" इत्यादिसूत्रांशव्यावर्त्यतयैवोक्ता, प्रागुक्तदिशा व्यवस्थासमर्थनं च सुशकम् । तथाऽपि टीकायां "अवाचकैः" इति "अवाचकत्वाविशेषेण" इति च अव्यवस्थायामवाचकत्वस्य निमित्ततयोपादानात्, "—"समाकर्षात्" इति वक्ष्यमाणन्यायस्य अत्राभिप्रेतत्वेन लक्षणानाश्रयणात्" इत्यानुमानिकसूत्रटीकोक्तदिशा "शरीररूपक" इत्याद्यंशतात्पर्यार्थानभिज्ञानेन, यथा "तथा सति लोके लक्षणेतरवृत्त्यभावापत्तेः" इति समाकर्षसूत्रे पूर्वपक्षिण आपादनं, तथा विशेषानभिज्ञस्य तत्तच्छब्दमुख्यार्थभूतेश्वरसम्बन्धस्य सर्वत्र सत्त्वादित्येतावन्मात्रं जानतः पूर्वपक्षिणः एतदव्यवस्थापादनमिति ध्येयम् । अत एव टीकादौ "शरीररूपक" इति सूत्रे न व्यवस्थासमर्थनं

चन्द्रिका

न हि तीरपुरुषमाणवकचित्रलिखितसिंहादौ गङ्गामञ्चाग्निसिंहशब्दा एव प्रयुज्यन्ते, न तु रूढ्या योगेन वा गङ्गादिवाचिपदान्तराणीति नियमोऽस्ति। अन्यथाऽग्न्यादौ वह्न्यादिशब्दस्याप्यप्रयोगः स्यात्। न च "समाकर्षात्" इति वक्ष्यमाणन्यायेन

प्रकाशः

स्पष्टमुक्तम्। अस्माभिस्तु—पूर्वं विवेकार्थं स्पष्टमुक्तम्। अन्यथा लक्षणादिवृत्त्यापादानस्यानिष्टत्वं न सिध्येत्। अस्य समाधिस्तु "कल्पनोपदेशात्" इत्यादावन्यत्रापि वाचकत्वोक्त्या भविष्यति। अत एवाग्रे "वाचकत्वाविशेषेऽपि" इति वक्ष्यते। 'तीर' इति सप्रयोजनलक्षणायाः, 'पुरुष' इति रूढलक्षणायाः, 'माणवक' इति सप्रयोजनोपचारस्य, "चित्रलिखितसिंहादौ" इति तु रूढोपचारस्योदाहरणम्। तीराद्यन्यलाक्षणिकादिरादिपदार्थः। एतेन 'लक्षणादिः' इत्यादिपदार्थो विवृतः। **न त्विति**। 'नद्यां घोषः, सुरसरिति घोषः' इत्यादेरपि दर्शनादिति भावः। **अन्यथेति**। एक एव शब्दो लक्षणीये प्रयोज्यो, न तु तत्पर्याय इत्यङ्गीकार इत्यर्थः। **वह्न्यादीति**। तस्यापि विष्णौ मुख्यस्यान्यत्र लक्षणादिनैव वृत्तेरिति भावः। ननु न शब्दानां ब्रह्मणि मुख्यत्वेऽप्यन्यत्र लक्षणादि, येनाव्यवस्था, किन्तु तत्रापि "कल्पनोपदशात्" इति न्यायेन मुख्यत्वमेव। न चक्षादिशब्दवदुभयत्र साम्यापत्तिः, न्यूनाधिकभाववत्त्वादिति भावेन शङ्कते—**न चेति**।

चन्द्रिका

वाचकत्वाविशेषेऽपि राज्ञि भृत्ये च जयिशब्दस्येव, अग्न्यादिशब्दानां ब्रह्मणि मुख्यत्वमन्यत्रामुख्यत्वं चेति युक्तं, 'भृत्यो जयी' इत्यत्र हि भृत्यशब्दस्य भृत्ये मुख्यत्वात्तदन्वयाय जयिशब्दस्यामुख्यता। ब्रह्मणोऽन्यत्र तु कश्चिदपि शब्दो न मुख्योऽस्ति, यदन्वयाय शब्दान्तरस्यामुख्यता। एतेन हानादिव्यवहारायान्यत्र प्रयोग इति परास्तम्। अग्निव्यवहारस्याग्निशब्देनैव सिद्धेर्वह्न्या-

प्रकाशः

'इति न्यायेन ब्रह्मणि मुख्यत्वमन्यत्रामुख्यत्वं' इत्यन्वयः। तत्र हि, मुख्यता किमुभयत्र तुल्या किं ब्रह्मण्यधिका अन्यत्र हीनेति संशये, हीनत्वे मुख्यवृत्तित्वाभावात् तुल्येति प्राप्ते, योगरूढ्योरिव मुख्यत्वेऽपि न्यूनाधिकभावसम्भवात्, ब्रह्मणि परममुख्यत्वमन्यत्र त्वपरममुख्यवृत्तित्वमिति वक्ष्यते, तेन न्यायेनेत्यर्थः। **वाचकत्वाविशेषेऽपीति।** "कल्पनोपदेशात्" इति न्यायेन हरौ तदन्यत्र चेति भावः। **अमुख्यत्वमिति।** किञ्चिन्मुख्यत्वं न तु लक्षणादिरित्यर्थः। **न मुख्योऽस्तीति।** सर्वशब्दानां लोके तुल्यवृत्तित्वेन भृत्यजयिशब्दयोरिव भृत्ये वृत्तितारतम्याभाव इत्यर्थः। एतेनेत्युक्तं व्यनक्ति— **अग्नीति।** एवं श्रुतेर्निरवकाशतयाऽपि प्राबल्योपपादनेन "नहि वैश्वानरश्रुतेरग्न्यादिविषयत्वाभावे व्यवहारस्य गत्यन्तरमस्ति" इति टीकाविवरणेन "साक्षात्" इतिसूत्रव्यावर्त्यमुक्त्वेदानीं "शब्दादिभ्योऽन्तः प्रतिष्ठानान्नेति चेत्" इतिसूत्रांशोक्तलिङ्गनिरवकाशत्व-

चन्द्रिका

दिशब्दाप्रयोगापातात् । अत एव पाचकत्वाद्यग्निलिङ्गानामात्मश्रुतेश्च न ब्रह्मणि मुख्यता, अन्यत्राप्रयोगापातात् । किञ्चेन्द्राग्न्यादिशब्दानां ब्रह्मण्येव मुख्यत्वे सूक्तव्यवस्था, विद्याव्यवस्था च न स्यात्, अमुख्यवृत्त्या तद्व्यवस्थाया निरस्तत्वत् । टीकादौ वैश्वा-

प्रकाशः

मप्यत्र ग्राह्यमिति भावेनाह—**अत एवेति** । प्राग्विवृतान्यस्माभिर्लिङ्गानि । **आत्मश्रुतेश्चेति** । एतेन "शब्दादिभ्यः" इति सूत्रभाष्यटीकायां—"यथा खलु वैश्वानरस्य विष्णुत्वनिश्चायकात्मशब्दादि विद्यते" इत्यादिना लिङ्गानां विष्णुप्रापकात्मशब्दसमाख्यादिना साम्यमुक्तं, तत्त्वभ्युपेत्य वादेन वा, "साक्षात्" इत्यादावग्नेरन्यत्र प्रयोगोपपत्तेर्वक्ष्यमाणत्वेनात्मश्रुत्यादेः विष्णौ मुख्यत्वस्य निर्बाधादिति भावेन वेति भावः। अत एवेत्युक्तं व्यनक्ति—**अन्यत्रेति** । "अभिव्यक्तेः" इत्यादिसूत्रव्यावर्त्योक्तिपरां "वैदिकविद्याभेदव्यवहारविरोधाच्च" इति टीकां विवृणोति—**किञ्चेत्यादिना** । इदमग्निसूक्तमिदं वायुसूक्तमित्यादिसूक्तव्यवस्था, तथा इयमात्मविद्या इयं वैश्वानरविद्या इयमक्षिविद्या इयं प्राणविद्या चेत्यादिविद्याव्यवस्था च न स्यादित्यर्थः। **निरस्तत्वादिति** । "ब्रह्मणि मुख्यानामिन्द्रादिशब्दानां" इत्यादिना निरस्तप्रायत्वादित्यर्थः । नन्वग्निश्रुत्यादेर्विष्णुप्रापकात्प्राबल्योक्तौ सूत्राभाष्यटीकाविरोध इत्याशङ्क्याह—**टीकादाविति** । जात्या निरवकाशत्वेन च श्रुतेः प्राबल्यं

चन्द्रिका

नरश्रुतेस्साधारण्योक्तिस्तु श्रुतित्वप्रयुक्ते विशेषे सत्येव श्रुतिलिङ्गयोर्निरवकाशत्वप्रयुक्तसाधारण्यमभिप्रेत्य । टीकायां लिङ्गस्य निरवकाशत्वोक्तिरपि स्वतोऽवकाशाभावाभिप्राया, अन्यथा 'सर्वगतत्वं च न तस्य' इति टीकाविरोधात् । "न तु लिङ्गेन विष्णुपरतानिश्चयः" इति टीकायामपि 'किन्तु प्रसिद्ध्याऽग्न्यादिपरत्वनिश्चयः' इति शेषः । यद्वा—टीकादिस्वारस्याय विष्णुपरत्वानध्य-

प्रकाशः

स्वयमुक्तं, टीकादौ तु सौत्रसाधारणशब्दस्वारस्यमनुरुध्य जात्या प्राबल्यमनुपपाद्य श्रुतेर्लिङ्गस्य निरवकाशत्वेन साम्यमुपेत्य साधारण्यमुक्तं, जात्या बलवत्त्वमस्मदुक्तरीत्याऽनुमतमेव । अतो 'न विरोध इति भावः । **श्रुतिलिङ्गयोरिति** । वैश्वानरश्रुतिसर्वगतत्वलिङ्गयोरित्यर्थः । ननु टीकोक्तरीत्या लिङ्गस्य निरवकाशत्वे वैश्वानरोऽग्निरेवेति कथं निर्णयेन पूर्वपक्षः, श्रुत्या लिङ्गबाधो वा कथमित्यत आह—**टीकायामिति** । सिद्धान्तदिशेत्यर्थः । वस्तुतः पूर्वपक्षे सर्वगतत्वलिङ्गमग्नौ सावकाशमिति टीकाशयः । एवं तर्हि विष्णुरेवेति सिद्धान्त्यभिमतनिर्णयाक्षेपपरग्रन्थः कथमित्यत आह—**न त्विसादि** । एवं स्वोक्तरीत्या श्रुतित्वनिरवकाशत्वोभयप्रयुक्तप्राबल्यं टीकायामप्यभिमतमित्युपेत्य टीकावाक्यानि तदनुगुणतया व्याख्याय, इदानीं पक्षान्तरमाह—**यद्वेति** । टीकादौ जात्या प्राबल्यं श्रुतेरनुक्त्वा निरवकाशत्वमात्रेण श्रुतिलिङ्गयोः साम्यमुपेत्य

चन्द्रिका

वसायेन पूर्वपक्षोऽस्तु । एवञ्च पक्षद्वयेऽप्यतीतसर्वाधिकरणाक्षेपः । अत एवास्य पादद्वयान्त्यतेति ॥

सिद्धान्तस्तु—

प्रकाशः

विष्णुरेव वैश्वानर इति विष्णुपरतानिश्चयो न युक्त इत्युक्तं, तत्स्वारस्यानुरोधेनेत्यर्थः । पूर्वपक्षफलमाह—एवञ्चेति । स्वाभिमतश्रुतेः द्वेधा प्राबल्यपक्षे निरवकाशत्वप्रयुक्तप्राबल्यपक्षे चेत्यर्थः । यथा नामधेयपादे उद्भिदादिचतुरधिकरण्या वाजपेयनयपूर्वपक्षे तथेति भावः । द्वितीयपक्षेऽपि सर्वत्र सिद्धान्त्यभिमतनिर्णयाक्षेपादिति भावः । टीकादौ पूर्वाधिकरणाक्षेपः सङ्गतिप्रदर्शनायेति भावः । उक्तं च तत्त्वप्रदीपे "पादद्वयार्थनिगमनाय सर्वनाम्नां सर्वलिङ्गानां च समन्वयदृढीकरणात्मकोऽयमधिकरणराज आरभ्यते" इति ॥

आत्मशब्दश्रुतिस्मृतिसमाख्याप्रकरणाभिविमानत्वादिलिङ्गानां वैश्वानरस्य विष्णुत्वसाधकानां वैश्वानरादिश्रुत्यादेरन्यत्र व्यवहारान्यथानुपपत्त्या सूक्तादिभेदव्यवहारान्यथानुपपत्त्या च विष्णुत्वासाधकत्वोक्तेःव्यवहारस्य गत्युक्त्यैव आत्मशब्दादिबलाद्वैश्वानरो विष्णुरिति भाष्यटीकारीत्या सिद्ध्यतीति भावेन, व्यवहारस्य गत्युक्तिपरां "अनन्ययोगेन ब्रह्मवाचकैरपि तैर्ज्ञानिनो हानादिसिद्ध्यर्थमन्यत्र अग्न्यादौ व्यवहरन्ति" इत्यादि "साक्षात्" इत्यादिसूत्रभाष्यटीकां विवृण्वन्

चन्द्रिका

अज्ञास्त्वज्ञानतः शब्दानन्यत्रैव प्रयुञ्जते ।
ज्ञानिनोऽपि च हानादिव्यवहारप्रसिद्धये ॥

अज्ञानिन इव ज्ञानिनोऽप्यन्यत्र हानादिव्यवहारस्यापेक्षितत्वात्, तस्य च शब्दप्रयोगाधीनत्वात्, ब्रह्मण्यमुख्यस्यान्यत्र मुख्यस्य च शब्दस्याभावादन्यगतिकतयाऽन्यत्रापि प्रयुञ्जते, जातिश्शब्दार्थ इति मते जातौ मुख्यानपि शब्दान् हानादिव्यवहाराय व्यक्ताविव । अग्न्यादाविन्द्रादिशब्दप्रयोगे च व्यवहारव्यवस्था न

प्रकाश

तदुक्तप्रमेयं सङ्गृह्याह—**अज्ञास्त्विति** । अज्ञानां मुख्यार्थाज्ञानतोऽन्यत्र प्रयोगेऽपि ज्ञानिनां कुतस्तत्र प्रयोगः, हानादिव्यवहारस्य अन्येनापि सम्भवादित्यत उत्तरार्धे व्यनक्ति—**अज्ञानिन इवेति** । एतेन पूर्वार्धस्योपयोगो दर्शितः । तमग्रे स्पष्टयिष्यामः । यद्वा—भाष्यादावनभिज्ञानादन्यत्र व्यवहारोक्तिः "जगद्वाचित्वात्" इति सूत्रसिद्धस्येह दृष्टान्तत्वेनेति सूचनाय "अज्ञानिन इव" इत्युक्तम् । यद्वा—अन्यत्र व्यवहारो न स्यादित्येतदज्ञानिनो ज्ञानिनो वेति विकल्प्य श्लोके द्वयोर्गत्युक्तिः । 'नेदं रजतं तस्माज्जहीहि इदं रजतमुपादत्स्व' इत्यादिव्यवहारस्य शब्दैकसाध्यत्वादित्यर्थः । **अन्यत्रापीति** । एतेन श्लोके चोऽप्यर्थोऽनुवृत्तेन 'अन्यत्र' इति पदेनान्वेतीति सूचितम् । **मतइति** । भट्टमते । प्रागुक्तातिप्रसङ्गं निराह—**अग्न्यादाविति** । अज्ञानां सर्वशब्दमुख्यार्थेश्वराज्ञानतः

चन्द्रिका

स्यात् । न चाग्न्यादौ वह्न्यादिशब्दानामिवेन्द्रादिशब्दानामपि शक्तिरभिधानादिसिद्धा । 'अग्निर्दुःखी' "अग्निर्वै देवानामवमः" इत्यादौ च तद्गतत्वेन विवक्षितदुःखित्वाद्यनुपपत्तेः भृत्ये जयिशब्दस्येवाग्निशब्दस्यान्यत्रामुख्यता । अन्यथा अलौकिकमग्न्यादिस्वरूपमेव न

प्रकाशः

अन्यत्रैव शब्दव्यवहारात् तस्य चासङ्कीर्णत्वाय व्यवस्थयैव शब्दप्रयोगात्, प्राज्ञा अपि तत्प्रहाणेन शब्दान्तरोपादाने कृत्याभावात् बहुलप्रयोगानुसार्यभिधानादिसिद्धशब्दशक्त्यनुसाराच्च व्यवस्थयैव शब्दान् प्रयुञ्जते, तदर्थत्वाच्छब्दप्रयोगस्येत्यर्थः । यदप्यग्न्यादौ वह्न्यादिशब्दस्याप्यप्रयोग इति तत्साम्यापादनं, तत्र तद्वैषम्यमाह—न चेति । एतेन जयिशब्दस्य राजभृत्ययोरिव वह्न्यादिशब्दानां "कल्पनोपदेशात्" इति न्यायेन जगद्ब्रह्मवाचकत्वाविशेषेऽपि न्यूनाधिकभावेन उभयत्र शक्तिरेवेति सूचितम् । यदत्रोक्तं जयिशब्दवैषम्यं, तत्राह—अग्निर्दुःखीति । दुःखादिस्वामित्वेन दुःखित्वमीशेऽपि युक्तमित्यतः—तद्गतत्वेनेत्युक्तम् । तद्गतनीचत्वापादकत्वेनेत्यर्थः । 'अन्यथा' अमुख्यतोऽपि तत्राप्रयोगे । प्रत्यक्षादिसिद्धतां निराह—अलौकिकेति । एवं "साक्षादप्यविरोधं जैमिनिः" इति सूत्राभिप्रेतमन्यत्र व्यवहारसमर्थनमुपपाद्य "अभिव्यक्तेरित्याश्मरथ्यः" "अनुस्मृतेर्बादरिः" "सम्पत्तेरिति जैमिनिः" इति सूत्रैरुक्तान् सूक्तादिव्यवस्थाहेतून् तत्तत्सूत्रभाष्य-

चन्द्रिका

सिध्येदिति कथं तत्र प्रयोगाभावापादनम्। सूक्तादिव्यवस्थायां तु अग्न्यादिसूक्तादिभिर्ब्रह्मोपासनायामग्न्यादावेव ब्रह्मणोऽभिव्यक्तिर्वा, अग्न्यादिसूक्ताद्युपासकैरग्न्यादावेव ब्रह्मणोऽनुस्मरणीयत्वं वा, तदुपासकानामग्न्यादिस्थब्रह्मप्राप्तिर्वा निमित्तम्। यद्यपि ऋग्भाष्ये—

पृथग्रूपाणि विष्णोस्तु देवतान्तरगानि च।
अग्न्यादिसूक्तवाच्यानि नाम्ना सूक्तभिदा भवेत्॥

प्रकाशः

टीकां विवृण्वन्नाह—**सूक्तादीति**। ननु ऋग्भाष्ये, विष्णोरग्नचाद्यन्तर्गतान्यग्नचादिशब्दवाच्यानि कानि चिद्रूपाणि, कानि चित्तु तदनन्तर्गतानि पृथग्विद्यमानानि अग्नीन्द्रादिशब्दवाच्यानि सन्तीति भिन्नभिन्नशब्दवाच्यविष्णुरूपभेदबोधकत्वात्, विष्णुरूपैकदेवताकत्वेऽपि संज्ञाभेदात् सूक्तादिव्यवस्था युक्तेत्युक्तम्। अत्र पुनरग्नावधिष्ठाने अपरोक्षीभूतत्वादिकं निमित्तमुच्यते। एतच्चायुक्तं, तथात्वे 'इदं विष्णुसूक्तं इदं वामनसूक्तं इदं पुरुषसूक्तं' इति व्यवस्थाभावापत्तेः, तत्राधिष्ठानस्यैवाभावात्। सौरसावित्रादिसूक्तव्यवस्थाभावापत्तेश्च, तत्राधिष्ठानभेदाभावात्। अतोऽन्यत्र भाष्यकृदुक्तमेव समाधानं वाच्यमिति तदेव सूत्रकृताऽत्र कुतो नोक्तमिति भावेन तत्रोक्तमाशङ्कच, तत्समर्थनपूर्वमेतदुक्तेरभिप्रायमाह—**यद्यपीति**। द्विविधानि विष्णुरूपाणि देवतान्तर्गतानि तदनन्तर्गतानि च। सर्वाणि चाग्न्यादिनामवन्ति। तत्राद्ये रूपाणां नाम्ना अधिष्ठाननाम्ना च अग्न्यादिसूक्तभेदः, अन्त्ये रूपनाम्नैवेत्युक्तमित्यर्थः।

चन्द्रिका

इत्यग्न्यादिशब्दप्रयोगः सूक्तव्यवस्थापक उक्तः। एवञ्च यथा सामशब्दस्तद्विशेषबृहद्रथन्तरादिशब्दाश्च ऋगाश्रितगीतिविशेष एव मुख्याः, तदाश्रयनानाऋक्षु त्वमुख्याः, तथैव द्वितीये उक्तत्वात्, सप्तमे उपपादितत्वात्, नवमे स्मारितत्वाच्च, एवमिन्द्राग्न्यादिश-

प्रकाशः

तत्र नामादीनां भगवति मुख्यत्वमन्यत्र तत्सम्बन्धनिमित्तत्वमित्येतत् दृष्टान्तेन समर्थयते–**एवञ्चेति** । **द्वितीय इति** । द्वितीये अध्याये आद्यपादे "गीतिषु सामाख्या" इति द्वादशेऽधिकरणे, यद्यपि प्रगीते मन्त्रे सामशब्दप्रयोगोऽभियुक्तानां, तथाऽपि मन्त्रनिष्ठा गीतिरेव सामशब्दार्थ इति एतावन्मात्रमुक्तम्। तत्कथमित्याकाङ्क्षायां सप्तमेऽध्याये द्वितीयपादे "साम्नोऽभिधानशब्देन प्रवृत्तिः स्याद्यथाशिष्टं" इत्यधिकरणे "कवतीषु रथन्तरं गायति" इत्यनेन रथन्तरशब्देन कवतीषु ऋक्षु किमतिदिश्यत इति परिज्ञानार्थं, रथन्तरशब्दः किं गीतिविशिष्टानां "अभि त्वा शूर नो नुमः" इत्यादीनामृचां वाचकः उत गीतिमात्रस्येति सन्देहे, अध्येतृप्रसिद्ध्या गीतिविशिष्टऋग्वाचक इति प्राप्ते,

विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे।

इति न्यायेन गीतिमात्रस्य वाचक इत्युपपपादितत्वात्, नवमे द्वितीयपादे "सामानि मन्त्रमेके स्मृत्युपदेशाभ्या" इत्यधिकरणे सप्तमसिद्धस्यैव गीतिवाचकत्वस्योत्तरविवक्षया स्मारितत्वादित्यर्थः।

चन्द्रिका

ब्दास्तत्तत्सूक्तानि चेन्द्राग्न्यादिगतब्रह्मरूपेष्वेव मुख्यानि, अतीतानागतानेकेन्द्रादिषु त्वमुख्यानीत्येव व्यवस्था सिद्ध्यति। अन्यथा परमतेऽपि सौरसावित्रादेरेकदेवताकत्वात् 'इदं सौरं इदं सावित्रं' इति व्यवस्था न स्यात्। तथाऽपीह सूत्रे आग्नेयादिसूक्तोपास-

प्रकाशः

उक्तं च शाबरभाष्ये—'तदेव पुनरभिधीयते स्मारणायोत्तरमधिकरणं चिन्तयितुम्। गीतिः सामेति स्थिते इदं चिन्त्यते, किं गीतिष्वृचः प्रधानभूताः किं वा गुणभूता इति। सामानि मन्त्रमेक इति पूर्वपक्षोऽपि तत्रत्यसिद्धान्तस्मारणार्थमेव' इत्यादि। अत्र त्रितयोक्तिर्दार्ढ्यायेति ज्ञातव्यम्। यदत्र केन चिदुक्तं—"विशेष्यं नाभिधा गच्छेत्" इति न्यायात् गानविशिष्टऋग्वाचित्वे "कवतीषु रथन्तरं गायति" इत्यतिदेशानुपपत्त्या तत्र तथात्वेऽपि नेह तथात्वमिति, तत्तुच्छं,

तत्तन्नाम्नोच्यते विष्णुः सर्वशास्तृत्वहेतुतः।
न क्वापि किञ्चिन्नामास्ति तमृते पुरुषोत्तमम्॥

इत्यादिवचनजातेन "समाकर्षात्" इत्याद्युक्तन्यायेनैतत्सिद्धेरिति। **अन्यथेति**। अग्न्यादिनानाशब्दप्रयोगात्सूक्तादिव्यवस्थाया अभाव इत्यर्थः। **तथाऽपीति**। नामभेदेन सूक्तव्यवस्थासिद्धावपीत्यर्थः। **परमात्मदेवताकत्वमिति**। यद्यपि तत्र "एकैव वा महानात्मा देवता सूर्य इत्याचक्षते। स हि सर्वभूतात्मा। तदुक्तमृषिणा—

चन्द्रिका

कैरग्न्यादिगतत्वेनानुस्मर्तव्यमित्यनुष्ठानविशेषोपयोगिव्यवस्थापकमुक्तम्। उक्तं चानुक्रमणिकायामपि सर्वसूक्तानां परमात्मदेवताकत्वं "एकैव वा महानात्मा देवता" इति। एतेन यागव्यवस्थाऽपि सिद्धा,

अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च।

इत्यादिना सर्वयागानां विष्णुदेवताकत्वेऽपि आग्नेयादियागेषु अग्न्यादिगतस्यैव भगवतः अग्न्यादिशब्दैरेवोद्देष्टव्यत्वादिना यागव्यवस्थोपपत्तेः। अग्नीषोमीयादीनां द्विदेवताकत्वं च अधिष्ठानद्वित्वेन

प्रकाशः

सूर्य आत्मा जगतस्तस्थुषश्च" इत्युक्तेः सूर्यदेवताकत्वमेवोक्तं भाति। तथाऽपि स्थावरजङ्गमात्मकजगदात्मकत्वलिङ्गात् "तद्विभूतयो अन्या देवतास्तदप्येतदृषिणोक्तं—इन्द्रम्मित्रं वरुणमग्निमाहुः" इति तदीयोत्तरवाक्याच्च सूर्यशब्देन परमात्मैवाभिप्रेत इति भावः। 'एतेन' इत्यनेन अत्रोक्तं ऋग्भाष्योक्तं च हेतुद्वयं परामृश्यत इति भावेन तद्व्यनक्ति—अहं हीति। अत्र उत्तमाधिकारिरूपकर्तृणामधमाधिकारिरूपकर्तृणामग्न्यादिगतविष्णूद्देशप्रकारः, "गुहाशयायैव न देहमानिने"

न देहाय न तन्मानपराय च कथंचन।

सदेहमानिहरये प्रणमेत्केवलाय वा॥

इत्यादिना कर्मनिर्णयोक्तो ध्येयः। आदिपदेन सङ्कल्पादिः। अग्नीषोमीयेति। सर्वयागानां विष्णुदेवताकत्वेऽपीत्यनुकर्षः।

चन्द्रिका

वा, अधिष्ठितभगवद्रूपद्वित्वेन वेति द्रष्टव्यम् ॥

अत्र चाद्यसूत्रे स्वपक्षे श्रुतिरूपस्य साधकस्योक्तिः। द्वितीये समाख्यारूपस्य। अत्रेतिशब्दस्याऽऽद्यसूत्रानुषक्तेन 'विष्णुर्वैश्वानरः' इत्यनेनान्वयः। तथा च 'विष्णुर्वैश्वानरः' इति गीतायां स्मर्यमाणं

प्रकाशः

आद्येति। "वैश्वानरः साधारणशब्दविशेषात्" इत्यत्र 'साधारणस्य' श्रुतिलिङ्गयोर्निरवकाशत्वादिना अग्निविष्ण्वोः साधारणस्य वैश्वानरशब्दस्य "आत्मानं वैश्वानरं" इत्यात्मशब्देन विशेषणादित्यात्मश्रुतिरूपस्येत्यर्थः। 'द्वितीये' "स्मर्यमाणमनुमानं स्यात्" इत्यत्र। "अहं वैश्वानरो भूत्वा" इति स्मृतिसमाख्यारूपस्य स्वपक्षे साधकस्येत्यर्थः। अत्र परैरितिशब्दो यस्मादित्यर्थे व्याख्यातः। स न युक्तः, करणार्थल्युडन्तानुमानशब्देनैव तदर्थलाभेन इतिशब्दाभावेऽप्यन्वयसम्भवादतिशयाभावाच्च हेत्वर्थकत्वस्य व्यर्थत्वादिति भावेन तस्यार्थमाह—अत्रेति। यद्वा–भाष्ये "इतिशब्दः समाख्याप्रदर्शकः" इत्युक्तम्। "अनेन "इति स्मर्यमाणं" इत्यन्वयः सूचितो भवति" इत्युक्तं टीकायाम्। तावता कथमर्थो लब्ध इत्यतः तद्वचनक्ति—अत्रेति। आद्यसूत्रे "तत्तु समन्वयात्" इत्यतोऽनुवृत्तस्य 'तत्' इत्यस्यार्थानुवादः—विष्णुरिति। अहंशब्दस्य विष्ववतारभूतकृष्णार्थकत्वात् 'विष्णुर्वैश्वानर इति गीतायां' इत्युक्तम्।

चन्द्रिका

विष्णोर्वैश्वानरत्वं अत्रापि स एव वैश्वानर इत्यस्यानुमापकमिति सूत्राक्षरार्थः। तृतीये वैश्वानरशब्दमात्रविषयासाधारणबाधकोद्धारः। "तथा चेतोऽर्पणनिगदात्" इत्यत्र ब्रह्मणि प्रसिद्धशब्दत्यागेन गायत्र्यादिशब्दप्रयोगे प्रयोजनं नेत्याशङ्का निरस्ता, अत्र त्वग्न्यादिशब्दानां पाचकत्वादिलिङ्गानां च ब्रह्मणि निरवकाशत्वाशङ्का निरस्यत इति भेदः।

प्रकाशः

तृतीय इति। "शब्दादिभ्योऽन्तः प्रतिष्ठानान्नेति चेन्न तथादृष्ट्युपदेशादसम्भवात्पुरुषविधमपिचैनमधीयते" इत्यत्राग्न्यादिशब्दात् होमाधारत्वगार्हपत्याद्यङ्गकत्वपाचकत्वादिलिङ्गेभ्यः "योऽयमन्तःपुरुषे" इति अन्तःप्रतिष्ठानान्न विष्णुरिति शङ्किते, अग्न्यादिनामालिङ्गादिमत्त्वेन उपासनोपदेशेन तेषां सावकाशत्वात्, "को न आत्मा किं ब्रह्म" इत्युक्तात्मत्वादेरन्यत्रासम्भवात, "शीर्ष्णो द्यौस्समवर्तत" इत्यादिना पुरुषसूक्तोक्तपुरुषसदृशस्यैवात्र "मूर्धैव सुतेजाः" इत्यादिनाऽभिधानाद्विष्णुरेवेति निरवकाशेन सावकाशस्य बाधोपपत्तेरित्युक्तत्वादिति भावः। **बाधकेति।** यद्यपि "असम्भवात्" इत्याद्यंशेन साधकोक्तिरप्यस्ति, तथाऽपि तदुक्तेः परपक्षे बाधकोक्त्या बाधकनिरासेऽपि व्यापारात् 'बाधकोद्धारः' इत्युक्तम्। अत एव प्रकरणादित्यनुक्त्वा 'असम्भवात्' इत्युक्तम्। "तथादृष्ट्युपदेशात्" इत्यंशस्य गायत्र्यधिकरणोक्तेनापौनरुक्त्यमाह–**तथा चेतोऽर्पणेति।**

चन्द्रिका

चतुर्थे परमतनिरासः। पञ्चमे प्रस्तुते वैश्वानरशब्दसमन्वये समाप्ते सर्वशब्दविषयसाधारणबाधकोद्धाराय लौकिकस्य वैदिकस्य चान्यत्र व्यवहारस्य गत्युक्तिः। वाच्यार्थधीव्यवहितं लक्षणादिकं विना साक्षान्मुख्यवृत्त्या ब्रह्मणः शब्दार्थत्वेऽपि व्यवहाराविरोध इति चास्याक्षरार्थः। षष्ठादिषु चतुर्षु साधारणबाधकोद्धाराय वैदिक्याः सूक्तादिव्यवस्थायाः गत्युक्तिः। यद्यप्यनुस्मृत्यनन्तरमभिव्यक्तिरभिव्यक्त्यनन्तरं सम्पत्तिः, तथाऽप्यभिव्यक्त्यनन्तरमपि सम्पत्तेः प्राक् अनुस्मृतिरपेक्षितेति दर्शयितुं अनुस्मृतेर्मध्ये उक्तिरिति सूत्रक्रमः। न च "साक्षात्" इत्यादिसूत्रपञ्चकं समन्वयानुपपत्तिसमाधिरूपत्वादध्यायान्ते स्यादिति शङ्क्यं, चतुर्थपादे पदवर्णस्वरादिसमन्वयस्यापि वक्ष्यमाणत्वात्तदवस्थायां च सूक्तादिभावस्यैवाभावेन तदनुपपत्ति-

प्रकाशः

चतुर्थ इति। "अत एव न देवता भूतं च" इत्यत्र 'अत एव' निरवकाशात्मशब्दादिहेतोरेव देवतादेर्नेत्यर्थः। साधकोक्तिबाधकोद्धारयोरनन्तरं परमतनिरासस्यावसरप्राप्तेरिति भावः। **पञ्चम इति।** "साक्षादप्यविरोधं जैमिनिः" इत्यत्र। **षष्ठादिष्विति।** "अभिव्यक्तेरित्याश्मरथ्यः" "अनुस्मृतेर्बादरिः" "सम्पत्तेरिति जैमिनिस्तथा हि दर्शयति" "आमनन्ति चैनमस्मिन्" इत्येतेषु। **साधारणेति।** उक्तवक्ष्यमाणसर्वशब्दसाधारणेत्यर्थः। तत्रापि पौर्वापर्यमाक्षिप्य समाधत्ते— **यद्यपीति।** पञ्चमादेरत्रानिवेशमाशङ्क्य त्रेधा समाधिमाह—**न चेति।**

चन्द्रिका

शङ्कानुदयात, तथाऽग्न्यादिसूक्तादिस्थपदादिसमन्वयनिष्ठानां पुंसाम-ग्न्यादाविव ब्रह्मणोऽभिव्यक्त्यादेरभावेन परिहारासङ्गतेः, तथोभय-त्रप्रसिद्धसमन्वयोक्त्यनन्तरं, ब्रह्मणि मुख्यत्वेऽन्यत्र प्रयोगो न स्यात् इत्याशङ्काया अन्यत्र मुख्यत्वे ब्रह्मणि स न स्यादिति प्रतिशङ्काप्र-तिरुद्धत्वेनानुदयाच्च अत्रैव युक्तत्वादिति ॥

अन्ये तु—"अयमग्निर्वैश्वानरः" इत्यादिप्रयोगात् जाठरभूता-

प्रकाशः

पदादीति । पदवर्णस्वरादिसमन्वयादिनिष्ठानां चतुर्मुखाद्युत्तमाधि-कारित्वेन तेषां व्याप्तदर्शित्वादिति भावः । तर्हि तृतीयपादान्ते निवेशः स्यादित्यत आह—**तथोभयत्रेति** ॥

अन्ये त्विति । "आत्मानं वैश्वानरमुपास्ते" इत्यत्र वैश्वानरः किं जाठराग्निः भूताग्निर्वा दिव्यदेवता वा जीवात्मा वा परमात्मा वेति संशये, "अयमग्निर्वैश्वानरो योऽयमन्तः पुरुषे" इति जाठराग्नौ, "विश्वस्मा अग्निं भुवनाय देवा वैश्वानरं" इति बाह्ये भूताग्नौ, "वैश्वानरस्य सुमतौ स्याम" इति देवतायां प्रयोगाद्वैश्वानरशब्दस्य त्रितयसाधारण्याज्जाठराग्न्यादिरेव वा, आत्मशब्दस्य जीवे रूढ-त्वात्तद्बलाज्जीवो वेति प्राप्ते, "एतस्यात्मनो वैश्वानरस्य द्यौर्मूर्धैव" इत्यादिना द्युमूर्धत्वादिश्रवणात्, "को न आत्मा किं ब्रह्म" इति ब्रह्मशब्दश्रवणात्, तयोश्चान्यत्रायोगात्, वैश्वानरशब्दस्य विश्वश्चासौ नरश्चेति विश्वनरः सर्वात्मकः पुरुषइत्यर्थः विश्वनर एव वैश्वा-

चन्द्रिका

ग्निदेवतारूपत्रयसाधारणस्य वैश्वानरशब्दस्य, जीवेश्वरसाधारणस्यात्मशब्दस्य च "मूर्धैव सुतेजाः" इति द्युमूर्धत्वादिना विशेषणादित्याद्यसूत्रार्थ इत्याहुः। तन्न, "सोऽयमात्मा चतुष्पात्, स्थूलभुग्वैश्वानरः" इत्यात्मन्यपि वैश्वानरशब्ददर्शनेन त्रितयसाधारण्योक्त्ययोगात्। जाठराग्नेरपि भूतजातित्वेन पृथगुक्त्ययोगाच्च। भाष्योक्तश्रुत्यादिभिरात्मशब्दस्य ब्रह्मण्येव मुख्यतया जीवसाधारण्याभावाच्च। स्वीकृतं च त्वयाऽपि "द्युभ्वाद्यायतनं" इत्यत्रात्मशब्दस्य ब्रह्मासाधारण्यम्। अन्यथा "तमेवैकं जानथ आत्मानं" इत्यात्मशब्दस्य जीवशब्दत्वेन सूत्रे 'अतच्छब्दात्' इति हेतुना जीवनिरासस्य, 'स्वशब्दात्' इत्यनेनोक्तात्मशब्देन ब्रह्म-

प्रकाशः

नर इति योगवृत्त्या ब्रह्मणि सम्भवात्, आत्मशब्दस्य जीववत् ब्रह्मण्यपि वृत्तेः वैश्वानरो ब्रह्मेति सिद्धान्त इत्याहुः। तत्र सूत्रार्थनिरासेनैतन्निरस्तमिति भावेन तमनूद्य निराह—**अयमिति। जाठरेति।** अन्यथा 'अत एव न देवता भूतं जाठरश्च' इति निर्देशः स्यादिति भावः। जीवकोटेरप्यनुत्थानमाह—**भाष्योक्तेति**। "अयमात्मा ब्रह्म"

अनात्तत्वादनात्मान ऊनत्वाद्गुणराशितः।

इत्यादिभिरित्यर्थः। स्वीकृतत्वमेव व्युत्थितं प्रति विपक्षे बाधकोक्त्याऽऽह—**अन्यथेति**॥

चन्द्रिका

त्वसाधनस्य चायोगात् ॥

केचित्तु—जाठरभूताग्निदेवतेश्वररूपचतुष्टयसाधारणस्य वैश्वानरशब्दस्य, मुमुक्षुभिरौपमन्यवप्रभृतिभिर्जिज्ञास्यमानत्वादिभिर्ब्रह्मलिङ्गैर्विशेषणादित्यर्थ इत्याहुः। तन्न, जाठरस्य पृथगुक्तचयोगस्योक्तत्वात्। "आत्मानं वैश्वानरं" इति साक्षाद्वैश्वानरविशेषणात्मश्रुतिग्रहण

प्रकाशः

केचित्त्विति। वैश्वानरः किं परमात्मेति शक्यनिर्णय उत नेति संशये, जीवपरसाधारणात्मशब्दसत्त्वेऽप्यात्मशब्दस्य "वैश्वानरमात्मानं" इति जीवे अप्रसिद्धवैश्वानरशब्दविशेषितत्वेन जीवविषयत्वशङ्कानुदयात्, जाठरभूतदेवतासु प्रगुक्तरीत्या प्रयोगदर्शनात्, परमात्मनि च "तदात्मन्येव हृदयेऽग्नौ वैश्वानरे प्रास्यत्" इति प्रयोगदर्शनात्, वैश्वानरशब्दस्य जाठरादिचतुष्टयसाधारण्यादुपक्रमगतब्रह्मात्मशब्दयोर्मिथः प्रतिबद्धत्वेनानिर्धारकत्वात्, अन्नादनरूपफलस्य च सर्वत्रोपपन्नत्वादशक्यनिर्णय इति प्राप्ते, "को न आत्मा किं ब्रह्म" इति सर्वेषां जीवानां आत्मभूतं ब्रह्म किमिति प्रश्नकरणात्, उत्तरे च "आत्मानं वैश्वानरं" इति ब्रह्मशब्दस्थाने सर्वत्र वैश्वानरशब्दप्रयोगाच्चायं वैश्वानरः परमात्मेति निर्णेतुं शक्यत एव, चतुष्टयसाधारणस्यापि वैश्वानरशब्दस्यास्मिन् प्रकरणे मुमुक्षुभिरौपमन्यवादिभिर्जिज्ञास्यत्वसर्वात्मत्वादिभिर्ब्रह्मधर्मैर्विशेष्यमाणत्वादित्यर्थ इत्याहुरित्यर्थः। आत्मश्रुतीति। तस्या ब्रह्मसाधा-

चन्द्रिका

सम्भवे प्राकरणिकलिङ्गरूपविशेषणग्रहणायोगाच्च ॥

यच्चोक्तमन्यैः—

यस्याग्निरास्यं द्यौर्मूर्धा खं नाभिश्चरणौ क्षितिः ।
सूर्यश्चक्षुर्दिशः श्रोत्रं .... ॥

इत्यादिनेश्वरे स्मर्यमाणं त्रैलोक्यात्मकं रूपं मूलभूतां श्रुतिमनुमापयत्, समानविषयां "मूर्धैव सुतेजाः" इत्यादिवैश्वानरविद्यामनुमापयत, वैश्वानरस्येश्वरत्वे लिङ्गमिति द्वितीयसूत्रार्थ इति, तन्न, "चक्षुषी चन्द्रसूर्यौ दिशः श्रोत्रे" इत्यादिश्रुत्यन्तरस्यापि उक्तस्मृतिमूल

प्रकाशः

रण्योपपादनस्य त्वन्मतेऽपि तुल्यत्वादिति भावः ॥

मतद्वयेऽपि द्वितीयादिसूत्रार्थान् क्रमेणानूद्य निराह—**यच्चोक्तमन्यैरिति । इत्यादिनेति ।**

द्यौर्मूर्धानं यस्य विप्रा वदन्ति खं चैव नाभिश्चन्द्रसूर्यौ च नेत्रे ।
दिशः श्रोत्रे विद्धि पादौ क्षितिं च सोऽचिन्त्यात्मा सर्वभूतप्रणेता ॥

इत्यादिरादिपदार्थः । **मूलभूतामिति ।** स्मृतीनां श्रुतिमूलत्वस्य पूर्वतन्त्रे स्मृतिनये व्यवस्थापनात्, तुल्यार्थाया एव मूलत्वादत्र च द्युप्रभृतीनां वैश्वानरस्य मूर्धाद्यवयवत्वेन "मूर्धैव सुतेजाः" इत्यादिना उच्यमानत्वेन तुल्यार्थत्वादेतद्वाक्यमनुमापयति, स्मृतिश्च ब्रह्मविषयेति मूलभूतश्रुतेरपि तथात्वं गमयिष्यतीत्यर्थः । **श्रुत्यन्तरस्यापीति ।** स्मृतिवचनं हि स्वमूलत्वेन श्रुतिं कल्पयति, न तु वैश्वानर-

चन्द्रिका

त्वसम्भवेन वैश्वानरविद्यायास्तन्मूलत्वासिद्धेः। "अहं वैश्वानरः" इति साक्षादीश्वरस्य वैश्वानरत्वबोधकस्मृतौ सत्यां बकबन्धप्रयासायोगाच्च॥

के चित्तु—द्युप्रभृतिपृथिव्यन्तं रूपं श्रुतिस्मृतिष्वीश्वरेऽभिज्ञातमिह प्रत्यभिज्ञायमानं वैश्वानरस्येश्वरत्वेऽनुमानं लिङ्गमित्यर्थ इत्याहुः।

प्रकाशः

विद्यमेव कल्पयितुं शक्नोति,

अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः।
वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथवी .... ॥

इत्याथर्वणवाक्यमूलत्वेनापि सम्भवेन कल्पकस्यान्यथासिद्धत्वादित्यर्थः। ननु श्रुतौ "अग्निर्मूर्धा" इति श्रूयते, स्मृतौ च "द्यौः" इति। तथा च कथं तन्मूलकत्वमिति चेन्न, "असौ वा व लोकोऽग्निर्गौतम" इति श्रुतेरग्नेर्द्युशब्दपर्यायत्वादिति तात्पर्यात्। न केवलं तेन वैश्वानरविद्याया ब्रह्मविषयत्वासिद्धिः, गतिसम्भवे क्लिष्टकल्पनायोगश्चेत्याह—**अहमिति**॥

के चित्त्विति। सूत्रे इतिशब्दः प्रकारवचनः, "अनुमानशब्दः "श्रुतिलिङ्गवाक्य" इति श्रुत्यादिसहपठितासाधारणधर्मरूपलिङ्गपरः, स्मर्यमाणशब्दः प्रत्यभिज्ञायमानपरः। तथा च "अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ" "द्यौर्मूर्धानं यस्य विप्रा वदन्ति" इत्यादिश्रुतिस्मृतिषु 'इति' इत्थंभूतं द्य्वादिरूपमीश्वरे अवगतं 'इह' वैश्वानरविद्यायां "मूर्धैव सुतेजाः" इत्यादिना 'स्मर्यमाणं' प्रत्यभिज्ञायमानं लिङ्गं

चन्द्रिका

तन्न, स्मर्यमाणशब्दस्य प्रत्यभिज्ञायमानार्थत्वे स्वारस्यभङ्गात्। "अहं वैश्वानरः" इत्यादिषूक्तस्येह "आत्मानं वैश्वानरं" इतिश्रुतिप्रत्यभिज्ञासम्भवे लिङ्गप्रत्यभिज्ञोक्त्ययोगाच्च ॥

यच्चोक्तमन्यैः—"मनो ब्रह्मेत्युपासीत" इत्यादिवज्जाठरे वैश्वानरे ईश्वरदृष्टयुपदेशो वा, "मनोमयः प्राणशरीरः" इत्यादिवद्वैश्वानरोपाधेरीश्वरस्य द्रष्टव्यत्वेनोपदेशो वा तृतीयसूत्रस्थतथादृष्टय-

प्रकाशः

स्यात्, श्रुत्यादाववगतं द्युप्रभृत्यात्मकत्वरूपं लक्षणं लिङ्गमिह प्रत्यभिज्ञायत इत्यर्थः। "अनुस्मृतेश्च" इत्यत्र 'अनुस्मृतिशब्दस्य प्रत्यभिज्ञापरत्वेन सूत्रकारैः प्रयुक्तत्वात्' इति श्रुतप्रकाशोक्तेः कथमेवं दूषण मित्यतः—**स्वारस्येत्युक्तम्**। उक्तरीत्या स्वारस्यसम्भवे तत्त्यागायोगात्। सूत्रकारोक्तिस्तु अनुशब्दबलाद्वा, स्वारस्यासम्भवाद्वा प्रत्यभिज्ञार्थत्वाशयेति युक्तमिति भावः। **अहमिति**। श्रुत्यादाववगतं द्युप्रभृत्यवयवत्वरूपं लिङ्गमिह प्रत्यभिज्ञायत इत्युक्तिवत्, "अहं वैश्वानरो भूत्वा" इति स्मृतौ विष्णाववगतवैश्वानरश्रुतिरिह प्रत्यभिज्ञायत इत्यपि वक्तुं शक्यत्वेन लिङ्गाद्बलवच्छ्रुतिप्रत्यभिज्ञोक्तिरेव ज्यायसीति तत्त्यागायोगात्। तथा च 'स्मर्यमाणा श्रुतिः' इत्येव सूत्रणं स्यात्, लघु चैवं सति सूत्रं स्यादित्यर्थः। किञ्चानुमानशब्दस्य लिङ्गपरत्वे "स्मर्यमाणं लिङ्गं" इत्येव निर्देशस्स्याल्लाघवादिति ध्येयम्। "शब्दादिभ्यः" इति सूत्रे शङ्काभागार्थस्याविरोधात्सिद्धान्तांशार्थमनूद्य प्रत्याह—**यच्चेति**।

चन्द्रिका

पदेशशब्दार्थ इति, तत्र न तावदाद्यः, वैश्वानरस्य मनोवत् प्रतीकत्वे मनश्शब्दस्येव वैश्वानरशब्दस्यापि ब्रह्मणि समन्वयोक्तयोगात्। वैश्वानरज्ञानेन सर्वपाप्मप्रदाहश्रवणायोगाच्च। अत एव न द्वितीयः। न हि सोपाधिकस्योपासनेन ज्ञानेन वा सर्वपाप्मदाहः। यच्चोक्तं—पुरुषविधशब्देन द्युमूर्धत्वादिकमुच्यत इति, तन्न, त्वन्मते 'विशेषात्' इत्यत्रापि द्युमूर्धत्वादेरुक्तत्वेन पुनरुक्तेः। यच्चोक्तं—विनैव जाठराग्नेः प्रतीकोपाधिकल्पनाभ्यां साक्षात्केवलस्य

प्रकाशः

सर्वपाप्मेति। "तद्यथैषीकातूलमग्नौ प्रोतं प्रदूयते एवं हैवास्य सर्वे पाप्मानः प्रदूयन्ते" इत्युक्तब्रह्मज्ञानफलस्य प्रतीकज्ञानादसिद्धिरिति भावः। 'अत एव' इत्याद्युक्तं व्यनक्ति—**न हीति**। **पुरुषविधशब्देनेति**। यद्यपि परभाष्ये 'पुरुषमपि चैनं' इत्यपि सूत्रपाठ उक्तः, तथाऽपि स पाठोऽप्रामाणिक इति भावेनायमेव पाठोऽनूदितः, ये तु 'पुरुषविधमपि' इति पठन्ति, तेषां मते द्युमूर्धत्वादिपृथिवीप्रतिष्ठितत्वान्तं यत्पुरुषविधत्वं, तद्गृह्यत इत्युक्तेरिति भावः। **विशेषादितीति**। आद्यसूत्रेऽपीत्यर्थः। "अत एव" इति सूत्रार्थो नातीव विरुद्ध इति तदुपेक्ष्य "साक्षादपि" इति सूत्रार्थं निराह—**यच्चोक्तमिति**। पूर्वं जाठराग्निप्रतीको जाठराग्न्युपाधिको वा परमेश्वर उपास्य इत्युक्तं, इदानीं विनैव प्रतीकोपाधिकल्पनाभ्यां केवलस्यैव अग्निवैश्वानरशब्दवाच्यत्वमुच्यत इत्युक्तमित्यर्थः।

चन्द्रिका

ब्रह्मणः उपासनास्वीकारेऽप्यविरोधः। केवलेऽप्यग्निवैश्वानरशब्दाव-ग्रणीत्वादिगुणयोगेन वर्तेते इति, तन्न, साक्षाच्छब्दस्य कैवल्यार्थतायाः क्लिष्टत्वात्। अतीतानामाकाशादिशब्दानामागामिनामक्षरादिशब्दानामपि यौगिकत्वापत्त्याऽस्माकं मत इव समन्वयाध्यायस्य तत्तच्छब्दप्रवृत्तिनिमित्तगुणपूर्त्यर्थत्वापाताच्च। यच्चोक्तं ब्रह्मपक्षे प्रादेशमात्रश्रुतिरयुक्तेति शङ्कानिरासार्थं "अभिव्यक्तेः" इत्यादिसूत्राणीति, तन्न, "अर्भकौकस्त्वान्नेति चेत्" इत्यनेन, अत्रापि "तथा दृष्टुचपदेशात्" इत्यनेन चास्याः परिहृतत्वादिति दिक्॥

प्रकाशः

क्लिष्टत्वादिति। अव्यवधानार्थत्वात्तस्येत्यर्थः। **गुणपूर्तीति**। तथा चैतत्सूत्रं त्वन्मतप्रतिकूलमिति भावः। किञ्च "तथा दृष्टुचपदेशात्" इत्यनेनैव शङ्कायाः परिहृतत्वात्, साक्षात्तत्प्रतिपादकत्वोक्तावतिशयाभावात्, प्रतिकूलत्वाच्च न वाच्यमेवैतदित्यपि ध्येयम्। **यच्चोक्तमिति**। "यस्त्वेतं प्रादेशमात्रं" इति श्रुतप्रादेशमात्रश्रुतिः कथमित्याकाङ्क्षायां, अतिमात्रस्यापीश्वरस्य प्रादेशमात्रपरिमाणहृदयादिस्थानेषु उपासकानामभिव्यज्यमानत्वाद्वा, हृदयादावनुस्मर्तव्यत्वाद्वा, "प्रादेशमात्रमिव ह वै देवास्संविदिता अभिसम्पन्नास्स्मः" इति श्रुत्या प्रादेशमात्रत्वसम्पत्त्या वा प्रादेशमात्रत्वं युक्तमित्यर्थः। "हृद्यपेक्षया" इत्यग्रेतनेनापि परिहृतत्वं ध्येयमिति भावेनाह— **इति दिगिति**। यद्वा केषाञ्चिन्मते "शब्दादिभ्यः" इत्यादि-

चन्द्रिका

अत्रापि परपक्षेऽपि वैश्वानरस्य जीवत्वं निषिध्य ब्रह्मेत्युक्तेस्तद्विदार्थतैव ॥

केचित्तु कथमपरिच्छिन्नस्य प्रादेशमात्रत्वमिति शङ्कानिरासकं "अभिव्यक्तेः" इति सूत्रम्। उपासनार्थं प्रादेशमात्रत्वेनाभिव्यक्तेरिति च तस्यार्थः। मूर्धप्रभृत्यवयवैः पुरुषविधत्वोक्तिः किमर्थेति शङ्कानिरासकं "अनुस्मृतेः" इति सूत्रम्। पुरुषविधत्वेनानुस्मृत्यर्थं तदुक्तिरिति च तस्यार्थः। कथमुरःप्रभृतीनां वेद्यादित्वोक्तिरिति

प्रकाशः

सूत्रार्थदूषणं कुतो न कृतमित्यत आह—इति **दिगिति**। तथा हि—तत्सूत्रमग्न्यादिशब्दादिना जाठराग्नेर्वैश्वानरत्वशङ्कानिरासकमित्युक्तमयुक्तं, जाठरस्य भूतत्वेन पृथक्शङ्कायोगात्, "अत एव" इति सूत्रे तन्निरासात्। अवश्यवक्तव्यपरसाधकसावकाशत्वोक्त्या बाधकोद्धारपरत्वसम्भवे अन्यथावर्णनायोगाच्च। 'पुरुषमपि' इति पाठस्य असाम्प्रदायिकत्वात्। अग्निशब्दस्य अग्रनयनादिना भगवद्वाचित्वं वक्तुं "साक्षादपि" इति सूत्रमित्यपि न, शब्दमात्रस्य विष्णुवाचित्वे अन्यत्रव्यवहारविरोधरूपबाधकोद्धारत्वसम्भवेऽन्यथोक्त्ययोगादित्यादि ज्ञेयमिति भावः। 'अत्रापि' एतदधिकरणेऽपीत्यर्थः ॥

अपरिच्छिन्नस्येति। अभिविमानपदोक्तस्येत्यर्थः। 'अभिव्यक्तेः' उपासकाभिव्यक्त्यर्थं तद्बुद्धिस्थतयेति यावत्। द्युप्रभृतिप्रदेशसम्बन्धिन्या मात्रया परिच्छिन्नत्वरूपं प्रादेशमात्रत्वमित्याश्मरथ्यो मन्यत इत्यर्थः। 'अनुस्मृत्यर्थं' उपासनार्थम्।

चान्द्रिका

शङ्कानिरासकं "सम्पत्तेः" इति सूत्रम्। प्राणाहुतेरग्निहोत्रत्वसम्पादनाय उरःप्रभृतीनां वेद्यादित्वोक्तिरिति च तस्यार्थ इत्याहुः। तन्न, अभिव्यक्त्यादिसूत्राणां भिन्नविषयत्वादाश्मरथ्यादिपदसूचितविकल्पो न स्यात्। प्रतिसूत्रं साध्याध्याहारश्च स्यात्॥

प्रकाशः

विकल्प इति। अस्मन्मतरीत्या सूक्तव्यवस्थारूपैकार्थ एव नानानिमित्तोक्त्या "लोपः शाकल्यस्य" इत्यादाविव मुनिग्रहणेन सूचितविकल्पो युज्यते, नान्यथेत्यर्थः। **साध्येति।** "अभिव्यक्तेः" इत्यत्र प्रादेशमात्रत्वमिति, "अनुस्मृतेः" इत्यत्र पुरुषविधत्वमिति, "सम्पत्तेः" इत्यत्र उरःप्रभृतीनां वेदित्वाद्युपदेश इत्यध्याहार इत्यर्थः। यद्यप्यत्र भाष्यदिशा अभिव्यक्तेर्निमित्तादग्न्यादिसूक्तनियम इत्याश्मरथ्य इत्यर्थप्रतीत्या सिद्धान्तेऽप्यध्याहारः साध्यस्य अविशिष्ट इत्यतः—**प्रतिसूत्रमित्युक्तम्**। अत एव भाष्ये प्रतिसूत्रमेतदेव साध्यमुक्तम्। तथा चैकत्र अध्याहृतमेव अनुवर्तिष्यते सर्वत्रेति भावः। यद्वा—'अभिव्यक्तेः साक्षादप्यविरोध इत्याश्मरथ्यः' इत्यादिरूपेण प्रतिसूत्रमन्वयः। 'साक्षादपि' अनन्ययोगेन मुख्यवृत्त्यैव ब्रह्मणः सर्वसूक्तप्रतिपाद्यत्वेऽपि अग्न्यादिसूक्तव्यवस्थाया अविरोध इत्याश्मरथ्यादिर्मन्यते, अभिव्यक्त्यादेः निमित्तादित्येवंरूपेणार्थोपपत्तेः, अनुवृत्तस्य पर्यवसितोक्तिर्भाष्ये—**सूक्तनियम इति।** अतोऽस्माकं न क्वाप्यध्याहारस्तव तु प्रतिसूत्रमिति भावः॥

चन्द्रिका

टीकाक्षरार्थस्तु—**गतिसाधनत्वादरतिः पाद इति**। **लोके** गमनेनारतिदर्शनात् रतिविरुद्धगतिसाधनत्वात्पादोऽरतिशब्दार्थ इत्यर्थः। **वाक्यान्तरस्याविरोधेनेत्यादि**। भाष्योदाहृतश्रुतौ "सर्वलिङ्गः सर्वगुणः" इत्यादौ श्रुतस्य सर्वशब्दस्य दुःखित्वादिजीवलिङ्गं नार्थः, निरवद्यत्वादिविरुद्धत्वादित्यर्थः। **अपिपदेनोभयसमुच्चयासिद्धेरि-**

प्रकाशः

यत्तु उक्तरीत्या वैश्वानरशब्दस्य जाठरादिषु चतुर्षु साधारणस्य शिवासाधारणब्रह्मात्मादिशब्दैर्विशेषणाच्छिव एव वैश्वानर इति, तदप्येतेनैव निरस्तं, जाठरस्य पार्थक्यायोगादिरुक्तत्वात्। ब्रह्मात्मादिशब्दस्य विष्ण्वेकनिष्ठताया भाष्यादौ बहुधा प्रतिपादनात्। "अहं वैश्वानरः" इति स्मृतिविरोधात्। पुरुषसूक्तविरोधाच्च, पुरुषसूक्तवैष्णवतायाश्च भाष्ये स्पष्टत्वात्। सूत्रार्थनिरासप्रकारस्तु केषाञ्चिन्मत इव ध्येयः, अनतिभिन्नार्थत्वात् सूत्राणामिति॥

"शब्दादिभ्यः" इति सूत्रे "मूर्धानं दिवोऽरतिं पृथिव्याः" इत्यस्यामृचि गतिसाधनत्वादरतिः पादः पृथिव्याः कारणमिति व्याख्यातम्। तद्विवनक्ति—**गतीति**। अरतिशब्देन गतिरुच्यते। पादस्य तत्साधनत्वात्, कार्यगमनेन तत्साधनं पादो लक्ष्यते। अरतिशब्दार्थो गतिः कथमित्यतोऽवयवार्थेनेत्याह—**लोक इति**। नञो विरुद्धार्थत्वात् रतिविरुद्धा अरतिरिति गतिरेवोच्यत इति। तत्त्वप्रदीपे तु—न रतिर्येनेति सोऽरतिः पाद इत्यर्थ इत्युक्तं "सम्पत्तेः" इति सूत्रव्याख्यायाम्। "अत्र व्यवहारस्योपचरितत्वा-

चन्द्रिका

त्यादि । सूत्रे 'पुरुषविधं' इत्यनेनैवोच्यमानायाः श्रुतिसमाख्यायाः द्वितीयसूत्रोक्तस्मृतिसमाख्यया, असम्भवशब्दोक्तप्रकरणेन च समुच्चयस्यापिशब्देनैव सिद्धेश्चशब्दः शङ्कानिवृत्त्यर्थः सन् भाष्योक्तस्यैव सूचक इत्यर्थः । **प्रागुक्तैवानुपपत्तिरिति** । वैदिकस्याग्न्यादिसूक्तादिव्यवहारस्याग्न्यादिप्रतिपादकत्वनिमित्तकत्वेन मुख्यत्वाङ्गीकारे "सर्वनामा" इत्यादिश्रुतिविरोधादिरूपप्रागुक्तानुपपत्तिरेव व्यवहारस्याभिव्यक्त्यादिनिमित्तकत्वेनोपचरितत्वाङ्गीकारे हेतुरित्यर्थः। भाष्योदाहृतश्रुतौ 'अरं' इत्यस्य सम्यगित्यर्थ इति तत्त्वप्रदीप एवोक्तमिति ॥

इति श्रीमद्ब्रह्मण्यतीर्थपूज्यपादानां शिष्येण श्रीव्यासयतिना
विरचितायां श्रीमद्भाष्यटीकाविवृतौ तात्पर्यचन्द्रिकायां
प्रथमाध्यायस्य द्वितीयःपादः ॥

प्रकाश

ङ्गीकारे प्रागुक्तैवानुपपत्तिः" इत्येतद्दुर्गमार्थत्वाद्व्यनक्ति-**वैदिकस्येति**। "विश्वं हरिमारादरमुपास्ते" इति श्रुतौ 'अरं' इत्यस्यार्थाप्रतीतेराह—**भाष्येति** । एवेति टीकाकारानुक्तेर्निमित्तमेतदिति सूचितम् । शिष्टमुपन्यासमुखेन विशदीकृतमिति भावः । पेटिकासङ्गतिस्तु प्रागेवोक्तेति ॥

॥ इति वैश्वानराधिकरणम् ॥

इति श्रीमत्सर्वतन्त्रस्वतन्त्रश्रीसुधीन्द्रगुरुपादशिष्यश्रीराघवेन्द्रयतिकृते चन्द्रिकाप्रकाशे प्रथमाध्यायस्य द्वितीयः पादः.

श्रीमध्वान्तर्गत श्रीवेदव्यासार्पणमस्तु.

एतत्संपुटग्रन्थोदाहृतवचनाकरप्रदर्शिनी.

ऐ. उ.	.... 2—3—8	अः इति ब्रह्म तत्रागतमहमिति, 174
आथ. उ.	.... 2—1—2	अक्षरात्परतः परः, 227
,,	.... 1—1—7	अक्षरात्संभवतीह विश्वं, 485
तै. सं.	.... 1—1—4	अग्नये जुष्टं निर्वपामि, 310
तै. ब्रा.	.... 2—1—9	अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा, 51
ऋ. सं.	.... 1—1-22	अग्निनाग्निस्सामिध्यते, 69
तै. सं.	.... 4—4—4	अग्निर्मूर्धा, 518
ऐ. ब्रा.	.... 1—1	अग्निर्वै देवानामवमः, 69
तै. सं.	.... 1—5—9	अग्निहोत्रं जुहोति, 50
,,	.... 3—5—1	अग्नीनादधीत, 352
छां. उ.	.... 4-10—1	अग्नीन् परिचचार, 411
म. ना.	.... 16—3	अंगुष्ठमात्रः पुरुषो अंगुष्ठं च समाश्रितः, 436
कठ. उ.	.... 4—12	अंगुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति, 230
आथ. उ.	.... 1—1—6	अचक्षुःश्रोत्रं तदपाणिपादं, 502
छां. उ.	.... 3-14—3	अणीयान् व्रीहेर्यवाद्वा, 279
कठ. उ.	... 1—2	अणोरणीयान् महतो महीयान्, 278
ब्र. सू.	.... 1—1-23	अत एव प्राणः, 143
ऐ. उ.	.... 2—3—8	अथ देवरथस्तस्य वागुद्धिः, 135
आथ. उ.	.... 1—1—5	अथ परा यया तदक्षरमधिगम्यते, 484
कौषीत.	.... 3—3	अथ प्राण एव प्रज्ञात्मा इदं शरीरं, 184
छां. उ.	.... 3-13—7	अथ यदतः परो दिवो ज्योतिः, 43

छां. उ.	3–13—7	अथ यदतः परो दिवो ज्योतिर्दीप्यते, 81
,, ...	4–15—5	अथ यदु चैवास्मिंच्छव्यं, 398
,, ...	5—1—6	अथ ह प्राणाः अहंश्रेयसि व्यूदिरे, 139
,, ...	4–10—4	अथ हाग्नयः समूदिरे, 393
,, ...	4–11—1	अथ हैनं गार्हपत्योऽनुशशास, 402
,, ...	4–12—1	अथ हैनमन्वाहार्यपचनोनुशशास, 411
,, ...	4–13—1	अथ हैनमाहवनीयोऽनुशशास, 411
,, ...	1—7—1	अथाध्यात्मं, 426
ऋ. सं. ...	1—2–15	अथावयमादित्ये, 75
षट्प्रश्न.	1–10	अथोत्तरेण तपसा ब्रह्मचर्येण, 431
तै. सं.	3—1–4	अदितिः पाशान् प्रमुमोक्तु देवः, 347
कठ. उ.	2—1	अदितिर्देवतामयी, 310
ऐ. उ.	3—1—6	अदितिर्हीदं सर्वं यदिदं किंच, 310
बृ. उ.	3—7–23	अदृष्टो द्रष्टाऽश्रुतः श्रोता, 453
तै. आ.	3–13	अद्भ्यः संभूतः, 8
तै. उ.	2—2—2	अद्यतेऽत्ति च भूतानि, 305
भ. गी.	13—22	अनादिमत्परं ब्रह्म, 76
तै. आ.	3—11	अन्तः प्रविष्टं कर्तारं, 428
अथर्वशिरः	1	अन्तरादन्तरं प्राविशत्, 483
छां. उ.	1–8—8	अन्तवद्वै किल ते शालावत्य, 34
म. ना.	11–6	अन्तर्बहिश्च तत्सर्वं, 171
सुबालोपनिषत्	7	अन्तश्शरीरे निहितो गुहायां, 467
छां. उ.	1—3–6	अन्नं थं, 525
याज्ञिकी उ.	66	अन्नमयप्राणमय........शुध्यन्तां, 332
छां. उ.	1–11—9	अन्नमेव प्रतिहरमाणानि, 36

तै. उ.	.... 3—2	अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते, 285
पा. सू.	.... 2—3—29	अन्यारादितरर्ते दिक्छब्दाञ्चूत्तर, 469
त. उ.	.... 2—2	अन्योऽन्तर आत्मानंदमयः, 248
छां. उ.	.... 1—2—9	अपहतपाप्मा ह्येषः, 203
,,	.... 4—11—2	अपहते पापकृत्यां लोकी भवति, 415
,,	.... 1—8—5	अपां का गतिरिति, 34
तै. आ.	.... 3—11	अपां नेतारं, 149
छां. उ.	.... 1—8—6	अप्रतिष्ठतं वै किल ते दाल्भ्य, 34
आथ. उ.	.... 2—1—2	अप्राणो ह्यमनाश्शुभ्रः, 274
कठ. उ.	.... 1—3	अभयं तितीर्षतां पारं, 394
तै. सं.	.... 2—6—1	अभिक्रामं जुहोति, 306
ऋ. सं.	.... 5—3—21	अभि त्वा शूर नोनुमः, 555
छां. उ.	.... 5—18—1	अभिविमानमात्मानं, 541
,,	.... ,,	अभिविमानमात्मानं वैश्वानरमुपास्ते, 420
,,	.... 1—8—5	अमुष्य लोकस्य का गतिः, 34
बृ. उ.	... 4—5—19	अयं वै हरयोऽयं वै दश च, 357
छां. उ.	.... 1—8—7	अयं लोक इति होवाच, 34
बृ. उ.	... 4—2—1	अयं वा व शिशुः, 24
,,	.... 5—9—1	अयमग्निर्वैश्वानरः, 525
,,	.... ,,	अयमग्निर्वैश्वानरः योऽयमन्तः पुरुषे, 538
छां. उ	... 4—15—5	अर्चिषमेवाभिसंभवन्ति, 429
कठ. उ.	.... 3—11	अव्यक्तात्पुरुषः परः, 159
ऐ. उ.	.... 3—2—3	अशरीरः प्रज्ञात्मा, 13
,,	.... 2—1—5	असावादित्यः त्रिवृत् त्रिवृदिव, 410
छां. उ.	.... 5—4—1	असौ वाव लोको गौतमाग्निः, 565

छां. उ.	.... 1—8—5	असौ लोकः, 34
पा. सू.	 1-4-107	अस्मद्युत्तमः, 412
,,	 5-2-121	अस्मायामेधास्रजो विनिः, 482
छां. उ.	.... 3-12—3	अस्मिन् हीमे प्राणाः प्रतिष्ठिताः, 113
,,	.... 1—9—1	अस्य लोकस्य का गतिः, 34
,,	.... 3-12—2	अस्यां हीदं सर्वं प्रतिष्ठितं, 89
भ. गी	.... 7—6	अहं कृत्स्नस्य जगतः, 152
छां. उ.	.... 4-14—3	अहं तु ते तद्वक्ष्यामि तद्यथा, 428
ऋ. सं.	 3--6-15	अहं भूमिमददामार्याय, 197
,,	....	,,	अहं मनुरभव, 184
,,	....	,,	अहं मनुरभवं सूर्यश्च, 138
भ. गी.	. 15—14	अहं वैश्वानरो भूत्वा, 524
,,	... 9--24	अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च, 341
,,	.... 9—16	अहमग्निरहं हुतं, 70
,,	... 10—20	अहमात्मा गुडाकेश सर्वभूताशयस्थितः, 225
ऐ. उ.	... 2—1—4	अहमुक्थमास्मि, 162
तै. आ.	... 1-12	अहल्यायै जार, 334
छां. उ.	.... 1—9—1	आकाश इति होवाच, 157
तै. उ.	.... 2—1—1	आकाशस्संभूतः, 107
,,	.... ,,	आकाशाद्वायुः, 28
तै. सं.	.... 2—1—2	आग्नेयं कृष्णग्रीवमालभेत, 347
तै. ब्रा.	... 3—3—5	आघारमभिघारयति, 50
ऋ. सं.	.... 7—8-17	आ तेन यातं, 364
ऐ. उ.	.... 3—2—3	आत्मानं परस्मै शंसति, 262
कठ. उ.	.... 3—3	आत्मानं रथिनं विद्धि, 374

ऐ. उ.	3—2—2	आत्मानं वेद, 262
,, ...	2—4—1	आत्मा वा इदं, 285
छां. उ ..	5-18--1	आत्मानं वैश्वानरमुपास्ते, 540
,, ...	4-15—1	आत्मेति होवाच, 420
,, ...	1-11—7	आदित्यमुच्चैस्सन्तं गायन्ति, 35
ऐ. उ. ...	2—4—2	आदित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशत्, 238
ऋ. सं.	1 –2-15	आदित्यव्रते तवानागसो अदितये स्याम, 75
विष्णुसहस्रनाम....	60	आदित्यो ज्योतिरादित्यः, 252
ऐ. उ.	3—2—3	आदित्यो रसः........यश्चासावादित्यः, 223
कौषीत. ...	3—8	आनन्दोऽजरोऽमृतः, 188
तै. उ.	3—6 –1	आनन्दो ब्रह्मेति व्यजानात्, 396
,, ...	,,	आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते,284
जै. सू.	1—2—1	आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां, 52
तै. ब्रा.	3—6 –6	आशासाना मेधपतिभ्यां मेधं, 358
पा. सू.	1—1-45	इग्यणः संप्रसारणं, 310
ऐ. उ.	2—1—8	इतः प्रदाना ह्येत इतस्संभृताः, 205
छां. उ.	3-14—4	इतः प्रेत्याभिसंभवितास्मि, 287
कठ. उ.	5—5	इतरेण तु जीवन्ति, 15
ऐ. उ. ...	3—2—3	इति ह स्माह वाध्वः, 241
छां. उ.	1—6– 8	इत्यधिदैवतं, 426
कौषीत.	3—3	इदं शरीरं परिगृह्योत्थापयति, 184
छां. उ. ...	3-12—1	इदं सर्वं, 95
,, ...	,,	इदं सर्वं भूतं, 112
कौषीत.	3—1	इन्द्र उवाच मामेव विजानीहि, 183
तै ब्रा.	3—3—7	इन्द्रं ह्यध्वर्योऽध्वरआघारमाघारयति, 51

कौषीत	3—1	इन्द्रः....त्रिशीर्षाणं त्वाष्ट्रमहनं, 188
ऐ. उ. ...	2—2—3	इन्द्रस्य प्रियं धामोपेयाय, 147
तै. आ.	3-11	इन्द्रस्यात्मा, 401
ऋ. सं.	2—3-22	इन्द्रं मित्रं वरुणमग्निमाहुः, 557
,, ...	,,	इन्द्रं मित्रं, 148
तै. सं.	4—2—5	इन्द्रो न तस्थौ, 462
बृ. उ.	2—5-19	इन्द्रो मायाभिः पुरुरूप ईयते, 360
तै. आ.	3-11	इन्द्रो राजा, 401
,, ...	,,	इन्द्रो राजा जगतो य ईशे, 293
तै. ब्रा.	1—3-10	इन्द्रो वै वृत्रं हत्वा, 137
बृ. उ.	6—2—2	इन्धो ह वै नामैष योऽयं, 342
छां. उ.	4-15—6	इमं मानवमावर्तं नावर्तन्ते, 434
,, ...	3-12—2	इयं वाव सा येयं पृथिवी,
विष्णुसहस्रनाम....	8	ईशानः प्राणदः प्राणः, 3
अथर्वशिरः	4	ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्रं, 73
कठ. उ.	4—12	ईशानो भूतभव्यस्य, 498
भ. गी.	18-61	ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति, 281
पा. सू. ...	3—3—1	उणादयो बहुळं, 420
छां. उ.	7-15—3	उत्क्रान्तप्राणान् शूलेन, 13
ऐ. उ. ...	2—1—4	उदरं ब्रह्म, 170
छां. उ.	4-14—1	उपकोसलैषा सोम्य तेऽस्मद्विद्या, 397
,, ...	4-10—1	उपकोसलो ह वै कामलायनः, 402
तै. सं.	2—5-11	उपव्ययते, 379
पा. सू.	2—2-30	उपसर्जनं पूर्वं, 423
कठ. उ.	1—2	उभौ तौ न विजानीतः, 317

कठ. उ.	....	2—2	ऊर्ध्वं प्राणमुन्नयति, 498
,,	...	1—3	ऋतं पिबन्तौ सुकृतस्य लोके, 320
,,	...	2—2	एकं रूपं बहुधा यः करोति, 360
नृसिंहपूर्वतापनी	..	2—4	एकः पुरस्तात्, 309
तै. सं.	..	2—5-10	एकविंशतिमनुब्रूयात्, 379
,,	...	,,	एकविंशः षोडशो वैराजं, 355
,,	...	6—3—7	एकादशप्रयाजान् यजति, 354
,,	....	6—3-10	एकादश वै पशोरवदानानि तानि, 480
छां. उ.	....	4-15—2	एतं संयद्वाम इत्याचक्षते, 395
ऐ. उ.	....	3—2—3	एतं ह्येव बह्वृचा महत्युक्थे मीमांसन्ते, 209
षट्प्रश्न.	....	4—7	एतत्सर्वं परे आत्मनि संप्रतिष्ठते, 341
बृ. उ.	....	1—5—3	एतत्सर्वं मनः, 368
तै. सं.	....	2—5—3	एतदस्मै दधि कुरुतेत्यब्रवीत्, 303
कठ. उ.	....	1—2	एतदालंबनं ज्ञात्वा ब्रह्मलोके महीयते, 316
ऐ. उ.	....	2—1—1	एतद्ब्रह्म ब्रह्मणो लोको ब्रह्मेमं, 136
छां. उ.	...	4-15—1	एतदमृतमभयमेतद्ब्रह्म, 427
,,	...	,,	एतद्ब्रह्म, 420
ऐ. उ.	....	2—1—5	एतद्धस्म वै तद्विद्वानाह हिरण्यदन् बैदः, 225
,,	...	2—1—8	एतद्धस्म वै तद्विद्वानाह महिदासः, 140
छां. उ.	....	3-14—4	एतमितः प्रेत्याभिसंभवितास्मि, 278
ऐ. उ.	....	3—2—3	एतमेव ब्रह्मेत्याचक्षते, 264
छां. उ.	...	5-18—2	एतस्यात्मनो वैश्वानरस्य मूर्धैव, 561
ऐ. उ.	...	3—2—3	एतामनुविधं संहितां संधियमानां, 255
छां. उ.	...	3-12—2	एतामेव नातिशीयंते, 49
छां. उ.	....	3-11—3	एतामेव ब्रह्मोपनिषदं, 94

ऋ. सं.	....	7—1-24	एते असृग्रमिंदवः, 349
षट्प्रश्न.	...	3--4	एवमेवैष प्राण इतरान् प्राणान्, 498
ऐ. उ.	...	2—2—1	एष इमं लोकमभ्यार्चत्पुरुषरूपेण, 139
छां उ.	....	4-15—3	एष उ एव वामनिरेष हि सर्वाणि, 428
बृ. उ.	....	5--7—3	एष त आत्मान्तर्यामी, 452
छां. उ.	....	3-14—3	एष म आत्मांतर्हृदये अणीयान् व्रीहेर्यवाद्वा,246
,,	...	,,	एष म आत्मांतर्हृदये ज्यायान्, 246
कौषीत.	....	3—9	एष लोकाधिपतिः, 187
सुबालोपनिषत्	...	7	एष सर्वभूतांतरात्मा, 461
बृ. उ.	....	6—4-22	एष सर्वेश्वरः, 74
षट्प्रश्न.	....	4--9	एष हि द्रष्टा स्प्रष्टा, 341
कौषीत.	....	3—8	एष ह्येव साधु कर्म, 186
तै सं.	....	7—2—8	ऐन्द्रवायवं गृह्णाति, 334
,,	....	1—2—1	औषधे त्रायस्वैनं, 9
,,	....	2—1—1	औदुंबरो यूपो भवति, 383
छां. उ.	....	4-10—5	कं च खं च तु न विजानामि, 434
,,	....	4—10	कं ब्रह्म खं ब्रह्म, 427
पा. सू.	....	2—2-38	कडाराः कर्मधारये, 423
छां. उ.	....	1-11—4	कतमा सा देवता, 26
,,	....	,,	कतमा सा देवतेति अन्नमिति होवाच, 33
,,	....	,,	कतमा सा देवतेति आदित्य इति होवाच, 33
तै. सं.	...	1—4-22	कदाचन स्तरीरासि नेन्द्र, 462
अथ. उ.	....	3—1 - 3	कर्तारमीशं, 486
षट्प्रश्न.	....	4— 1	कस्मिन् सर्वे प्रतिष्ठिताः, 32
छां. उ.	....	1—8--4	का साम्नो गतिरिति, 34

ऋ. सं.	 5–6–13	कुविदंग नमसा ये, 498
छां. उ.	.... 4–10—4	कुशलं नः परिचचारीद्धंतास्मै, 413
भ. गी.	 15–16	कूटस्थोऽक्षर उच्यते, 485
पा. सू.	... 3–3–113	कृत्यल्युटो बहुळं, 506
तै. उ.	... 2—7	को ह्येवान्यात्, 239
छां. उ.	.... 5–11—1	को न आत्मा किं ब्रह्म, 527
छां. उ.	.... 3–12—1	गायति त्रायति च, 108
छां. उ.	 3–12–1	गायत्री वा इदं सर्वं भूतं यदिदं किंच, 44
कठ. उ.	 1–2–12	गुहाहितं गह्वरेष्ठं पुराणं, 339
कठ. उ.	.... 2–1—7	गुहां प्रविश्य तिष्ठंती, 339
कठ. उ.	.... 2—2–6	गुह्यं ब्रह्म सनातन, 22
भ. गी.	 15–8	गृहीत्वैतानि संयाति वायुर्गंधानिवाशयात्, 341
ऋ. सं.	 8–6–16	घर्मा समंतात्त्रिवृतं व्यापतुः, 322,
ऐ. उ.	.... 3—2—1	चक्षुर्मयः श्रोत्रमयश्छंदोमयो, 210
ऋ. सं.	.... 1—8—7	चक्षुर्मित्रस्य वरुणस्याग्नेः, 254,
ऐ. उ.	.... 2—1—4	चक्षुः श्रोत्रं मनो वाक्प्राणः, 145
प्रश्न. उ.	.... 4—8	चक्षुश्च द्रष्टव्यं च श्रोत्रं च, 32
आथ. उ.	... 3—1–4	चक्षुषी चन्द्रसूर्यौ, 564
ऐ. उ.	.... 3—2—3	चत्वारः पुरुषा इति बाध्वः, 241
ऋ. सं.	.... 8—4–19	चन्द्रमा मनसो जातः, 527
ऋ. सं.	.... 1—8—7	चित्रं देवाना मुदगादनीकं 74
पा. सू.	.... 1–3—7	चुटू, 421
पा. सू.	.... 5—3–61	ज्य च, 288
आथ. उ.	.... 3—2—1	जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानं, 509
भ. गी.	 13–18	ज्योतिषामपि तज्ज्योतिः, 71

ऐ. उ.	.... 2—1—5	तं देवाः प्राणयंत स एषोसुः, 135
ऐ. उ.	.... 2—1—8	तं भूतिरिति देवा उपासांचक्रिरे, 170
कौषीतकि	... 3—2	तं मामायुरमृतमित्युपास्व, 186
मुद्गल	... 3	तं यथा यथोपासते तथैव भवति, 532
ऐ. उ.	.... 2—1—1	तं शतं वर्षाण्यभ्यार्चत्, 178
आथ. उ.	.... 2—2—9	तच्छुभ्रं ज्योतिषां ज्योतिः, 71
ऋ. सं.	.... 8—4–17	ततो ज्यायांश्च पुरुषः, 49
बृ. उ.	.... 3—4—1	ततोहंनामाभवत्, 175
ऐ. उ.	.... 2—1—4	तत्प्राण उत्क्रान्ते अपद्यत, 10
ऐ. उ.	.... 2—1—4	तत्प्राणे प्रपन्न उदतिष्ठत्, 10
आथ. उ.	.... 1—7—1	तथाक्षरात्संभवतीह विश्वं, 132
ब्र. सू.	.... 1—4—3	तदधीनत्वादर्थवत्, 155
ऐ. उ.	... 2—3—8	तदयं प्राणोधितिष्ठति, 364
बृ. उ.	... 3—4–10	तदात्मानमेवावेदहं ब्रह्मास्मि, 152
सुबालोपनिषत्	 1	तदाहुः किं तदासीत्, 461
छां. उ	.... 3–12—6	तदेतदृचाभ्यनूक्तं तावानस्य, 84
छां. उ.	... 3–13—8	तदेतदृष्टं च श्रुतं च, 48
म. ना. उ.	.... 1—6	तदेव ब्रह्म परमं कवीनां 211
तै. उ.	.... 2—1	तदेषाभ्युक्ता, 117
छां. उ.	.... 4–14—3	तद्यथा पुष्करपलाश आपो, 393
छां. उ.	.... 5–24—3	तद्यथैषीकातूलमग्नौ प्रोतं प्रदूयते, 567
छां. उ.	... 1—7—5	तद्यजुस्तद्ब्रह्म, 427
छां. उ.	.... 4–11—1	तद्यदस्मिन् सर्पिर्वोदकं सिंचति, 395
बृ. उ.	.... 4—4–15	तद्देवा ज्योतिषां ज्योतिः, 70
तै. आ.	 3–14	तद्वै त्वं प्राणो अभवः महान् भोगः प्रजापतेः, 1

आथ. उ.	.. 1—8	तपसा चीयते ब्रह्म, 487
भ गी.	 9–19	तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च, 172
ऐ. उ.	... 2—2—3	तमिंद्र उवाच ऋषे प्रियं वै मे, 136
ऐ. उ.	... 2—2—3	तमिंद्र उवाच प्राणो वा अहं, 151
ऐ. ब्रा.	 40–5	तमेताः पंचदेवताः परि ह्येनं, 417
बृ. उ.	.... 4—2—2	तमेताः सप्ताक्षितय उपतिष्ठंते, 438
तै. आ.	 3–12	तमेवं विद्वानमृत इह भवति, 486
तै. आ.	 3–14	तमेव मृत्युममृतं तमाहुः, 25
आथ. उ.	..... 2—2—5	तमेवैकं जानथ आत्मानं, 562
विष्णुतत्वविनिर्णय, ब्रह्मतर्क		तयोः स्वभावो बलवान् उपजीव्यादिकश्च, 136
ऐ. उ.	.... 3—2—3	तस्मात्पुरुषं पुरुषं प्रत्यादित्यो, 231
ऐ. उ.	.... 2—2—2	तस्मादक्षरं तस्मादक्षरं इत्याचक्षते, 496
आथ. उ.	.... 1—1—9	तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते, 488
बृ. उ.	.... 6—2—3	तस्मादेव प्राविविक्ताहारतर इवैव भवति, 342
ऋ. सं.	.... 8—4–17	तस्माद्विराडजायत, 125
ऐ. उ.	.. 2—2—4	तस्य ह वा एतस्य बृहतीसहस्रस्य संपन्नस्य, 154
ऐ. उ.	.... 3—2—3	तस्यैतस्यासावादित्यो रसः, 210
ऋ. सं.	.... 2—3–18	तस्येदाहुः पिप्पलं स्वाद्वग्रे तन्नोन्नशद्यः 323
छां. उ.	.... 1—6—7	तस्योदिति नाम, 430
बृ. उ.	.... 4—1–20	तस्योपनिषत्सत्यमिति, 311
बृ. उ.	.... 7 5—4	तस्योपनिषदहमिति, 175
ऐ. उ.	.... 2—1—4	ता आहिंसंत, 139
प्र. उ.	.... 2—3	तान् वरिष्ठः प्राण उवाच, 203
ऐ. उ.	.... 2—2—4	तावंति शतसंवत्सरस्याह्नां सहस्राणि 139
ऐ. उ.	... 2—1—4	ता वा एताः शीर्षन् श्रियःश्रिताश्चक्षुः, 134

ऐ. उ.	.... 2—2—2	ता वा एतास्सर्वा ऋचः, 135
छां. उ.	.... 3-12—6	तावानस्य महिमा ततो ज्यायांश्च पुरुषः, 84
जै. सू.	.... 1 -2—8	तुल्यं च सांप्रदायिकं, 52
पा. सू.	.... 7—1-74	तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य, 241
अथर्वशिर.	 1	ते देवा रुद्रमपृच्छन्, 483
छां. उ.	.. 4-14—1	ते होचुरुपकोसलैषा, 403
छां. उ.	.... 3-12—6	त्रिपादस्यामृतं दिवि पादोस्य, 114
तै. आ.	... 3-14	त्वं प्राणो अभवः, 9
ऋ. सं.	.... 2-15—7	त्वमग्न इंद्रो वृषभः सतामसि, 75
ऋ. सं.	 4--5-11	त्वामग्ने तमसि, 61
मांडूक. उ.	.... 1—2	दक्षिणाक्षिमुखे विश्वो मनस्यंतस्तु तैजसः 131
सुबालोपनिषत्	 6	दिव्यो देव एको नारायणः, 461
आथ. उ.	.... 2—2	दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः,485
भ. गी.	... 7-23	देवान् देवयजो यांति मद्भक्ता यांति मामपि,398
ऋ. सं.	.... 2—6-29	देवाश्चित्ते असुर्य प्रचेतसो, 74
तै. ब्रा.	.... 3—5—3	देवेद्धो मन्विद्धः, 379
छांदोग्यभाष्य		द्वावात्मानौ हि देवेषु द्वौ प्राणौ द्वौ तु चेतनौ, 40
ऋ. सं.	... 2—3-17	द्वा सुपर्णा, 216
विष्णुतत्वनिर्णय ब्रह्मतर्क		द्विविधं बलवत्वं च बहुत्वाच्च स्वभावतः, 135
मैत्री.	 6-22	द्वे ब्रह्मणी वेदितव्ये, 332
तै. सं.	.... 1--1—6	धान्यमसि धिनुहि देवान्, 71
नृसिंहपुराण.	.... ,,	ध्येयस्सदा सवितृमण्डलमध्यवर्ती, 172
ऋ. स.	.... 8—6-13	न ऋते त्वत्क्रियते, 177
कठ. उ.	.... 1—2	न जायते म्रियते वा विपश्चित्, 316
पा. सू.	.... 8—2—8	न ङिसम्बुध्योः, 280

बृ. उ.	5—8 -8	न तदश्नाति किंचन, 301
ऋ. सं.	5—6–24	न ते विष्णो जायमानो न जातो, 212
ऋ. सं. ...	5--3-21	न त्वा वां अन्यो दिव्यो न पार्थिवो, 73
ऋ. सं.	1—6—1	न त्वा वां इन्द्र कश्चन न जातो, 73
कठ. उ.	2—2—5	न प्राणेन नापानेन मर्त्यो जीवति कश्चन, 3
ऋ. सं.	2—8—3	न यस्येन्द्रो न वरुणो न मित्रो, 519
कौषीत.	3—8	न वाचं विजिज्ञासीत, 184
कठ. उ. ...	1—2-18	न हन्यते हन्यमानेपि देहे, 316
बृ. उ. ...	5—7-23	नान्योतोस्ति द्रष्टा, 475
कठ. उ.	1--2-22	नायमात्मा प्रवचनेन लभ्य: 375
महा.नारा.उ....	11-4	नारायणपरो ज्योतिः, 70
नारा. उ.	1	नारायणाद्रुद्रो जायते, 519
नारा. उ.	1	नारायणाद्ब्रह्मा जायते, 519
आथ. उ. ...	1—1—6	नित्यं विभुं सर्वगतं सुसूक्ष्मं, 522
श्वेताश्वतर. उ....	6–12	निष्कलं निष्क्रियं, 187
महा.नारा.उ....	2—4	निहितं गुहासु, 220
ऋ. सं.	6—6-38	नेमिं नमंति चक्षसामेषं, 355
पा. सू.	1—3-17	नेर्विशः, 315
ऋ. सं.	7—7–28	नैतावदेनापरो अन्यदस्त्युक्षासद्यावा, 104
बृ. उ.	3—2—1	नैवेह किंचनाग्र आसीत्, 294
सुबालोपनिषत्....	6	नैवेह किंचनाग्र आसीत् अमूलं
महा.नारा.उ. . ..	11-3	पतिं विश्वास्यात्मेश्वरं शाश्वतं शिवमच्युतं, 290
आथ. उ. ...	1—1—4	परा चैवा परा च तत्रापरा ऋग्वेदः, 501
ऐ. ब्रा. ...	40-5	परि ह्येनं म्रियन्ते, 69
ऐ. ब्रा.	40–5	परि ह्येनं म्रियन्ते विद्युद्वृष्टिः 394

प्र. उ.	....	4—7	परे आत्मनि, 32
छां. उ.	....	3-13—7	परो दिवः, 86
ऋ. सं.	....	7-99—1	परो मात्रया, 42
छां. उ	...	1—9	परोवरीयो हास्य भवति, 35
तै. सं.	....	4—5—2	पशूनां पतये वृक्षाणां पतये, 290
श्वेताश्वतर.उ	....	3—1—9	पश्यत्यचक्षुः स शृणोत्यकर्णः, 479
भ. गी.	....	11-5	पश्य मे पार्थ रूपाणि शतकोटिसहस्रशः 360
बृ. उ.	...	1—5-20	पुण्यमेवामुं गच्छति, 344
ऐ. उ.	....	3—2—3	पुरुषं पुरुषं प्रत्यादित्यो भवति, 252
आथ. उ.	....	2—1-10	पुरुष एवेदं विश्वं, 517
ऐ. उ.	....	2—2—1	पुरुषरूपेण य एष तपति. 147
ना. उ.	..	1	पुरुषो ह वै नारायणः, 102
तै. ब्रा.	....	2—3—6	प्रजापतिः प्रजाः सृष्ट्वा व्यस्रंसत, 251
कौषीतकि.	....	3—6	प्रज्ञया वाचं समारुह्य, 201
कौषीतकि.	....	3—8	प्रज्ञानंदोजरः, 184
पा. सू.	....	6-1-102	प्रथमयोः, 119
ब्र. सू.	....	3—1—5	प्रथमेऽश्रवणात्, 146
श्वेताश्वतर.उ.	...	1-10	प्रधानममृताक्षरं, 519
पा. सू.	...	5—3-60	प्रशस्यस्य श्रः, 288
छां. उ.	....	1-10—9	प्रस्तोतर्या देवता, 38
तै. उ.	....	2—3	प्राणं देवाः, 5
ऐ. ब.	....	2—1—4	प्राण उदक्रामत्, 139
मांडव्यश्रुति.	....		प्राण एवाकरणस्तस्मान्मुख्यस्तस्मान्मुख्यः, 24
ऐ. उ.	...	2—2—3	प्राणस्त्वं प्राणः सर्वाणि भूतानि, 137
छां. उ.	....	6—8—2	प्राणस्य प्राणः प्राणबंधनं हि, 38

बृ. उ.	.... 4—2—1	प्राण: स्थूणा, 40
तै. उ.	.... 3—3	प्राणाद्ध्येव खल्विमानि भूतानि जायंते, 39
तै. आ.	... 3-14	प्राणापानावजिरं संचरंतौ, 20
छां. भाष्य.		प्राणस्थविष्णुना सर्वे प्रसूयंते यतस्ततः, 40
छां. उ.	.... 4-10—5	प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म, 396
ऐ. उ.	... 5—2—1	प्राणो वंश इति स्थविरः, 139
ऐ. उ.	... 2—2—3	प्राणो वा अहमस्म्यृषे, 137
ऐ. उ.	.... 2—2—1	प्राणो वाव तदभ्यार्चत्, 154
छां. उ.	.... 7—3—2	प्राणो वा आशाया भूयान्, 221
कौषीतकि.	...; 3—2	प्राणोस्मि प्रज्ञात्मा, 183
ऐ. उ.	.... 2—2—1	प्राणो ह्येष तपति, 170
बृ. उ.	.... 3—4—8	प्रेयः पुत्रात्, 461
अनुव्याख्यान	.... 1—1—6	बाहुळ्याच्छ्रुतिलिंगयोः, 18
कठ. उ.	... 1—3—3	बुद्धिं तु सारथिं विद्धि, 374
तै. आ.	... 3-14	ब्रह्मणैव रमते, 163
ऐ. उ.	.... 2—4—3	ब्रह्म ततमं, 209
आथ. उ.	.... 2—2—7	ब्रह्मपुरे ह्येष व्योम्न्यात्मा, 220
बृ. उ.	.... 3—4-10	ब्रह्म वा इदमग्र आसीत् 152
तै. उ.	.. 2--2	ब्रह्मविदाप्नोति परं 339
आथ. उ.	.... 1—1—1	ब्रह्मा देवानां प्रथमः सबंभूव, 497
तै. आ.	.... 3-11—2	ब्रह्मेन्द्रमग्निं जगतः प्रतिष्ठां, 428
ऐ. उ.	.... 2—1—4	ब्रह्मेमं पुरुषं, 143
तै. आ.	.... 3-14—1	भर्ता सन् भ्रियमाणो बिभर्ति, 7
तै. उ.	.... 2—8	भीषास्मादग्निश्च, 417
पा. सू.	.... 1—3-66	भुजोनवने, 412

भ. गी.	 7–23	मद्भक्ता यांति मामपि, 532
कठ. उ.	.... 2—2—3	मध्ये वामनमासीनं, 498
छां. उ	 3–18–1	मनो ब्रह्मेत्युपासीत, 566
छां. उ.	.... 3–14—2	मनोमयः प्राणशरीरः, 566
ऐ. उ.	.... 2—1—4	मनो वाक्प्राणः, 142
छां. उ.	.... 3–14—2	मनोमयः प्राणशरीरो भारूपः, 201
भ. गी.	 14–3	मम योनिर्महद्ब्रह्म, 495
कठ. उ.	... 2–3–2	महद्भयं वज्रमुद्यतं, 54
ऐ. आ.	.... 3—2—3	महापुरुष इति यमवोचाम, 251
कठ. उ.	.... 2—1—4	महांतं विभुमात्मानं मत्वा धीरो, 375
कौषीतकि.	.... 3—1	मामेव विजानीहि प्राणोस्मि, 184
पा. सू.	 1–1–8	मुखनासिकावचनोनुनासिकः, 491
ऋ. सं.	.... 4—5—9	मूर्धानं दिवः, 525
छां. उ.	.... 5–18—2	मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः, 527
बृ. उ.	.... 3—2—1	मृत्युनैवेदं 305
कौषिताकि.	.... 3—1	यं त्वं मनुष्याय हिततमं, 183
बृ. उ.	.... 5–7—3	यं पृथिवी न वेद यः पृथिव्या अंतरः, 445
बृ. उ.	.... 5—7–3	यः पृथिव्यां तिष्ठन्, 430
बृ. उ.	.... 5—7—3	यः पृथिव्या अन्तरः, 247
बृ. उ.	 5–7–22	य आत्मनि तिष्ठन् य आत्मनोन्तरो, 198 (माध्यन्दिनपाठः.)
बृ. उ.	.... 5—7–22	य आत्मनि तिष्ठन् आत्मनोंतरो यमयति, 447 (माध्यंदिनपाठः.)
बृ. उ.	.... 5—7—3	य आत्मनोन्तरः, 469
बृ. उ.	.... 5—7—9	य आदित्ये तिष्ठन्, 172

ऋ. सं. .... 2—2–24 य उ त्रिधातु पृथिवीमुत द्यां, 290.
छां. उ. ... 3-11—3 य एतामेव ब्रह्मोपनिषदं वेद, 49
छां. उ. ... 4-11—1 य एष आदित्ये पुरुषः सोहमस्मि, 392
छां. उ. .... 4-11—1 य एष आदित्ये पुरुषो दृश्यते, 409
छां. उ. .... 1—7—5 य एषोंतरक्षिणि, 392
छां. उ. .... 1—6—6 य एषोंतरादित्ये हिरण्मयः, 171
ना. .... 11-6 यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा, 211
तै. आ. .... 3-12 यज्ञेन यज्ञमयजंत, 85
भ. गी. .... 15-11 यतंतोऽप्यकृतात्मानो नैनं पश्यंति, 341
तै. उ. ... 3—1-11 यतो वा इमानि भूतानि, 27
आथ. उ. .... 1 --1—6 यत्तदद्रेश्यमग्राह्यं, 382
शत. ब्रा. ... 10-6-3-2 यथा व्रीहिर्वा यवो वा श्यामाकतंडुलो वा, 279
षट्प्र. उ. .... 4—7 यथा सोम्य वयांसि वासोवृक्षं, 32
आथ. उ. .... 1—1—7 यथोर्णनाभिस्सृजते गृह्णते च, 484
आथ. उ. .... 3--1—3 यदा पश्यः पश्यते रुक्मवर्णं, 489
शत. ब्रा. .... 10-3-3-6 यदा वै पुरुषः स्वपिति, 27
छां. उ. .... 3-12—4 यादिदमस्मिन्नन्तःपुरुषे, 112
छां. उ. ... 3-12—3 यदिदमास्मिन्पुरुषे शरीरं, 112
छां. उ. ... 8—1—1 यदिदमास्मिन् ब्रह्मपुरे दहरं, 419
छां. उ. .... 4-15—5 यदु चैवास्मिन् शव्यं कर्म, 431
म. ना. .... 1—5 यदेकमव्यक्तमनन्तरूपं, 360
छां. उ. .... 4-10—5 यदेव कं तदेव खं, 434
तै. उ. .... 2—7—1 यदेष आकाशः, 157
छां. उ. .... 4-10—5 यद्वाव खं तदेव खं, 431
छां. उ. .... 3-12--7 यद्वैतद्ब्रह्म, 49

तै. ब्रा.	.... 37-9—3	यमिंद्रमाहुः, 76
आथ. उ.	... 1—1—5	यया तदक्षरमाधिगम्यते, 227
बृ. उ.	.... 5 · 7-14	यश्चक्षुषि तिष्ठन्, 425
बृ. उ.	... 5—7-18	यश्चक्षुषि तिष्ठन् चक्षुषोंतरः, 408
ऐ. उ.	.... 3—2—4	यश्चासावादित्यः, 231
तै. उ.	.... 2—8	यश्चासावादित्ये, 251
तै. आ.	 3-14	यस्तद्वेद, 163
बृ. उ.	.... 5—7-14	यस्तेजसि तिष्ठन्, 465
छां. उ.	.. 5-18—1	यस्त्वेतमवं प्रादेशमात्रं, 522
बृ. उ.	.... 4—4-17	यस्मिन् पंच पंच जनाः, 350
तै. सं.	.... 3—5 7	यस्य पर्णमयी जुहूर्भवति, 165
सुबालोपनिषत्	 7	यस्य पृथिवी शरीरं यः पृथिवीमन्तरे संचरन् 13
बृ. उ.	.... 5—7—3	यस्य पृथिवी शरीरं, 13
बृ. उ.	.... 5—7-16	यस्य प्राणः शरीरं, 457
कठ. उ.	 2-25	यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः, 313
ऋग्भाष्य	.... 1—1-22	यस्यास्ये हूयते सोग्निः परेशेन समिध्यते, 70
आथ. उ.	... 1—1—9	यस्सर्वज्ञस्सर्वविद्यस्य ज्ञानमयं तपः, 487
कठ. उ.	.... 3 - 2	यस्सेतुरीजानानामक्षरं ब्रह्म तत्परं, 323
कौषीत.	.... 3—2	यावद्धयस्मिन् शरीरे प्राणो वसति, 184
कठ. उ.	... 4—7	या प्राणे संविशत्यदितिर्देवतामयी, 386
छां. उ.	.... 3-12—2	या वै गायत्रीयं वाव सा येयं पृथिवी, 83
बृ. उ.	.... 4—5-19	युक्ता ह्यस्य हरयश्शता दश, 357
भ. गी.	... 12-3	ये त्वक्षरमनिर्देश्यमव्यक्तं, 496
तै. उ.	 3-10-11	येन जातानि जीवंति, 15
तलवकार	.... 1—4	येन वागभ्युद्यते, 185

आथ उ.	... 1—2-13	येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां, 505
ऋ. सं.	.... 1—4—8	येना पावक चक्षसा भुरण्यंतं, 75
बृ. उ.	... 5—9—1	येनेदमन्नं पच्यते, 5[illegible]5
छां. उ.	... 3-12—2	येयं पृथिवी, 112
बृ. उ.	.... 5—7—5	योग्नौ तिष्ठन् य एष एतस्मिन्, 533
बृ. उ.	... 5—7—4	योद्भ्योऽन्तरः, 469
ऋ. सं.	 10–82–3	यो नः पिता जनिता, 74
बृ. उ.	.... 3—5-21	योयं मध्यमः प्राणः, 24
बृ. उ.	.... 7—9	योयमंतः पुरुषे, 559
छां. उ.	.... 3-12—9	योयमन्तर्हृदये, 44
बृ. उ.	.... 6—3—7	योयं विज्ञानमयः प्राणेषु हृद्यंतर्ज्योतिः, 77
ऋ. सं.	.....5—7—1	यो वर्धन औषधीनां यो अपां, 74
तै. सं.	.... 2—6–10	यो अवगुरेत्तं शतेन यातयेत्, 292
बृ. उ.	... 5—7–22	यो विज्ञानादंतरः, 469
बृ. उ.	.... 5—7–22	यो विज्ञाने तिष्ठन्, 475
बृ. उ.	.... 5—7–22	यो विज्ञाने तिष्ठन् विज्ञानादंतरो, 447
ऋ. सं.	.... 5—7—1	यो विश्वस्य जगतो देव ईशे, 74
तै. उ.	.... 2—1—1	यो वेद निहितं गुहायां, 41
कौषीतकि	.... 3—4	यो वै प्राणः सा प्रज्ञा या प्रज्ञा स प्राणः, 185
पा. सू.	.... 8—3–19	लोपः शाकल्यस्य, 570
कौषीतकि	.. 3—8	वक्तारं विंद्यात्, 185
तै. सं.	... 2—1—4	वत्समालभेत, 152
छां. उ.	.... 4—3—3	वागप्येति, 32
शतपथब्राह्मणे	 10-3-3-6	(वागप्येति, 32)
छां. उ.	... 3—12-2	वाग्वै गायत्री वाग्वा इदं सर्वं, 113

तै. सं. .... 2—1—1 वायव्यं श्वेतमालभेत, 153

तै. उ. .... 2—6—1 विज्ञानं चाविज्ञानं, 202

बृ. उ. .... 5—9-28 विज्ञानमानंदं ब्रह्म, 356

ऋ. सं. .... 5—5—7 विदे हि रुद्रो रुद्रियं महित्वं, 438

जै. सू. .... 1—2—7 विधिनात्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः, 52

ऋ. सं. ... 4—5-11 वि मे कर्णा पतयतो वि चक्षुः 59

म. ना. .... 11-2 विश्वतः परमां नित्यं विश्वात्मानं परायणं, 133

तै. सं. ... 4—6—2 विश्वतश्चक्षुः, 74

ऋ. सं. .... 8—4-12 विश्वस्मा अग्निं भुवनाय देवा वैश्वानरः, 561

ऋ. सं. .... 4—5-11 विश्वे देवा अनमस्यन् भिया, 78

ऋ. सं. .... 2—6-29 विश्वेषामिज्जनिता ब्रह्मणामसि, 74

पा. सू. .... 5—3-62 वृद्धस्य च, 288

भ. गी. ... 15—15 वेदैश्च सर्वैरहमेव वेद्यः, 172

ऋ. स. .... 4—5—9 वैश्वानरमृत आजातमग्निं, 525

ऋ. सं. .... 1—7—6 वैश्वानरस्य सुमतौ स्याम, 561

छां. उ. .... 5-24—4 वैश्वानरे तद्धुतं भवति, 525

ऋ. सं. .. 4—5-11 वैश्वानरो जायमानः, 67

पा. सू. .... 3—1-17 व्यत्ययो बहुलं, 334

पा. सू. .... 3—3-98 व्रजयजोर्भावे क्यप्, 505

पा. सू. .... 5-2-116 व्रीह्यादिभ्यश्च, 482

ऋ. सं. .... 8--4-19 शीर्ष्णो द्यौस्समवर्तत, 527

पा. सू. .... 5-4-154 शेषाद्विभाषा, 432

भागवत .... 2—4 श्रियः पति र्यज्ञपतिः प्रजापतिः, 290

तै. आ. .... 3-13 श्रीश्च ते लक्ष्मीश्च पत्न्यौ, 3

भ. गी.	.. 2–29	श्रुत्वाप्येनं वेद न चैव कश्चित्, 259
पा. सू.	.... 1—3 6	ष: प्रत्ययस्य, 421
पा. सू.	.... 3—3-99*	संज्ञायां समजनिषदनिपत, 505
ऐ. उ.	... 3—2—3	संवत्सर एव प्रध्वंसयन्, 231
षट्प्रश्न.	.... 1—9	संवत्सरो वै प्रजापतिः, 250
ऐ. उ.	.... 2—4—3	स इदं ब्रह्म ततममपश्यत्, 230
तै. उ.	... 2—6—1	स इदं सर्वमसृजत, 107
ऐ. उ.	... 2—4—3	स एतमेव पुरुषं ब्रह्म ततममपश्यत्, 140
ऐ. उ.	.... 2—4—3	स एतमेव सीमानं विदार्य, 140
छां. उ.	.... 4–15—6	स एनान् ब्रह्म गमयति, 398
छां. उ.	... 7–25—1	स एवाधस्तात्स उपरिष्टात्, 13
ऐ. उ.	.... 2—3—3	स एष पुरुषः पंचविधः, 147
कौषीत.	.... 3—8	स एष प्रज्ञानंदो ऽजरोऽमृतः, 188
ऐ. उ.	.... 2—1—8	स एष भूतिश्चाभूतिश्च, 135
बृ. उ.	.... 3—2—5	स ऐक्षत यदि इवा इममभिमंस्ये, 318
श्वे. उ.	.... 6—9	स कारणं कारणकारणाधिपः, 517
बृ. उ.	.... 3—2—5	स तया वाचा तेनात्मना, 318
तै. उ.	.... 2—1	सत्यं ज्ञानमनंतं ब्रह्म, 202
पा. सू.	.... 2—1–40	सप्तमी शौण्डैः, 423
आथ. उ.	.... 1—1—1	स ब्रह्मविद्यां, 486
छां. उ.	.... 7–15—3	समासं व्यातिषं दहेत्, 13
तै. सं.	.... 2—6—1	समिधो यजति, 336
ऋ. सं.	.... 6—7—5	समुद्रे अंतश्शेते, 73
म. ना.	 11–7	समुद्रेतं विश्वशंभवं, 290
तै. आ.	 3–11	समुद्रे अंतः कवयो विचक्षते, 73

छां. उ. ... 4-11, 12, 13 स य एतदेवं विद्वानुपास्ते अपहते, 393

ए. उ. ... 2—4—3 स य एतमेव सीमानं, 183

बृ. उ. .... 3—2—5 स यद्यदेवासृजत तत्तदत्तुमध्रियत, 293

तै. उ. .... 2—8—1 स यश्चायं पुरुषे, 251

ऐ. उ. .... 3—2—4 स यश्चायमशरीरः प्रज्ञात्मा, 210

ऐ. उ. .... 3—2—4 स योतोश्रुतोऽगतोऽमतो, 446

कौषीत. .... 3—1 स यो मां वेद, 186

पा. सू. ... 3—1-56 सर्तिशास्त्यर्तिभ्यश्च, 153

छां. उ. .... 3-14—1 सर्वं खल्विदं ब्रह्म, 172

छां. उ. ... 3-14—1 सर्वं खल्विदं ब्रह्मतज्जलानिति शांत उपासति, 271

बृ. उ. .... 3—2—5 सर्वं वा अत्ति, 294

आथ. उ. .... 1—1—6 सर्वगतं सुसूक्ष्मं, 13

भ. गी. ... 13-14 सर्वतःपाणिपादं तत्, 74

भ. गी. .. 10-20 सर्वभूताशयास्थितः, 220

छां. उ. ... 4-11, 12, 13 सर्वमायुरेति ज्योग् जीवति, 416

आथ. उ. .... 1—1—1 सर्वविद्याप्रतिष्ठां, 507

भ. गी. .. 15-15 सर्वस्य चाहं हृदि सन्निविष्टः, 287

बृ. उ. .... 3—2—5 सर्वस्यैतस्यात्ता भवति, 304

छां. उ. ... 1—9—1 सर्वाणि भूतान्याकाशादेव, 28

ऐ. उ. .... 2—1—6 सर्वाणि भूतान्यापिपीलिकादिभ्यः, 170

छां. उ. .... 1-11—5 सर्वाणि ह वा इमानि भूतानि प्राणमेव, 39

छां. उ. ... 1-11—7 सर्वाणि हवा इमानि भूतान्यादित्यमुच्चैस्संतं, 35

छां. उ. .... 5-24—3 सर्वे पाप्मानः प्रदूयन्ते, 541

कठ.	 2-15	सर्वे वेदाः, 142
कठ. उ.	 2-15	सर्वे वेदा यत्पदमामनंति, 504
छां. उ.	... 4-15—4	सर्वेषु लोकेषु भाति य एवं वेद, 398
बृ. उ.	.... 4 5-18	स वा अयं पुरुषः सर्वासु, 102
त. आ.	... 3-11—2	सवितारं बृहस्पतिं, 299
ऋ. सं.	.... 1—3—6	सवितारमूतये, 442
बृ. उ.	... 6—3–7	स समानस्सन्नुभौ लोकावनुसंचरति, 77
ऋ. स.	.... 8—4-17	सहस्रशीर्षा पुरुषः, 102
तै. आ.	... 3-11—5	स हैव संतं न विजानंति देवाः, 491
कौषीत.	.... 3 –2	सहोवाच प्राणोस्मि प्रज्ञात्मा, 187
ऐ. उ.	.... 2—4—3	सीमानं विदार्यैतया द्वारा, 229
पा. सू.	.... 7—1-39	सुपां सुलुक्, 280
बृ. उ.	.... 6—3-14	सुप्त इत्यत्रायं पुरुषः, 78
तै. आ.	.... 3-11—4	सुवर्णं कोशं रजसा परिवृतं, 84
ऋ. सं.	.... 1—8—7	सूर्य आत्मा जगतस्थस्तुषश्च, 74
आथ. उ.	... 1—2-11	सूर्यद्वारेण ते विरजाः प्रयांति, 515
छां. उ.	.... 1-11—5	सैषा देवता, 29
छां. उ.	.... 3-12—5	सैषा चतुष्पदा षड्विधा गायत्री, 50
बृ. उ.	.... 3—2—6	सोकामयत भूयसा यज्ञेन, 318
कठ. उ.	.... 3—9	सोध्वनः पारमाप्नोति तद्विष्णोः परमं पदं, 374
अथर्वशिर. उ.	 1	सोन्तरादन्तरं प्राविशत् , 483
छां. उ.	.... 3-15– 2	सोहं वायुं दिशां वत्सं वेद, 294
तै. सं.	.... 2—3—2	सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः, 336
ऋ. सं.	 2--7-18	स्तुहि श्रुतं गर्तसदं युवानं, 438

मांडूक. उ.	....	1—3	स्थूलभुग्वैश्वानरः प्रथमः पादः, 535
पा. सू.	....	1—3–11	स्वरितेनाधिकारः, 506
तै. आ.	....	3–15—1	हरिं हरंतमनुयंति देवाः, 163
पा. सू.	....	1—1—7	हलोनंतरास्संयोगः, 128
कठ. उ.	...	1—2–19	हंता चेन्मन्यते हंतुं हतश्चेन्मन्यते हतं, 317
ऋ.सं.	...	1—3—6	हिरण्ययेन सविता रथेन; 442
छां. उ.	....	1—6—6	हिरण्यश्मश्रुः 430
ऋ. सं.	....	4—5–11	हृदय आहितं यत्, 227
षट्प्र. उ.	....	3—6	हृदि ह्येष आत्मा, 338
बृ. उ.	....	6—3—7	हृयंतर्ज्योतिः, 78
तै. आ.	....	3–13	ह्रीश्च ते लक्ष्मीश्च पत्न्यौ, 3
ऋ. सं.	....	1—3—6	ह्वयाम्यग्निं प्रथमं स्वस्तये, 442

शोधनपत्रिका.

पृट.	पङ्क्ति.	अशुद्ध.	शुद्ध.
2	9	वनका	वनवका
5	17	अर्थे	अर्थ
5	18	म्राह्य	प्राह्य
8	4	नास्त्वु	नास्त्यु
14	15	दन्व	दन्वय
16	2	तत्र	तन्न
16	18	रण	धारण
17	1	धीनं जन्मा	जन्मा
17	8	दिति	इति
17	10	वीते	वेति
19	5	यो शात्	योगात्
21	7	सगृह्णाति	संगृह्णाति
23	11	श्रितः	श्रिता
25	18	नतु	ननु
38	12	अपो	अपो
47	17	हृंष्ट	दृष्टं
48	1	हृष्टं	दृष्टं
49	8	अग्रि	अग्नि
50	3	षाद्विधा	षड्विधा
51	18	दप	व्यप
58	18	यत्वोत्सा	यत्वात्सो
60	9	विंप	विप
61	1	पूर्वत्र वायु	पूर्वत्रावायु

पुट.	पङ्क्ति.	अशुद्ध.	शुद्ध.
61	13	द्वि	द्वि
62	11	कश	काश
64	13	धेन	धनं
68	10	कणा	कर्णा
70	9	लङ्गा	लिङ्गा
88	8	दनं	दानं
88	17	त्वाक्त	त्वोक्त
89	11	स्थम	स्थ
89	14	र्ति	र्त्ति
91	17	इदं	इद
92	10	पुरुषः	पुरुष
101	11	क्याग्नि	क्याग्नि
126	6	र्तते	र्यते
128	14	पृष्टेपु	पृष्ठेषु
131	3	स्वप्न	स्वप्ने
131	16	मस्थ	पस्थ
139	16	चक्षु	चक्षुः
143	3	कि	किं
144	13	तच्छ्र	तत्किश्रु
144	14	तिलिंगयारे	तिलिङ्गयोःर
158	15	लिवङ्	लिङ्
158	16	कारो	कारे
160	6	द्वे	द्वेः
168	12	द्विस्यां	द्विभ्यां
169	9	वर्य	वर्त्य
172	19	स्मृषे	स्म्यृषे
173	14	द्र प्य	द्राघ्य
182	1	तदि	तीदं

पृष्ठ.	पङ्क्ति.	अशुद्ध.	शुद्ध.
182	11	र्सत्र	सर्त्र
,,	16	शङ्कयां	शङ्कायां
183	7	थर्त्वा	र्थत्वा
,,	12	तन्मा	तं मा
187	18	मायु	मामायु
192	1	इदिन्या	इद्रिया
197	9	त्याह	त्यत आह
200	18	पाति	पीति
204	10	पियां	पिकायां
,,	,,	णोऽत्रा	णोवा
210	16	पर	परि
222	11	त्युक्ये	त्युक्थे
223	6	वस्थि	नवस्थि
223	14	एतादि	एतामि
235	13	नेति	नवेति
237	2	र्थो	र्थो
246	1	अत्मा	आत्मा
249	7	वोक्ते	वोक्तेः
250	12	रसु	रमु
250	13	यन्ति	यति
251	9	प्रासि	प्रसि
254	19	तत	त
255	1	भ	भा
257	1	ख्यने	ख्याने
258	9	वृत्ति	वृति
265	4	त्वत्य	त्वस्य
267	11	विर	विवर
267	18	नाथ	नार्थ

पृष्ठ.	पङ्क्ति.	अशुद्ध.	शुद्ध.
269	3	स्य । धी	स्य धी
270	9	नानानि	नानि
272	7	ज्ययया	ज्याया
284	1	श्रुय	श्रुत्य
285	4	वावा	वः
285	19	याद	यदि
290	13	धार्म	धर्म
292	17	एव	एवं
293	10	कुत	कुतः
303	15	जतिः	जातिः
304	5	सङ्क	सङ्कु
306	8	यय	य
312	3	तृव	तृत्व
329	14	बाधक	क
332	3	विज्ञा	विज्ञान
333	2	वय	वयव
334	3	द्वेश्य	द्देश्य
341	2	श्रोत्रा	श्रोता
,,	2	घ्रात्रा	घ्राता
,,	18	माय	र्माय
342	3	प्रविक्त	प्रविविक्ता
,,	4	तरइव	तरइवैव
,,	19	तरइव	तरइवैव
343	3	विक्ता	विविक्ता
347	7	द्वन्ति	द्वान्ति
348	8	पान	पादन
349	10	यार्थं	यार्थ
351	2	यु	यु

पृष्ठ.	पङ्क्ति.	अशुद्ध.	शुद्ध.
352	12	इदि	इति
352	18	न्तित्त	न्तित
358	13	स्यप्या	स्याप्य
376	5	करण	करणं
388	18	स्यैव	स्यैव
397	17	विद्या "	विद्या " इति
404	19	मग्नि	मग्निः
405	8	परश	पररश
411	3	न्वहा	न्वाहा
421	14	आङ्	आङ्
429	10	तेऽर्चिषमभि	तेऽर्चिषमेवाभि
440	12	तदन्य	न्य
455	5	अत्यत्र	अत्रत्य
469	13	आपा	अपा
470	16	पास्यादौ	वास्यादौ
474	13	स्तु	मस्तु
479	1	स्सा	सा
480	10	चिंह्नि	चिह्नि
495	19	दन	दान
499	13	निव	निरव
500	9	त्वोप	त्वापे
513	17	दिनी	दिना
516	19	अरो	आरो
520	2	पृथिव्यादि	पृथि
525	15	शशम	शम
526	6	यद्य	द्य
531	10	पन्या	पत्न्या
535	17	युक्त	त्युक्त

पृष्ट.	पङ्क्ति.	अशुद्ध.	शुद्ध.
535	17	भत्र	भयत्र
547	17	नच	न चा
549	4	त्वत्	त्वात्
552	11	यद्वा	यद्वा-अत्र
556	18	देवतता	देवता
558	17	विष्व	विष्णंव
568	15	यदा	यादा

B
132
V3B2
1920
v.3
[redacted]

Bādarāyana
Brhmasūtrabhāshyam

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY